
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

श॰कौ॰
१

२२०

।। ।।श्रीगणेशायनमः।। ।।गाङ्कुटादिभ्योऽञ्णिन्ङित्।गाङ्देशात्कुटादेश्च परेऽञ्णितः प्रत्यया ङितः स्युः।अध्यगीष्ट।विभा
षा लुङ्लृङोरितीङो गाङ्।इह विशेषणार्थ एव हि गाङो देशे ङकार इति गाङ्कुटादीति सूत्रे वृत्तौ कुटिता।कुटितुं।अञ्णि
त्किं।कोटः।घञ्।चुकोट।व्यचेः कुटादित्वमनसीति वक्तव्यं।एतच्च षष्ठे लिट्यभ्यासस्येति सूत्रे भाष्ये पठितमपि स्पष्टार्थं
अर्थं वृत्तिकृतेह पठितं।तुदादिगणे कुटादिभ्यः प्राक् पठितस्य व्यचेः कुटादित्वे वार्त्तिके नातिदिश्यते।विचितुं।विचिता
।अनसीति किं।उरुव्यचाः।अत्र हरदत्तः।अनसीति पर्युदासात्कृन्मेवेह।तेनेह न।विव्याचिथ।अव्याचीत्।केचित्तु प्रसज्य
प्रतिषेधमाश्रित्य थलादिष्वपि ङित्वमाहुः।। तत्र वाक्यभेदादसमर्थसमासाच्चायुक्तमिति माधवादयः।अथ कथं
लिलिखिषुः स्वयमेव लिलिखिष्यत इति।अत्र हरदत्तादयः।कणवादिभ्य इत्यत्र षष्ठीतत्पुरुषबहुव्रीह्योः सर्वविवक्षया ब
हुव्रीहिश्रोपोय।कुटादिभ्य इति।। तेन लिखेरपि कुटस्यादित्वयात्र संग्रह इति।तन्न।शाकुनिषाल्लेखने इति सौत्रप्र
योगविरोधापत्ते।।रलोव्युपधादीप्सूरेतोस्तु ल्लितत्र वृत्तिग्रन्थविरोधाच्च।तत्र हि लिलिखित्वा लोखित्वा।लिलिखिषति
लिलेखिषति।विलेखितुमिति प्रदर्शितं।तस्मात्संज्ञापूर्वकतया समाधेयमिति हरदत्तः।कथं चुकुटिषतीति।।
सनोङित्वाघ्नैनादिवन्नङ्प्रसंगात्।मैवं।उपदेशग्रहणानुवृत्त्या उपदेशे योऽङित्तदन्तात्मनेपदमिति व्याख्यानात्।

लुं६

डुं॰१

हृ५

रामः
१

विजइट्। विजेः परइडादिः प्रत्ययो ङित्स्यात्। उद्विजितुं। इट् किं। उद्वेजनं। इह हट्ट द्विर्यस्येति सूत्रान्मंडूकप्लुत्याय स्यादि
त्यनुवर्त्तते। तेनेडादिः प्रत्ययो लभ्यते। न तु न मैकवचनमिदं। तथा हि सति विजिषीयेत्यत्रैव स्यात्। ओविजी भय
चलनयोरिति विजिरिह गृह्यते। न तु पृथग्भावार्थ इति। तस्यानिट्त्वादिति हरदत्तः॥ न च क्रादिनियमाल्लिटीट्
संभवत्येवेति वाच्यं। तत्र कित्वे नमनार्थत्वादिति तत्स्वभावः। वस्तुतस्तु नेदं युक्तं। विवेजिथेति थलीट् संभवात्। तत्र च पित्वे
न कित्त्वाभावात्। तस्मात्तु यादिसाहचर्यात्तुदादेरेव ग्रहणं। न तु जुहोत्यादेरिति बोध्यं। नन्वेवं रुधादेरपि ङित्वाद्धुद्वि
जितेत्याद्युदाहरणमाधवेन सह हि विरोध इति चेन्न हि माख्यानादेव जुहोत्यादेरग्रहणमित्यस्तु। हरदत्तोक्तिस्तु दुष्टैवे
ति दिक्॥ [illegible] विभाषोर्णोः॥ अस्मादिडादिः प्रत्ययो ङिद्वा स्यात्। ऊर्णुविता। ऊर्णविता॥ इडिति किं। ऊर्णवनीयं।
सार्वधातुकमपित्। अपित्सार्वधातुकं ङिद्वत्स्यात्। चिनुतः। इह परत्र परशब्दप्रयोगात्कल्प्यमानो वतिः सप्तम्
नात्वकल्प्यं। ङितीव ङिद्वदिति। तथा सति प्रतियोगिनि सप्तमीप्रसंगात्। सार्वधातुके अपितीति। पूर्वत्रापि एवमेव।
अजितीति। इटीति च सप्तमी स्यात्॥ अयं तेतु सर्वत्र प्रथमा। तस्मात्कर्तीयान्तादेव वतिः। ङितालुल्यं ङिद्वदिति।
अत एव पचेते इत्यादौ ङितो यत्कार्यं आतो ङित इत्तीपूरितोऽपि भवति। नन्वेवं यादेपतीत्यमनसास्तु तद्वत्येत्र

श॰ कौ॰ २ २२१

त्यासन्नुदात्तेन्ङिदितिलसार्वधातुकानुदात्तत्वंस्यादितिचेन्न।उपदेशग्रहणस्योभयसंबंधेनङिदुपदेशादङुपदेशाच्चे
तिपाष्ठभाष्येव्याख्यातत्वात्।अन्दिङुओरितिपर्युदासेनोपदेशेऽकारवतोग्रहणाद्वा।तत्तन्मंताद्धातिरित्येवंपरः।पाष्ठप्रति
ग्रंथस्तुआपाततइत्येषनिष्कर्षः।अत्रापिच्छंपित्त्रभवतोतिवाक्यार्थद्वयंकिंतिवितिसूत्रेवर्णितमस्माभिः।भाष्येतुह
लश्नःशानज्जितिसूत्रेस्थितमेतत्॥ ॥असंयोगाल्लिट्कित्।असंयोगात्परोपिल्लिट्कित्स्यात्।निन्यतुः।बिभि
दतुः।अपित्किं।बिभेद।असंयोगात्किं।सस्रंसे।ङित्वेप्रकृतेकित्करणंयजादीनांकितीतिसंप्रसारणार्थं।ईजतुः
ईजुः।पूर्वत्रापिकित्वंकुतोनकृतमितिचेत्।वक्तः।वैक्ष्यइत्यत्रसंप्रसारणापत्तेः॥जागृतः।जाग्रतीत्यत्रगुणापत्तेश्चङि
त्वेतुवच्यादीनांकितीत्युक्तेर्नसंप्रसारणं।जाग्रोविचिण्णल्ङित्स्वितिपर्युदासाच्चनगुणः।अदुपधेभ्योलिटःकित्वंगु
णात्पूर्वविप्रतिषेधेन।कित्वस्यावकाशःईजतुःईजुः।गुणस्यावकाशः।चेतति।वहतेवहधेइत्यत्रपूर्वविप्रतिषेधात्कि
त्वं।इंधिभवतिभ्यांच।आभ्यांलिट्कित्स्यात्।समीधेदस्युहंतमं।पुत्रईधेअथर्वणः।बभूविथ।इंधेःसंयोगार्थंग्रहणं।भवतेस्तु
पिदर्थं।इंधीत्युच्चारणार्थेनेकारेणनिर्देशः।स्तुङ्प्योरितिवत्॥नत्विकश्तिपावितिइका॥नलोपापत्तेः।अत्रवा
र्तिकं॥इंधेश्छंदोविषयत्वाद्भुवोवुकोनित्यत्वात्ताभ्यांलिटःकिद्वचनानर्थक्यमिति।अयमर्थः।इंधेर्भाषायामिजादे

व ६

राम॰ २

\3

श्चेत्यामाभाव्यं। छंदसितु अमंत्रे इति प्रतिषेधा[illegible]घघाभ्यां नास्ति तथापि छंदस्युभयथेति लिटः सार्वधातुकत्वे ङित्वात्स
मीधेइति न लोपः। श्नमभावस्तु आर्धधातुकत्वाद्यत्ययाद्वा। भुवो वुँक् ङित्वादेव गुणवृद्धी बाधिष्यते। न च शब्दांतर
प्राप्तावुगनित्य इति वाच्यं। कृताकृतप्रसंगित्वमात्रेण। पिलक्षणानुरोधान्नित्यत्वस्याश्रयणात्। शब्दांतरप्राप्त्या स्वरभि
न्नस्यप्राप्त्या चानित्यतायाः सिद्धांते बहुधात्यक्तत्वात्। एषैव सूत्रके नोपिगतिः। बभूवेत्यत्र वृद्धेरनिग्लक्षणेन तयाङित्वान्निचे
ति निषेधासंभवेन वुको नित्यतया एवं शरणीकरणीयत्वात्। न च कित्वसामर्थ्यादनिग्लक्षणयाऽपि वृद्धेर्निषेधः। अह
भूवेत्यत्र गुणाभावप्रसंगेन थाथलिचवृद्धिनार्थत्वात्। अत एव यङ्लुकि णल्थलोर्बोभूव बोभूविथेति नित्यत्वाद्वुकि सि
द्धं। नहि तत्र कित्वं प्राप्नोति श्विपा निर्देशात्। तस्मादेतत्सूत्रं न कर्तव्यमिति भाष्ये स्थितं। अत्र काशिका। श्रंथिग्रंथि
दंभिस्वंजीनां वक्तव्यमिति। यद्यप्येतदिह सूत्रे भाष्येनास्ति तथापि मणीवार्तेत्नेतिवन्नाप्रामाणिकं। तथा चात एकह
ल्मध्ये इत्येत्वाभ्यासलोपौ प्रतिनलोपस्याभीयत्वेनासिद्धौ सत्यां दंभेश्श्नेति वार्तिकमारब्धं। आभात्सूत्रस्य प्रत्याख्योना
श्नसोरल्लोप इति न परत्वेकरणो नानित्यत्वाद्वा नेदं वार्तिकमावश्यकमिति तु षष्ठे वक्ष्यते॥ तथा। स्वदेः परस्य लिटीति सू
त्रेस्वंजेरुपसंख्यानमिति वार्तिकस्य भाष्यकृता परिषस्वजे इत्युदाहरणं दत्तं। प्रयुज्यते च। तमिंदुः परिषस्वजे इति॥

पि २

मे॰

श॰ कौ॰ ३ २२२

एतच्च कित्वं पिदर्थमपिदर्थं चेति सुधाकरः॥ अपिदर्थमेवेति न्यासकारात्रेयादयः॥ हरदत्तस्तु संदिदेह। वस्तुतस्तु न्यासा-
द्युक्तमेव न्याय्यः। इह श्रन्थेर्नोपाष्ठ भाष्ये चापितस्योदाहृतत्वात्॥ श्रन्थ ग्रन्थ संदर्भे। श्रेथतुः। श्रेथुः। ग्रेथतुः॥ ग्रेथुः॥ देभतुः।
देभुः। ससञ्जे। सस्वजाने। केचित्तु श्रन्थिग्रन्थिदम्भिस्वञ्जीनां वेति पठन्ति। कित्वं विकल्पयन्तीति हरदत्तमाधवौ। तन्मते ददम्भ-
तुः। शश्रन्थतुरित्याद्यपि। सुधाकरमते तु राल्यपि श्रेथ ग्रेथ देभेति। स्यादेतत्। सर्वमते तु श्रेथतुः। ग्रेथतुरित्यादि दुर्ल-
भं। सस्वजेरिति वत्स युक्तं हल्मध्यस्थत्वादिति चेत्॥ सत्यं। अत एव एत्वाभ्यासलोपावथ च वक्तव्याविति हरदत्तः॥
अत्र मूलं मृग्यं तथा सुधाकरमते श्रेथिथ। न्यासादिमते शश्रन्थिथ इति वदतो माधवस्यायुक्तो मूलं मृग्यं॥ कि-
त्वे विकल्पिते पक्षेऽपि थलि च सेटीत्यस्याप्राप्तेरविशेषात्। तथा न लोपस्यासिद्धत्वादेत्वाप्राप्तेरेव च नमिति मा-
धवोक्तिरपि शिथिलं मूलं। श्रेथेति आभ्यां संयोगसत्त्वाद्धे थेरादेशादित्वाच्चैत्वाप्राप्तेरूढः तया न लोपासिद्धत्वा-
सिद्धत्वविचारस्य काकदन्तपरीक्षाप्रायत्वादिति दिक्। कौमारास्तु सर्वमिदं सूत्रारूढं। तथा च शर्ववर्मणा
सूत्रितं। अनिदनुबन्धानामगुणोऽनुषङ्गलोपः। परोक्षायामिति श्रन्थिग्रन्थिदम्भीनामिति। अस्येकव्यंजनम-
ध्येऽनादेशादेः परोक्षायां। थलि च सेटि। तत्फलभजत्रपश्रन्थिग्रन्थिदम्भीनां चेति। अत्र निरनुषङ्गेः साहचर्याद्गु-

थि

राम: ३

बंथियेत्यादीतिदुर्गसिंहः। एवं स्थितेदं मेऽस्त्रेतिवार्त्तिकभाष्ययोः सामान्यापेक्षज्ञापकतामाश्रित्य दंभिग्रन्थीनामन्य
त्रोक्तं पाणिनीयेपीष्टमितिकथंचित्समर्थनीयं॥ ॥मृडमृदगुधकुषक्लिशवदवसः क्त्वा। गुधकुषक्लिशिभ्यः क्त्वोरलो
व्युपधादितिविकल्पप्राप्तेःइतरेभ्यो नक्त्वासेडितिनिषेधेप्राप्ते कित्त्वं विधीयते। मृडित्वा। मृदित्वा। गुधित्वा। कुषित्वा। क्लि
शित्वा। उदित्वा। उषित्वा। वसतिक्षुधोरितीट्। यजादित्वात्संप्रसारणं। रुदविदमुषग्रहिस्वपिप्रच्छः संश्च। एभ्यः संश्च क्त्वा
च कितौ स्तः। रुदविदमुषीणां रलो व्युपधादितिविकल्पे प्राप्ते ग्रहेस्तु विध्यर्थमेव। स्वपिप्रच्छ्योस्तु सनर्थं। नावते
वचरितार्थत्वात्हनिटः क्त्वः कित्त्वविधानं नियामकं स्यादितिनशंकनीयं। रुदित्वा। रुरुदिषति। विदित्वा। विविदिष
ति। मुषित्वा। मुमुषिषति। गृहीत्वा। जिघृक्षति। सुप्त्वा। सुषुप्सति। पृष्ट्वा। पिपृच्छिषति। कित्त्वाद्ग्रहादीनांसंप्र
सारणं। किरश्च पंचभ्यइतिप्रच्छेः सनइट्। इको झल्। इकः परो झलादिः सन् कित्स्यात्। चिचीषति। तुष्टूषति।
चिकीर्षति। ननु चिस्तुकृभ्यः सनि कृते गुणं बाधित्वा अज्झनेतिदीर्घोस्तु किं कित्त्वेन। न च यियविषतीत्या
दावपि तथा स्यादितिवाच्यं। अनुनासिकस्य क्विझलोरितिसूत्रात् झलनुवृत्त्या झलादौ सनि दीर्घविधानात्। न चेह गुण
मिवदीर्घोपि सनीत्यत्रणिलोपमथविशेषाद्दीर्घो बाधेत। कित्त्वे तु सति चिचीषतीत्यादौ कृतार्थो दीर्घो ज्ञोपसनीत्यत्र

6

श्र०कौ· परत्वात्सिलोपेन बाध्यते इति वाच्यं येन नाप्राप्तिन्यायेन दीर्घस्य गुणापवादत्वात्॥ ~~नच पुरस्तादपवादन्यायेन दीर्घस्य गुणा~~

४ ~~पवादत्वात्~~ नच पुरस्तादपवादन्यायेन णिलोप एव बाध्य इति भ्रमितव्यं॥ उभयापवादतासंभावनायामेव तदवतारात्। इहतु

२२३ णिलोपेन सह येन नाप्राप्तिविरहात्॥ नच बाध्यसामान्यचिंतायां णिलोपबाधो दुर्वार इति वाच्यं। स्याशपाज्ञीप्समान इति

निर्देशात् लक्ष्यानुरोधाच्चेह बाध्यविशेषचिंताया एव युक्तत्वात्॥ नच कुटादेर्गुणवृद्धीवोत्सर्गे। ध्रुगतिस्थैर्ययोरितिया

ठाज्जुगूषति दुषतीत्यत्र कृतार्थो दीर्घः परेण गुणेन बाध्यतेति वाच्यं। ऊहनेतिवक्तव्ये ऊर्णेति प्रत्याहारग्रहणस्य निरव

काशत्वात्॥ नच गमेरिङादेशस्येति वार्तिकं व्यर्थं स्यात् ऊतेत्रादिना संभवव्यभिचाराभ्यां गमेरचाविशेषविधिष्णुणात्वा

दज्यहणसार्थक्यसंभवात्। एवं हि उतो दीर्घ इत्यत्काइउः हनोरिति सूत्रयेत्। इणिकोरादेशस्यापि ग्रहणमिति पक्षेपि इहनो

रिति ब्रूयात्। हनासाहचर्याच्च इङ्धातोरेव ग्रहीष्यते नेन्द्रे इव सर्वतिः॥ यथान्यासपाठेपि हनि साहचर्याल्लुग्विकरणस्या

देशागमे ग्रहणासंभवाच्च तस्माद्दीर्घादीर्घविधिना गुणबाधात्किं कित्वेन। उच्यते। उत्तरार्थमेव अपमिको मलि तिक

स्येति। अपमिकोलोपसज्ञी समान इत्यादेरपि कस्य च पर्यालो

नेयं। योगविभागः किमर्थ इति परमवशिष्यते। तत्राऽऽग्रहणसामर्थ्यसज्ञी समान इत्यादेरपि निष्कर्षः। वार्तिकं तु

चनाक्लेशपरिहारार्थं लक्षणैक चक्षुष्मोबाध्यसामान्यचिंताभ्रमं वारयितुं योगविभाग इति निष्कर्षः।

दी५ तर तिप धूप रामः ४

यथाश्रुताभिप्रायकं। तद्यथा। इकः किं त्वं गुणो मा भूद्दीर्घारंभात्कृते भवेत्। अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते।
सामर्थ्याद्धि पुनर्भाव्यमृदित्वं दीर्घसंश्रयं। दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोजनं। अस्यार्थः। इकउत्तरस्य सनः किं
त्वं विधीयते। गुणो मा भूदित्येवमर्थं। दूषयति। दीर्घारंभादिति। गुणो न भविष्यतीति शेषः। आरंभवाधमाह। कृते भ
वेदिति। अयं भावः। सनिमीमेत्यत्र मीग्रहणेन मिनोतिमपि गृहीत्वा दीर्घः कृतार्थ इति चिचीषंतीत्यादौ कृते दीर्घे गुणः
स्यात्। दूषयति। अनर्थकं त्विति। मीनातिमिनोतीनां त्वे कृते गामादाग्रहणेष्वविशेषान्मीग्रहणेनैव मिनातिमीना
त्योरपि सिद्धे मीग्रहणं तत्र मास्तु। तथा च दीर्घविधानं न कृतार्थमिति भावः। ह्रस्वार्थमिति। ह्रस्वेषु दीर्घः प्रवर्त्ते
तां। ननु दीर्घेषु अप्राप्ते शास्त्रमर्थवदिति न्यायात्। ततश्च लुलूषतीत्यादौ गुणः प्रसज्यत एवेत्यर्थः। दूषयति।
सामर्थ्यादिति। गुणनिवृत्तिरूपप्रयोजनसद्भावाद्दीर्घाणां दीर्घे भाव्यमेव। मोराजीतिवदिति भावः। नन्वेवं दीर्घाणा
गुणस्येव ऋदित्वस्यापि बाधः स्यात्। तथा च चिकीर्षतीति न सिध्येदत आह। ऋदित्वमिति। यं विधिं प्रतीति न्यायाद्गुण
एव बाध्यः न तु ऋदित्वमित्यर्थः॥ ननु तितीर्षतीत्यादौ न हि इत्वं बाध्यते तत्राह। दीर्घाणामिति॥ इत्वोत्वयोर्हि
गुणवृद्धी परत्वाद्बाधिके न तस्याकृते नेति दीर्घेण गुणबाधे सत्येवेत्वं लभ्यं न तु ततः प्राक्। एवं च यस्य तु विधौ

५४

8

नि२

श॰ कौ॰ २

रित्यंशोऽकृस्वद्वद्दीर्घस्य विशिष्ट इति भावः। एवं प्राप्ते सिद्धांतमाह॥ लोपस्त्विति॥ हलंताच्च॥ कर्मेवाख्येयं। अंतश
ब्दः समीपे परस्य तेषु वर्तमानो विशेषणमपि निपातनात्पूर्वं पतितः। इक इति पंचम्यंतमपीह षष्ठ्या विपरिणम्यते। त
त्सापेक्षोऽप्यंतशब्दो नित्यसापेक्षत्वात्समस्यते। इक्समीपाद्धलः परो झलादिः सन् कित्स्यात्। बिभित्सति। इकः किं। यिय
क्षते। झल् किं। विवर्धिषते। कथं धिप्सतीति। ग्रहणस्य जातिपरत्वात्सिद्धमित्युपपादितं निपातन एकाजिति सूत्रे॥ ॥
लिङ्सिचावात्मनेपदेषु॥ इक्समीपाद्धलः परौ झलादी लिङ् तङ्परः सिच्चैतौ कितौ स्तः। भित्सीष्ट। अभित्त। इकः किं।
यक्षीष्ट। संप्रसारणं माभूत्। आत्मनेपदेषु किं। अस्राक्षीत्। अद्राक्षीत्। अकिजीत्सुकेरत्रस्यात्। सिच एवेदं विशे
षणं न तु लिङः। असंभवात्। झलन्तु हसे वलिङः परस्मैपदस्य व्यावर्तितत्वाच्च। हलः किं। चेषीष्ट। अचेष्ट। झल् किं। वर्जिषी
ष्ट। अवर्जिष्ट॥ ॥उश्च॥ ऋवर्णात्परौ झलादी लिङ्सिचौ कितौ स्तस्तङि। कृषीष्ट। अकृत। झलादी किं। वरिषीष्ट॥ अ
वरिष्ट। लिङ्सिचोरितीट्। तङि किं। अकार्षीत्। ऋ इति वर्णग्रहणं। व्याह्रेन्मीयात्॥ ॥वागमः॥ गमः परो झलादी लि
ङ्सिचौ वा कितः। संगसीष्ट। संगंसीष्ट। समगत। समगंस्त। कित्वपक्षे अनुदात्तोपदेशवनतितनोत्यादिनानुना
सिकलोपः॥ ॥हनः सिच्॥ हंतेः परः सिच् कित्स्यात्। अहत। आहसातां। आहसत। सिचः कित्वादनुनासिकलोपः

२२४ ह ४ बा ५ अयष्ट ६

रामः ५

यद्यपिसिजंतस्यांगस्यात्मनेपदंङित्त्वमस्तीतिअनिर्दितामित्येवसिद्धं।तथापिसिजंतस्योपधालोपोनेतिज्ञापनार्थ
मिदं।तेनामंस्तत्यादिसिद्धं।नचानिदितामितिपर्युदासःशंक्यः।।सिचइकारस्योच्चारणार्थत्वात्।अन्यथानुमापत्तेः।नचधा
तुग्रहणेनतद्व्युदासः।धातुग्रहणमुपदेशेनुमप्रवृत्त्यर्थमितिकुंडाहुंडेत्यादिसिद्धयेभाष्यएवह्रमारणात्वात्।।नचतासे
र्थाहतेयेतत्।तत्रापीकारस्योच्चारणार्थत्वात्।नचैवंमंताहतेत्यादौआत्मनेपदेउपधालोपापत्तिः।।आभीयस्तासेष्टि
लोपस्यासिद्धत्वात्।आभात्सूत्रप्रत्याख्यानपक्षेलुविकरणप्रयुक्तमुपधात्वमाश्रित्यलोपोनेतिसामान्यस्येष्टंज्ञापक
मस्तु।अंगवृत्तपरिभाषयावामंताहेनेतिसाध्यता।नन्वाहेतेत्यत्रानोलोपंबाधित्वायित्वंसमानाश्रयत्वप्रयुक्तानुसिद्धन
आपेक्ष्यते।।साचसिचःसित्वंविनाननिर्वहतीतिकथंज्ञापकतेतिचेन्न।आर्धधातुकोपदेशेयदकारांतमितिव्याख्यानादे
वलोपाप्रवृत्तेः।जयादित्यस्तुसिचूतास्योरिदित्करणमनुनासिकलोपप्रतिषेधार्थमाह।तन्मतेधातुग्रहणसत्वेषां
हत्ताकृतार्थत्वान्नुह्विधानुपदेशिवद्वचनंप्रत्ययसिद्ध्यर्थमितिवचनमेवशरणीकरणीयं।धिन्विकृण्व्योरचेतिनु
मनुषक्तनिर्देशोज्ञापकइतिवाशरणीयमितिदिक्।यद्यपीहलिङिवावित्यनुवृत्त्यासिद्धं।तथाप्युत्तरार्थमव
शंकर्त्तव्यंसिज्ग्रहणंस्पष्टत्वार्थमिहैवकृतं।अन्यथाह्लिलिङिवधारेह्योनित्यः।।धानिषीष्टेतिचिण्वद्दिटिस्यानिवक्त

५२

घा ४

शा॰ कौ॰ ६

२२५

उपास्थित ५

उक्तरीत्या वधादेशाभावे पित्त्रजझलादित्वान्न कित्वं इत्यादि व्युत्पादनीयं स्यात्॥ ॥यमो गंधने। सूचनार्थायमेः सि
ज्ञोक्तरीत्या वधादेशाभावे। त्वात्सूचनेत्रय मिर्वर्त्तते। तच्च परदोषाविष्करणं॥ आङो
क्कित्स्यात्। उदायत। उदायस्तां। उदायसत। धातूनामनेकार्थत्वात्सूचनेत्रयमिर्वर्त्तते। तच्च परदोषाविष्करणं। आङो
यमहनइत्यात्मनेपदं। धात्वर्थेनोपसंग्रहादकर्मकत्वात्। सिचः कित्वादनुनासिकलोपः। गंधने किं। उदायंस्त पादं॥ आङ्
यमहन इत्यात्मनेपदं। उदायस्त कूपाद्रज्जुं। उद्धृतवानित्यर्थः। सकर्मकत्वेपि समुदाङ्भ्यो यमोग्रंथे इत्यात्मनेपदं।
पृष्ठवानित्यर्थः। स्वांगकर्मकत्वात्तङ्। उदायस्त कूपाद्रज्जुं। उद्धृतवानित्यर्थः। सकर्मकत्वेपि समुदाङ्भ्यो यमोग्रंथे इत्यात्मनेपदं।
विभाषोपयमने। यमः सिचू किद्वा स्यात् विवाहे। रामः सीतामुपापत। उपायंस्त वा। उदवोढेत्यर्थः। उपाद्यमः स्वकरणे इति तङ्।
गंधनोगेतू पयमने पूर्वविप्रतिषेधेन नित्यं कित्वमिति न वेति विभाषेति सूत्रे भाष्ये स्थितं॥ स्थाघ्वोरिच्च। अनयोरिदादेशः
स्यात् सिच्च कित्स्यात्। उपास्थिषातां उपास्थिषत। उपान्मंत्रकरणेकर्मिकाच्चेति तङ्। घोः। अदितौ घुस्थोरिति ह्रस्वं तु युक्तं
यद्यपि जयादित्येन वा गमइत्यारभ्य पंचसूत्र्यामात्मनेपदेष्वित्यनुवर्त्तितं तथापि निष्फलत्वादुपेक्ष्यं॥ तथाहि। गमेः प
रस्मैपदे सिज्नास्ति। अजाबाधात्। लिङ्लुनझलादिः। न चात्मनेपदमेवानुवर्त्य झल्ग्रहणं त्याज्यमिति वाच्यं। उत्तरसूत्रे
स्याद्यानिषातामिति चिराव दिटि अतिव्याप्त्यापत्तेः। हंतेस्तु परस्मैपदे वधादेशो नित्यः। यमेस्तु यमरमेतीट् सकोः स नो
र्मलादिः सिचू परस्मैपदे नास्ति। उपयमेतु नित्यमात्मनेपदं। स्थाघ्वोः परस्मैपदे सिचो लुक्। एवं स्थिते हनः सिच्सूत्रेयदु

अधित ५

रामः ६

क्ङित्त्विकृता। आत्मनेपदग्रहणमुत्तरार्थमनुवर्त्तते इति तद्व्याख्यानं रमणीयमेव। तस्माद्यथाव्याख्यातमेव साधु। स्या
देतत्। भाव्यमानस्य सवर्णाग्राहकत्वादिति तपरकरणं व्यर्थं स्यात्। इको झलित्युक्तेऽपि लाघवे विशेषाभावात् स्थिवेत्युक्तमिति तत्वं।
भाव्यमानोऽपि क्वचित्सवर्णान् गृह्णातीति कुशकाशावलंबनेन तु वार्त्तिकं। इश्च कसन्तकारेत्वं दीर्घो मा भूदित्येतेऽपि सः। अ
नंतरेऽस्तु तो मा भूत्तु तश्च विषये स्मृतः। इति। अस्यार्थः। इश्चेति तकारेत्वं कस्य सिद्ध्येदिति प्रश्नः। हेतोरपि सामान्यतः
संबंधित्वेनैव विवक्षायां षष्ठी। अन्यथा हेतावितिवृत्तीया स्यात्। अत्र तकारस्य इत्वोक्तिरापातत इत्युक्ते मे आह। स्तन्त्रो
यद्यान्तकारमेतीति तकारे त। तपरद्वितीयो व्याख्येयं। तथा च भाष्यांकस्य हेतो विकारस्तपरः क्रियत इति। अस्मामि तादावि
वभाव्यमानोऽप्यां तरतम्याद्दीर्घो मा भूदित्युत्तरं। आतेपीति। इश्चेत्यंशादेतेऽपि स्याद्घोरितिं घुमास्थेतीत्वेन सिद्धे विधा
नसामर्थ्याद्दनंतरतमोऽपि ह्रस्वः सिद्धस्तत्किं तपरेणेति पुनः प्रश्नः। अनंतर इति। असदृशे आदेशे क्रियमाणे ह्रस्व
द्रव ह्रुनोऽपि स्यात्स मा भूदित्यर्थः। ह्रुनश्चेति। विषयविशेषवाक्यस्पष्टेरित्याधिकृताह। ह्रुतो वह्नाने। अतएव कुरून
गमा इइत्यादौ स्मृतः। नत्वास्थिनेत्यादौ। अटित्वात्। तथा चेष्टापत्तिर्न कार्येति तपरत्वं समर्थितं। ज्ञांच स्तु। अनंतरे अ
विद्यमानेऽपि विशेषे। घुमास्थेतीत्वेन सिद्धेऽप्पीतियावत्। ह्रुनो मा भूदित्येतदर्थं दीर्घः स्यान्मोराजीतिवत्। अस्त्वेवमपि

क्ङित्त्वेसति ५

श॰कौ॰ ७

२२६

तिचेन्न॥ अप्राख्यानादिरूपे विषये श्रुतस्यैष्यमाणत्वात्। नदेवं स्थलान्तरे भिन्नकालनिवृत्त्यर्थमर्पितपरत्वमिह हीर्ष्यनिवृ
त्तिद्वारा श्रुतसिद्धार्थपर्यवस्यतीति व्याचख्युः। अपरे तु यद्यनेन श्रुतो विधीयेत तर्हि यत्राष्टमिकस्य विषयस्तत्राप्य
नेनैव स्यात्। तस्यासिद्धत्वात्। तन्नस्य पक्षे अनुवाददोषः स्यात्। अतो नोक्रस्व एभविष्यतीति न परकरणाद्रष्टाख्यानपरं श्रुतु
र्थचरणा इति व्याचख्युः। एतच्च मतद्वयमप्ययुक्तं। अनन्तस्यापीत्यादीनां टिसंज्ञाविरहादिहाप्रवृत्तेः। केचित्तोपि मतं तद्
यखंडनपरतयैव नेयः। न्यासहरदत्तादयस्तु आष्टमिकस्वग्रंथैर्हत्यादिमिश्रविरोधादुपेक्ष्याः। भाष्यं त्वस्मदुक्तव्याख्या
नुगुणमेव। यदा विषयस्तदैव श्रुतेन भवितव्यमिति योजनया नेह श्रुतस्य विषयोस्तीति ध्वनितत्वादिति दिक्॥ ॥न
क्त्वा सेट्। सेट् क्त्वा किन्न स्यात्। देवित्वा। सेढिं। कुत्वा। क्त्वा किं। निगृहीतिः। अत्र वार्तिकं। न सेडिति कृते किन्त्वे निष्ठाया
मवधारणात्। ज्ञापकान्न परोक्षायां सनि झल्ग्रहणं विदुः॥ इत्वं किन्त्वसंनियोगेन रेणानुल्पस्य धीवनि। वस्वर्थं किदती
देशाऽग्रहीतिः क्त्वावविग्रहात्। अस्यार्थः। पूर्वार्धे मेको ग्रन्थः। जत्रोनेराधीन्नेतस्य प्रकल्प्यते। क्त्वाग्रहणात् क्त्वा न सेडिते
तावतापि योगेन। किन्त्विक तेयुधित इत्यादौ निष्ठायां नाकित्वं। कुतः। अवधारणात्। निष्ठा शीङ् इत्यनेन। शीङ्ग दिम्यस्
वनिष्ठान किदिति नियमादित्यर्थः। विपरीतनियमस्तु लक्ष्यानुरोधान्न व्याख्यास्यते। नन्वेवं लिटि प्रतिषेधाज्जग्मि

१३

रामः

13

वेत्यादावुपधालोपेन स्यादत आह। ज्ञापकादिति। किं तन्नत्राह रुसनीति। शिशयिषत इत्यत्र कित्वं वारयितुं क्रियमाणमि
कोरु लिति रुल्ग्रहणं ज्ञापयति। आतिदेशिकस्य कित्वस्य नायं निषेध इति। नन्वुत्तरार्थं रुल्ग्रहणं स्यान्नेत्याह इत्व
मिति। उपास्थापिषातां हरिहरौ भक्तेनेत्यत्र हि अस्थास्म आतामिति स्थिते इत्वं प्राप्तं चिरावद्भा [illegible] रत्वमि
[illegible] विवक्ष्य। परत्वाच्चिरावद्भावे कृते युक्प्राप्नोतीष्टश्च। अ
पवादत्वात्तु किति कृते पकारस्येत्यसंगः। तं वारयितुं रुल्ग्रहणमिति ज्ञापकभंगवादिनोभिमतं तन्न। नसेडिति सिचो
पि कित्वे निषिद्धे तत्संनियोगशिष्टतया इत्वस्याप्रवृत्तेः। अत्राह दृष्टान्तमाह रेणोति। शोभना धीवानोस्यां सुधीवेत्यत्रा
नो बहुव्रीहेरिति ङीपो निषेधे वनो रश्चेति रेफोपि न भवतीत्यर्थः। भाष्ये त्वभ्युपेत्यापि समाहितं इत्वे कृते पिष्टद्वि
र्भविष्यतीति। युक्ता हि आकारस्य द्विर्बाध्यते न तु कारस्यापीति भावः। जग्मिवानित्यत्र क्वसोः कित्वनिषेधं वार
यितुं त्वाग्रह इति शंकते। वस्वर्थमिति। दूषयति। किं तर्हीडेशादिति। ओपदेशिकस्य निषेधात् आतिदेशिकेन सिद्धं
त इति निषेधस्य ज्ञापितत्वादिति भावः। स्यादेतत्। संयोगान्ते घ्यातिदेशिककित्वाभावादोपदेशिकमेव शरणं। अजेरा
जिवानिति यथा।। अत्राहुः। आनुपूर्व्या सिद्धं। नलोपे कृते द्विर्वचने एकादेशे च वस्वेकाजितीट्। कृते द्विर्वचने नाना

२४

श॰ कौ॰
८
२२७

मेकाचामिति सिद्धांतात्॥ नचेदानीं कित्वप्रतिषेधः उपजीव्यविरोधात्। कित्वे हि प्रतिषिद्धे नलोपनिवृत्तौ हि हल्त्वात्तु
टिस्थाच्छ्राभावात्। इडेव नावतिष्ठेत। किंच कसोष्ठ्यां द सत्वात्सार्वधातुकत्वे सार्वधातुकमपिदिति ङित्वात्सिद्धं। एव
स्थिते सिद्धांतमाह। गृहीतिरिति। क्रिल्लिड्त्यर्थे क्त्वाग्रहणमित्यर्थः। तिलुत्रेष्वग्रहादीनामितीडू। कित्वात्संप्रसार
णं। एवं कुंचकौटिल्याल्पीभावयोः निकुचितिः। कित्वान्नलोपः। उपस्निहितिः। कित्वान्नगुणः। इदानीं क्त्वाग्रहणं प्रत्या
चष्टे। क्त्वा चेति। विग्रहादिति। योगविभागादित्यर्थः। अयं भावः न सेतिनिष्ठा श्रीङि त्यादि त्रिसूत्रीं पठित्वा पूङः क्त्वा चेत्य
त्र योगो विभज्यते। पूङः पूङः परा सेण्निष्ठा किन्न स्यात्। ततः क्त्वा च सेण्निष्ठा किन्नेत्यनुवर्त्तते। पूङ इति निवृत्तं। एवं चेक्त्वा
ग्रहणं प्रत्याख्यातं। योगविभागस्तु पूर्वमेकसूत्रेण सहनिमातव्यः। निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृषः। एभ्यः परा सेण्निष्ठा
किन्न स्यात्। शयितः। शयितवान्। अनुबंधनिर्देशो यङ्लुङ्निवृत्त्यर्थः। शेशियितः। शेशियितवान्। एरनेकाचइतियण्। ञि
ष्विदा स्नेहनमोचनयोः। भ्वादिः। प्रस्वेदितः प्रस्वेदितवान्। यस्तु ष्विदा गात्रप्रक्षरणे ञितः स नेह गृह्यते। ञिक्ष्विदिः साहचर्या
त्। ञिमिदा स्नेहने। प्रमेदितः प्रमेदितवान्। ञिक्ष्विदा स्नेहनमोचनयोरिति ~~[illegible]~~ दिवादिरयं गृह्यते न तु ञिक्ष्वि
दा अव्यक्ते शब्दे इति भ्वादिरपि। ~~[illegible]~~ मिदिना साहचर्यादिति हरदत्तः। चिंत्यं। भ्वादिष्वपि मिदेः पठ्यमानत्वात्। तस्मा

तं१ एतदिति दिवादिर३

रामः
८

प्रक्ष्वेदितः। प्रक्ष्वेदितवान्। प्रधर्षितः प्रधर्षितवान्। सेट्कं। स्विन्नः। स्विन्नवान्। आदि

दविशेषाद्रुभयोर्ग्रहणंन्याय्यं। प्रक्ष्वेदितः। प्रक्ष्वेदितवान्। प्रधर्षितः। प्रधर्षितवान्। सेट्कं। स्विन्नः। स्विन्नवान्। आदि

तश्चेती णिनिषेधः। विभाषाभावादिकर्मणोरिति पक्षेऽप्यनुज्ञायते। सकित्त्वप्रतिषेधस्य विषयः। मृषस्तितिक्षायां। से

णिनिष्ठाकित्स्यात्। मर्षितः। मर्षितवान्। क्षमायां किं। अपमृषितं वाक्यं। अविस्पष्टमित्यर्थः। तितिक्षाग्रहणं ज्ञापकं मी

मसेनादिकृतोऽर्थनिर्देश उदाहरणमात्रं न तु परिसंख्येति॥ ॥उदुपधाद्भावादिकर्मणोरन्यतरस्यां। उकारोपधाद्धातोः प

रो भावादिकर्मणोर्विहितासेणिनष्ठावाकित्स्यात्। द्युतितं। द्योतितं। मुदितं। मोदितं साधुना। प्रद्युतितः॥ प्रद्योतितः

प्रमुदितः। प्रमोदितः साधुः। उदुपधात्किं। किटितं। टितं। भावेत्यादि किं। रुचितं कार्षापणं। सेट्कं। कुष्टं। उदुपधात्पू

इति भाष्यं। शाब्दिकरणेऽप्येवं व्यपतेइत्यर्थः। नेह गुधपरिवेष्टने। दिवादिः। गुधितं। पूङः क्त्वा च। पूङः परे सेट् क्त्वा निष्ठे

कितौ न स्तः। नित्योऽयं योगः विभाषयोर्मध्ये पाठात्। पवितवान्। पवित्वा। क्लिशः क्त्वा निष्ठयोः। पूङश्चेतीट्॥ नक्त्वा से

ड्डितिसिद्धे क्त्वाग्रहणं प्रागुक्तरीत्यायोगविभागेन नत्वप्रत्याख्यानार्थं। सूत्ररीत्या न्तरार्थं तथा च भारद्वाजीयाः पठं

ति। नित्यमकित्त्वमिडाद्योः क्त्वाग्रहणमुत्तरार्थमिति। कात्यायनस्तु इह सेडिति निवृत्त्य विकल्पं चानुवर्त्य अनिट्स

वकित्त्वं विकल्प्य कित्त्वाभावे पवितः पवित्वेत्यादि सिद्धौ कित्वपक्षे श्रुकः किती ती णिनिषेधात्पूतः पूत्वा नित्यादि

पवितः ८

श. कौ.
१०
२२८
नुबंध५

स्तिद्धौ सत्यां पूङः क्त्वेति सूत्रं ऽनर्थकं च स्यात्। उत्तरसूत्रे वाग्रहणं च। किं तस्मिन्पक्षे उत्तरसूत्रे सेड्ग्रहणं मृडक्त्वात्यानुवर्त्तनीयमिति
क्लेशः। पूर्वं कृतं क्त्वाग्रहणं तत्त्वाख्यानं तु इदानीं न संगच्छते। मृडमृदेति ज्ञापकाद्य न क्त्वा सेडित्यर्थः। साधनीयः। न च स्वपि प्रक्लि
ग्रहणादनिट्कस्याप्यकित्त्वं स्यादिति वाच्यं। तस्य सनर्थत्वात्।। अन्यथा क्त्वः कित्त्वे पर्यापन्ने वेति दिक्। उदितं वधेयं।
पूङः क्त्वा चेत्यत्र सानुबन्धनिर्देशः स्पष्टार्थः। ननु पूङो निष्ठेत्यर्थः। तत्रेटो दुर्लभत्वात्। उदित्वात्पूङ एव निर्दिष्टत्वात्। नापि य
ङ्लुङ्निवृत्त्यर्थः। उदित्वात्सामान्यनिर्देशेन यङ्लुकि पूङोपीडभावात्। यत्तु यङ्लुक्यार्धधातुकस्येडिति ङस्तीव। न च श्र्युकः किती ति
प्रतिषेधः। तत्रैकाच इत्यनुवर्त्तनात्।। उक्तं हि यङ्लुग्वार्त्तिकं कृता। एकाच उपग्रहादिति। एवं च यङ्लुङ्निवृत्त्यर्था मनु
बंधोच्चारणमिति मन्तं। अस्मिन्पक्षे पोपुवितः पोपुवितवानिति निष्ठायां भवति। क्त्वायां तु पुरोपोपुवित्वेत्येव। न त्वा से
डिति कित्त्वप्रतिषेधः। न च क्त्वाग्रहणसामर्थ्यात्तस्यापि यङ्लुकि प्रतिषेधः। तस्योत्तरार्थत्वात्। अनुबंधनिर्देशस्य
च निष्ठायां चरितार्थत्वादत एव क्त्वाग्रहणमुत्तरार्थमिति माधवाजीयोक्तिरपि संगच्छते इति दिक्।। नोपधात्थफान्ता
द्वा। निष्ठेति निवृत्तं। वानुकृष्टत्वात्। नकारोपधात्थान्तात्फान्ताच्च परः सेट् क्त्वा कित्स्याद्वा। ग्रथित्वाः ग्रंथित्वा गुफित्वा
।। गुंफित्वा। नोपधात्किं। रिफकत्थनादौ। रेफित्वा। इह रलो व्युपधादिति विकल्पोपि न प्रवर्त्तते। नोपधग्रहणसामर्थ्यात्।

क्त्वा च विग्रहादिति वार्त्तिकं संगच्छते। इह किं चित्र्यपोरिति न्यायेन प्रक्रमते प्युपयोगेऽनिर्दिष्टेत्यर्थत। अत एव उ

एमः
१

लुचित्वा। लुंचित्वा। ऋतेरीयङ्गाद्धातुत्वे विकल्पितः तदभावे ऋतित्वा। अर्तित्वा। स्त्रजेड्वारणार्थ इत्यारोदि ५

भ१

ननु ऋफ ऋम्फ हिंसायां॥ अत्राद्य ऋकारोपधत्वान्नोपधग्रहणस्यावर्त्तोस्त्विति चेन्नैवं। ऋफित्वा। ऋम्फित्वा। ऋम्फित्वेति
त्रैशब्द्यस्य नोपधग्रहणस्य त्वा[illegible]सत्त्वयोरविशिष्टत्वात् इति हि ता[illegible]स्मिन्न क्त्वा सेडिति प्रवर्तते ऋदुपधस्यार्फित्वेति भवति
नोपधस्यात्वस्मिन्विकल्पे ऋफित्वा ऋंफित्वा[illegible]ति असत्यपि नोपधग्रहणे सर्वत्र अकृतविकल्पप्रवर्त्ते तोसत्पांत दे
वरूपत्रयं॥ ॥वंचिलुंच्यृतश्च॥ एभ्यः सेट् क्त्वा न कित्स्याद्वा। वंचु गतौ। भ्वादिः। वंचु प्रलम्भने चुरादिः॥ सोपीह ग्रह्यते। चुरादी
नामनित्यण्यन्तत्वात्। वाचत्वा। वंचित्वा। उदितो वेति वेट्। इडभावे कित्वमस्त्येव। वक्त्वा। लुंच अपनयने। लुंचीति॥ नन्वि
कान्नलोपप्रसंगात् अनिदितीति धातुरेव ग्रह्यते न तु अदंताः। पूर्वसूत्रे नग्रहणेनेह षकरणे यलंविना तदंतविधिर्नेति ज्ञापित
त्वात्॥ ॥तृषिमृषिकृशेः काश्यपस्य॥ एभ्यः क्त्वा किद्वा स्यात्। काश्यपग्रहणं पूजार्थं। वेति प्रकृतमात्। न क्त्वा सेडिति निषे
धे प्राप्ते विकल्पोयं। तृष पिपासायां। तृषित्वा। तर्षित्वा। मृष तितिक्षायां। मृषित्वा। मर्षित्वा। कृश तनूकरणे। कृशित्वा। कर्शित्वा
न्यासग्रंथे तु कृष विलेखने इति क्वचित्कः प्रमादपाठः॥ ॥अनिट्त्वात्॥ रलो व्युपधाद्धलादेः संश्च॥ उश्च इश्च वी ते उपधे य
स्य तस्माद्धलादेः रलंतात्परौ क्त्वासनौ सेटौ वा कितौ स्तः। द्युतित्वा। द्योतित्वा। दिद्युतिषते। दिद्योतिषते॥ द्युतिस्वाप्यो विति
संप्रसारणं। रलः किं। देवित्वा। दिदेविषति। व्युपधात्किं। वर्तित्वा। विवर्तिषते। एषित्वा। एषिषिषति। इह नित्यमपि हि

हलादेः किं१

स्व२

श॰कौ १०

तेगुणेनबाध्यते।। ओरोऽश्रीदित्करणेनसामान्यतउपधाकार्यसहित्वात्साबल्यज्ञापनात्। सेद्धिं भुक्त्वा भुञ्जते। आदि
ग्रहणंस्पष्टार्थं लघुपधस्य हलंतत्वाव्यभिचारात्।। ।।ऊकालोऽज्झ्रस्वदीर्घप्लुतः। ऊस्वदीर्घप्लुत इति समाहारद्वंद्वः।। सौत्रं पुं
स्त्व। ऊ इति त्रयाणां प्रश्लेषेण निर्देशः। तत्र न तावदंते मात्रिकः। विभाषापृष्टप्रतिवचने हेरिति हेः प्लुतविधानात्।।
नापिमध्ये।। प्लुपिचेति दीर्घविधानात्। द्विमात्रिकस्तु नांते। ओमभ्यादाने इति प्लुतविधानात्। परिशेषादेकमात्रद्विमा
त्रत्रिमात्राणां क्रमः सिद्धः। यत्तु घित्वात्पूर्वमेव ह्रस्वः प्लुतोंते संधितोमत इति मैत्रेयः। तन्न भाष्यादर्शनप्रयुक्तं। यत्।
वत्तास्ते एकमात्रस्य ह्रस्वत्वं त्रिमात्रस्य प्लुतत्वमित्येव दुर्लभमिति महावृत्तैव दूषितं। ई३ चाक्रवर्मणस्येत्यत्रेव हापि
सूत्रे केचिद् ऊ३ इति प्लुतघोति कां लिपिं लिखंति। तन्नाद्यमादिकं। दीर्घस्यैवोचितत्वात्। तदयमर्थः। उश्च ऊश्च ऊ३श्च वः
कालः परिच्छेदको यस्य सोऽच् क्रमाद्ध्रस्वादिसंज्ञः स्यात्। संज्ञाप्रदेशाः। ऊस्वस्य गुणः। हे हरे। दीर्घाकितः।। पापच्यते। वाक्यस्य टेः
प्लुतः। एहि कृष्ण ३।। स्यादेतत्। उकालोऽज्झ्रस्व इति प्रथमवाक्यार्थे स्वेणोकारेणाणत्वात्सवर्णग्रहः स्यात्। मैवं। एवं सति कं
स्वसंज्ञां न विदध्यात्। अत्र चांते यैव सिद्धेः। तस्मात्संज्ञायां सामर्थ्यान्नेह सवर्णग्रहः।। महासंज्ञाया अन्वर्थत्वाच्च। कालशब्द
सामर्थ्याच्च। उ३ जिस्तुक्तेपि यथा प्लुते ज्ग्रहणं सामर्थ्यं। उकारस्याप्यव्यभिचारात्। तेन सामर्थ्यादुस्वदीर्घप्लुतार्थः। साहचर्यं च

श्रः५

एमः १०

नस्थानात्ः असंभवात् । नयत्नतः ॥ अव्यभिचारात् । परिशेषात्कालतएवेतिसिद्धे कालग्रहणं प्रमाणेनैव परिच्छेदलाभार्थं ।
ऊस्वनद्वापइतिलिंगाच्च । यदि हि लुमत्संज्ञानां लोपसंज्ञेव दीर्घप्लुतसंज्ञयोः ह्रस्वसंज्ञाव्यापिका तर्हि किं न बाधा ग्रहणान्न
चनिषेधार्थः स्मः । विध्यर्थत्वे लाघवादिति दिक् । यद्वा अक्षु ह्रस्वसंज्ञेत्यनुवर्तते तत्सप्तम्या विपरिणाममपृथक्शब्दसंज्ञायांसेव र्णग्र
हणं नेति व्याख्येयं । न चैवमुदात्तादिसंज्ञाविधावच्शब्दो न सवर्णग्रहणीयादिति वाच्यं । वाक्यस्य टेः प्लुत उदात्त इति लि
गेनाशह्रस्वसंज्ञायामित्यस्यानित्यत्वात् ॥ ॥ अचश्च ॥ यत्र ह्रस्वो दीर्घः प्लुत इति शब्दैरज्विधीयते तेन त्राच इति पदपूरणा
येहूको गुणाद्वृद्धीत्यनेन तुल्यमेतत् । न त्वलोन्त्यस्य शेषोपवादो वा तेन शामामष्टानां दीर्घ इत्यत्र शमादिभिरच्चो विशे
णात् शाम्यतीत्यादि सिद्धं । ह्रस्वो नपुंसके इत्यत्र अजंतस्य प्रातिपदिकस्येति व्याख्यानादलोन्त्यस्य ह्रस्वः । अतिरि
॥ अतिनु ॥ नेह स्तुवाग्ब्राह्मणकुलं । वाक्यस्य टेः प्लुत उदात्तः ॥ अत्र टेरिति व्याख्यानादग्निचीत्सोमसुत् । अजि
त्यनुवृत्तिसामर्थ्यात् ह्रस्वसंज्ञया विधाने इति लभ्यते । नेह । द्यौः पथाः । सः ॥ उच्चैरुदात्तः ॥ ताल्वादिषु भागवत्सु स्था
नेषु वर्णा निष्पद्यंते तत्र ऊर्ध्वभागे निष्पन्नोऽच् उदात्तसंज्ञः स्यात् । प्रदेशाः ॥ आद्युदात्तश्चेत्येवमादयः ॥ नीचैर
नुदात्तः ॥ स्पष्टं । प्रदेशाः ॥ अनुदात्तौ सुप्पितावित्यादयः ॥ समाहारः स्वरितः ॥ समाहृतिः समाहारः । उदात्तानुदा

श·कौ·
११

२३०

त्तत्वयोर्धर्मयोर्मेलनं।तद्वान्स्वरितसंज्ञः॥ स्यात्।सूत्रेत्रअर्शआद्यच्।तस्यादितउदात्तमर्धह्रस्वं।अर्धह्रस्वशब्देनार्धमा
त्रालक्ष्यते॥प्रकृतत्वादेवसिद्धेतस्येतिवचनेनदीर्घस्यापिस्वरितस्यग्रहणात्॥ यद्वा।ह्रस्वग्रहणमविवक्षितं।तेनस्वरित
स्यादौअर्धमात्राअर्द्धंवाउदात्तंबोध्यं।शिष्टंतुअनुदात्तंपरिशेषात्।क्वचित्तुतस्यवाचनिकीएकश्रुतिः।तथाचबह्वृचप्राति
शाख्यां।एकाक्षरसमावेशेपूर्वयोःस्वरितःस्वरः।तस्योदात्ततरोदात्तादर्धमात्रार्धमेववा।अनुदात्तःपरःशेषःसउदात्त
श्रुतिर्नचेत्।उदात्तंवोच्यतेकिंचित्स्वरितंवाक्षरंपरमिति।पूर्वयोः।उदात्तानुदात्तयोः।तस्य।स्वरितस्य।अर्धमात्रा
उदात्तादुदात्ततरा।स्वतंत्रोदात्तादुच्चतरेत्यर्थः।अर्धमेववेतिद्वितीयव्याख्याभिप्रायं।दीर्घप्लुतयोरनुरोधेनेदं।शेषः॥
उदात्तश्रुतिःस्यात्।किमविशेषेणनेत्याह।नचेदिति।उदात्तस्वरितपरंविहायेत्यर्थः।अत्रायंनिष्कर्षः।स्वरितोद्विधा।प्राकृ
तः।अप्राकृतश्च।तत्राद्यः।उदात्तादनुदात्तस्येतिविहितः।तच्छेषस्यैकश्रुतिर्नियता।अग्निमीळे।अत्यमेदूतादि।गार्ग्या
दिमतेतुअत्राप्यनुदात्तःशेषः।द्वितीयस्तुसूत्रांतरैर्विहितः।तस्याप्युत्सर्गेणएकश्रुतिःशेषः।बांचह्रायस्वं।तेवर्धतेति
यथा।उदात्तस्वरितपरत्वेतुशेषोनुदात्तः।क्व।गोष्वा।मन१ध्यास्य।उदात्तपूर्वंस्यात्।क.नस्यपूर्वरूपनिष्पन्नस्यदी
र्घस्याद्येवं।नयेशाः।उदात्तपूर्वंस्यात्किं।पुनस्त्वमेषां।अत्रविशेषमनुपदंवक्ष्यामः।पूर्वरूपनिष्पन्नस्यकिं।अस्मिं

२

राम:
१२

स्वेरितत्वा। अत्राकल्पदीर्घातरेत्ता। [illegible] मध्येतु कंपयेत्कंपं इत्यादिवचनात्पूर्वोत्तरभागौ नीचौ मध्येतूदात्तः॥ रथीश्वे
ति। पुनस्तेश्मा। स्वेश्वतत्ता। सर्वत्र च समाहारः स्वरित इति पाणिनीपलक्षणं निर्बाधं तस्मादित इति विषयविवेकस्तु
ह्रायोवादः॥ विशेषे शिक्षादिभिर्बोध्यत इति दिक्। एवं स्थिते। अर्द्धह्रस्वमित्यर्द्धमात्रोपलक्षणं। ह्रस्वग्रहणाम
तंत्रमिति वृत्तिग्रंथः पूर्वापरविरोधपरिहारेणोत्तरवाक्यमेवं नार्थमाख्येयः॥ अर्द्धमात्रादितउदात्तं। अर्धमात्रो तु अत्रानुदात्त
एकश्रुतिर्वेतिवृत्तिग्रंथोपि विषयभेदेन व्यवस्थया बोध्यः॥ उभयत्रापि हरदत्तग्रंथो मूलापर्यालोचननिबंधन इतिस
धीभिराकलनीयं। इतआरभ्य नवसूत्री इत उत्कृष्टो दात्तादनुदात्तस्य स्वरित इत स्माद्युत्तरत्र पाठ्यतिप्राचः। तत्रा
व्यवधानपर्यंतं नार्थः॥ किं तूत्तरत्वमात्रो नोदात्तस्वरितोदयमित्यत्र निषेध्यलाभानुरोधेन तदुत्तरत्र अअइत्य
तः प्रागिप नवसूत्रीति फलितोर्थः॥ तेनाष्टमिकस्यापि स्वरितस्येदं विभागकथनं न्याय्यं। यैराः॥ उत्तरत्राश्रुत्या
षिस्पष्टयोजनं तत्सूत्रेवव्याप्नामः॥ उत्कर्षलिंगं तु देव ब्रह्मणो रितिसूत्रं न ह्युत्कर्षं विना देव ब्रह्मणोः स्वरितो
लभ्यते। त्रिपादीस्थत्वेनासिद्धत्वात्। ततः स्वरितात्परमिदं कांडमिति स्थितं। एकश्रुतिदूरात्संबुद्धौ। संबुद्धिः सं
बोधनं। अंतर्भावितण्यर्थाद्बुधेः क्तिन्। दूरत्वं च प्राकृतप्रयत्नाधिकयत्नसापेक्षोच्चारणत्वं। दूरादनुष्ठेय

2

ब१

श० कौ० १२

२३२

तया बोधनायां करणीभूतं वाक्यमेकश्रुतिः स्यात्। आगच्छ भो माणवक देवदत्त ३। स्वराणामविभागेनावस्थानमेकश्रु
तिः॥ अतस्सतु वाक्यस्य टेरिति प्लुतेनापवादत्वादेकश्रुतिर्बाध्यते। एकश्रुति[illegible] त्रिमा संबुद्धिर्नेह। ग्रहणेन दूरादित्यपा
प्लुताभ्यामवयवभेदेन वाक्यस्य समुच्चिताभ्यां दूरात्संबोधनं द्योत्यते। दूरात्किं। त्रैस्वर्यमेव। तत्राद्युदात्तः। उपसर्गाश्चाभि
वर्जमिति फिट्सूत्रात्। गच्छेति तिङ्ङतिङ इति निघातः। भोःशब्दो निपातत्वादाद्युदात्तः। शेषयोरामन्त्रितनिघातः। एकवचनं
संबुद्धिरिति कृ २९ दानेकारकान्वययाक्रियया एवाकाङ्क्षितत्वात् तेन आगच्छत ब्राह्मणा इत्यादावपि भवति। यज्ञकर्म
ण्यजपन्यूङ्खसामसु॥ यज्ञक्रियायां मन्त्र एकश्रुतिः स्यात्। जपादीन्वर्जयित्वा। अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अ
यम्। अपां रेतांसि जिन्वति। यज्ञकर्मणीत्युक्तेः स्वाध्यायकाले त्रैस्वर्यमेव। अजपेत्यादि किं। ममाग्ने वर्चो विहवेष्वस्तु
जपो नाम उपांशुप्रयोगः। यथा जले निमग्नस्येत्याहुः। युक्तं चैतत्। जप मानसे चेति धातोर्घञ्जपोऽनुपसर्गे इत्य
पि जपशब्दनिष्पत्तेः। रूढश्चायं मन्त्रकरणमन्त्रेषु। यत्र जपतीति कल्पसूत्रकृतां व्यवहारः। अत एव याजुषत्वादुपांशुप्रयु
ज्यमानानामपीषे त्वेत्यादीनां जपत्वाभावादेकश्रुतिर्भवत्येव। शाखाच्छेदनादिकं प्रतीतेषां करणत्वात्। न्यूङ्खाना
म षोडश ओकाराः। तेषु प्रथमसप्तमत्रयोदशास्तु पूर्व उदात्ताः त्रिमात्राश्च। इतरे त्रयोदशानुदात्ताः। अर्धौकारा ए

राम: १२

म१

तच्चाम्रेडितायनेन चतुर्थेऽहनीति खंडे स्फुटीकृतं। दृष्टांतोऽस्तु षड्ढोंकाराइति प्रामादिकः पाठः। तत्र षड्ढोमांतत्वेच मूलांतरं
मृग्यं। गीतिषु सामाख्येति जैमिनिः। एवं विश्वं समत्रिणं दह। विश्वं त्वं अत्रिणं पाप्मानं संदहेति संबंधः। एशाद्दो गीतिप्र
रणाः। निपात इत्यन्ये। उच्चैस्तरां वा वषट्कारः। यज्ञकर्मणि वषट्कार उच्चैस्तरां वा स्यादेकश्रुतिर्वा। वषट् इशाद्दो नात्र वौषट्
शब्दो लक्ष्यते। तुल्यार्थत्वात्। द्वावपि हि देवतासंप्रदानस्य द्योतकौ वौषडित्येव तूक्तं। प्रतिपत्तिलाघवेऽपि मात्रागौरवा
त्। कारग्रहणं ज्ञापकं समुदायादपि क्वचित्प्रत्ययो भवतीति। तेन एवकार इत्यादि सिद्धं। उच्चैः शब्दोऽधिकरणप्र
धानोऽपि तद्विशिष्टभवनक्रियायां वर्तते। तेन क्रियाप्रकर्षादामुप्रत्ययः उदात्ततरो भवतीति फलितोऽर्थः। ब्रूहिप्रेष्यश्रौष
ड्वौषडावहानामादेरिति सूत्रेण वौषट्शब्दस्यादेः प्लुत उदात्तो विहितः। तदपेक्षया अयमुदात्ततरोऽस्य विधीयते।
द्वयोरयमुदात्ततर इत्येके। तदाद्याज्ञातापेक्षः प्रकर्षः। अन्ये तु स्वार्थिकस्तरबित्याहुः॥ तत्रोदात्तमात्रं प्रथमस्य सिद्धं
द्वितीयस्यानेन विधीयते। अत्र प्रकर्षो विवक्षित एव प्रबलः। वषट्कारोंत्यः सर्वत्रोच्चैस्तरां बलीयान् याज्यायाः इति स्मृति
त्वात्। सोमस्याग्ने वीहीति वौषट्। विभाषा छंदसि। छंदसि एकश्रुतिर्वा स्यात्पक्षे त्रैस्वर्यं संप्रदायाद्व्यवस्थितो विकल्पः।
तेन बह्वृचानां स्वाध्यायकाले संहितापाठे त्रैस्वर्यमेव। ब्राह्मणे त्वेकश्रुतिः। शाखांतरेष्वपि यथा संप्रदायं व्यवस्था। अ

२५

श॰कौ॰
१३

२३२

त्रतंत्राहत्यादिना अछंदसीतिनञ्श्लेषात् भाषायामपि ऐच्छिको विकल्पो बोध्यः। तथाच दांडिनायनादिसूत्रे भाष्यं। एक
श्रुतिर्हि स्वरसर्वनामेत्यादि। अत एवाभिष्टुक्तानाविरुद्धास्वरकतत्पुरुषबहुव्रीह्याद्याश्रयणे नम्निष्टकाव्यादिनिर्माणं सं
गच्छते। श्वेताश्वो भावतीति अलंबुसानां यातेति च ह्यर्थं वाक्यामिति पस्पशाते भाष्यमपि। काव्यप्रकाशे पिवेदंष्वलो(
केसरो न विशेषाद्यवस्था पुंहेतुरिति। किमर्थं तर्हि ऋल्युयोत्तमं विभाषा भाषायामिति सूत्रे [illegible] मितिचेत्। त्रैस्वर्येणाऽकं
मेपाक्षिकानुदात्तत्वमायेति गृहीण। वेतिप्रकृते विभाषाग्रहणं कुर्वन् सूत्रकारोपि तत्रादिकं मन्येते। यत्तु वृत्तिकृन्म
तं विभाषाग्रहणं यज्ञकर्मणीत्यस्य निवृत्त्यर्थमिति। तच्चिंत्यं। छंदसीत्युक्तेपि तन्निवृत्तेः सिद्धेः। अन्यथा पूर्वसूत्रस्य
निर्विषयत्वापत्तेः। नच जपादिषु सावकाशस्य परस्य पूर्वो पूर्वबाद इति वाच्यं। एवं हि सति परत्रैव जपादिग्रहणं कुर्या
त्। छिन्नत्वा। किंच छंदोग्रहणेन। ऐतेन ऊहितानाम छंदस्त्वात्तत्रापि [illegible]
[illegible] सावकाशस्य पूर्वस्य मंत्रेषु परेण बाधः स्यादिति हरदत्तोक्तं पि तदुक्तं सिद्धांतेपि अन्यूहितेषु परत्वादस
प्राप्तिमाशंक्य यज्ञकर्मणीति कर्मग्रहणं तेनोक्तं जपादिपर्युदासेन मंत्राणामेव ग्रहणमिति पक्षे विभाषाग्रह
णं व्यर्थं स्यादिति। तदपीदुःशत्रुप्रस्तावे द्विषितमस्माभिः। यदपीह वृत्तिकृता अग्निमीलइत्या घप्पे कश्रुत्या वुदाहृ

सामर्थ्यात्सर्वस्यैव प्रवृत्तिरिति स्वोक्तिविरोधात्। यदपि हरदत्त २

राम:
१३

नंतत्सकलाप्याएकसंप्रदायविरुद्धं छंदोग्रहणं वैयर्थ्यापादकंच। छंदसि व्यवस्थितोन्यत्रैच्छिक इति विकल्पयो
र्वैषम्यं सूचयितुं हि तत्। न च लोके विकल्पस्य प्रवृत्तिकतानुक्तत्वादसौ प्रदर्शयितव्य इति वाच्यं। भाष्यादिसंमतेरुक्तत्वात्।
म्वेत इत्यादेर्हि त्रिकतापि तत्रतत्रोदाहृतत्वाच्च। इत इत्यस्य षूडिदमित्यंतोदात्तता। सूत्र इति लुप् एकोनुदात्त इति कथ
स्वरानुसरणोनंतरस्यादिति दिक्॥ ॥न सुब्रह्मण्यायां स्वरितस्य तूदात्तः॥ सुब्रह्मण्याख्ये निगदे यज्ञकर्मणीति विभा
षाछंदसीति च प्राप्ता एकश्रुतिर्न स्यात् स्वरितस्योदात्तश्च स्यात्। नितरां गद्यत इति निगदः। परप्रत्यायनार्थमुच्चैः पठ्यमा
नः पादबंधरहितो यजुर्मंत्रविशेषः। अपादबद्धेपि हि गदिर्वर्तते। यथा गद्यमिति। निगदेति कर्मण्येव। सुब्रह्मण्याशब्दोय
रित्यक्ते स्वलिंग एव न इति निगदे निरूढः॥ सुब्रह्मण्यामिति साधुरितियत्। तित्वात्स्वरितः॥ तस्यदाप्तस्येकादेशः॥ स्वरि
तानुदात्तयोरांतर्यात्स्वरितः॥ ततो निपातेन ओमभ्यादाने ओमाङोश्चेत्युदात्तस्वरितयोरेकादेशः स्वरित एव। एकादे
शउदात्ते नोदात्त इत्युदात्तविधित्वं नेह प्रवर्तते। अनुदात्तस्येत्यनुवृत्तेः। ततः स्वरितस्यातूदात्त इति प्रकृतसू
त्रेणैवोदात्तः। इति वृत्तिकारकैयटहरदत्तादयः। वस्तुतस्तु नेदं युक्तं। एकादेश उदात्तेनेत्यत्र अनुदात्तानुवृत्तेर्नौष
माराणाभावात्। क्वाचित्कं मतमिति तदुदात्तपाठश्च। अत एव आपिशलिशाखे उदात्तवत्येकीभावे उदात्तं संध्यक्षरं अनुद
सुब्रह्मण्यो३म् इंद्रागच्छ हरिव आगच्छ मेधातिथे मेषवृषणश्वस्य मेने गौरावस्कंदिन्नहल्यायै जार कौशिक ब्राह्मण गौतम ब्रुवाण श्व
सुत्यामागच्छ मघवन्॥५

श· कौ· १४

२३३

त्तोदये पुनः स्वरितः स्वरितो पधे इत्युक्तं। इह हि पूर्वार्द्धे अनुदात्तग्रहणमकुर्वतः उत्तरत्र च कुर्वतः पुनःशब्दे पूर्वोन्नयं अमंवा
रयतः स्पष्ट एवोक्त आशयः। यत्तु नस्यादित इति सूत्रे स्वरितोदात्तार्थं चेति वार्त्तिके यः सिद्धः स्वरितः स्तु ब्राह्मणेभ्य इति।
माध्यंतेत्यादिवादमात्रं निष्कर्षेत्तु देवब्रह्मणोरितिवत्। स्वरितस्यानुदात्त इत्यपि न वस्तुसूत्कर्षज्ञापकमेवेत्यवधेयं।
इंद्रेत्यामंत्रितमाद्युदात्तं। आष्टमिको निघातस्तु भिन्नवाक्यत्वान्न भवति। द्वितीयो वर्णोनुदात्तः। उदात्तादनुदा
त्तस्य स्वरितः। न चास्मिन्कर्त्तव्ये स्वरितस्यासिद्धत्वं। एजत्कांडमुकृष्यत इत्युक्तत्वात्। अत एवास्मिन्नुदात्ते कर्त्तव्ये भाष्ये नि
घातोपि न। यथोद्देशपक्षे अनुदात्ते परिभाषायां कर्त्तव्यायामसिद्धत्वेन वर्त्तमानाभावात्। तेन द्वावप्युदात्तौ। आद्यु
दात्तः। ततः परस्योदात्तादनुदात्तस्य स्वरित इति स्वरितस्योनेनोदात्तः। छकाराकारोनुदात्तः। न च तस्योदात्तादः
नुदात्तस्येति स्वरितः प्राप्तः। एकारस्योत्कर्षेणास्यासिद्धत्वात्। हरिव आगच्छेत्यत्रोक्तप्रक्रियया वकार उदात्तः। वकारे
एकारावनुदात्तौ मेधातिथेमिषच्छंदस्य परांगवद्भावः। आमंत्रिताद्युदात्तः। शाखाहस्योदात्तादिति स्वरितत्वे नेनो
दात्तः। ततस्त्वातोनुदात्तः। हर्षेति पूर्ववदनुदात्तौ। एं चानुदात्तौ। इत्याधीवतमिति अर्द्धात्रर्भामिति चक्र
त्वावत्तानु सेधेयो। तेन परांगवद्भावे उपजीव्यसामर्थ्यं स्फुटीभवति। भोरेत्यत्र गोत्वेदव स्कंदनीति विग्रहः। सत

रामः १४

रि३

रोगोरोयप्यापिबेति मंत्रवर्णात्। पूर्ववद्द्वावुदात्तौ। ततस्त्रयोऽनुदात्ताः। अहे तु दात्तौ॥ चत्वारोनुदात्ताः॥ कौशी
त्युदात्तौ। चत्वारोनुदात्ताः। गोतित्युदात्तौ। चत्वारोनुत्ताः। अश्वइत्युदात्ते। स्तुत्यामित्रोदात्ते॥ संज्ञायां समजेति क्यपो दा२
विधाने उदात्त इत्यनुवृत्तेः। आगोति द्वावुदात्तौ। चत्वारोनुदात्ताः। अत्र वार्त्तिकानि। असावित्यंतः। तस्मिन्नेवनि
गदे प्रथमांतस्यांतउदात्तः स्यात्। गार्ग्यो यजते। ञित्स्वरेणाद्यमत्राद्युदात्तो नेन बाध्यते। अमुष्येत्यंतः षष्ठ्यंत
स्यापि आम्रवत्। दाक्षेः पिता यजते। स्यांतस्योपोत्तमं चेतिः। तेन द्वावुदात्तौ। गार्ग्यस्य पिता यजते॥ वा नामधेयस्य। चे
स्यांतस्य नामधेयस्य उपोत्तममुदात्तं वा स्यात्। देवदत्तस्य पिता यजते। देवब्रह्मणोरनुदात्तः॥ स्वरितस्योदात्तं इ
ति पूर्वसूत्रशेषस्यायमपवादः। देवब्रह्मणोः स्वरितस्यानुदात्तः स्यान्तु ब्राह्मण्याय्ये। दैव्या आगच्छत। इयोर्यथा मंत्रि
ताद्युदात्तत्वे शेषनिघाते चोदात्तादनुदात्तस्य स्वरितः। तस्यानेनानुदात्तः। द्वितीयस्य आष्टमिको निघातस्तु
न भवति। आमंत्रितं पूर्वमविद्यमानवदिति पदात्परत्वाभावात्। ततः प्राचीनपदस्य तु भिन्नवाक्यस्थत्वात्। येतु दे
वा ब्रह्माणा इत्यासामानाधिकरण्येन व्याचक्षते तन्मते विभाषितं विशेषवचने बहुवचनमिति पक्षे विद्यमानतया द्वि
तीयस्य निघातः। अकृतसूत्रेण स्वरितनिघातस्तु वकारस्येव। तथा च भाष्यं देवब्रह्मणोरनुदात्तत्वमेके इच्छंति

वाब्रह्मणा५

श॰ कौ॰
१५

२३४

देवा ब्रह्माण इति द्विःपाठः। उदात्तौ द्वावेकौ वेति विकल्पाभिप्रायेण। तत्र द्वितीयपक्षे प्रकृतस्तत्रैव प्रग्रहणेन कृते
ऽस्वरितात्संहितायामनुदात्तानां। स्वरितात्परेषामनुदात्तानामेकश्रुतिः स्यात्संहितायां। इमं मे गंगे यमुने सरस्वति।
अनुदात्तानामिति जातौ बहुवचनं तेनैकस्य द्वयोश्च भवत्येव। संहिताग्रहणं ज्ञापकं अन्यत्र पंचमीनिर्दिष्टे कालोन
व्यवधायक इति। तेन तिङ्ङतिङः इति निघातः पदपाठेपि भवति। अग्निमीळे। पुरुहूत इत्यादौ तु अवग्रहेपि भवत्येक
श्रुतिः। यथा संधीयमानानामिति ह्यतिदेशात् इतिशब्दात्परस्य तु पुरुहूत इति पुरुहूत इत्यादौ न भवति। परिग्रहे त्वन
र्षीतादि निषा निशाद्ये विशेषवचनात्।। एवं अन्वेत वा इत्यादावपि पश्चादीस्तु घुदात्तानामिति निषेधादिति दि
क्।। ।।उदात्तस्वरितपरस्य संनतरः। उदात्तस्वरितौ परौ यस्मात्तथाभूतस्यानुदात्तस्य [illegible] अनुदात्ततरः स्यात्। अ
ग्निं कृत्ना। स्पादेन तत्। इमं मे गंगे इति मंत्रे शुतुद्रिशब्दस्य पादादित्वेन निघाताभावादाद्युदात्ततया तस्मिन्परे सर
स्वतीतीकारस्य सन्नतर इष्यते। एकश्रुतिर्बलुआप्नोति। न वक्तव्या उत्कर्षणात्सिद्धतया सन्नतरायै योगात्। उक्तं हि पूर्व
त्रासिद्धं नास्ति विप्रतिषेधो भावादुत्तरस्येति त्यत्ते।। नमुन इत्यत्र नेति योगविभागान्निर्दोषः। देवदत्तत्राडित्यत्र तुनधी चे
ति पूर्वपदस्य कतिस्वरे उदात्तस्वरितयोर्यण इत्यं च त्यकारस्य स्वरितः पूर्वस्य सन्नतर अनेना सिद्धः। प्रकरणोत्कर्षात्। अ

राम:
१५

यस्वरसूत्रप्रसंगात्फिट्सूत्राणि व्याख्यायंते॥ फिषोंत उदात्तः॥ फिष् इति प्रातिपदिकस्य प्राचां संज्ञा॥ फिषोंऽत उदात्तः स्यात्। उच्चैः॥ पाटलापालंकांबासागरार्थानां॥ एतदर्थानामंत उदात्तः स्यात्। पाटला। लघावंत इति प्राप्ते। अपालंकः॥ वृक्षविशेषः। इहापि प्राग्वत्। अंबार्थ। माना। ऊनर्वे नानामित्याद्युदात्ते प्राप्ते। सागरः। समुद्रः। लघावंत इति प्राप्ते॥ गेहार्थानामस्त्रियां॥ गेहं। गृहं। नब्विषयस्येति प्राप्ते। अस्त्रियां किं। माला। अत एव पर्युदासाज्ज्ञापकाच्छाला[illegible]द्युदात्तः॥ गुदस्य च॥ अंत उदात्तः स्यान्न तु स्त्रियां। गुदं। अस्त्रियां किं। आंत्रेभ्यस्ते गुदाभ्यः। स्वांगशिटामदंतानामित्यंतरंगमाद्युदात्तत्वं। ततष्टाप्॥ ध्यपूर्वस्य स्त्रीविषयस्य॥ नित्यस्त्रीलिंगस्य धकारयकारपूर्वो योंत्योच् स उदात्तः। अंतर्द्धा। स्त्री विघृमवार्णानाम्नामिति प्राप्ते। छाया। माया। जाया। जा। यांतस्यांत्यात्पूर्वमित्याद्युदात्ते प्राप्ते। स्त्रीति किं। बाह्यं। बहिषष्टिलोपो यञ्चेति य[illegible]दात्तत्वं। विषयग्रहणं किं। इभ्या। क्षत्रिया। यतोऽनाव इत्याद्युदात्त इभ्यशब्दः। क्षत्रियशब्दस्तु यांतस्यांत्यात्पूर्वमिति मध्योदात्तः॥ खांतस्याश्मादेः॥ नखं। उखा। सुखं दुःखं। नखस्य स्वांगशिटामदंतानामित्याद्युदात्ते प्राप्ते। उखा नाम यवाग्वादिपाकार्थं याज्ञिकैर्निर्मितो भांडविशेषः। तस्य कृत्रिमत्वान्नव पुष्करीकृत्रिमाख्या चेदित्युवर्णीस्योदात्तत्वे प्राप्ते। सुखदुःखयोर्नब्विषयस्येति प्राप्ते। अश्मादेः किं। शिखा। मुखं॥ मुखस्

अंतत्वाद्द्यु

हर न९

शा॰ कौ॰ १६

२३५

स्वांगशिटामितिनञ्विषयस्येतिवाद्युदात्तत्वं। शिखायास्तुदीर्घांततया स्वांगशिटामितास्याद्युदात्तत्वेपि अश्मादे

रिति पर्युदासेनाद्युदात्तत्वं ज्ञाप्यते। तथाच शीङः खो निद्ध्रस्वश्चेति उणादिषु नित्वमुक्तं। वस्तुतस्तु नदेवशरणे। स्यावाहत्या चरितार्थस्य अश्मादेरि

शंखो निधौ ललाटास्त्रीति कोशादस्थिचाचक्रस्य स्वांगशिटामिताद्युदात्ते। अतिशयेन बहुलो बंहिष्ठः। नित्वादे

त्वस्य ज्ञापकत्वायोगात्। हिष्ठवत्सरतिशत्यांतानां। एषामुदात्तः स्यात्। अव्ययस्य

घुदात्तेप्राप्ते। बंहिष्ठैरश्वैः सुवृता रथेन। यद्वंहिष्ठं नातिविधे इत्यादौ व्यत्ययाद्युदात्तः। संवत्सरः। अभ्यूणावी

पदद्वकतिस्वरोत्र बाध्यते। सप्ततिः। अशीतिः। लघावन्त इति प्राप्ते। चत्वारिंशत्। इहापि प्राग्वत्। साधु वा चित्

नाप्रभृतस्यायोः। अव्ययपूर्वपदप्रकृतिस्वरोत्र बाध्यते। दक्षिणस्य साधो। अन्त उदात्तः स्यात्। लघावन्ते इति गुरुरुदात्तः। दक्षिणः सर

भावे व्यवस्थायां सर्वनामतया स्वांगशिटामिताद्युदात्तः। अर्थान्तरे तु लघावन्ते इति गुरुरुदात्तः। दक्षिणो बाहुः।

लोदारपरछंदानुवर्तिषु इति कोशः। स्वांगत्वाया मादिर्वा। इह दक्षिणस्याद्यन्तौ पर्यायेणोदात्तौ स्तः। दक्षिणो बाहुः

[illegible] अस्वांगग्रहणं किं। प्रत्यङ्मुखमासीनस्य वाम बाणो दक्षिणो भवति। छंदसि च। अस्वांगार्थमि

दं। दक्षिणः। इह पर्यायेणाद्यन्तावुदात्तौ। कृष्णस्याम्। गाख्याचेत्। वर्णानां तणोत्ताद्युदात्ते प्राप्ते नोदात्तौ विधीयते।

राम॰ २६

श्मानां श्रीहीरणां। कश्मोनोनावद्वृषभः। मगाख्यायां तु कश्मोराश्रे। वानामधेयस्य। कश्मसेतेवा। अयंवांकश्मोत्र
श्विना। कश्मऋषिः। श्रुङ्गगोरयोरादिः। नितमुदात्तः स्यादित्येके। वेत्यनुवर्त्तत इति तु युक्तं सरोगोरोबैथापिवेतु
त्रोनोदात्तदर्शनात्। अगुंष्ठोदकबककवशानां छुदस्यतः। अगुष्ठस्य स्वागानामकुर्वादीनामिति द्वितीयस्योदात्तत्वे
प्राझे। उदकस्य कर्दमादिपाद्यदाद्यद्वितीययोः पर्यायेणप्राणिनां चकुपूर्वाणामिति कवर्णात्पूर्वस्यादेरुदात्तत्वे प्रा
वेतोदात्तार्थ आरंभः। वशाग्रहणं नियमार्थं छन्दस्येवेति। तेन लोके आद्युदात्तत्वेनैताहुः। पृष्ठस्य च। छन्दस्यन्तउदात्ते
स्यात्। वाभाषायां। भाषामात्रविषयस्वरसूत्रमिदं। घागेकादशभ्यो छन्दसि। कल्युयोत्तमाविभाषाभाषायामित्यादिव
तां पृष्ठं। पृष्ठं। अर्जुनस्यात्तराख्याचेत्। उनर्वतानामित्याद्युदात्तस्यापवादः। अर्यस्यस्वाम्याख्याचेत्। यांतस्यांतात्पूर्वी
मिनियतोनावद्इतिवाद्युदात्तेप्राप्ते वचनं। आशाया अदिगाख्याचेत्। दिगाख्याव्यावृत्त्यर्थमिदं। अतएवज्ञापका
हिक्स्पर्यायस्याद्युदात्तता। इंद्र आशास्पसदि। नक्षत्राणामाब्विषयाणां। अंत उदात्तः स्यात्। आश्लेषानुराधादी
नोलघावंत इति प्राप्ते जेष्ठाश्रविष्ठा इष्ठत्वं [illegible]तत्वेनाद्युदात्तेप्राप्ते वचनं। नकुपूर्वस्य कृत्तिकाख्याचेत्।
अंत उदात्तो न। कृत्तिकानद्यत्वं। केचित्तु कुपूर्वीय आपूतद्विषयाणामिति व्याख्याच आर्यिकाबहुलिकेत्यत्रापि

धनिष्ठानां२

दंतोदात्त इति तच्चिंत्यं। तिल्वाश्वमेद त्वा घपदास्त्येव पठ्यमानत्वात्॥ न्त्रः संख्यायाः॥ पंच। स्वांगशिटाम १

श्रा को। अंतोदात्तेनेत्याहुः॥ घृतादीनां च। अंत उदात्तः॥ घृतं मिमिक्षे। आकृतिगणोयं। ज्येष्ठकनिष्ठयोर्वयसि। अंत उ

१७ दात्तः स्यात्। ज्येष्ठ आह चमसा। कनिष्ठ आह। वयसि किं। ज्येष्ठः॥ श्रेष्ठ॥ कनिष्ठः॥ अल्पिष्ठः॥ इह नित्वादाद्युदात्त एव।

बिल्वतिष्ययोः स्वरितो वा। अनयोरंतः स्वरितो वा स्यात् पक्षे उदात्तः। इति फिट्सूत्रेषु प्रथमः पादः॥ ॥अथादिः प्रा

२३६ क् शकटेः॥ अधिकारोयं। शकटिशकट्योरिति यावत्। ह्रस्वांतस्य स्त्रीविषयस्य। आदिरुदात्तः स्यात्। बलिः।

तनुः। नब्विषयस्यानिसंतस्य। वनेन वायः। इसंतस्य तु सर्पिः। नपुंसकं। तृणधान्यानां च द्व्यषां। द्व्यचामित्य

का स्या: ६ थ्यः॥ कुशाः॥ माषाः॥ तिलाः॥ बकचौ तु गोधूमाः॥ यत्तु अलाबूतिलोमेति रजसि कटज्जिधौ हरदत्तेनोक्तं। ति

लश हृषो घृतादित्वाद्दंतानां। शिट् सर्वनाम। करीः॥ ओष्ठः॥ विम्बः॥ आशिणां कुपूर्वं। कवर्गात्पूर्व आदिरुदा

त्तः। यत्तु कुपूर्वाणामिति पाठमुपन्यस्य कवर्गाद्ये पूर्वे तस्मिन् ध्ये आदिरिति न्यासकारहरदत्तयस्तस्य समन्

ह इति सूत्रेषोचुः। तच्चिंत्यं। पूर्वेषामिति सूत्रस्य संगते॥ पुंसानुजवल्कुनापूर्व इति विग्रहात्। जीषा समास रामः

दुति सर्वनामतानिषेध इति त्वाख्यातमुचितं। काकः॥ वृकः॥ इउके षुमे। खष्पूर्वणीकृत्रिमाख्या चेत्। खयि १७

परे पूर्वमुवर्णमुदात्तं स्यात्। कंदुकः। उनर्वन्नंतानां। उनर्वन्नंतानां वोरिशादस। अस्वसार्त्वाकरणवो। वन। प

वानंमेपांवर्णानांतराणितिनितांतानां।आदिरुदात्तः।एनः।हरिणः।शितिः।पृश्निः।हरित्।कस्वांतस्यऊस्वमन्तरा
छील्ये।अद्धर्जः।कस्वांतस्यादिभूतऊस्वमुदात्तंस्यात्।मुनिः।अक्षस्यादेवनस्य।आदिरुदात्तः।तस्यनाह्नः।देवनेछ
अक्षैर्मादीव्यः।अर्धस्यासमद्योतने।अर्धोग्रामस्य।समेंशकेतु अर्धं पिप्पल्याः।पीतद्र्वर्थानां।आदिरुदात्तः।पी
तद्रुः।सरलः।ग्रामादीनांच।ग्रामः।सोमः।यामः।लुबन्तस्योपमेयनामधेयस्य।स्फिगन्तस्येतिपाठे स्फिगिति लुपः प्राचांच
ञ्चा।चञ्चेवचञ्चा।नवृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणां।एषामुपमेयनाम्नांनादिरुदात्तः।तालइवतालः।मेरुरिवमे
रुः।व्याघ्रः।सिंहः।महिषः।राजविशेषस्ययमन्वाचेत्।अयमन्वाह्वः।आंगउदाहरणं।अंगाःइत्युदाहरणं।लघावं
तेद्वयोश्चबह्वषोगुरुः।अंतेलघौद्वयोश्चलघ्वोःसतोःबह्वच्कस्यगुरुरुदात्तःस्यात्।कल्याणः।कोलाहलः।इहगुरू
णांमध्येयआदिरित्यर्थोभिप्रेतः।तेनवृषाकपिरित्यत्रव्यपदेशिवद्भावेनादिभूतेसिद्धे।तेनवृषाकप्यग्नीत्यादि
सूत्रस्याहत्यादिग्रंथानविरुध्यंते।नन्वेवमपिअत्रनतोडी।षितिसूत्रेसारंगकल्माषशब्दोलघावंतइत्यादिनाम
ध्योदात्ताविति हरदत्तग्रंथोविरुध्यतइतिचेत्।सत्यं।आदिशब्दइहनान्वेतीत्येवसारं।स्त्रीविषयवर्णाक्षुपूर्वा
णां।एषांत्रयाणामादिरुदात्तः।स्त्रीविषय।मल्लिका।वर्णः।श्येनी।हरिणी।अक्षुशब्दात्पूर्वोस्त्येषांते अक्षुपूर्वाः।
श्रीतवत्यरिमाणादितिसूत्रस्यभाष्यादिग्रंथाअसंगच्छंते।शकुनीनांचलघुपूर्वमितिसूत्रे षष्ठीसमासः ३

क्षां२

श॰ कौ॰
१०
२३२

तरक्षुः।शकुनीनांचलघुपूर्वंपूर्वंलघुदान्तेस्यात्।कुक्कुटः।।तित्तिरिः।नर्तुआरायाख्यायां।यथालक्षणं आम्रमुदात्तं त्वं
न।वसंतः।कृकलासः।धान्यानांचद्व्यषान्तानां।आदिरुदात्तः।कातः।श्यामाकाः।षांतः।माषाः।जनपदशब्दानाम
षांतानां।केकयः।हयादीनामसंयुक्तलांतानामंतःपूर्वंवा।हयितिहलः संज्ञा।पललो।शललं।हयादीनांकिं।एकलः
असंयुक्तेतिकिं।मल्लः।इगंतानांचद्व्यषां।आदिरुदात्तः।कृषिः।। ।।इतिद्वितीयःपादः।।अथद्वितीयेभागेपात्।।
इषोन्तस्यहलादेरित्यतःआद्वितीयाधिकारः।अषांआद्यकारात्मकरवरूढेत्यतःप्राक्अचामितप्रक्रिकाःरः।स्वांग
नामकुर्वादीनां।कवर्गरेफचकारतादीन्वर्जयित्वास्वांगानांद्वितीयमुदात्तं।।ललाटं।कुर्वादीनांकपोलः।रस
ना।वदनं।मादीनांच।अच्चोद्वितीयमुदात्तं।मलयः।शादीनांशाकानां।शीतकल्या।शतपुष्पा।पांतानांकुर्वादी
नां।पादपः।।आतपः।लघ्वादीनांतुअनूपंघचांतः।नीयं।।युतान्यरुपंतानां।युतादिस्त्रितयांतानांद्वितीयमु
दात्तं।युतं।अयुतं।अनि।धमनिः।अरणि।विपणिः।मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठ
काशीनामादिर्वा।एषामादिर्द्वितीयोवोदात्तः।मकरः।वरूढइत्यादि।छंदसिच।आमकरार्घर्थआरंभः।लक्षान्तु
सारादादिर्द्वितीयंवोदात्तंज्ञेयं।कर्दमादीनांच।आदिर्द्वितीयंवोदात्तं।कर्दमः।सुगंधितेजनस्पतेवा।।आदि

राम:
१८

२

सुगंधितेजनः ।३। नपःफलांतानां । आदिर्द्वितीयंवोदात्तं ॥ राजादद्वितीयंजेशहरिश्चंद्रेति त्रयः पर्यायेणोदात्ताः । सुगंधितेजनः ।३। नपःफलांतानां । आदिर्द्वितीयंवोदात्तं ॥ राजा
नफलो यांतस्यांतात्पूर्वं । कुलायः ॥ आंतस्यवनालघुनी ॥ नाशङ्केलघुचउदात्तेस्तः । सनाथा । सभा ॥ शिशुउमारोदुंबरबली वर्दोष्ट्रारपुरूरवसांच । अंतात्पूर्वमुदात्तं द्वितीयवा ॥ सांकाश्यकांपिल्यनासिक्यदार्वीघाटानां ॥ द्वितीयमुदात्तं
वासांकाश्यमित्यादि । ईषान्तसहयादेरादिर्वा । हयादेः । हलोदे । हलीषा । उशीनरदासेरकपलालशैवालश्यामाक
शरीरशरावहृदयहिरण्यारण्यापत्यदेवराणां । एषामादिरुदात्तस्यात् । महिष्याषाढयोर्जायेष्टकाख्या चेत् । आ
दिरुदात्तः । महिषीजाया । अषाढाउपदधाति ॥ ॥तृतीयःपादः ॥ शकुटिशकट्यौरक्षरमक्षरंपर्यायेणउदात्तं ।
शकटिः । शकटी ।३। गोष्ठजस्य ब्राह्मणनामधेयस्य । अन्तरमक्षरंक्रमेणोदात्तं । गोष्ठजः ।३। ब्राह्मणः । अन्य
त्रगोष्ठजः । पशुः । कुंदुनेरपदसक. तिसरेणांतोदात्तः । परावनस्योपोत्तमवर्जशेषंक्रमेणोदात्तं । परावतः । धूम्रजा
नुमुंजकेशकालवालस्थालीपाकानामधूजलस्थानां । एषांचतुर्णांधप्रभृतीन्युत्तरोवर्जयित्वा शिष्टानिक्रमे
णोदात्तानि । धूम्रजानुः । मुंजकेशः । कालवालः ॥ स्थालीपाकं । कपिकेशहरिकेशयोश्छंदसि । कपिकेशः ४
हरिकेशः ।८। न्यङ्स्वरौस्वरितौ । सरट्ं । न्यर्बुदव्ल्केशयोरादिः । स्वरितःस्यात् । तिल्यशिक्यकाश्मर्यधान्य

व्य १

36

शा॰कौ॰
१९

२३८

कन्याराजन्यमनुष्याणामंतः। स्वरितं स्यात्। तिलानां भवनं क्षेत्रं तिल्यं। यतो नावइति प्राप्ते। बिल्वभक्ष्यवीर्याणि छंदसि। त्रे
त स्वरितानि। न्यक्त्वस्य मस्ति मे तत्वनुस्त्वानि। स्वरीरुत्वत्। उतत्वः प्रश्यन्। न भंतामन्यके समे। सिमस्मै। सिमस्य। अथर्वणो तं उदा
त्तः। आथर्वणाइति प्रायिकं। तत्र हष्टस्ये त्येवं पख्याते न वासं त्तं तु तेसिमस्माद्गत्स्यग्वेदे पि भवत्येव। निपाता आद्युदा
त्ताः। स्वाहा। उपसर्गाश्चाभिवर्जं। इह नाभिरिति स्तुवर्चं। मा स्तुवा तदपि। एवमादि ध्रुभेः स्वपठत्वात्। आत्वेतानि षो
दतेति मंत्रे उपसर्गाश्चाभिवर्जमिति क्वचनात्वात्ति पदिको तोदात्त त्वमित्युक्ता मानो मर्त्ता अभिद्रुहन्निति मंत्रे एव
मादीनामंतइति वक्तावेदभाष्यकृता ध्वनितमेतत्। एवादीनामंतः। एवमादीनामिति पाठांतरं। एव। एवं। नूनं। सह।
ते पुत्र सूरिभिः सह। षष्ठस्य तृतीये सहस्य सइति प्रकरणे सहशब्द आद्युदात्तइति तु भ्रांतः॥ न त्विंत्यं। वा वा दीनामुभा
वुदात्तौ। उभौ ग्रहणमनुदात्तं पदमेकवर्जमित्यस्य बाधाय। चादयोनुदात्ताः॥ पदु पदुः। शेषं सर्वमनुदात्तं। शेषं नि
प्रस्पष्टं। यथेति पादांते। तेने मिमृभ्वो यथा। पादांते किं। यथानो अदितिः करत्। प्रकारादिद्विरुक्तौ परस्यांतउदात्तः॥
त्यादिद्विरुक्तस्य परमित्यर्थः। प्रप्राय। दिवे दिवे॥ ॥इति शांतनवाचार्यप्रणीते फिट्सूत्रे चतुर्थः पादः॥ ॥प्रा
संगिकं समाप्य प्रकृतमनुसरामः। अथ त्क एकाल्प्रत्ययः। एकाल्प्रत्ययो यः सोऽपृक्त संज्ञः स्यात्। संज्ञाप्रदेशाः

रामः
१९

वेरष्टक्सेत्यादयः। एके इति व्यर्थं। नियामत एकाजित्येकग्रहणेन वर्णग्रहणे जातिग्रहणमिति ज्ञापनेपि अल्ग्रहणा
त्सामर्थ्यादेवेह व्यक्तिपरत्वात्। किंचं सूत्रमेवेदं व्यर्थं। अष्टक्सदेशे घ अल्ग्रहणेनैव सिद्धेः॥ नच स्तुरां स्तुनोतीति स्तु
रास्तुत्। तमाचक्षाणः स्तुरा इत्यत्र धात्वचपवस्पसस्य लोपः स्यादिति वाच्यं। प्रत्याद्यन्तपरिभाषया गतार्थत्वात्।
विभक्तिसाहचर्याच्च। अन्यथा सूत्रारंभेपि जिप्साहचर्यात्सेरपि तिङ एव ग्रहणाद्भैत्सीदिति सिचो न भवति। वेरपृ
क्सेत्यत्र तु वकोरेकारयोरन्तरमनुनासिकमाश्रित्य घक्ग्रहणं प्रत्याख्यास्यत एव। तत्पुरुषः समानाधिक
रणः कर्मधारयः। समानाधिकरणावयवस्तत्पुरुषः कर्मधारयसंज्ञः स्यात्। संज्ञाप्रदेशाः पुंवत्कर्मधारयेत्यादयः
समानाधिकरणोपदेशाश्रयत्वेनास्तोस्येत्यर्थः। आद्यश्चः यदि तु पूर्वकालैकेति प्रकरणासंज्ञेनेक कर्मधारयश्चेति कृत्वा
तत्पुरुषानुवृत्त्या पर्याये लक्षे च कारात् गतिश्चेत्यादाविव समुच्चयः। साध्यते तदिदं सूत्रं शास्त्रमकर्तृ प्रथमानिर्दि
ष्टं समास उपसर्जनं। समासविधायकं शास्त्रं समासः। तादर्थ्यात्। समस्यतेनेति व्युत्पत्त्या वा। तत्र प्रथमया यन्नि
र्दिश्यते तदुपसर्जनं स्यात्। द्वितीयाश्रितादिभिः॥ कस्माश्रितः। महासंज्ञाकरणमन्वर्थसंज्ञार्थं। लोके ह्यप्र
धानमुपसर्जनमाहुः॥ तेन राज्ञः कुमार्याः राजकुमार्य इत्यत्रोभयोः षष्ठीति सूत्रे प्रथमानिर्दिष्टत्वाविशेषेपि

श॰ कौ॰ २०

२३८

राजैवोपसर्जनं नतु कुमारी। तेन कुमारीशब्दस्य न पूर्वनिपातो न वा गोस्त्रियोरिति ह्रस्वः। न च राज्ञः कुमारीति प्रथमांते नै
व विग्रह इति भ्रमितव्यं। मूलाभावात्। तथा च तत्पुरुषे तुल्यार्थतृतीयासप्तमी॥ इति सूत्रे परमे कारके इत्याकारकेणोत्पा
दावतिप्रसंगमाशंक्य लक्षणप्रतिपदोक्तपरिभाषाबलेन समाहितं भाष्ये। अनेकमन्यपदार्थ इति सूत्रेपि भाष्य
केयटयोः स्पष्टमेतत्। प्रथमांते नैव विग्रह इति नियमो नास्तीति परिनिष्ठितविभक्त्यैव विग्रहस्योचितत्वाच्च।
ध्यत्वेनाभिधीयते। आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयत इत्यपि व्याख्यातं। पूर्वापरीभावापन्नानेकक्षणविशि-
ष्टस्योत्पत्तिरात्मास्तीत्यादावपि स्फुटमेवेति भावः। पचत्यादावपि हि अधिश्रयणादिरधःश्रयणान्तो व्यापारक-
लापः क्रिया। अत एव तस्य युगपदसन्निकर्षान्न प्रत्यक्षता। किं त्वेकैकस्याधिश्रयणादिव्यापारस्य क्रमेणानुभवे स-

राम· २८

भेदिका। काल्यानुपातियद्रूपं तदस्तीति ४

तिमनसा संकलना क्रियते। तदुक्तं भाष्ये। क्रिया नामेयमत्यन्तापरिदृष्टा अशक्या पिंडीभूता निदर्शयितुमिति। एकम
पि पारिभाषिकं। एकफलावच्छिन्नत्वात्। उक्तं च गुणभूतैरवयवैः समूहः क्रमजन्मनां। बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यप
दिश्यते इति। तदेवं भवत्यादौ क्रियावाचकत्वं सुस्थं। अत एवाभूदस्ति भविष्यतीति कालानुयोगः। नहि क्रियात्वं विना सोऽसंभ
वति। तदुक्तं। क्रियाभेदाय कालस्तु संख्या सर्वस्य प्रतीयते इति च। भाष्ये तूक्तार्थसाधनाय निरुक्तकारवचनमुदाहृतं। षड्भा
वविकारा इति ह स्माह भगवान्वार्ष्या[illegible]यणिरिति। भावस्य क्रियायाः षट्प्रकारा इत्यर्थः।
तेषु च जायते अस्तीति पाठात्सर्वत्र क्रियान्वयः सिद्ध इत्यर्थः। कैयटस्तु प्रकारान्तरेणापि व्याचख्यौ। भावस्य सत्ताया ए
ते प्रकाराः। सत्तैवानेकक्रियात्मिका साधनसंबंधादवसीयमानसाध्यस्वरूपा जन्मादिरूपतयावभासत इति। तथा च जा
तिसमुद्देशेऽपि संबंधिभेदात्सत्तैवेत्युपक्रम्योक्तं। प्राप्तक्रमविशेषेषु क्रिया सैवाभिधीयते। क्रमरूपस्य संहारे तत्सत्त्वमि
ति कथ्यते इति। व्यापारविशेषाणां साध्यत्वात्क्रमिकत्वाच्च तदुपहिता सत्तापि भवतीत्यर्थः। पाकइत्यादौ प्रकृत्या साध्या
वस्थायां असत्त्वरूपाया उपस्थितिः। घञाद्यैस्तु सिद्धरूपायाः। उक्तं च। क्रियायाः सिद्धतावस्था साध्यावस्था च कीर्तिता॥
सिद्धतां उपमिश्चेति तत्रैवेष्टेति प्रत्ययविधिः। आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता। प्रकल्पिता यथा शास्त्रे स घञा

शं·कौ·
३८

२५८

दिनिबंधनइतिलिंगसंख्याकारकाद्यन्वययोग्येनावस्थाविशेषेणाघञादिभ्यउपस्थितिरित्यर्थः।एतेनकृदभिहितोभावो
द्रव्यवत्प्रकाशतेइतितृतीयाध्यायेभाष्यमपिव्याख्यातं।प्रकल्पितेत्यनेनपदस्फोटस्यैववास्तवतांध्वनयति।साध्य
त्वेनेति।अतएवनाप्रतिकारकतयाओदनादेरन्वयइतिभावः।अतएवभोक्तुंपाकोभुक्त्वागमनमित्यादौतुमु
न्नादयःसिद्धाः।कृत्वोर्थात्वनभिधानान्नेत्येवशरणं।अतएवक्वचिद्दृश्यतेपिद्विर्वचनं।द्विरणाविधिरितिसूत्र
वार्त्तिकयोःप्रयोगात्।सत्वभावत्विति।अतएवपाकंकरोतीत्यादौकारकत्वेनसान्वेतीत्यर्थः।नन्वेवंपश्य
मृगोधावतीत्यादौमृगकर्तृकशीघ्रगतेर्दर्शनप्रतिकर्मतानस्यात्।नचसंसर्गमर्यादयेहकर्मताभानेपिप्रका
रत्वेनाभानान्नोक्तदोषइतिवाच्यं।एवमपिपचतिभवतीत्यादावसंगतेः।एककर्तृकावर्तमाना[illegible]पचिक्रिया
एकतत्कर्तृकावर्तमानाभवनक्रियेतिहितत्रवाक्यार्थः।नत्वत्रभवतीतिलकारार्थस्यकर्तुर्देवदत्तकर्तृकपचि
क्रियांप्रत्यभेदेनसंसर्गेणाविशेष्यत्वस्यावश्यकत्वात्।तथाचदेवदत्तवत्पचिक्रियायाःसत्वधर्मोदुर्वारः।अत्राहुः।
कर्तृत्वकर्मत्वयोरनुभवबलाज्ज्ञानेस्वीक्रियते।कारकांतराभावमात्रेतात्पर्यमिति।आख्यातशब्देभागाभ्या
मित्युदाहृतश्लोकोप्येतदभिप्रायकएव।तत्रयत्प्रतीत्युत्तरश्लोकानुरोधादितितृतीयेस्फुटीकरिष्याम॥

रामः
३८

मः॥ एतेन अपाक्षीदपाक्षी॥ पचतः [illegible] पचंतिपक्ष्यतिपक्ष्यतेइत्यादावपि भवतीत्यनेनकर्त्तृत्वेनान्वयो व्याख्यातः
भावीवर्त्ततेध्वस्तो स्तीत्यादाविवस्तह्मीवस्यस्यावर्त्तमानस्तन्नासंभवात्॥ ॥उपदेशोजनुनासिकइत्॥ उपदेशो
नुनासिकोजित्स्येत्संज्ञः स्यात्॥ उपदिश्यतेनेनेत्युपदेशः॥ कृत्यल्युटो बहुलमिति बाहुलकात्करणे घञ्॥ अनयोल्युट्
स्यात्॥ सच धातुपाठ प्रातिपदिक [illegible] पाठौसूत्रवार्त्तिकेच॥ एतेहि शब्दा उपदिश्यंते तत्रशास्त्रकृता पठितस्याप्यनु
नासिकस्यपाठइदानीमपभ्रष्टः॥ अतएवाहुर्हीत्निकाराः प्रतिज्ञानुनासिक्याः पाणिनीयाः इति॥ तत्र एधस्पर्धत्या
त्यादावनुदात्तेत्त्वादात्मनेपदं॥ एधते॥ स्पर्धते॥ भवूइत्यत्रोगित्वान्नुम्॥ भवान्॥ णल्सूत्रे अकारस्येत्त्वाद् घत्वा
ह्रासिद्धिः॥ आचारेवगल्भक्लीबहोडेभ्यइतिवार्त्तिके गल्भादेरनुनासिकत्वेनानुदात्तेत्त्वात्तङ्॥ अवगल्भते॥
इत्यादि॥ उपदेशइतिकिं॥ अभ्रआँअपः॥ आङोनुनासिकश्छन्दसीत्यनुनासिकः॥ नासौशास्त्रेपठितः॥ ननु एवं
उत्कुंइत्यत्रापिप्रसंगः॥ विधानसामर्थ्यान्नेति तुप्रकृते पितुल्यं॥ अथानुबंधा अनेकांताइतिपक्षेऽत्र आ अ
टितइत्यादित्यत्रेतीरिनषेधार्थमित्संज्ञा किं न स्यादितिचेन्न॥ एवमपि आङ्इदितिवक्तव्ये अनुनासिकवि
धानस्यवैयर्थ्यापत्तेः॥ एतेन दधिइछतीतिदधिब्राह्मणाकुलँदधीयते॥ किं पल्लोपयलोपयोःकस्वत्वेचा

श० कौ०
४०
२५९

णोऽप्रगृह्यस्येत्यनुनासिकं। अत्रेदितो नुम्धातोरिति नुम् स्यात्। दधिमध्वित्यादिषु प्रातिपदिकेषु भवति पचतीत्यादिषु च इत्कार्यं
लोप एव स्यात्। तस्मादुपदेशग्रहणं कर्तव्यमिति परास्तं। अणोऽप्रगृह्यस्येति वक्तव्ये अनुनासिकविधानसामर्थ्या
दित्संज्ञाविरहोपपत्तेः। सत्यं। उत्तरार्थमुपदेशग्रहणं। अजिति किं। मनि प्रत्यये मकारस्य मा भूत्। सत्यां हि तस्याम
न्येऽप्योपदिश्यन्ते इति हलन्तेष्वन्त्यादचः परः स्यात्। अनुनासिकः किं। चिरिणोति जिरिणोति॥ ॥ हलन्त्यं। उपदेशेऽन्त्यं
हलित्स्यात्। यद्यपि सर्वो हलन्तं न भवधिप्रत्ययो भवति तथापि धातुप्रातिपदिकत्वाद्युपाधिपरिच्छिन्नं समुदायमन्त्य
त इह गृह्यते। अन्तग्रहणसामर्थ्यात्। शीङ् स्वप्। ङित्वान्ङ्। शेते। उपदेशे किं। अग्निचित्। श्रोत्रियश्छन्दोऽधीते इ
त्रोत्रियचरन्ते चिकित्स इत्यादौ तु वाक्यार्थे पदवचनमिति पक्षे। अविद्यमानप्रकृतिप्रत्ययविभागत्वेऽपि उपदेशे
त्वाद्भवत्येवेत्संज्ञा। सत्तु नित्यस्य स्वरादिपाठादित्संज्ञा प्राप्ता उच्चारणसामर्थ्यान्न भवति। न च नित्स्वरः प्रयोजनं।
अंतोदात्तनिपातनवैयर्थ्यापत्तेः। स्यादेतत्। हल्प्रत्याहारसिद्धेरेतत्सूत्रसापेक्षत्वादन्योन्याश्रयः। पदार्थबोधं विना
वाक्यार्थज्ञानासंभवात्॥ अत्राहुः। हल्च लचेति समाहारद्वंद्वे संयोगान्तलोपेन लकारोऽत्र निर्दिश्यते। तेन लस्य
त्संज्ञायां सत्यां आदिरन्त्येनेति हल्संज्ञा। ततोऽपि हलिदिति वाक्यार्थबोधः। यद्वा हलिति तत्राहत्येकशेषाणामनन्त

राम:
४०

नं३

माश्रयणाद्धस्य समीपवर्त्ती लकारो हल्। तस्य इदिति। संपूर्णसूत्रापत्त्या हल्सूत्रस्यांतं हलंतमिति वा। इह पक्षत्रये पू
र्वः पूर्वः प्रबलो लाघवादिति तत्त्वं। येह्या। हल्सूत्रे लकारस्यैव तत्वल्कार इति व ऋजुणा भूतस्य निर्देशः। तस्य च पुषादिद्यु
ताद्यदित इति ज्ञापकादित्संज्ञा। न तत्प्रदेशे जस्तुना सिक इति। अत्पक्षं ज्ञाया अघाप्यनिष्पादनात्। यत्तु णलो लित्करणं
ज्ञापकमिति। तच्चिंत्यं। लित्वस्याघाप्यसिद्धेः। न च विभेदेस्तत्र लोपाभावार्थं हलग्यादिसूत्रे अपृक्तं हलिति द्वितीयहल्ग्र
हणं तत्र ज्ञापकमिति वाच्यं। भविनेत्यादौ ङानिवृत्त्यर्थं हल्ग्रहणोपपत्तेः। न च स्तुतिस्तीति प्रत्यये प्रकृतेरार्हृयान्नैव मि
ति वाच्यं। यासेत्यादौ सुलोपानापत्तेः। न चैकदेशविकृतस्यानन्यत्वादेकादेशस्य च पूर्वांततया ग्रहणाद्धलेतायाः प्रव
कृतेः परत्वेनेष्टसिद्धिः। यः सुहृत्स्य आतिप्रसंगात्। तस्माल्लोपप्रवृत्तिकाले हलंतत्वं वाच्यं। न च यासेत्यत्रापि ना
स्ति। किं त्वाबंतात्परत्वमाश्रित्य लोपः कार्यः। न च तत्राबंतात्प्रकृतिः। उभयत आश्रयेणादिवद्भावायोगात्। अ
घनदस्यां प्रहरणमिति निर्देशादाबंता [illegible] उभयत आश्रयेतादिवद्भावं [illegible] ब्रूषेत यथापि हल्शब्दस्य
वाघापिशक्तस्य ग्रहे कर्थं हल्ग्रहणसामर्थ्यात्स्मल्लोलित्वं निश्चेयं। न च लितीति ज्ञापकं। ल्सुडादौ चरितार्थत्वा
त्। तस्माद्दुक्तप्रकारचतुष्टयमेव शरणं। स्यादेतत्। आद्येह ल्संज्ञातः पूर्वकथं संयोगोत्तलोपः। संयोगसंज्ञा

स्यल्ले ३

शा.कौ.
४१
२६०
त्रै ४

याभ्यांनिष्पन्नेः ॥ द्वितीयेहस्सल् इतिकथंसमासः ॥ सुप्संज्ञायाअनिष्यादात् एवंतत्तीयेहलोन्त्यमितितत्सुषःकथं चातुर्थे
चतुर्थेचलदित इतिबहुव्रीहिःकथंउच्यते । साधुत्वज्ञानोपयोगिनः शास्त्रस्यार्थबोधोयहितद्वोस्य साधुत्वा
नोपदानांस्वार्थात्तुभावकतायांसुपप्रयुज्येततदेषदोषःस्यात् । सचनोपप्रयुज्यतेप्रमाणाभावात् । शतशोप्यभिचा
राच्च । यथाचैतत्तथाअइउण्इत्यत्रैवप्रतिपादितं ॥ ॥ नविभक्तौतुस्माः ॥ विभक्तिस्थास्तवर्गसकारमकाराइतोनस्युः ।
रामान् । पचेरन् । ब्राह्मणाः । पचतः । रामं । अडाहो । विभक्तौकिं । अचोयत् । ऊर्णायायुस् । कुधादिभ्यन्नम् ॥ आङ्गिरशी
विभक्तिरितियत्रविभक्तिसंज्ञानत्रायंनिषेधोनभवति । इदमस्यथमुरितिमकारपरित्राणार्थमुकारानुबंधासं
जनात्प्रापकात् । तेनकिमोत् । कइतिसिद्धं । स्यादेतत् । तदानीमित्यादौदानीमोपितर्हिमित्त्वंस्यादितिचेत् । न । यांततवा
त्तस्य । पकारोह्यत्रत्वमनुभवन्मकारस्येत्संज्ञांप्रतिबध्नाति । संयोगान्तस्यलोपइतियलोपस्येत्संज्ञांप्रत्यसिद्धत्वया
मकारस्येत्त्वाभावात् । यद्वा । इदमस्यथमुरित्येनेनानित्यत्वमात्रंज्ञाप्यतेनतुआङ्गिरशीयेषडप्रवृत्तिः । अन्नेतइयो
दित्वत्तुस्वस्वमुखार्थस्तकारः । नत्वित्संज्ञकः ॥ नित्त्वरापत्तेः । नचेष्टापत्तिः । उरौवायोभज्झीयतबराधसेदत्यादौ
उरौभज्झीपेत्मनयोरंतोदात्तत्वादर्शनात् । आद्युदात्तश्चेतिसूत्रेलाविषीयेत्यभाष्यकारैरेवांगेहान्तस्यसिद्धं

रामः
४१

तितत्वा चा। यत्तु इह द्वनि कृतो न्तं। किमोत्। इटो तदृत्पत्रायं निषेधो न भवति। अनित्यत्वादस्य विधेरिति। तत्त्वो क्ति वि
रुद्धं। उटो दिति सूत्रेण तकार उच्चारणार्थ इति तेनैवोक्तत्वात्। तस्मादस्तु पेत्य वा दमात्र। यद्वा। उयोदित्यत्रास्य अकार मा
त्रस्य विधेः। अनित्यत्वादिति तु किमोदित्येतत्स्वरमिति व्याख्येये। आदिर्ञिटुडवः। उपदेशे आदिभूता ञि टु डु एते
इतः स्युः। ञिइन्धी। इद्ध। टुवेपृ। वेपथुः। डुवप्। उप्त्रिमं। उपदेश इति किं। ञिकारीयति। आदिः किं। पटूपति। अत्ति हि टथ्यादि
षु पटु शब्दस्योपदेशः। अत्रे न स्संज्ञायां सत्यां अणुः स्यात्। अवयवे ह्यचरितार्थो दित्वं समुदायस्य विशेषकं स्यात्॥ ॥
षः प्रत्ययस्य। प्रत्ययस्यादिः षइत्स्यात्। शिल्पिनि ष्वुन्। नर्तकी। प्रत्ययस्येति किं। षोडश। षष उत्वमित्यत्रोपदेशस्थो
य षकारः। आदिः किं। अविषः। महिषः। अविमहिभ्यां टिषच्। न त्वत्र प्रयोजनाभावादेव षकारस्येत्संज्ञा न भविष्य
ति। ईकारस्य टित्वादेव सिद्धेः। न च पक्षे ङीषर्थः षकारः। ङीषोपि पित्वात्। परस्योदात्तनिवृत्तिस्वरेणोदात्तत्वात्। सत्यं॥ वि
निगमकाभावेन पक्षे टकारस्यापि श्रवणं स्यात्। चुटू। प्रत्ययाद्यौ चुटू इतौ स्तः। गोत्रे कुंजादिभ्यश्च्फञ्। कौंजायनाः।
ञ्यस्येयादेशं वक्ष्यति। जस्। ब्राह्मणाः। कस्योनादेशं वक्ष्यति। सोस्याभिजन इत्यधिकारे शुण्डिकादिभ्यो ञ्यः। शौं
डिक्यः। चरेष्टः। कुरुचरी। टस्यैकादेशं वक्ष्यति। लशक्वतद्धिते। सप्तम्यां जनेर्डः। उपसरजः। ढस्येयादेशं वक्ष्यति। धनगणं लब्धेत्यनु

स्तोल्लक्षे

शा·कौ· ४२ २६१

वर्त्तमानेऽन्नास्मः। अन्नंलब्ध्वा आन्तः खुटुषा। प्रत्ययस्येति कर्त्तव्ये योगविभागादनित्यमिदं। तेन केशवंचुचुः। क्रोशाच्चणाइत्यत्र चु
कारस्येत्संज्ञा नास्त्याहित्यस्याचित्त इत्येतोदान्तः स्यात्। पित्करणात्पर्यायार्थं स्यात्। अवोकुयरश्चेत्यतो अवादित्यनुवर्त्तमा
नेन तेनासिकायाइतिटीटच्।। अवटीटः। यद्वाच्चुचुचेराप्टीटचोयादयः।। लोपोव्योर्वलीतियलोपइतिव्याख्येयं।। ।।लश
क्वतद्धिते। तद्धितभिन्नेप्रत्यये आदिभूतालशकवर्गाइतः स्युः। ल्युट्। भवनं। कर्त्तरिशप्। भवति। क्तक्तवतूनिष्ठा। भूतः
भूतवान्। प्रियवशे वदः खच्। प्रियंवदः। ग्लाजिस्थश्चग्स्नुः। जिष्णुः। भंजभासमिदो घुरच्। भगुरं। ङे। हरये। अतद्धि
तेकिं। चूडालः। प्राणिस्थादातोलजन्यतरस्यां। लोमशः। अत्रप्रयोजनाभावान्नेत्संज्ञेतपिस्त्रवचं। करिणिका। करणिललाद
त्कनलंकारेइतिभवार्थेकन्। अत्रकिंतिचेतिवृद्धिःस्यात्। रूपंचनसिध्येत्। इरउपसंख्यानं। रुणद्धि। अथवारेफोहलन्त्य
मितीत्संज्ञः। इकारस्तूपदेशेजन्तुनासिकइतिस्यादेतत्। एवंसतिइदित्वान्नुम्स्यात्।। नवतत्रकुंभीधान्यन्याय आश्र
यितुंशक्यः। नंदतीत्याद्यव्याप्तेः।। सत्यंभिदादिषुप्रभृतीनां नकारपाठोज्ञापकः। अंतेदितामेवनुमइति।। यद्वा गो।पा
दांतइतिसूत्रादंतग्रहणमनुवर्त्यविष्यते। तेच्चावश्यमनुवर्त्यंचनिजोनुम्माभूदिति। अथवानहशाइतिज्ञापको
नभविष्यति। सतिहिनुमिरुधपधत्वाभावादेवक्सस्योपाप्तेः किंतन्निषेधेन। यद्वा। इदितोवेतिज्ञापकात्समुदाय

९२ रा·म· ४२

स्येत्संज्ञा॥ अवयवे अचरितार्थस्य स्वरितत्वस्य समुदायविशेषकत्वात्स्वरितेत्त्वप्रयुक्तमात्मनेपदं। तेन रुंधे इत्यादिसि
द्धं। तस्य लोपः। तस्येतो लोपः स्यात्। तस्य ग्रहणं सर्वलोपार्थं। त्रिदुडुनामलोंत्यस्य माभूत्। नानर्थकेलोंत्यविधिरिति
तु नास्ति। अलोंत्यात्पूर्व उपधेति सूत्रे तस्यग्रहणाख्यानात्। यथासंख्यमनुदेशः समानां। समसंख्यानां संबंधो यथा
क्रमं स्यात्। नंदिग्रहिपचादिभ्यो ल्युणिन्यचः। नंदनः। ग्राही। पचः। समूलाकृतजीवेषु हन्कृञ्ग्रहः। समूलघातं ह
न्तीत्यादि। अत्रानुवाद्ययोरपि धीत्न्पपदयोर्यथाक्रमं बोध्यं। स्यादेतत्। विदिभिदिछिदेः कुरजित्वरेतच्छीलाघ
र्थत्रयेण यथासंख्यं प्राप्नोति। एवं ख्यात्यान्ङसिङसोरित्यादावपीति चेत्। अत्र भाष्यं। स्वरितेनेत्यपकर्ष्यते। तेन स्वरि
वा५ तत्वाभावान्नेह यथासंख्यमिति॥ प्रतिज्ञास्वरिताः पाणिनीयाः। स्वरितत्वाभावादेव कर्तृकर्मणोश्च भूकृञोरिति सूत्रे
न यथासंख्यं नाडीमुष्ट्योश्चेति सूत्रे तु यथासंख्यं भवत्येवेति भाष्यं वृत्तिकारस्तु कर्तृकर्मणोश्च नाडीमुष्ट्योश्चेति
सूत्रद्वयेपि भाष्यविपरीतं वदन्नुपेक्ष्यः॥ नाडीमुष्ट्योश्चेति सूत्रे यथासंख्याभावपरं भाष्यमपि पूर्वापरविरोधाच्चिं
त्यं। एतेदेव वामनतांत परे सन्नत्र वृत्तेरालंबनमस्तु। कर्तृकर्मणोरित्यत्र तु वृत्तिश्चिंत्यैवाविशेषाद्यशः आदेर्भगा
घञ्जुवावितरत्रापि स्वरितत्वादेव न यथासंख्यं॥ इह सूत्रे भाष्ये वृत्तौ चेत्यस्पष्टं। चतुर्थे तु वृत्तिकारोप्यागमभज

86

७

खचेलि।१

शा॰ कौ॰ ४३

२६२

ताममाघलितिं॥ स्वरितेनाधिकारः। इत्थंभूतलक्षणे तृतीया। अधिकारो विनियोगः। स्वरितत्वयुक्तं शब्दस्वरूपमधिक-
तं बोध्यं। प्रत्ययः। परश्चेत्यादि यथा। प्रापरोऽन्तरत्रोपस्थितिः। क्वचित्तु पूर्वत्रापि। तदुक्तं। आतिङस्तूभयोर्योगयोः शेष
इति। कियद्दूरमधिकार इत्यत्र तु व्याख्यानं शरणं। यथा आतृतीयाध्यायात् धात्वधिकारो न तु आम्लादेशोऽप्येवं।
तथा आ सप्तमाध्यायपरिसमाप्तेरङ्गाधिकारो न तु प्रागभ्यासविकारेभ्य एवेत्यादि। यद्वा। स्वरिते इति सप्तम्यन्तं। तेन त-
स्मिन्नदृष्टे अधिकारो निवर्त्तेत इत्यर्थः। कः स्वरितोऽधिकारार्थः कश्चैतन्निवृत्त्यर्थ इत्यत्र तु व्याख्यानमेव शरणं। नन्वेवं व्या-
ख्यानादेवानुवृत्त्यननुवृत्ती स्तां किमनेन सूत्रेण। सत्यं। अर्थान्तरराशिसंग्रहीतुं सूत्रं कृतं। तथा हि। स्वरितेनाधिका-
ररूपोऽर्थो [illegible]॥ गोस्त्रियोः इत्यत्र च स्त्रीशब्दः स्वर्यते। तेन गोटाङ्ग्रहणं कृन्निवृत्त्यर्थमिति न वक्तव्यं। किं चात्र-
धिकं कार्यमधिकारः। गोणोऽपि शास्त्रप्रवृत्तिरित्यर्थः। तथा च गोणमुख्यन्यायोऽपत्र नेष्यते अपादानाधिकरणादौ त-
त्र स्वरितः पाठ्यः। अपि चात्राधिककारः कृतिरियं। यत्पूर्वः स न परं बाधते। तथा च पूर्वविप्रतिषेधाः संगृहीता भवन्ति।
तत्र तत्र स्वरितपाठेनैव गतार्थत्वादिति दिक्॥ ॥इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य तृतीये पादे प्रथममाह्निकं॥ ॥ रामः
अनुदात्तङित आत्मनेपदं। अनुदात्तेत्काद् उपदेशे यो ङित् तदन्ताच्च धातोर्लस्थाने आत्मनेपदमेव स्यात्। एधते। स्पर्धते।

४३

बोभूयते। आनीयतो कथं नहि शिनेड् इत्यादि। ङिद्वद्भावयमिति चेत्सत्यं। व्यपदेशिवद्भावो बोध्यः। उपदेशो किं। चुकुटिषति।
गाङ्कुटादिभ्य इति सन आर्धधातुकत्वे ङित्त्वं। धातोरिति किं।। अचुकुटत् अदुद्रुवदिति ङिद्भावमङ्चङ्भ्यां माभूत्।। कथमु
न्धीतोरिति ~~[illegible]~~ लभ्यते इति चेन्न। भूवादिसूत्रान्मण्डूकप्लुत्यानुवृत्तस्य धातवइत्यस्य विभक्तिविपरिणा
मात्। सादृश्यमात्रेण परिणाम व्यवहारो वस्तुगत्या तु योग्यशब्दान्तरमेव संनिहितं भवतीति कैयटः। यद्वा। आत्मने
पदे नैव लकारस्याधातोः आक्षेपः। इकोझल् इत्यत्र सनो धातोराक्षेपवत्। अनेन एव ङितान्तस्य विशेषणात्त्रदन्तविधि
र्व्याख्यातः। चित्रीयते इत्यादौ तु अवयवे अचरितार्थेन ङकारेण व्यज्जन्तस्य विशेषणं तन्तोव्यपदेशिवद्भावान्ङि
दन्तमेति दिक्। एतेन चिनुतः स्तुनुत इति व्याख्यातं। यत्तु नञ्डिः तीवडि दृरिति आरब्धमाश्रितस्तस्मा बाधनं।। नदापात
ति४ तः। पचेतेड् इत्यादौ वा नोडि तङ्डूया देशाभावप्रसंगात्।। ननु हृद्भः स्यसनोरिति सूत्रे स्यग्रहणे न विकरणेभ्यो नि
यमो बलीयानिति ज्ञापितत्वाच्चङ्डोश्चिनुत इत्यादौ चानुपपत्तिरेव नास्तीति चेत्। उपजनिष्यमाणेनापि ङिता प३
उपसंजातनिमित्तस्यापि परस्मैपदस्य बाधापत्तेः। नियमो बलीयानित्यस्यापि प्राञ्जिकत्वाच्च। वृद्भ्यः स्यसनोरिति
स्य विकरणव्यवधानेपि नियमप्रवृत्तिरिति ज्ञापकतायाः अपि स्तुवत्वात्। गादेः शिदिति सूत्रे भाष्यकैयटयो

श. कौ.
४५

२६३

रिदं स्पष्टं । तस्माद्यथाव्याख्यातमेवमनोरमं । हरदत्तस्तु ङित इत्येव व्याख्यत् ।। धातोरिति नापेक्ष्यते । नियमो बलीयानित्यत्र श्य
णाच्छब्दः । तेन न दोषः ।। न च भाविना ङिता बाधः ।। परत्वात्तरस्मैपदस्यैवोचितत्वादिति तस्याशयः ।। उभयथापि यङ्यङो ङित्त्व
स्य गुणनिषेधे चारितार्थतामाशंक्य यङः प्रागनुदात्तमकारं प्रश्लिष्य जुंचंक्रम्य दंद्रम्येति ज्ञापकाद्घुङ्भावं वदन्तः इयङः आ
गिकारमीकारं चा प्रश्लिष्य आघे अंतेदित्वाभावान्न नुम् द्वितीये एकाच इत्यनुवृत्तेः श्वीदितो निष्ठायामितीनेन निषेध इ
ति केचित्प्रयतन्तः परास्ताः ।। स्यादेतत् । यङ्लुक्यपि सर्वत्राति व्याप्तिः ।। प्रत्ययलक्षणेन ङिदन्तत्वादिति चेन्न । ङित्त्वस्य प्रत्ययाप्र
त्ययसाधारण्यात् [illegible]या स्तुहि पदित्यत्रेत्तोर्मन्तसीड् इति स्वरस्यैवात्वसंतस्येति दीर्घस्यैव चेह । आत्मनेपदस्याप्रवृत्तेरिति निष्कर्षः
।। प्रांचस्तु बोभूतु तेतिक्ते इत्यत्र निजेर्यङ्लुगन्तादात्मनेपदविधानं ज्ञापकं यङ्लुगन्तात्प्रत्ययलक्षणेनात्मनेपदं ने
ति । नन्वेवमपि पास्पर्धीतीत्यादावात्मनेपदं दुर्वारं स्पर्धेरनुदात्तेत्वात् । न चेदं प्रकृत्यंतरमिति वाच्यं । द्विः प्रयोगो द्विर्वचनं षा
ष्ठमिति वक्ष्यमाणत्वात् । तत्पं । श्निपाशपेत्यादिना निषेधो बोध्यः ।। अनुबंधेन [illegible] ईशो हि द्विधा । क्वचित्साक्षात् । शीङः सार्वधा
तुके गुणः । शीङो युङिति यथा ।। अनुदात्तेत इत्यादौ तु अनुबंधत्वेन । यत्र तु नोभयथापि निर्देशस्तत्र बलवत्येव । अग्रोङो यमहनः ।।
भावकर्मणोरित्यादि यथा ।। नन्वाङ्ङ्जिकयं नानुबंधनिर्देश इति चेन्न । प्रकृतिग्रहणे यङ्लुगन्तस्य ग्रहणमित्यस्य ह्ययमेप

राम:
४४

बो ३ नि ३

वादः॥ तेन प्रकृतेर्यत्रानुबंधेन निर्देशः स एवास्य विषयः। अत एव चेचिन्नः मरीमृज्य इत्यादौ क्ङिति चेति प्रवर्त्तत एवेति दिक्॥
अथ कथं स्पर्धायां नागः स्पर्धति कलभेभ्यः परिभवमिति॥ अत्राहुः आधृषाद्वेति विकल्पितणिचः स्पर्धेरिदं रूपं॥ यद्वा॥
च क्षिङो ङित्करणमनुदात्तेत्त्वलक्षणस्यात्मनेपदस्यानित्यत्वं ज्ञापयति। स हि अनुदात्तेत्॥ विचक्षणः प्रथयन्नित्याद-
वनुदात्तेत्त्वस्य हलादेरिति दर्शनात्॥ न चायं ल्युट्। लित्स्वरापत्तेः। अतो दान्तस्य च पठ्यमानत्वादिति॥ [illegible]
एतेन स्फायन्निर्मोकसंधीति मुरारिप्रयोगो व्याख्यातः। स्यादेतत्। लस्य तिबादयः। लटः शतृशानचौ। लिटः कानज्वा
क्वसुश्च। लृटः सद्वेत्यात्मनेपदपरस्मैपदयोर्विहितत्वादितरत्र आरंभाप्राप्तदपरिसमाप्तेः प्रकरणं किमर्थमिति चेन्न। निय-
मार्थमित्यवेहि। अत एवानुदात्तङित आत्मनेपदमेवेति व्याख्यातं। सोयं प्रकृतिनियमः। उत्तरसूत्रे च भावकर्मणोरात्म-
नेपदमेवेति अर्थनियमः॥ यत्रैवकारस्ततोन्यत्रावधारणमिति सिद्धांतात्। तथा हि। तदसंबध्यसंबंधो व्यावृत्तिः सै-
वावधारणं। व्यापकत्वद्योतके वशब्दसंबद्धभिन्नगं॥ न चास्मिन्नयं ज्ञे अनुदात्तेत्स्वस्थितिभ्यः परस्मैपदं माभूत् आत्मने-
पदं त्वनियतत्वात्तदन्नीत्यादावपि स्यादिति वाच्यं। शेषात्परस्मैपदमेवेति [illegible] नियमात्॥ ननु तत्र कर्त्तरीत्युक्तेः कर्त्तरि पर-
स्मैपदमेवास्तु॥ भावकर्मणोस्तु जागर्यते अघतेइत्यादौ परस्मैपदं दुर्वारमेवेति चेत् न॥ भावकर्मणोरात्मनेपदमे

२४

90

त्य १

शा.कौ.
८५
२६४

वेतिनियतत्वात्॥ अस्तुवाप्ययंनियमः॥ आत्मनेपदं अनुदात्तङित एव॥ भावकर्मणोरेवेति॥ नचैवं अनुदात्तेत्प्रभृतिभ्यः परस्मै
पदप्रसंगः। परस्मैपदस्यापि शेषात्कर्तरीति नियतत्वात्॥ ननु कीदृशस्तत्र नियमः। कर्तरि यदि परस्मैपदं भवति शेषादेवेति।
शेषाद्यदि भवति कर्तर्येवेति वा। आद्ये अशेषात्कर्तरि माभूत्॥ भावकर्मणोस्तु शेषादशेषाच्च परस्मैपदं दुर्वारं। अन्त्ये शेषाद्भावक
र्मणोर्माभूत्। अशेषात्तु भावकर्मकर्तृषु त्रिष्वपि प्राप्नोति॥ सत्यं॥ योगविभागेन नियमद्वयं बोध्यं। शेषादेव। तत्रापि कर्तर्ये
वेति। तस्मादिह प्रकरणे प्रकृत्यर्थनियमः प्रत्ययनियमो वेति पक्षद्वयमपि स्थितं। स्यादेतत्। विकरणव्यवधाने नियमो न प्राप्नो
ति। तथाहि। विकरणानामवकाशो लादेशभिन्नः। इकश्तिपौ धातुनिर्देशे इति श्तिप्। पाघ्राध्माधेट्दृशः शः। नाछील्यादि
षु चानशः। नियमस्यावकाशः। लिट् लिङ् लुङ् लृङ् स्मः। पस्पर्धे॥ स्पर्द्धिषीष्ट। आस्त। शेते। अजिजुह्वोत्। भिनत्ति भूयादि
त्यादि। एधते स्पर्धते कुरुते निविशते इत्यादावुभयप्रसंगे परत्वान्नित्यत्वाच्च विकरणेषु कृतेषु तैर्व्यवधानान्नियमो न स्यात्।
ततश्च प्रकृतिनियमपक्षे विकरणान्तादुभयप्रसंगः प्रत्ययनियमेपि तुल्यजातीयस्यैव नियमेन व्यावृत्तिः। धातोरनन्तरस्य
लस्य यथात्मनेपदं अनुदात्तङित एव॥ यदि तु परस्मैपदं शेषादेवेत्यादि। तथा च धात्वनन्तरानन्तरत्वाश्रयणादपि विकरणव्यव
धाने नियमाप्रवृत्तेः पदद्वयमपि स्यादेव॥ सत्यं विकरणेभ्यो नियमो बलीयानिति हि ज्ञः स्य सनो रिति स्यग्रहणेन ज्ञाप्यते।

रामः
८५

सं २

।अतो नियमद्वयेऽपि दोषः। तत्रापि अकर्त्रर्थनियमपक्षो बलीयानित्यवधेयं। तत्र हि शेषात्कर्तरीति न वाच्यं। किं तु परस्मैपदमि
त्येव। यत्र तत्त्वात्मनेपदप्राप्तिस्तत्र परस्मैपदमेव स्यात्। प्रत्ययनियमपक्षे तु शेषादिति कर्तरीति च वाच्यं। योगश्च विभजनीय
इति दोषत्रयमधिकं स्यात्। तिबादिवाक्येन सह वाक्यभेदः परिसंख्याप्रयुक्तत्रिदोषता चेति दोषचतुष्टये तु पक्षद्व
येऽप्यस्त्येव। यदि तु तदपि किमर्थं सोढव्यमिति बुद्धिस्तर्हि लस्य तिबादय इत्यनेनैव सहेदं अकरणमेकवाक्यतया वि
धायकमिति व्याख्येयं। अस्मिन्पक्षे शेषात्कर्तरीति कर्त्रर्थमेव। परस्मैपदमात्मनेपदमिति च सूत्रशाटकवद्भावि
नी संज्ञाश्रयणीया। अन्यथा विहितानां संज्ञा संज्ञया च विधानमित्यन्योन्याश्रयः स्यात्। अस्मिंश्च पक्षे विकरणेषु
न कश्चिद्दोषः। लादेशेषु कृतेषु सार्वधातुकत्वमाश्रित्य विकरणप्रवृत्तेः। न च स्यादिषु दोषस्तद्वास्थ्य एवेति वाच्यं।
लमात्रापेक्षतयान्तरंगेषु तिबादिषु कृतेषु लकारविशेषापेक्षतया बहिरंगाणां स्यादीनां प्रवृत्तेः॥ ॥भावकर्मणोः॥
अनयोर्विहितस्य लस्यात्मनेपदं स्यात्। स्तूयते। क्रियते। प्राग्वदेकवाक्यतया विधिः। भिन्नवाक्यतया नियमो वे
ति बोध्यं। नियमोऽपि द्विधा। प्रत्ययनियमोऽर्थनियमश्चेति। न चान्त्यपक्षे कर्मणि घञ् न स्यात्। को भवता लाभो ल
ब्ध इति। अकर्तरि चेत्यस्य त्वपादानादिरवकाश इति वाच्यं। लज्जानीयस्य परस्मैपदस्यैव नियमेन व्यावर्तनात्।

न्याद

स्यादेतत्२१

शा॰कौ॰
४६

२६५

लूयते केदारः स्वयमेवेत्यत्र परस्मैपदं प्राप्नोति। कर्मवत्कर्मणेोत्पनेन हि शास्त्रं व्यपदेशो वातिदिश्यते। तथा च तेन तेन
शास्त्रेण तत्तत्कार्यं कर्त्तव्यं। तत्र कर्मण्यात्मनेपदमित्यस्यावकाशः। स्तुद्धकर्म। कर्तरि परस्मैपदमित्यस्य शुद्धः कर्त्ता
॥ कर्मकर्तृषु नयप्रसंगे परत्वात्परस्मैपदमिति। सत्यं। प्राधान्यात्कार्यातिदेश एवेति आत्मनेपदमेव प्रबोध्यं। पक्षा
न्तरे तु शेषात्कर्तरीत्यत्र कर्तरि कर्मेत्यतः कर्तरीत्यनुवर्त्य कर्त्रैव यः कर्त्ता तत्र परस्मैपदं न तु कर्मकर्त्तरीति व्याख्येयाक
र्त्तरि कर्मव्यतिहारे। विनिमयविषयीभूतायां [illegible] क्रियायां वर्त्तमानाद्धातोः कर्त्तर्यात्मनेपदं स्यात्। व्यतिलुनीते। अ
न्यस्ययोग्यं लवनं करोतीत्यर्थः। परस्परकरणमपि कर्मव्यतिहारः। संप्रहरंते राजानः। व्यात्युक्षीमभिसरणाग्लहाम
दीव्यन्। कर्तृग्रहणमुत्तरार्थं। न गतिहिंसार्थेभ्यः। एभ्यः कर्मव्यतिहारे आत्मनेपदं न स्यात्। व्यतिगच्छंति। व्यतिसर्प
ति। व्यतिघ्नंति। प्रतिषेधे हसादीनामुपसंख्यानं। हसादयो हसप्रकाराः शब्दक्रियाः। व्यतिहसंति। व्यतिजल्पंति॥ हरतेर
प्रतिषेधः॥ संप्रहरंते राजानः। अर्थग्रहणसामर्थ्याच्छब्दांतरनिरपेक्षा गतिहिंसयोर्वर्त्तते तेन इह न। ह्रियते। हरतिस्तूप
सर्गवशाद्धिंसायां वर्त्तते इति न तस्यायं प्रतिषेध इत्याहुः। ततः संप्रहरिष्यतो हृष्टाकर्णी धनंजयावित्यत्र तु योत्स्यमा
नाविति विवक्षितं॥ ननु कर्मव्यतिहारः वहेस्तु नायं प्रतिषेधः। अगत्यर्थत्वात्। प्रापणं हि वहेरर्थः। गतिप्रतीतिस्त्वाद्दे

राम॰
४६

पाताइतरेतरान्योन्योपपदाच्चआत्मनेपदं नस्यात्। परस्परोपपदाच्चेतिवक्तव्यं। इतरेतरस्यअन्योन्यस्यपरस्परस्यवा
व्यतिलुनंति। लौकिकेशब्दव्यवहारेलाघवप्रत्यानादरादितरेतरादिशब्दाव्यतीन्युपसर्गोचिकर्मव्यतिहारद्योतनाय
समुच्चीयंते। तथात्मनेपदमपिसमुच्चीयेतेतिनिषेधोयमारभ्यते। नन्वेवंसंपद्विनिमयेनोभेदधनुर्भुवनद्वयमित्यत्र
तङ्कथंनेतिचेत्। करणविनिमयेसत्यपिक्रियाविनिमयस्याविवक्षितत्वात्। नेर्विशः। निपूर्वाद्विशआत्मनेपदं
स्यात्। निविशते। नेः किं। प्रविशति। कथंतर्हिन्यविशतन्यविक्षतेति। अटाव्यवधानात्। नचस्वागमव्यवधायकमिति
वाच्यं। अंगभक्तस्याटोविकरणानंप्रत्यवयवत्वेपिधातुंप्रत्यनवयवत्वेनव्यवधायकत्वादिति। अत्राहुः। तिबा
दिविधेःप्राग्लावस्थायांधातोरेवाडागमः। लुङ्लङ्लृङ्क्ष्वडुदात्तइतिसूत्रेहिलकारकनिर्देशस्यमाष्यकृतासिद्धवत्सूत्रेप्रत्याख्या
नावसरेवक्ष्यमाणत्वात्। मतांतरेपिलकारविशेषापेक्षत्वादुहिरंगमडागमंवाधित्वालमात्रापेक्षत्वादंतरंगे च
णुतिबादिषुकृतेषुनियमोभविष्यति। विकरणोभ्योनियमोबलीयानितिसिद्धांतात्। अत्रेदमद्यःस्यसनोरिति
स्यग्रहणंज्ञापकमितिबोध्यं। अथेदंज्ञापकंविकरणाव्यवधानेपिनियमःप्रवर्ततेइत्येवपरतयानीयेततथा
यदोषः। अंतरंगत्वात्तिबादिषुसत्सुशब्दांतरस्याप्राप्त्याऽनित्ययोरद्धिकरणयोर्मध्येपरत्वादट्प्रवृत्तेः। ननुवि

श·कौ
४७
२६६

करणाः अह्नंतरात्प्राप्नोन्नहशब्दांतरस्येति चेत्। किं ततः। न हि शब्दांतरस्येति वाचनिकं। किंतु न्याय्योयं। तथा च शब्दांतर
स्य प्राप्नुवतः इव तस्मात्प्राप्नुवतोप्यनित्यत्वं। यद्यपि संबंधितया पूर्वं प्राप्नोति तद्यपि संबंधितया पुनः प्राप्तेस्तुल्य
त्वात्। अत एवोपसर्गनियमे अड्व्यवायेउपसंख्यानामिति वार्त्तिकं प्रत्याख्यातं शदेः शित इति सूत्रे भगवता भाष्य
कारेणेति दिक्। अर्थवद्ग्रहणपरिभाषयानेरुपसर्गस्य ग्रहणात्तेनेह न। मधु निविशंति भ्रमराः। कथं तर्हि इत्युक्ता
मैथिली भर्तुरंके निविशंती मर्यादितिका लिदास इति चेत्। अंगानि विशंतीमिति पाठ इति प्रामाणिकाः। यत्तु पद
संस्कारपक्षे णसमाधानं दुर्घटं चेत्युक्तं तन्न। अपवादविषयपरिहारेणोत्सर्गप्रवृत्तेः। अन्यथा डितिप्रसंगा
त्। वालिप्रायामित्यादेर्वैयर्थ्यापत्तेश्चेति दिक्। परिव्यवेभ्यः क्रियः। एभ्यः क्रीणातेरात्मनेपदं स्यात्। ञित्वादेव सि
द्धे अकर्त्रभिप्रायार्थोयमारंभः। परिक्रीणीते। विक्रीणीते। अवक्रीणीते। पर्यादय उपसर्गा इह गृह्यंते। तं
त्राहत्याद्याश्रयणेन क्रीणातेर्ये पर्यादयस्तेभ्यः क्रिय इति व्याख्यानात्। परस्परसाहचर्याद्वा। तेनेह न। विक्रीणा
सीति। अत्र ह्येकदेशविकृतस्यानन्यत्वात्प्राप्नोति। न चापंविभक्तिविशिष्टस्य विधिस्तस्य विकारो न तु विशब्दस्ये
ति उत्तरसूत्रस्थकैयटवाक्याद्भ्रमितव्यं। विभक्तेर्लोपात्। प्रकृतिभागस्यैवाविकारात्। कैयटस्याप्ययमपरितोषोस्त्येव।

राम:
४७

अतएववव्हसति। पक्षिवाचिनो। विशब्दस्य संभवेत्तु साहचर्यादुपसर्गग्रहणं व्याख्येयमिति॥ ॥विपराभ्यां जेः॥ स्पष्टो
र्थः॥ विजयते। पराजयते। प्राग्वदुपसर्गग्रहणान्नेह। विंजयसि। पराजयति सेना। परा उत्कृष्टा। ननु जेरिति कथं नि
र्देशः॥ प्रकृतिवदनुकरणमित्यतिदेशेन धातुत्वप्राइयङि जियङिव क्तव्यत्वात्। नच नियः क्वियङिति दीर्घस्यावका
शमियङः परत्वाद्धेर्ङीतीति गुणो बाधत इति युक्तं। ह्रस्वेपि पिपूर्वविप्रतिषेधेनेयङ इष्टत्वात्। अत एव क्वियङ
ति निर्दिश्यते। किंच क्वियो दीर्घादिति सूत्रे दीर्घग्रहणमपीह ज्ञापकं। अन्यथा क्वियङिति निर्देशादेव दीर्घस्यनि
र्णये किं तेन। उच्यते। अनित्योयमतिदेशः॥ अतो नेयङ्। अनित्यतायां प्रमाणं तु कालक्सूत्रे एवोक्तं। अविवक्षिता
र्थरूपमात्रानुकरणाद्वा। यत्तु पराजेरसोढ इति सूत्रे इयङः परत्वाद्धेरिति गुण इति हरदत्तेनोक्तं। तच्चिंत्यं। क्वियो दी
र्घादित्येतत्सूत्रस्थभाष्यकैयटस्थ तिग्रंथैस्तत्रत्येहत्यस्वग्रंथाभ्यां च सह विरोधात्॥ आङो दोनास्यविहरणे॥
आङ्पूर्वाद्ददातेर्मुखविकासनादन्यत्रार्थे वर्तमानादात्मनेपदं स्यात्। विद्यामादत्ते। अनास्यविहरणे किं॥ मुखं
व्याददाति। आस्यग्रहणमविवक्षितं। उपेयिवाननाश्वाननूचानश्चेत्यत्रोपशब्दवत्। तेनेहापि न। विपादिकां व्याददाति। पा
दस्फोटो विपादिका। नदीकूलं व्याददाति। पराङ्गकर्मकान्नास्य इति निषेधो नेष्यते। तथा च वार्त्तिकं। स्वांगक

श·को
४८

२६७

र्मकाश्चेति। स्वमंगमिह स्वांगं नत्वद्रवं मूर्त्तिमदिति परिभाषितं। व्याददते पिपीलिकाः पतंगस्य मुखं। कथं तर्हि व्यात्ते
विहगपतिर्मुखं स्वकीयं। कर्त्रभिप्राये भविष्यति। अकर्त्रभिप्रायार्थोऽयमारंभः। एतेन मुखं व्याददाति स्वपितीत्यत्र
सुस्वाव्याददातेइतिव्यत्यासेन प्रयोग इति प्रत्यभावपरीक्षायां वाचस्पतिग्रंथोऽपि व्याख्यातः। आङो दि· द्दि· शिष्टस्य
ग्रहणान्नेह भिक्षामाददाति। अत्र स्मृतावाकाइ इति हरदत्तः। क्रीडोऽनुसंपरिभ्यश्च। क्रीडृ विहारे। अस्मादा
त्मनेपदं स्यादनुसंपरिभ्यः चकारादाङः। अनुक्रीडते संक्रीडते आक्रीडते। उपसर्गेण समासाहचर्यादनोः
कर्मप्रवचनीयान्न। माणवकमनुक्रीडति। माणवकेन सह इत्यर्थः। तृतीयार्थ इत्यनोः कर्मप्रवचनीयसंज्ञा।
समोऽकूजने। संक्रीडति शकटं। मयास्य संक्रीडति चक्रिचक्र इति श्रीहर्षः। कथं तर्हि क्रीडते नागराज इति।
अपप्रयोग एवायमित्याहुः॥ आगमेः क्षमायां। ण्यंतस्येदं ग्रहणं। आगमयस्व तावत्। सहस्व कंचित्कालं। मा
त्वरिष्ठा इत्यर्थः। एतेन यावदागमयतेथ नरेंद्रानिति श्रीहर्षप्रयोगो व्याख्यातः। यावत्प्रतीक्षते इत्यर्थात्। शि
क्षेर्जिज्ञासायां। धनुषि शिक्षते। शिक्ष विद्योपादाने इत्यस्येह ग्रहणं। अनुदात्तेत्त्वादेव सिद्धत्वात्। किंतु शक्तेः
सनंतस्य। सनिमीमेतीसा। धनुर्विषयज्ञाने शक्तो भवितुमिच्छतीत्यर्थः। क्रियैव हि शक्तेरर्थं प्रति विषयतयैवान्वेति

राम·
४८

॥भोक्तुं शक्तो निगंतुं शक्नोतीत्यादिदर्शनात्। भोजनविषयकशक्तिमानिति हितार्थः॥ घटस्वेति तुमुन्। इह तु ज्ञानं विषयः। ज्ञातुमिति तुमुन् प्रयुज्यते। आत्मनेपदेनैव ज्ञानविषयकताया गमितत्वात्। नन्वेवं जिज्ञासायामित्यसंगतं। ज्ञानेच्छाहितदर्थः। लक्ष्ये तु ज्ञाने शक्तेर्विषयः॥ शक्तिस्तु सतनर्थभूतायामिच्छायामिति व्याख्यानात्॥ सत्यं। ज्ञानविशिष्टायाः शक्तेरिच्छाविषयतया ज्ञानस्यापि विषयत्वानपायात्। एतावानेव परं भेदः इच्छा सन्वाच्या। शक्तिस्तु प्रकृत्यर्थः। तस्यास्तु ज्ञानविषयकत्वमात्मनेपदेन द्योत्यते इति। आशिषि नाथः॥ अनुदात्तेत्वादेव सिद्धे नियमार्थं वार्त्तिकं। आशिष्येवेति। नचैवमनुदात्तेत्वं व्यर्थमिति वाच्यं तस्य नीयन इति पुजर्थत्वात्। सर्पिषो नाथते। आशिषि नाथ इति कर्मणि षष्ठी। सर्पिर्मे भूयादित्याशास्ते इत्यर्थः। कथं तर्हि नाथसे किमु पतिं न भूभृतामिति भारविः उच्यते॥ नाधसे इति पाठः। तवर्गचतुर्थस्थाने लिपिप्रमादात् द्वितीयः पठ्यते। अत एव काव्यप्रकाशे चुतसंस्कृतेरुदाहरणं। तत्पल्ली यातिपुंस्त्रिकुंजरकुलं कुंभाभया प्रार्थिनारीनंतामनुनाथते कुचयुगं यत्राहृतं माकथा इति। अनुनाथति स्तनयुगमिति तु पठनीयमिति तत्रैवोक्तं। अत्रापि धकारो वा पाठः। हरतेर्गतताच्छील्ये। गतं प्रकारः। पैतृकमश्वा अनुहरंते। मातृकं गावोनुहरंते। पितुर्मातुश्चागतं प्रकारं संततं परिशीलयंतीत्य

रा॰कौ॰ र्थः॥ ऋतष्वनाइस्तुस्कन्नं तालकः। गततालछील्पेकिं मालुस्तु हरति॥ सादृश्यमात्रमिह विवक्षितं न तु प्रकारताछील्पां किर
४९ तेर्हर्षजीविकाकुलायकरणेषु॥ विक्षेपार्थः किरतिः। हर्षादयस्तु विषयत्वेनोपात्ताः। तत्र हर्षो विक्षेपस्य कारणं जीविका
२६८ कुलायकरणे तु फलं। षष्ठे प्रोद्देशमेवं वा निर्दिष्टं। तेन एषे वार्थे अपाच्चतुष्पादिति सुट् विधीयते। अयस्किरते हृष्टो हृ
ष्टः॥ कुक्कुटो भक्षार्थी श्वा आश्रयार्थी च (हर्षा) दिष्वतिकिं। अपकिरति कुसुमं। इहात्मनेपदस्तु आगमो न भवत॥
हर्षादिमात्रसत्वे तु पर्यपि तङ् प्राप्नोति। तद्विधौ चतुष्पाच्छकुनिकर्तृत्व सालेखनस्य वं निमित्तत्वेनानुपादानात्।
तथापि शब्दशक्तिस्वाभाव्यात्तु ट् समानविषयो यं तङ्। तेन गजोपकिरतीत्येव भवतीत्येके। अत्र मूलं मृग्यं। आ
ङि नुप्रच्छ्योः॥ आनुते। उत्कण्ठापूर्वं शब्दं करोतीत्यर्थः॥ णुस्तुतौ। अदादिः॥ आपृच्छते। प्रच्छ ज्ञीप्सायां। तुदादिः॥ ग्रहि जपे
ति संप्रसारणं॥ शप उपालम्भने। शप आक्रोशे इति स्वरितेत्। तस्मादात्मनेपदमकर्त्रभिप्रायेपि फले वक्तव्यं शपथरूपे र्थे।
देवदत्ताय शपते। त्वत्पादौ स्पृशामि नैतन्मया कृतमित्येवंरूपं शपथं करोतीत्यर्थः॥ श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमान इति संप्रदा
नसंज्ञा॥ ज्ञीप्स्यमाने विवदन्ते। तद्यथा। यस्मा आख्यायते स संप्रदानमित्येके। यत्राख्यायते स इत्यन्ये। कथं तर्हि
नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामीति। अत्राहुः। स्वाशयं प्रकाशयामीत्येताव

रामः
४९

दिहविवक्षितं न तु शपथ इति ॥ समवप्रविभ्यः स्थः ॥ एभ्यस्तिष्ठतेः प्राग्वत् । संतिष्ठते । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते । आ
ङः प्रतिज्ञायामुपसंख्यानं । शब्दं नित्यमातिष्ठते । नित्यत्वेन प्रतिजानीते इत्यर्थः ॥ भाष्ये वृत्तौ च अस्तिं सकारमातिष्ठते
गुणवृद्धी आगमावातिष्ठते इत्युदाहृतं । असाध्यः ॥ आपिशलिर्हि अस भुवीति न पठति किं तु सकारमात्रं । स्नः सं
तीत्युदाहरणं । अस्तिः आसीदित्यादि सिद्ध्येत् तु अजादावागमो प्रतिजानीते । तावेव गुणवृद्धी इति । प्रकाशनस्थे
याख्ययोश्च । तिष्ठतेरेतयोरर्थयोरात्मनेपदं स्यात् । गोपी कृष्णाय तिष्ठते । स्वाभिप्रायं प्रकाशयतीत्यर्थः ॥ श्लाघ
हुङ् इति संप्रदानत्वं । संशय्य कर्णादिषु तिष्ठते यः ॥ कर्णादीन् निर्णेतृत्वेनाश्रयतीत्यर्थः ॥ स्थेयो विवादनिर्णेता ॥ ति
ष्ठतेः अस्मिन्निति व्युत्पत्तेः । वृत्तौ तु तिष्ठत्यस्मिन्निति प्रयुक्तं । तत्र प्रकरणादिना विवादपदनिर्णेतुः प्रतीतिर्न तु शा
ब्दीत्यभिप्रायेण परस्मैपदबोध्यं । कृत्यल्युटो बहुलमिति अधिकरणे अचो यत् । उदोऽनूर्ध्वकर्मणि ॥ उत्पूर्वात्ति
ष्ठतेरनूर्ध्वत्वविशिष्टपरिस्पन्दे वर्तमानादात्मनेपदं स्यात् । उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता ॥ अनूर्ध्वेति किं ॥ ज
वेन पीठादुदतिष्ठदच्युतः । इह क्रियाया अनूर्ध्वत्वं नाम उपरिदेशसंयोगफलकत्वाभावः । यद्यप्युदोऽनूर्ध्व इत्यु
क्ते अनूर्ध्वेन विशिष्टक्रियावाचकत्वं लभ्यते एव धातोः क्रियावाचित्वाव्यभिचारात् तथापि लोकप्रसिद्धपरिस्पन्दात्म

100

श्रा·कौ
५०
२६९
२५

ककर्मपरिग्रहार्थंकर्मपदं। तेनेह न। अस्माद्ग्रामाच्छतमुत्तिष्ठति। उत्पद्यतइत्यर्थः। तथा च उदईहायामिति वार्त्तिकं सोत्र
कर्मपदस्थिद्धार्थकथनपरं॥ ॥उपान्मंत्रकरणे॥ मंत्रकरणं कारकविशेषो यत्र तस्मिन्नर्थे वर्त्तमानादुपपूर्वकात्ति
ष्ठतेरात्मनेपदं स्यात्। आग्नेय्याग्नीध्रमुपतिष्ठते। ऐंद्र्यागार्हपत्यमुपतिष्ठते मंत्रकरणे किं। भर्त्तारमुपतिष्ठति यौवने
न। उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वाच्यं। देवपूजायां। आदित्यमुपतिष्ठते। कथं तर्हि स्तुतं स्तुति
भिरथ्याभिरुपतस्थे सरस्वतीति। देवतात्वारोपाद्भविष्यति महीपतेरिव तां शास्त्राद्धा। संगतकरणे। रथिकानुपतिष्ठते।
उपश्लिष्यतीत्यर्थः॥ गंगा यमुनामुपतिष्ठत इति। मित्रकरणे तु पश्लेषं विनापि भवति। रथिकानुपतिष्ठते॥ अयं
पंथाः स्त्रुघ्नमुपतिष्ठते॥ प्राप्नोतीत्यर्थः॥ वा लिप्सायामिति वक्तव्यं। भिक्षुको ब्राह्मणमुपतिष्ठते उपतिष्ठति वा॥ लि
प्सया हेतुभूतया उपगच्छतीत्यर्थः॥ अकर्मकाच्च। उपपूर्वकात्तिष्ठतेरकर्मकादात्मनेपदं स्यात्। भोजनकाले उपति
ष्ठते॥ सन्निधत्त इत्यर्थः॥ उद्विभ्यां तपः॥ आभ्यां तपतेरकर्मकादात्मनेपदं स्यात्। उत्तपते वितपते दीप्यतइत्यर्थः॥
स्वांगकर्मकाच्चेति वक्तव्यं। स्वमंगं स्वांगं॥ न त्वद्रवमिति परिभाषितं॥ उत्तपते वितपते पाणिं। अकर्मकात्स्वांगकर्म
कादित्युक्तेः स्वमंगं स्वांगमिति व्याख्यानाच्च नेह। देवदत्तो यज्ञदत्तस्य पाणिमुत्तपति। संतापयतीत्यर्थः॥ सुवर्णमुत्तप

रामः
५०

ति। संतापयति विलापयतीत्यर्थः॥ उद्विभ्यां किं। निष्टपति। निसस्तपतावनासेवने इति मूर्धन्यः॥ आङो यमहनः॥ आ
ङ्पूर्वाभ्यामकर्मकाभ्यां स्वांगकर्मकाभ्यां च यमिहनिभ्यामात्मनेपदं स्यात्। आयच्छते। आहते। आपृच्छते पाणिं। आ
हते शिरः॥ नेह परस्य शिरं दं आहंति॥ कथं न हि स्त्री आजघ्ने विषमविलोचनस्य वक्षः इति भारविः। अत्र केचित्। आजेति
पदं छित्वा घ्ना इति भावे क्विपि चतुर्थ्येकवचनान्तमुक्त्वा घ्ने हंतुमाजगामेति व्याचख्युः॥ तन्न। आजेर्लिटि वीभावेन
विवाये इति सिद्धांतात्। अन्ये तु विषमविलोचनस्य समीपमेत्य स्वं वक्षः आस्फालितवानित्यर्थः॥ मल्लो ह्युत्साह
विष्करणाय स्वं वक्षः आस्फालयतीत्याहुः॥ भागवृत्तौ तु प्रमादेवायमित्युक्तं। एवं च मोहादाहध्वं मा रघूत्तम मामि
ति भट्टिप्रयोगोपि चिंत्यः॥ समो गम्यृच्छिभ्यां। संपूर्वाभ्यामकर्मकाभ्यां गम्यृच्छिभ्यामात्मनेपदं स्यात्॥ संगच्छते। स
मृच्छिष्यते। अकर्मकाभ्यां किं॥ ग्रामं संगच्छति। कथं तर्हि तच्चैक्यं समगच्छतेति। आर्षत्वात्। यद्वा चातुर्वर्ण्या
दित्वात्स्वार्थे ष्यञ्। एकं समपद्यतेत्यर्थः॥ विदिप्रच्छिस्वरतीनामुपसंख्यानं। विदेर्ज्ञानार्थस्येह ग्रहणं। परस्मै
पदिभ्यां साहचर्यात्॥ न लाभार्थस्य। स हि स्वरितेत्वादुभयपदी। सत्ताविचारणार्थयोस्त्वनुदात्तेत्वादात्म
नेपदं सिद्धमेव। संविन्ते संविदाते। संविद्रते। संपृच्छते। संस्वरते। अर्तिश्रुदृशिभ्यश्चेति वक्तव्यं। अर्तीति भ्वादि

२६

गो

शा.कौ.
२१
२७०

न१

जुहोत्यादीद्यावपिगृह्यते॥ सर्तिशास्त्यर्तिभ्यश्चेति धातुपाठस्तिनालुप्तविकरणोर्तिः साहचर्याज्जुहोत्यादेरेव ग्रहणं। परस्मैपदे
ष्विति लुङन्तरार्थमनुवर्तमानमपि योगविभागसामर्थ्यादेतत्सूत्रे सर्तिशास्त्यर्तिभ्यश्च इति धातुना संबध्यते। तेन। मासमृत। मासमृषातां
मा समृषत इति भाष्यस्वारस्याद्यभिप्रायेण। समारत समारेतां समारन्त इति त्वर्तिस्तु जुहोत्याद्यभिप्रायेण योज्यं॥ संमृणु
ते। संपश्यते रज्ञासीतिपुरा पि संमृणुमहे इति स्तु रासिप्रयोगस्तु चिंत्यः॥ अकर्मकादित्यनुवृत्तेः॥ वृत्तिकारस्तु समो गम
छिस्वरत्यर्तिश्रुविदिभ्य इति पठित्वा दृशेश्चेति वक्तव्यरूपेण पपाठ॥ तत्र वार्तिकानुपूर्वीभंगे केषांचिदेव सूत्रघटे
पेदृशेश्च तद्दृष्टिकारे बीजं न पश्यामः॥ अथास्मिन्नकर्मकाधिकारे ये सकर्मकास्तानि गमिप्रभृतयस्तेषां कथं अ
कर्मकता। उच्यते। धातोरर्थांतरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया। वहति भारमिति
।प्रापणे सकर्मको वहिः। स्यंदने त्वकर्मकः॥ वहति नद्य इति॥ प्राणविशिष्टधारणं जीवतिराह। गात्रविशिष्टं विक्षेपं चन्
त्यतिः॥ अतोद्यावथकर्मको। प्रसिद्धेर्यथा। मेघो वर्षतीति। कर्मणोऽविवक्षातो यथा॥ हितान्न यः संशृणुते स किंप्रभुः॥
उपसर्गादस्यत्यूह्योर्वेति वक्तव्यं। इकत्र आरभ्याकर्मकादित्यनेन संबध्यते। निरस्यति निरस्यते। संमूहति समूहते। उप
सर्गात्किं। अस्येति। ऊहते। अनुदात्तेत्वादात्मनेपदी। कथं तर्हि अनुक्रमं व्यूहति पण्डितो जन इत्यादि। चक्षिङ उ

राम:
५१

५२

डि॰त्करणेनानुदात्तेत्वलक्षणस्यात्मनेपदस्यानित्यताज्ञापनात्समाधेयं॥ ॥निसमुपविभ्यो ह्वः॥स्पष्टोऽर्थः॥निह्वयते इ
त्यादि। अकर्त्रभिप्रायार्थं सूत्रं। स्यादेतत्। निह्वास्यते इत्याद्युदाहरणमस्तु। न तु निह्वयते इ। आकारांतस्य सूत्रे उपादा
नात्। एकारांतस्य ग्रहणाभावात्। नहि विकृतिः प्रकृतिं गृह्णातीति चेत्। उच्यते। एकारांतादपि कथमभ्युपेयं॥
न हि ह्व इति सूत्रे आकारविशिष्टः पठितः। प्रयोगसमवायिनां वाचकत्वेनेति सिद्धांतरीत्या ह्व इति वा तस्य आकारांतमर्थः
द्धेत्यत्रनांतस्य दधीवेति यदिति हि वांतस्यैव एकारांतेऽपि हानुकार्यः। तस्मान्न किंचिदिहानुपपन्नं। यत्तु न्यासकृतोक्तं
नव्यो लिटीत्यात्वनिषेधके सूत्रे कृतात्वस्य व्यञ्इत्यस्य निर्देशो ज्ञापको हि विकृतिः प्रकृतिं गृह्णातीति॥ सोऽयमस्था
नेसंरंभः। उक्तरीत्या पूर्वपक्षस्य शिथिलत्वात्। एरनेकाचेत्योः स्त्रुपीत्यादावपि विकृतिग्रहणे शिशयिषते इत्यादावपि
यणापत्तेः॥ विकृतेः प्रकृतिग्राहकत्वे विभ्व राजा वित्यत्रापि विभ्वस्य वस्तुराटोरिति दीर्घप्रसंगात्। ॥उदासाहमित्यादे
मूर्धन्यप्रसंगाच्चेति दिक्। स्पर्द्धायामाङः॥ आङ्पूर्वात् ह्वयतेरात्मनेपदं स्यात्स्पर्धायां विषये। मल्लो मल्लमाह्वयते। स्पर्धमा
नस्तत्स्थानं करोतीत्यर्थः। स्पर्धायां किं। पुत्रमाह्वयति। यद्यपि स्पर्द्धायामप्ययं धातुः पठ्यते तथापि आङ्पूर्वस्तत्र न
वर्त्तते किंतु शब्दे। अत एव स्पर्धायां विषये अयं विधिरिति व्याख्यातं॥ ॥गंधनावक्षेपणसेवनसाहसिक्यप्रतिय

मर्थ इत्यपि तुल्यं। प्रक्रियादर्शायां हि एकारांतानुकरणेऽत्व एव शरणादर्शनं तु आकारांतं १

श॰कौ॰
५१
२७१

त्नप्रकथनोपयोगेषु कृञः। एषु सप्तस्वर्थेषु कृञ आत्मनेपदं स्यात् अकर्त्रभिप्रायेऽपि फले। गंधनमिह सूचनं तथा हि। गंध अर्दने अ
र्द हिंसायामिति चुरादौ पाठात्। गंधनं हिंसा। सूचनमपि वधबंधादिकरणात्वाद्धिंसेति स एवेह गंधनशब्दार्थः। उत्कुरुते। सूच
यतीत्यर्थः॥ अवक्षेपणं भर्त्सनं। श्येनो वर्तिकामुदाकुरुते। भर्त्सयतेइत्यर्थः॥ हरिमुपकुरुते। सेवतेत्यर्थः। सहसा वर्तते सा
हसिकः। ओजः सहोंभसा वर्तते इति ठक्। तस्य कर्म साहसिक्यं। परदारान्प्रकुरुते। तेषु सहसा प्रवर्तते इत्यर्थः॥
प्रतियत्ने। एधोदकस्योपस्कुरुते। अवोदैधौद्मेति निपातः। समाहारद्वंद्वः। कृञः प्रतियत्ने इति षष्ठी। उपात्प्रतियत्नेत्या
दिना सुट्। तस्य गुणांतराधानं करोतीत्यर्थः। गाथाः प्रकुरुते। प्रकर्षेण कथयतीत्यर्थः। उपयोगः समीचीनो विनियोगः।
शतं प्रकुरुते धर्मार्थं विनियुङ्क्ते इत्यर्थः। एषु किं। कटं करोति। अधेः प्रसहने। अधिपूर्वात्कृञः। प्रागवदभिभवे त्वम
यांच। षह मर्षणे। अभिभवे चेति पाठात्। ये तु अभिभवे छंदसीति पठंति तेषामपि छंदसीति योगविभाग इति हरदत्तः॥
तमधिचक्रे। अभिभूतवान् सोढवान्वेत्यर्थः। एतेन भवादृशाश्चेदधिकुर्वते परानिति भारविप्रयोगोऽपि व्याख्यातः।
ज्ञमंते इत्यर्थी। तावेः शब्दकर्मणः॥ विपूर्वात्कृञ आत्मनेपदं स्यात्। शब्दश्चेत्कर्मकारकं भवति। स्वरान्विकुरुते। उच्चा
रयतीत्यर्थः। शब्दकर्मणः किं। चित्तं विकरोति कामः। अकर्मकाच्च वेः कृञोऽकर्मकात्प्रागवत्। हीनान्यनुपकर्त्रीणि प्र

पो॰ ४
राम॰
५१

वृद्धीति विकुर्वते ॥ संमाननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषु निञः ॥ एषु द्योतनीयेषु नयतेरात्मनेपदं स्या
त् । उत्संजनज्ञानविगणनव्ययान् नयतेर्वाच्या ॥ इतरे प्रयोगोपाधयः । तथा हि । आचार्यः शास्त्रे नयते शास्त्रीयसिद्धा
न्तानुपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रतिपादयतीत्यर्थः । ते च शिष्याः युक्तिभिर्निश्चीयमानाः संमानिता भवन्तीति तदी
याभिलषितार्थसंपादनात् । तथा चात्र नयतेः प्रापणमेवार्थः ॥ शिष्यसंमाननं तु तदीयं फलं सत्प्रयोगोपाधिः ॥ उत्संज
नो दण्डमुन्नयते । उत्क्षिपतीत्यर्थः ॥ आचार्यकरणे । माणवकमुपनयते । विधिना आत्मसमीपं प्रापयतीत्यर्थः ॥
तत्फलं माणवकसंस्कारः । तत्स्यकर्तृगामित्वाभावादप्राप्तमात्मनेपदं आचार्यकरणे विधीयते । उपनयनपूर्वके
णाध्यापनेन हि कश्चिदतिशयोऽध्यापके जन्यते । स एवाचार्यशब्दप्रवृत्तिनिमित्तं उपनीयदहमाचार्यः स उदा
हृतं इत्यपि अतिशयविशेषपरिचायकं । तथा चाचार्यकरणं फलीभूतं प्रयोगोपाधिः । न च तत्स्यकर्तृगामित्वा
दात्मनेपदं सिद्धमेवेति वाच्यं । नहि तदुपनयनक्रियायाः साक्षात्फलं किंतूपनयनपूर्विकाया अध्यापनक्रि
यायाः ॥ प्रयोगोपाधित्वं तु परंपरया फलीभूतस्याप्यस्तीति दिक् । विनिन्युरेनं गुरवो गुरवोगुरुप्रियमित्यत्र तु
आचार्यकरणस्याविवक्षितत्वान्न तङ् । विवक्षा हि स्वायत्तेत्युपज्ञोपक्रमं तदाद्याचिख्यासायामिती द्यासनाज्ञा

णाने।१ राजदेयं भागं शोधयति निर्यातयतीत्यर्थः। व्ययो धर्मादौ विनियोगः। शतं विनयते २

श·कौ· पितॄंस्तत्त्वं नयते। निश्चिनोतीत्यर्थः। भृतिर्वेतनं। कर्मकरानुपनयते। भृतिदानेनात्मसमीपं प्रापयतीत्यर्थः।। विगणनमृ-
५३ णादेर्निर्यातनं। करं विनयते। धर्मार्थं विनियुङ्क्ते इत्यर्थः। एषु किं। घटं नयति। कर्तृस्थे चाशरीरे कर्मणि।। नियः कर्तृस्थे
२७२ कर्मणि यदात्मनेपदं प्राप्तं तच्छरीरावयवभिन्न एवास्मात्। शरीरशब्देन तदवयवो लक्ष्यते। शरीरतादात्म्यापन्नस्य
कर्तृतया शरीरस्य तत्स्थत्वासंभवात्। अवयवानां तु संबंधविशेषेण तत्स्थत्वसंभवात्। अत एव हि करादिपुरु-
षपृथक्त्वाद्व्याप्यमित्युद्घोषः। क्रोधं विनयते। स्वकीयं क्रोधमपगमयतीत्यर्थः।। क्रोधापनयनफलस्य चित्तप्रसादादेः क-
र्तृगतत्वात् स्वरितञितः इति सूत्रेण सिद्धे नियमार्थमिदं। तेनेह न। गडुं विनयति। कथं तर्हि विगणय्य नयन्ति पौरुषं वि-
जितक्रोधरया जिगीषवः इति भारविः। कर्त्रभिप्रायत्वाविवक्षायां भविष्यति। केचित्तु अपनयने वर्तमानादनेना-
त्मनेपदं विधीयते। इह तु केवलेऽर्थे प्रसृष्टेऽर्थे वा वर्तते। धातूनामनेकार्थत्वादित्याहुः।। वृत्तिसर्गतायनेषु क्रमः।। क्रम
आत्मनेपदं स्यात्। अप्रतिबन्धोत्साहस्फीततासु। वृत्तौ। ऋच्यस्य क्रमते बुद्धिः। न प्रतिहन्यते इत्यर्थः।। सर्गे।। व्याकर-
णाध्ययनाय क्रमते। उत्सहत इत्यर्थः।। स्फुजते हन्ताहार्थतायेनेंद्रलोकावजयाय सृष्ट इत्यादौ प्रसिद्धा।। तायने।। क्र- ग्रामः
मन्तेऽस्मिन् शास्त्राणि। स्फीतीभवन्तीत्यर्थः। तायृ संतानपालनयोरित्यस्मात् त्रुटि तायनमिति रूपं।। उपपराभ्यां।। इत्ना ५३

दिषूपपराभ्यामेव क्रमेरात्मनेपदं स्यान्नान्यपसर्गान्तरपूर्वात्। उपक्रमते। पराक्रमते। आभ्यामेवेति नियमान्नेह। संक्रामति।
वृत्त्यादिष्वित्येव। नेह। उपक्रामति पराक्रामति। आङ उद्गमने। आङ्पूर्वात्क्रमेरुद्गमने वर्तमानादात्मनेपदं स्यात्। आक्रमते
आदित्यः उदयत इत्यर्थः। ज्योतिरुद्गमने इति वाच्यं। नेह। आक्रामति धूमो हर्म्यतलात्। भाष्ये तु हर्म्यतलमिति पठ्यते। तत्रो-
द्गमनपूर्विकायां व्याप्तौ क्रमिरिष्यते न तूद्गमनमात्रे अकर्मकतापत्तेः। कथं तर्हि नभः समाक्रामति चन्द्रमाः क्रमादिति।
उच्यते॥ व्याप्ताविह क्रमिर्वर्तते न तूद्गमे। वेः पादविहरणे। विपूर्वात्क्रमेः पादविहरणे वर्तमानादात्मनेपदं स्यात्। साधु
विक्रमते वाजी। पादविहरणं पादविक्षेपः। यद्यपि क्रमिस्तत्रैवार्थे पठ्यते तथापि धातूनामनेकार्थत्वात्तत्रैवार्थे पादग्रहणं॥ ते
नेह। विक्रामत्यजिनसंधिः। द्विधा भवति स्फुटतीत्यर्थः॥ ॥प्रोपाभ्यां समर्थाभ्यां। तुल्यार्थाभ्यां प्रोपाभ्यां क्रमेरात्मने-
पदं स्यात्। समस्तुल्योर्थो ययोरिति विग्रहे शकंध्वादित्वात्पररूपं। सशब्द एव वा तुल्यार्थो बोध्यः॥ आरंभे अनयोस्तुल्या-
र्थता। प्रक्रमते उपक्रमते। आरभत इत्यर्थः। समर्थाभ्यां किं। प्रक्रामति। गच्छतीत्यर्थः। उपक्रामति॥ आगच्छतीत्यर्थः॥
उपपराभ्यामिति नेह प्रवर्तते। तत्र वृत्त्यादिग्रहणानुवृत्तेरुक्तत्वात्। इह च वृत्त्यादेर्विवक्षणात्। अनुपसर्गाद्वा। अ-
नुपसर्गात्क्रमेरात्मनेपदं वा स्यात्। क्रामति। क्रमते। उपपराभ्यामित्यस्य नियमार्थत्वाद्वृत्त्यादिसूत्रमनुपसर्गविषय

मं३ २३

श.कौ ५४ २७३

कमेवा। तेनहत्यादीनामयं विकल्पः। तस्मादप्राप्तविभाषैवेयं॥ अपह्नवे ज्ञः॥ अपलापे वर्तमानाज्जानातेरात्मनेपदं स्यात्॥
शतमपजानीते। अपलपतीत्यर्थः॥ अकर्मकाच्च॥ अकर्मकाज्जानातेरात्मनेपदं स्यात्। सर्पिषो जानीते। सर्पिषोपायेन प्रव
र्तते इत्यर्थः। ज्ञोविदर्थस्य करणे षष्ठी। अकर्मकात्किं। स्वस्थाने सम[illegible]दितिवत्तुनोक्तस्वरेण पुत्रं जानातीतत्रातिव्याप्तेः।
संप्रतिभ्यामनाध्याने। आभ्यां जानातेरात्मनेपदं स्यादनाध्याने। शतं संजानीते। अवेक्षत इत्यर्थः। शतं प्रतिजानीते। अंगी
करोतीत्यर्थः। अनाध्याने किं॥ मातुः संजानाति। उत्कंठापूर्वकं स्मरतीत्यर्थः॥ अधीगर्थेति कर्मणि षष्ठी। ननु तत्र शेष इ
त्यनुवर्तते। तेनात्र कर्मणः शेषत्वेन विवक्षितत्वादकर्मकाच्चेति पूर्वेणाप्राप्नोति। अत्राहुः। अनाध्यान इति विभज्यते। तच्चो
भयोर्योगयोः शेषः। तेनाध्याने पूर्वेणापि न भवतीति। भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः। एषर्थेषु व
देरात्मनेपदं स्यात्॥ अत्रोपसंभाषोपमंत्रणे धातोर्वाच्ये इतरेऽभ्युपाधयः। भासनं दीप्तिः। शास्त्रे वदते। भासमानो ब्र
वीतीत्यर्थः। भासने हेतुभूतं सद्विशेषणं शिष्यैः स्तूयमानो हि भासते। तथा चोपप्लुपरिशास्त्रार्थप्रतिभासात्स्तुत्युक्ति
निर्वहति। तेजोभंगे तु न शक्नुयाद्धेतुमिति भावः। उपसंभाषोपसान्त्वनं। कर्मकरानुपवदते। उपसान्त्वयतीत्यर्थः। ज्ञाने
शास्त्रे वदते। उक्तिविषयकज्ञानवानिति फलितोर्थः। यत्न उत्साहः। क्षेत्रे वदते। तद्विषयकमुत्साहमाविष्करोतीत्यर्थः।

राम: ५४

अपनय पादसरोजमंकतः शिथिलय बाहुलतां गताहतां। कुचवदमें भुजमाकुलीकृतं इति पूर्वपादत्रयं ५

अत्र विप्रकरणादूपसंवदत इत्यर्थः स्पयत्नः कर्मेत्याहुः विशिष्टोत्र वदतेरर्थ इत्यपि स्तवचः। विमतौ। क्षेत्रे विवदंते। विमत्या
हेतुभूतया नानाविधं भाषंत इत्यर्थः। उपमंत्रणमुपछंदनं। कुलभार्यामुपवदते। स्वाभिलषिते प्रवर्त्तयितुं प्रार्थय
८३ त इत्यर्थः॥ एतेष्विति किं। यत्किंचिद्वदति। व्यक्तवाचां समुच्चारणे। मनुष्यादीनां संभूयोच्चारणे वदेरात्मनेपदं स्यात्। संप्र
वदंते ब्राह्मणाः। देवाः। यद्यपि वदधातुर्व्यक्तायामेव पठ्यते तथापि व्यक्तवाचामित्युपादानसामर्थ्याद्येषां प्रसिद्धतरं व्य
क्तवाक्त्वं त एवेह गृह्यंते। तेन शुककशारिकादीनां समुच्चारणेन भवति। वरतनु संप्रवदंति कुक्कुटाः॥ नन्विह तनुशब्द
स्य स्त्रीत्वे संबुद्धौ चेति गुणेन भाव्यं दीर्घांत्वेन दीलक्षणः कप्राप्नोति। सत्यं तनुशब्दः स्त्रीजातौ केचिद्भिः प्रयुज्यते।
तस्मादूङुतः इत्यूङ्। नेकमिधारयो यमिति हरदत्तः॥ अनोरकर्मकात्॥ अनुपूर्वाद्वदेरकर्मकाद्व्यक्तवाग्विषयकादात्म
नेपदं स्यात्॥ अनुवदते कठः कलापस्य॥ अनुः सादृश्ये। तेन कलापस्येति तुल्यार्थयोगे शेषलक्षणा षष्ठी। अकर्मकादि
ति किं। पूर्वोक्तमनुवदति। व्यक्तवाचामित्येव। अनुवदति वीणा॥ विभाषा विप्रलापे। विप्रलापात्मके व्यक्तवाचां समुच्चा
रणे वर्त्तमानाद्वदेरात्मनेपदं वा स्यात्। विप्रवदंते विप्रवदंति वा वैद्याः। युगपत्परस्परविरोधेन वदंतीत्यर्थः॥ विप्रलापे किं
। संप्रवदंते ब्राह्मणाः॥ व्यक्तवाचामित्येव। विप्रवदंति शकुनयः॥ समुच्चारणइत्येव। क्रमेण संप्रवदंति॥ अवाद्ग्रः॥

शं कौ ५५ २७४

अवपूर्वाद्गिरतेरात्मनेपदं स्यात्। अवगिरते। अवात्किं। गिरति। गरणातेरवपूर्वस्य प्रयोगो नास्ति अनभिधानादिति भाष्यं
समः प्रतिज्ञाने। संपूर्वाद्गिरतेः प्रतिज्ञावर्तमानादात्मनेपदं स्यात्। शब्दं नित्यं संगिरते। प्रतिजानीत इत्यर्थः। प्रतिज्ञाने किं।
संगिरति ग्रासं। उदश्चरः सकर्मकात्। उत्पूर्वात्सकर्मकाच्चरेरात्मनेपदं स्यात्। धर्ममुच्चरते। उल्लंघ्य गच्छतीत्यर्थः। सकर्मका
त्किं। बाष्पमुच्चरति। उपरिष्टाद्गच्छतीत्यर्थः॥ समस्तृतीयायुक्तात्। संपूर्वाच्चरतेस्तृतीयान्तेन युक्तादात्मनेपदं स्यात्। रथे
न संचरते। तृतीयायुक्तात्किं। उभौ लोकौ संचरसि इमं चामुं च देवल। दाणश्च सा चेच्चतुर्थ्यर्थे। संपूर्वाद्दाणस्तृतीयान्तेन यु
क्तादात्मनेपदं स्यात् सा चेत्तृतीया चतुर्थ्यर्थे। दास्या संप्रयच्छते कामुकः। सम्यक्संप्रदानीत्यर्थः। अशिष्टव्यवहारे चतुर्थ्यर्थे तृती
या वक्तव्या। एतच्चानेनैव ज्ञाप्यते। यद्वा इह सूत्रे चेत्यस्य शब्दार्थो निपातानामनेकार्थत्वात्। सा च चतुर्थ्यर्थे भवतीत्यर्थः।
अशिष्टव्यवहार इति तु वक्तव्यमेव। भाष्ये त्विदं सूत्रमपि प्रत्याख्यातं। तथाहि। यो दास्या सह भुंजानस्तस्या दत्तं स्वयं भुंक्ते स्वपच
नं सेव्यदातिं तद्विषये यं प्रयोग इष्यते तत्र सह युक्ते इत्येव तृतीया। कर्मव्यतिहारे तङ्। दानपूर्वके भोगे दाणधातुर्वर्तते इति।
नन्वारभ्यमाणे सूत्रे संप्रयच्छते इत्यत्र कथं तङ्। समइति पंचम्या आनंतर्यलाभात्। अत्राहुः। सम इति विशेषणषष्ठी॥ तेन
पूर्वसूत्रमपश्यन्नेन समुदाचरन्त इत्यादौ प्रवर्तते इति। दास्या संप्रयच्छते इत्युदाहृत्य शिष्टव्यवहारे तु ब्राह्मणीभ्यः संप्रयच्छ

रव्या ४

र्थे ५

राम: ५५

ति ३ अस्वकृतिकारः। पाणिग्रहण एवेष्यते तेनेह न यत्र दत्तस्य भार्यामुप
यच्छति ३

स्वया २

नीति प्रत्युदाहरन्भाष्यकारो व्रीहीनुपयमानेऽप्रमाणं॥ उपाद्यमः स्वकरणे॥ उपपूर्वाद्यमः आत्मस्वीकारेऽर्थे॥ भार्यामुपयच्छते। पत्नी
स्य सतो रूपांतरेणाकरणांतदिह न गृह्यते। किंतु अस्वस्य सतो यत्स्वत्वसंपादनं तदेव। चिंप्रत्यय स्तु सूत्रेन कृतः समर्थ
नाग्रथमाद्वितिविकल्पितत्वात्। तेनेहेन। स्वंशाटकमुपयच्छति। दासीत्वेन रूपेणास्वीकरोतीत्यर्थ इति। एतच्च भाष्य
विरुद्धं। तत्र स्वीकारमात्रे आत्मनेपदस्योक्तत्वात्। तथाच भट्टिः आयुक्त्वा उपायंस्त महास्त्राणि। शस्त्राण्युपायंस्त जित्व
राणि। नोपायंस्त दशाननः। उपायंसत नास्त्रमित्यादि॥ ज्ञाश्रुस्मृदृशां सनः॥ सन्नंतानामेषामात्मनेपदं स्यात्। अपन्ह
वे ज्ञ इत्यादिभिः सूत्रैर्ज्ञानातेरात्मनेपदं विहितं। श्रुदृशोरपि समो गम्यृच्छिभ्यामित्यत्रोपसंख्यानं तेन तस्मिंश्च विषये पूर्ववत्सन्न
न्तेऽपि सिद्धं। विषयांतरे नेन विधीयते। स्मरतेस्तु अप्राप्त एव विधानं। धर्मं जिज्ञासते। पूर्वसूत्रेणाप्राप्तस्यायं निषेधः
अत्रैव सिद्धं। विषयांतरे नेन विधीयते। स्मरतेस्तु अप्राप्त एव विधानं। धर्मं जिज्ञासते। पूर्वसूत्रे सकर्मक विषय
अतेन तस्य विधिर्वा भवति प्रतिषेधो वेति न्यायात्॥ तथाच सकर्मकत्वेऽनिषेध इति फलितं। पूर्वसूत्रस्य सकर्मक विषय
त्वात्॥ अकर्मकात्तु पूर्ववत्सन इत्यात्मनेपदं भवत्येव। अकर्मकाच्चेति सूत्रेण केवलाद्विधानात्। औषधस्यानुजिज्ञासते
त्वात्॥ अकर्मकात्तु पूर्ववत्सन इत्यात्मनेपदं भवत्येव। ... प्रत्याङ्भ्यां श्रुवः॥ आभ्यां श्रुवः सन्नंतादात्मनेपदं न स्यात्। प्रतिशुश्रूषति॥ आशुश्रू
ते। औषधेन प्रवर्तितुमिच्छतीत्यर्थः। प्रत्याङ्भ्यां श्रुवः॥ आभ्यां श्रुवः सन्नंतादात्मनेपदं न स्यात्। प्रतिशुश्रूषति॥ आशु
षति। उपसर्गग्रहणं चेदं परस्परसाहचर्यात्॥ तेनेह न देवदत्तं प्रतिशुश्रूषते। लक्षणेत्थंभूतेत्यादिना प्रतिः कर्म
शुश्रूषते। सुस्मूर्षते। दिदृक्षते॥ नानोर्ज्ञः॥ अनुपूर्वाज्जानातेः सन्नंतादात्मनेपदं न स्यात्। पुत्रमनुजिज्ञासति। अनो
र्ज्ञं। धर्मं जिज्ञासते ५

शकौ
५६
२७५

प्रवचनीयो नोपसर्गः॥ शदेः शितः॥ शितः प्रकृतिभूतो यः शदिस्तस्मादात्मनेपदं स्यात्। शीयते। शीयेते शीयंते। शितः किं। शात्स्य-
ति। अशात्स्यत्। शेघात्कर्त्रीरीति परस्मैपदं। म्रियतेर्लुङ्लिङोश्च॥ शितो लुङ्लिङोश्च प्रकृतिभूतो यो म्रियतिस्तत एवात्मनेपदं
स्यान्नान्यस्मात्॥ तत्र शित्प्रकृतित्वं पूर्वं चछिदुत्पत्तेः प्रागेव योग्यतया बोध्यं। लुङ्लिङोस्तु सत्तामेवोत्पत्तेर्बोध्यं। म्रियते म्रियेत
। म्रियतां॥ अम्रियत अमृत। मृषीष्ट। नियमः किं। ममार मर्तासि मरिष्यति। अमरिष्यत्। ङित्वं तु स्वरार्थं। माहि मृत लुङि ता-
स्यनुदात्तेदिति ङिल्लक्षणः सार्वधातुकनिघातः हि चेति तिङ्घातप्रतिषेधः। पूर्ववत्सनः॥ सनः पूर्वो यो धातुस्तेन तुल्यं सन-
तादप्यात्मनेपदं स्यात्। येन निमित्तेन सन्प्रकृतेरात्मनेपदं विधीयते तदेव निमित्तं सनाव्यवहितं सदप्यात्मनेपदं प्रवर्तयती-
त्यर्थः। इह सूत्रे तेन तुल्यमिति तृतीयान्ताद्वतिर्नतु पंचम्यंतात्। लक्षणाभावात्। यथा च ब्राह्मणेन तुल्यं वेदं धीते इत्यत्र
ब्राह्मणादिवेति गम्यते तथेहापि पूर्वस्मादिवेति गम्यते। ब्राह्मणापादानकेध्ययने ब्राह्मणशब्दस्य लक्षणया ब्राह्मणपादा-
नकाध्ययनेसदृशं वैश्यापादानकाध्ययनमिति क्रियासाम्यदृष्टांते निर्वाहं। अन्यथा वतिप्रत्ययायोगात्। यदाह ते न तुल्यं
क्रिया चेद्वतिरिति। एवं च प्रकृतेपि आत्मनेपदभवनसतुल्यत्वं बोध्यं। तदपि निमित्तसादृश्यात्तद्द्वारकमिति फलितोर्थः। एतेन
शब्दो नित्यः कृतकत्वात् घटवदित्यादिव्याख्यातं तत्रापि भवनक्रियायाः साम्यात्। अन्यथा वत्प्रत्ययासाधुतापत्तेः। अत एव

राम:
५६

बुभुक्षतर

नित्यो न विवृतुमर्हतीति प्रांचः प्रयुंजते। साध्यपदस्य ज्ञाने लक्षणया ज्ञानयोः सामान्यं वा वाक्यार्थ इति वास्तु। सर्वथापि शब्दघटयोः सामानार्थ्यं न तु शाब्दमिति दिक्। आसिसिषते। शिशयिषते। निविविक्षते इत्यादिद् इह तु न भवति। शिशासति मुमूर्षति। न ह्येषां शदिम्रियतिभ्यां क्रि। शितः प्रकृतिः अतो नात्मनेपदनिमित्तं। कृते हि सनि सनन्तमेव शितः प्रकृतिः। शिशयिषते इत्यादौ तु प्रकृतौ ङित्वान्यथानिमित्तातिदेशः संभवत्येवेति वैषम्यात्। नन्वेवमनुचिकीर्षतीत्यत्रातिप्रसंगः। गंधनादेरर्थस्य ञित्वस्य चात्मनेपदनिमित्तस्यातिदेशापत्तेरिति चेन्न। अनुपराभ्यां कृञ इति वचनपर्यालोचनया अनुपूर्वकत्वाभावविशिष्टस्यैवात्मनेपदनिमित्तताव्यवस्थापनात्। अस्तु वा प्राधान्यात्कार्यिस्यैवातिदेशः प्राक्सनो येभ्य आत्मनेपदं दृष्टं तेभ्यः सनन्तेभ्योपि भवतीति। न चैवं शिशासति मुमूर्षतीत्यत्रातिप्रसंगः शदेः शितो म्रियते र्लुङ्लिङोश्चेति सूत्रद्वयेपि सनो नेत्यनुवर्त्य वाक्यभेदेन सनंतान्निषेधात्। जुगुप्सते इत्यादौ तु यद्यप्ययमतिदेशो न प्रोति नित्यसनंततया प्राक्सन आत्मनेपदादर्शनात्तथाप्यनुदात्तङित इत्यनेनैवात्मनेपदं। अवयवे ह्यचरितार्थं लिंगं समुदायं विशिनष्टि सामर्थ्यात्। न चैवं जुगुप्सयतीत्यादावतिप्रसंगः सन्पर्यन्तविशेषणेन चारितार्थ्ये सति ततोऽधिकविशेषणे प्रमाणाभावात्। नन्वेवं गोपयतीति जयतीत्यादावतिप्रसंगः। सन्निधाने भयोकतरद्विशेषणीयं नरस्तत्र नियाम

चोरणं चक्रार चोरणं चक्रे इत्यस्य भ्रमप्रमविप

श॰कौ॰
५७
२७६

कामावादिति॥ अत्राहुः। यन्न निंदादौ सन्निष्यते तदर्थका एवानुदात्तेतः नित्यं सनंताश्चेति। अर्थांतरे तु अननुबंधका एव चु
रादौ पाठ्याः। अन्यथा निंदाद्यमादिभ्योन्यत्र यथाप्राप्तं भवति तथा लडादिरपि स्यात्॥ ॥आम्प्रत्ययवत्कृञोनुप्रयोगस्य॥
आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः। आम्प्रकृतिभूतस्य धातोरिव अनुप्रयुज्यमानात्कृञोप्यात्मनेपदं स्या
त्। ञित्वादेव सिद्धे अकर्त्रभिप्रायार्थमिदं सूत्रं। ईहांचक्रे। नन्वस्य विध्यर्थत्वादिहां चकारेत्यादावपि कर्त्रभिप्राये तङ् प्राप्नोति॥
सत्यं। पूर्ववदित्यनुवर्त्तते। तत्सामर्थ्याद्वाक्यभेदेन नियमोपि क्रियते। पूर्ववदेवात्मनेपदं न तु पूर्वविपरीतमपीति। कृञः किं
ईहामासा ईहांबभूव। इह कृञ्ग्रहणसामर्थ्यात्प्रत्याहारग्रहणं। अतएव च ज्ञापकादनुप्रयोगविधौ प्रत्याहारग्रहणं। प्रोप
भ्यां युजेरयज्ञपात्रेषु॥ प्रोपाभ्यां युजिर्योगे इत्यस्मादात्मनेपदं स्यादयज्ञपात्रेषु। प्रयुंक्ते। उपयुंक्ते। युजिरः स्वरितेत्त्वात् रुधादे
रकर्त्रभिप्रायार्थोयं विधिः। युज समाधाविति दिवादेस्तु नेह ग्रहणं। अनुदात्तेत्वादेव सिद्धेः। सूत्रे युजेरितीकारस्याविवक्षितत्वा
च्च। यज्ञपात्रविषयताया स्तत्रासंभवाच्च। स्वराद्यंतोपसृष्टादिति वक्तव्यं। स्वरो वृत्त्यादिरंतो वा यस्य तादृशेनोपसर्गेण संबद्धादित्य
र्थः। संनिसृष्टस्तु एतद्भिन्नाः सर्वेप्युपसर्गाः संगृहीताः। उद्युंक्ते। नियुंक्ते। अयज्ञपात्रेषु किं। द्वंद्वं न्यंचि [struck through]
[struck through] पात्राणि प्रयुनक्ति। समः क्ष्णुवः॥ संपूर्वात् क्ष्णुधातोः प्राग्वत्स मो गम्यृच्छिभ्यामित्यतो विच्छिद्य पाठः सकर्मकादपि विधा

रामः
५७

नि२३२२

115

नार्थः॥ संज्ञापूर्वकशास्त्रं॥ भुजोऽनवने॥ रक्षणातिरिक्तेऽर्थे वर्त्तमानाद्भुजः प्राग्वत्। भुजो भक्षणे इति वक्तव्ये अवन इति वचनम
र्थान्तरेष्वपि यथा स्यात्। भुजेर्हि पालनाभ्यवहारार्थो विवोपभोग आत्मसात्करणं चार्थः। ओदनं भुंक्ते। अभ्यवहरतीत्यर्थः।
बुभुजे पृथिवीपालः पृथिवीमेव केवलां॥ दिवं मरुत्वानिव भोक्ष्यते महीं। नेह पालनमर्थः किंतूपभोग आत्मसात्करणं वा।
एतेन वृद्धो जनो दुःखशतानि भुंक्ते इति व्याख्यातं। अनवने किं। महीं भुनक्ति। रुधादेरिह ग्रहणं। अवनप्रतिषेधात् पठ
ति हि। संयोगो विप्रयोगश्च तूपक्रमविशेषस्य तिहेतव इति। यथा दोग्ध्री पयस्यो धेनुः शब्दः संसर्गिभिर्विशेषवस्थाप्य
ते। सवत्सा धेनुरानीयतां सकिशोरा सवर्करेति। तथा वत्सा किशोरा वर्करेति गौर्धेनुर्वडवा अजा च क्रमेणानीयते ना
न्यार्थे हापि। तेन भुजो कौटिल्य इत्यस्य तुदादेर्ग्रहणं नेह। विभुजति पाणिमिति॥ ॥णेरणौ यत्कर्म णौ चेत्स
कर्त्तानाध्याने। एवं ताद्रात्मनेपदं स्यात् अनाध्याने अणौ यत्कर्म णौ चेदिति द्वितीयं वाक्यं कर्म इह क्रिया। णौ अ
कर्त्तुरुपात्तया क्रियया सैव चेत्संयते नोचेत्येत्यर्थः॥ स कर्त्तेति तृतीयं वाक्यं॥ अणावित्याद्यनुवर्त्तते। कर्मेह कारकं।
[illegible] शब्दाधिकाराश्रयणात्। णौ चाकर्त्तुरर्थस्य नियतकर्मकारकं स चेत्स्यान्नेत्कर्तृत्यर्थः॥ णौ च संश्चङ्गोरा
नेपदे सिद्धेपि अकर्त्रभिप्रायार्थमिदं सूत्रं। कर्त्रभिप्रायेपि विभाषोपपदेन प्रतीयमान इति विकल्पपरस्मैपदा

वाधनार्थं च यौन चाकर्त्रभिप्राये च विलार्थस्यास्य १
अणावकर्मकादिति परस्मैपदवाधनार्थं च १

२

शा॰कौ॰
५८
२७७

भ्यां पराभ्यां बाधः स्यादिति वाच्यं। पूर्वविप्रतिषेधाश्रयणात्। अत्र च प्रमाणं दर्शयति राजेति भाष्योदाहरणमिति दिक्। उदाहर
णानुकर्त्तृस्य भावकाः कर्त्तृस्य क्रियाश्च। तत्राहिकमेवद्भावो नास्तीति वक्ष्यते। प्रकृतसूत्रेणैव त्वात्मनेपदं। तथाहि। विषय
त्वापन्नुपसर्जनविषयत्वापादनवचनो दृशिः सकर्मकाणामंशद्वयाभिधायिता नियमात्। तत्र धातूपात्तव्यापाराश्रयः
कर्त्ता धात्वर्थभूतव्यापारव्यधिकरणफलशालि कर्म। तथा च पश्यंति भवं भक्ता इति प्रयोगः। चाक्षुषज्ञानविषयं कुर्वंती
त्यर्थः। प्रदानुसौकर्यातिशयविवक्षया प्रेरणांशस्त्यज्यते तदा पश्यति भव इति प्रयोगः। विषयी भवतीत्यर्थः। उक्तं चानि
वृत्तप्रेषणाकर्मस्थक्रियावयवे स्थिते। निवर्त्तमाने कर्मत्वे स्वे कर्त्तृत्वेवतिष्ठते इति। पश्यंतं प्रेरयंतीति णिचि दर्शयंति भक्ता
इति प्रयोगः। पश्यंतीत्यर्थः। उक्तं च। निवृत्तप्रेषणाद्धातोः प्राकृतेर्थे णिजुच्यते इति। ततः पुनरार्थ्यस्य सौकर्यद्योतनार्थं भवि
वक्षायां दर्शयते भवः। विषयी भवतीत्यर्थः। तदिह पश्यति दर्शयतेः समानार्थतया कर्त्तृस्थभावकत्वाच्च कर्मवद्भाव
विरहे प्रकृतसूत्रेणात्मनेपदं। णिचः कतिभूते नहशिनायमेवार्थो द्वितीयकक्षायामुपात्तः स एव चतुर्थ्यामिति स
मानक्रियत्वमस्ति। आरोप्यत्वं कर्म प्रथमकक्षायां तदेव कर्त्तृ। एवमारोहयते हस्तीत्यप्युदाहरणं। आरोहंति हस्तिनं
हस्तिपकाः। न्यग्भावयंतीत्यर्थः। आरोहति हस्ती। न्यग्भवतीत्यर्थः। ततो निवृत्तप्रेषणास्मिन् णिचि आरोहयंति। आरोहं

रामः
५८

स्ति१

तीत्यर्थः ॥ ततः पुनर्णिपर्यन्तागे आरोहयते न गभवतीत्यर्थः ॥ इहापि प्रागवस्थप्रथमतृतीययोर्द्वितीयचतुर्थ्यौ आर्थसाम्या
च्चतुर्थ्यौ कस्मादुदाहरणं ॥ सोयं निवृत्तप्रेषणापक्षः ॥ आ[illegible] न्यग्भावनं कौ हो ॥ शुद्धे प्रतीयते । न्यग्भावनं न्यग्भवनं स्यंपत्ते पिप्रति
पद्यते । अवस्थापञ्चमीमाह । यत्तं तत्कर्मकर्तरि । निवृत्तप्रेषणाद्धातोः प्राकृतेर्थे णिजुच्यते इति । इह विशिष्टवाचकयोः शुद्धरूप
तयोर्वाच्यांशे वाचकभेदाद्धागणयित्वा पूर्वोक्तप्रथमतृतीयकक्षायामवस्थाचतुष्टयं चतुर्थकक्षायां तु पञ्चमी अवस्थेति
ति स्तोकार्थोभिप्रेतः ॥ यद्वा पक्षपतिभवं भक्तो ॥ आरोहति हस्ती न हस्तिपकादि इति च प्राग्वदेव प्रथमकक्षा ॥ ततः । स्तोकर्यद्योतना
र्थकर्मणा एव प्रेषणामध्यारोपणे क्रियते दर्शयति भव ॥ आरोहयति हस्तीति । पश्यत आरोहतं प्रेरयतीत्यर्थः ॥ ततो णिच्
कृति भ्यां पिजन्यां चोपात्तयोर्द्वयोरपि प्रेषणयोर्युगपत्त्यागे दर्शयते आरोहयते इत्युदाहरणं ॥ विषयीभवति न्यग्भवतीति
च पूर्ववदेवार्थः सोयमध्यारोपितप्रेषणापक्षः ॥ इहाध्यारोपितप्रेषणापक्षे दर्शयति भव आरोहयति हस्तीति द्वितीयकक्षा
यामतिव्याप्तिं वारयितुं समानक्रियत्वपदं द्वितीयवाक्यात्तेन प्रेषणाधिक्यान्नातिव्याप्तिः ॥ निवृत्तप्रेषणापक्षे दर्शयतिभ
वमारोहयंति हस्तिनमिति पेवं रूपतृतीयकक्षायामितिव्याप्तिं वारयितुमे[illegible] णो यत्कर्मसर्वैः कर्मकर्तृत्वे तु
रूपं तृतीयं वाक्यं । इह तु अणौ कर्मणो भवेद्धस्तिनोः कर्मत्वमेवेत्तु कर्तृते निनातिव्याप्तिः ॥ अत्र प्राचः । अणौ यत्कर्म

हचर

व

श॰कौ॰
५९
२७८

तिवाक्यं कर्मांतरनिवृत्तिपरं।तथाहि।यत्र दोर्नित्यसंबंधादिइयच्छब्देन तच्छब्द आक्षिप्यते।धर्मांतरस्य चानिर्देशाद्दृष्टेश्च तत्रापि
श्रुतं कर्मत्वमेव विधीयते।तच्च विधीयमानं सामर्थ्यात्स्मेरित्यस्य संनिहितत्वाच्च एयंतावस्थायामेव विधीयते।तच्च एणौ तद्वि
धानं संभवति।अएणौ यत्कर्म तत्त्वनुवादः सामर्थ्यादेव तत्सिद्धेः।तदेवमणौ यत्कर्म तत्तावत्तदेव णौ यत्कर्म णौ चेत्तत्कर्मेत्यर्थःफ
लितः।अनेन च कर्मांतरनिवृत्तिः क्रियते।न त्वणौ कर्मणो णौ कर्मत्वं प्रतिपाद्यते।स कर्तेत्यनेन वाक्येनास्य कर्तृत्वप्रति
पादनात्।एकस्य युगपदेकस्यां क्रियायां कर्मकर्तृत्वयोरसंभवात्।तस्मात्।उद्देश्यप्रतिनिर्देश्यभावाल्लब्धेयमस्य ग्रहे पुनः।तद्धि
वाक्यभेदेन कर्मांतरनिवृत्तावेव तात्पर्यं णौ चेदिति वाक्यांतरं।अणौ यदित्येव।अणौ यत्प्रतिपाद्यं वस्तु तदेव णौ प्रतिपाद्यं चेदित्य
र्थः।इति व्याचख्युः।अत्रेदं चिंत्यं कर्मांतरनिवृत्तिपरव्याख्यानं यद्यपि कैश्चिदाश्रितं तथापि तस्य फलं दुर्लभं।आरोहयमाणो हस्ती
स्थलमारोहयति मनुष्यानित्यस्य व्यावृत्तिः फलमिति चेन्न।तत्र समानक्रियत्वाभावात् सैव चेदिति वाक्यं हि प्रतिपाद्यसाम्या
र्थमिति वृत्तिपदमंजर्योः स्थितं।न चेह तदस्ति।नन्वस्तु वृत्त्यादिमते दोषो या।भाष्यकैयटयोस्तु समानक्रियत्वस्यानुक्त
त्वात्कर्मांतरव्यावृत्तिफलकं वाक्यं सार्थकमेवेति चेन्न।भाष्यमतेऽपि समानक्रियत्वस्य व्याख्येयत्वात्।तस्यानुक्तत्वे प्रत्या
ख्यानतयासंभवत्वात्।अन्यथात्र अध्यारोपितप्रेषणे द्वितीयकक्ष्यायामतिप्रसंगात्।भाष्यवार्तिकयोः कर्मशब्दस्य क्रियापर

राम॰
५९

स्य ३

तयैव व्याख्यातुं शक्यत्वात् अत्र अनुपेत्यापि भ्रमः। मास्तु भाष्यमते समानक्रियत्वं तथापि दर्शयते भृत्यान् राजेत्युदाहरणं व्या
चक्षाणेन कैयटेन अणौ योऽकर्तृकर्मणी तद्भिन्नं कर्म व्यावर्त्यते इति तावत्स्पष्टीकृतं। तथा च मनुष्यान् णिस्या णौ कर्तृत्वप्रागत्यर्थ
दुह रोगौ किमित्वेऽपि दुर्वार आत्मनेपदं। मनुष्यैर्लयोः णौ कर्तृकर्मणोरेवेह कर्मतया तदितरकर्माभावात्। अपि च सकर्तृत्वांशोऽपि
दुह नास्ति। हस्तिनः स्वकर्तृत्वात्। स्यादेतत्। आरोहयमाणाइत्यत्र अणौ कर्मणो हस्तिनः एककर्तृत्वं। स एव च स्थलमारोहय
तीत्यत्रापि कर्तृत्वेति। तदापि न। प्रत्यासत्तिबलेनैवातिप्रसंगभंगात्। तथा हि। एणं तादात्मनेपदं स्यात् णौ यत्कर्म स चेत्कर्तृ
त्युक्ते प्रत्यासत्तेरेतल्लभ्यते। येन णिचा रायं तादात्मनेपदं विधित्सितं तन्नत्प्रकृतौ यत्कर्म स चेत्कर्तृति। इह तु उपायमुपा
धिः कृतमेव तत्रात्मनेपदं। आरोहयमाणा इति। यत्र तु नकृतस्थलमारोहयतीति न तत्रायमुपाधिरस्ति। येनातिव्याप्तिः
स्यात्। यत्तु हरदत्तेनोक्तं। हस्तिपकानारोहयति हस्तीत्यत्र माभूदिति। [illegible]त्रेदं वक्तव्यं। किमिदमध्यारोपितप्रेषणापन्नेदिति
यकर्त्रायामुदाहरणं किंवा निवृत्तप्रेषणापन्नाइति। नाद्यः। णिज्वाच्यव्यापारभेदेन समानक्रियत्वाभावात्। न द्वितीयः।
तत्राद्ययोः कल्पयोरणपन्नत्वात् तृतीयस्याट्युह हस्तिनः कर्तृत्वायोगात्। हस्तिपकानां कर्मत्वासंभवाच्च। तस्माच्चतुर्थ्यापरि
शिष्यते। तत्रापि न्यग्भवतीत्यर्थपर्यवसानेनेकर्मणोनन्वयः स्पष्ट एव। स्यादेतत्। दर्शयते भृत्यान् राजेति नावज्ञाप्य

स्य २

तथ९

120

श·कौ· ६० २७५

स्वीकृतं तत्समर्थनाया। अणौ येकर्त्तृकर्मणी तदितरकर्मव्यवच्छेदोऽभिप्रेत इत्याह कैयटः तस्याप्ययमाशयः अणौ यत्कर्म तच्चेत् क
र्त्तृ इति कर्मत्वतोन्वयत्वं कर्त्तरीत्येतत्प्रथमया विपरिणम्यते। यच्च यच्च यदिति नपुंसकमनपुंसकेनैकशेषः। तेन कर्मकर्त्तृयोर्णौ
कर्मत्वेप्यदोषः। एवं च करेणुरारोहयते निषादिनमिति भाष्यप्रयोगोप्युपपद्यत इति। एवं स्थिते निवृत्तप्रेषणाध्यारोपितप्रेष
णापत्तयोर्द्वयोरपि चरमकक्षायामकर्मकतया भाष्यकैयटादिग्रंथाः सर्वस्वारस्यानन्विताः स्युस्तत्किं हरदत्तं प्रत्येव पर्यनुयोगे
न। एतावानेव हि भेदः। भाष्यमते अणौ येकर्त्तृकर्मणी ति व्याख्यानादुदाहरणमिदं वृत्तिकारहरदत्तादिमते त्वनुदाहरणं। २५
अणौ यत्कर्मेत्येव व्याख्यानादिति। अत्रोच्यते। अनन्वयस्तावद्दुरुद्धरः। बाधे दृष्टेन्यस्याम्यात्किं दृष्टेन दृष्टिबाध्यतामिति न्या
यात्। गमेरप्ययं न घोघोष इत्यत्र गम्भीरनदीप्रहार्थयोर्भेदबोधानंतरं नीरलक्षणायामपि प्राथमिकबोधमादाय गम्भीर
पदस्यार्थस्य वदिहाप्यध्यारोपितप्रेषणापत्तेर्द्वितीयकक्षायां कर्मणापन्विते ततो णिजर्थस्य वक्कर्मणोपि त्यागे णिचः कर्मपद
स्य च प्राथमिकबोधमादाय कथंचित्सार्थक्यं। स्वज्ञाप्यसंबंधो लक्षणोत्पत्त्युपगमात्। एषैवार्थवादेः प्राशस्त्यलक्षणायां गति
रिति कैयटस्योक्तिसंभवो बोध्यः। निष्कर्षस्तु कर्मव्यवच्छेदवाक्यार्थो भाष्यवार्त्तिकयोरनभिमत एव। उक्तरीत्या प्रयोजनाभा रामः ६०
वात्। ग्रंथस्तु कर्मपदस्याक्षिपापरतायां स्तुत्यस्य एवा उदाहरणोपुत्पत्त्या नितादेर विवक्षायां कर्मव्यापारमात्रे विवक्षिते सिद्धम्

वतीत्येवाशयो बोध्यः। स्मरपते नं वनगुल्मः स्वयमेवेति भाष्यदृष्टत्वोर्व्याख्यावसरे एवमिति कर्मणो विवक्षायाः कैयटहरदत्ताभ्या
मुभाभ्यामपि शरणीकृतत्वाच्च। यत्तु सूत्रशेषे कैयटेनैतन्मितस्य विवक्षेति पुनः प्रतिपादितं तद्देवा पातेत इति कृतं स्मात्। न्यस्त
दीनां परित्यागाच्छुद्धान्नेदपरिग्रहात् कर्मवाक्ये च तादृथ्ये वर्णानां सर्वेषु ज्वलं। सादेनते सकर्मकाणां सर्वेषामंशद्वयाभि

ति४

धायित्वाकर्मकेतरि कर्मविवक्षा वाँदिशो देव सिद्धानीक्ष्मूलोदाहरणानि। न चाभ्याणोपितदूषणापह्नेत्यारोहयन्तो हस्तिनः
कर्मत्वाभावात्तमानधातोः कर्मत्वाभावेन पचत्योदनं देवदत्तो राध्यत्योदनः स्वयमेवेति वत्कर्मवक्षा वेनप्राप्नोतीति वाच्यं

स्र६

पविक्लिद्यादिभ्यो वैलेरायस्य दुरुपपादत्वात्। विक्लेदने द्विधा भावनयोरपि कर्तृस्यता पत्तौ कर्मविवक्षा वाति देशस्य निर्विषयता
पत्तेः। तत्र व्यापारांशस्य कर्तृस्यत्वेपि विक्लित्तिं द्विधा भवनरूपे फले कर्मस्येद्ग्रनियदि तर्हि दृशिकृञोरपि विषयत्वन्य
ग्भावौ कर्मस्थाविति तुल्यं। तस्मादिह वैषम्ये बीजं वक्तव्यमिति चेत्। अत्राह भर्तृहरिः। विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थि
ता। क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पितेति। अस्यार्थः। यत्र क्रियाप्रयुक्तो विशेषो दृश्यते। यथा पक्वेषु तण्डुलेषु य
था वा छिन्नेषु काष्ठेषु। तत्र क्रिया स्थिता। तेन पच्यते ओदनः छिद्यते काष्ठमिति कर्मवद्भावः सिद्धः। अन्येषां मते अन्ये
षां धातूनां वा शब्दैरेव क्रियाव्यवस्था। शब्देन कर्तृव्यापारस्यैव प्राधान्येनावगमात् कर्तृस्थतेत्यर्थः। उद्दृश्यतापि केचि

निवृत्तप्रेषणप्रक्रियैव स्ववृत्तित्वरूपसंग्रहात्। अध्यारोपितप्रेषणपक्षपरित्यागेपि तत्त्वभावात्। न च दृशोः कर्तृस्थभा
ववृत्तपारस्य कर्तृस्थक्रियतया कर्मद्वारो न प्राप्नोतीति वाच्यं १

शा·कौ·
६१
२८०

त्कर्मस्थांशस्पर्श। चित्तव्यापारांशस्येतोत्सार्गिकं नियामकं बोध्यं। तदिह दर्शनरोहणाभ्यां विषयेऽभ्युपगम्यते च विशेषानुपलं
भात्कर्तृस्थ एवेह भावः क्रिया च। उद्देशानुरोधाच्च। अहं पश्येयमिति ह्युद्देशः। ननु अयं विषयो भवत्विति। एवमहमुपरि
गच्छेयमित्युद्देशो न तु हस्तिनोऽन्यभावो भवत्विति। उपरिगमनरूप एव च व्यापारः विशेषो रुहेरर्थो न तु अन्यभावनमात्रं। भूमिष्ठे
वृक्षे स्पशाखां हस्ताभ्यामवनमयत्यपि आरोहतीत्यप्रयोगात्। अत एव यद्वितु परं छन्दसीत्यत्र भाष्ये रुहिर्गत्यर्थ इति। अत एव
चारोगोकर्तृरोगीकमित्वं। पचिच्छिद्योस्तु विक्लित्तिद्विधाभवनरूपे विशेषकर्मणि दृष्टः तदुद्देशे चैव च कारकव्यापार इति म
हद्वैषम्यं। एवं च रुह्यते हस्तीति कर्मवद्भावं प्रदर्शयतो भाष्यन्यायविरोधादुपेक्ष्य इति कैयटः। एतेन अधिगच्छति शास्त्रार्थः
स्मरति श्रद्दधाति च। यत्कृपावशात् स्तस्मैन्नमोऽस्तु गुरवे सदेति प्रयोगो व्याख्यातः। न चैवं क्रियते इति न स्यादिति वाच्यं यत्ना
यत्तावदिदं तामेतद्दोषप्रसङ्गेऽपि भूवादिसूत्रस्य भाष्यानुसारेण करोतेर्भूतप्रादुर्भावार्थतामभ्युपगच्छतामस्माकं सर्वसाम
जस्यात्। एवं च कर्तृस्थभावक्रियेषु कर्मवद्भावात्मनेविध्यर्थमिदं सूत्रमिति स्थितं भाष्ये। लावयते स्वयमेवेत्यादौ तु कार्या
तिदेशपक्षपरत्वात्कर्मवत् [illegible] कर्मणोऽतेरवात्मनेपदं। शास्त्रातिदेशे तु भावकर्मणोरित्येतदपेक्ष्य परत्वात्सेरणादिसूत्रे
रात्मवद्येयं। यदि त्वणौ येकर्तृकर्मणाति क्लिन्न कर्मनिवृत्तिर्भाष्यकृतोऽभिप्रेता स्यात्तर्हि सकर्मकाणामयेतत्सूत्रोदाहरणानां

२४
शा·कौ·
६१

पत्नौ कर्मस्याक्रिया अप्युदाहरणं सुः न हि तत्रास्ति देशः सुलभः कर्मवदकर्मकाणामिति वक्ष्यमाणत्वात्। तथा नियमार्थत्व
परिगणनं यच्छ्रिणोः प्रतिषेधार्थत्वमित्यादि भाष्यवार्तिकग्रन्थानामप्यसामञ्जस्यं स्यादित्यादिक। तस्मादिहास्मदुक्तमेव वाक्यार्थत्र
यमुनित्रयसंमतं। जयादित्यन्यासकारहरदत्तकैयटादिसकलग्रन्थकाराणामिह महानेव पूर्वापरविरोधो विपश्चिद्भिरुद्भाव्यः।
अस्मदुक्तिस्तु मात्सर्यमुत्सार्य परिभावनीयेत्यलं बहुना। यत्तु कैरणुरारोहयते निषादिनमिति माघप्रयुक्ते तस्मिंश्च श्रेतिसि
द्धं। एतेन ससंततं दर्शयते गतस्मयः कृताधिपत्यामिव साधुबाधुतामिति व्याख्यातं। बधुतां तं पश्यति तां दर्शयते। यद्वा। बु
धुतां कृताधिपत्यामिव लोकः पश्यति तां दर्शयते इत्यर्थः॥ आद्ये बंधुता अणौ कर्त्री। द्वितीये त्वणौ सा कर्म उभयथापि णौ
कर्मत्वं निर्विवादमेवेति दिक्। णौ रिति किं। आरोहतीति निष्टन्तेः षण्णाम्माभूत्। न च णौ चेदिति वाक्यशेषेः श्रुतत्वा[illegible]देव भ [स्मे]
विष्यतीति वाच्यं। अणाविति तस्यापि श्रुतत्वात्। किंच उत्तरार्थमवश्यं णौ रिति वाच्यमेव। तदिहैव स्पष्टार्थमुक्तं। हेतुमणिजन्त
हरणार्थं च। भीस्मोस्तस्यैव संभवात्। तेन गणयते गणः स्वयमेवेति सिद्धं॥ गणयतिर्हि विभज्य भागशो वस्थापने वर्तते। त
था च कर्मस्थभावकादस्मान्निष्टन्तेः प्रेषणाद्वेतुमस्मो पुनः प्रेषणांशत्यागे सत्यात्मनेपदमिष्टं। णौ रिति हेतुमस्मिंचासन्नि
धानादणाविति अपि तस्यैव ग्रहणाच्चुरादिणौ पत्के मेतत्कर्तृकाद्वेतुमण्यतादपि सिध्यतीति। यत्तु वृत्तिकृता गणयती

शा.कौ.
६२
२८१

त्येवंरूपमवस्थाचतुष्टयेप्युदाह्रियते॥ तत्रसंख्यानिमित्तकस्यपरिच्छेदस्यज्ञानविशेषात्मकतयाकर्तृस्थस्यधातुवाच्यतामाश्रित्य
कर्मवद्भावात्प्रवृत्त्याद्वितीयावस्थायांपरस्मैपदमुपपादनीयं। चतुर्थावस्थायांतुपरस्मैपदमशुद्धमेव। गोरणाविरच्चापिऋणा
वकर्मकादित्यत्रैवहेतुमण्णिचस्यग्रहणस्यन्याय्यत्वात्। तथैवभाष्येस्थितत्वाच्च। भागशोऽप्रस्थापनपरत्वेतुद्वितीयावस्थायामध्या
त्मनेपदमितिविशेषः कर्मवद्भावस्यदुर्वारत्वात्। यद्वि रोगोतुराणांत्रयीत्यादिनिषेधान्नास्तइतिदिक्। गोचेदितिकिं। निवृत्तप्रेषणा
त्स्मो आरोहयतिहस्तिपकाइतितृतीयकक्षायांमाभूत्॥ असतिहिणौचेऊहणोप्युतत्वात् रणावेवकर्मत्वेकर्तृत्वंचलभ्येत। न
चैकस्योभयरूपताबाधितेतिवाच्यं। प्रथमावस्थायांकर्मणो द्वितीयावस्थायांकर्तृत्वस्यनिर्विवादत्वात्। अनाध्यानेकिं। स्म
रतिवनगुल्मंकोकिलः। ततश्चतुर्थावस्थायांस्मरयतिवनगुल्मः उत्कंठापूर्वकस्मृतेर्विषयोभवतीत्यर्थः॥ स्मृत्याध्याने॥
घटादिः॥ ॥ भीस्म्योर्हेतुभये। आभ्यांणिजन्ताभ्यामात्मनेपदंस्यात् प्रयोजकादेवचेद्भयविस्मयौस्तः। सूत्रेभयग्रहणंविस्मयस्या
प्युपलक्षणं। मुंडोभीषयते। भियोहेतुभयेषुगितिषुग्बिभेतेर्हेतुभयइतिवैकल्पिकात्वपक्षेतुभापयते। अत्रषुङ्। त
हिंधावीकारप्रश्लेषात्। जटिलोविस्मापयते। नित्यंस्मयतेरित्यात्वं। आर्तिह्रीतिपुक्। हेतुभयेकिं। कुंचिकयाभापयति। रू
पेणविस्मापयति। इहकरणाद्भयविस्मयौनतुहेतोः। यद्यपिहेतोर्व्यापारेणिज्विधानात्प्रयोजकस्याभावाद्दुर्वारंतथापिहेतु

रामः
६२

125

स्वरूपमेवान्यनि[illegible]रपेक्षं धात्वर्थप्रयोजकं चेदित्यर्थः। विशेषणोपादानसामर्थ्यात्। अत एव मौण्ड्येन भाययतीत्यत्र न मौण्ड्य
स्य धर्मस्य भेदेन विवक्षणात्। उदाहरणे तु तादात्म्यस्य विवक्षणाद्द्वयोरेव भयम्। एतेन मनुष्यवाचा मनुवंशके तु। विस्माय
यन्तीति व्याख्यातं। इह हि न सिंहाद्विस्मयः किंतु मनुष्यवाचेतिकरणात्। अत एवात्र नित्यं स्मयतेरित्यात्वं न। तद्विधानेऽपि भे
तेर्हेतुभये इत्यतो हेतुभयानुवृत्त्या भयग्रहणस्य च स्मयोपलक्षणात्तथा व्याख्यानात्। क्वचित्तु विस्मापयन्तीति तु गागमः पाठः
प्रामादिकः। यद्वा वाक् विस्मापयते। सिंहस्तु विस्मापयमानो वाचं प्रयुङ्क्ते विस्मापयति। स्यन्तात् स्मिच्। वा चेति तु प्रयोज्यकर्तृ
त्रितीया। न तु करणे इति समाधेयम्। गृधिवञ्च्योः प्रलम्भने। प्रतारणार्थाभ्यामाभ्यां स्यन्ताभ्यामात्मनेपदं स्यात्। माणवकं ग
र्धयते वञ्चयते वा।। प्रलम्भने किं। श्वानं गर्धयति।। अभिकाङ्क्षामस्योत्पादयतीत्यर्थः।। अहिं वञ्चयति। वर्जयतीत्यर्थः।।
लियः संमाननशालीनीकरणयोश्च। संमाने [illegible] शालीनीकरणयोश्चकारात् प्रलम्भने वर्तमानात् स्यन्ताल्लीधा
तोरात्मनेपदं स्यात्। लीङ् श्लेषणे दिवादिः। ली श्लेषणे क्र्यादिः। उभयोरपि ग्रहणम्। निरनुबन्धकपरिभाषा तु प्र
त्ययविषयिणी। वामदेवाड्ड्यड्याविति डित्करणेन ज्ञापिता हि सा। ज्ञापकं च सजातीयविषयकमेवेत्युत्सर्गः। संमानने।
जटाभिरालापयते। पूजां समधिगच्छतीत्यर्थः।। अकर्मकत्वाया।। धात्वर्थेन क्रोडीकृतकर्मत्वात् पुत्रीयतीत्यादिवत्।।

श॰ कौ॰
६३
२८२

शालीनीकरणे। श्येनो वर्त्तिकामुदाकुरुते। न्यक्करोतीत्यर्थः। प्रलंभने। बालमुल्लापयते। विभाषा लीयतेरिति णत्वं विधी-
यते। तदस्मिन्विषये नित्यं। अन्यत्र तु विकल्पः। व्यवस्थितविभाषा हि सा। न च लीयतेरिति विहितमात्वं कथं लीनातेः स्यादिति वाच्यं।
लीनातिलीयत्योर्यका निर्देशोयमिति तिङ्न्नात्। संमाननादिषु इति किं। बालकमुल्लापयति। आह्वययतीत्यर्थः। मिथ्यो-
पपदात्कृञोभ्यासे। णयन्तात्कृञो मिथ्योपपदादात्मनेपदं स्यात्। ब्रोनः। पुनः। पदं मिथ्या कारयते। स्वापचारं स्वरादिदुष्टमसकृदु-
च्चारयतीत्यर्थः। नित्यवीप्सयोरिति द्वित्वं तु न भवति। आत्मनेपदेनैवाभ्यासस्य द्योतितत्वात्। करोतिरिह उच्चारणाहत्तिरक-
र्मकः। णयन्तस्तूच्चारणाहत्तिः सकर्मकश्च। मिथ्योपपदात्किं। पदं सुष्ठु कारयति। कृञः किं। पदं मिथ्या वाचयति। अभ्यासे किं। सकृ-
त्पदं मिथ्या कारयति। स्वरितञितः कर्त्रभिप्राये क्रियाफले। स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्क्रियाफले कर्तृगामिनि स-
ति। यजते। स्तुनुते। कर्त्रभिप्राये किं। यजंति याजकाः। स्तुन्वंति दक्षिणादिलभ्यफलं। उक्तं च हरिणा। यस्यार्थस्य प्रसिध्यर्थमा-
रम्यंते पचादयः। तत्प्रधानफलं तेषां न लाभादिप्रयोजनमिति। पचापाकः। षित्वादङ्। केचित्तु प्रयोजकव्यापार एव णिजभि-
धेयस्तद्द्योतकमात्मनेपदमनेन विधीयते। कुरुते। कारयतीत्यर्थः। कारयते इत्यत्र तु प्रयोजकव्यापारद्वयमर्थः। णिजंता-
स्मिंश्च यथा कर्त्रभिप्राय इति सूत्रांशोपि कर्तृपदस्य हेतुकर्तृपरत्वात् कार्थतात्पर्यक एवेत्याहुः। उक्तं च हरिणा। क्रिया-

राम:
६३

वा चं ४

यद्दत्तावाख्याता केश्चित्स्वार्थपरार्थता॥ असती वा सती वापि विवक्षितनिबंधना॥ केषांचित्कर्त्रभिप्राये णिचा सह विक-
ल्प्यते। आत्मनेपदमन्येषां तदर्थाऽकृतिर्यथा। कीर्णीषपचते धत्ते चिनोति चिनुते पि च। आत्मप्रयोगा दृश्यंते येषु राय-
र्थोभिधीयते इति असतीवे तन्नेन कमलवनोद्घाटनं कुर्वते ये इत्यादयः प्रयोगाः समर्थिताः॥ तत्रापि स्वार्थता विवक्षाया
संभवात्। एषु थीसवें कं द्योतकं वा आत्मनेपदमिति मतद्वयसंगृहीतं केषांचिदित्यादिना श्लोकेन चिनोति चिनुते इति चि-
नोति चायृयति चेति क्रमेणार्थः॥ अपाद्वदः। अपपूर्वा द्वदते रात्मनेपदं स्यात्कर्त्रगामिनि क्रियाफले संविधाने वा॥ न्या-
यमपवदते। कर्त्रभिप्राये किं। अपवदति णिचश्च। णिजंतादात्मनेपदं स्यात्कर्त्रगे फले संविधाने वा। कटंकारयते। कथं कत-
ष्मम्रणि। ष्मम्रणिकारयतीति भाष्यसंविधाने इति व्याख्याने भविष्यति। आद्यपक्षे तु कर्त्रगामित्वाविवक्षायां भविष्यति।
अत्र कश्चित्वल्लयते:स्वरितेत्करणाज्ञायकाच्चुरादिणिजंतादिदमात्मनेपदं न भवतीति॥ आह च। स्वरितेत्त्वाहुर्हिः कर्या-
दोलद्धिश्चकम्रुरादिषिणि[?]। चंद्रस्तु णिजे भावपक्षे स्वरितेत्त्वस्य सार्थकत्वान्नोक्तेर्थे ज्ञापकता अत म्रुरादेरप्ययं विधिर्भ-
वत्येवेत्याह॥ मैत्रेयस्तु स्वरितेत्त्वमस्यानाकरमित्याह॥ तदेतद्दूरत्वोपि संजग्राह। एष विधिर्न चुरादिणिजंतात्स्यादिति क-
श्चन निश्चिनुते स्म। आत्मवचोवनकिंचनदृष्टलज्ञायते:स्वरितेत्त्वमनार्षमिति। समुदाङ्भ्यो यमो ग्रंथे॥ एभ्यो यमः आ-

128

शा॰कौ॰
६४
२८३

गवत्कर्तृगे फले तं विधाने च नतु ग्रंथे विषये। आङ्पूर्वकस्य वचनं सकर्मकार्थं। अकर्मके त्वाङो यमहन इत्येव सिद्धं व्रीहीन्सं
यच्छते। भारमुद्यच्छते। वस्त्रमायच्छते।। ग्रंथे किं। उद्यच्छति चिकित्सां वैद्यः। इह ह्यधिगमनपूर्वक उद्यमनं यमेरर्थः।। चि
कित्सा शास्त्रमधिगन्तुमुद्यमं करोतीत्यर्थः। कर्त्रभिप्राये इत्येव। संयच्छति। उद्यच्छति। आयच्छति। अनुपसर्गा[illegible]। अस्मा
त्प्राग्वत्कर्तृगे फले तं विधाने च। अकर्मकाच्चेत्येव सिद्धे वचनमिदं सकर्मकार्थं।। गां जानीते। अनुपसर्गात्किं। स्वर्गं लोकं
न प्रजानाति। कथं तर्हि भट्टिः। इत्यन्यपः पूर्वमवालुलोचे ततोनुजज्ञे गमनं सुतस्येति। कर्मण्ययं लिट्। नृपेणोर्जितश्रीयो
ऽस्य विपक्षिणामादितिजयमंगला। विभाषोपपदेन प्रतीयमाने। स्वरितेत्यनन्तरम् आत्मनेपदं वा स्यात्समीपोच्चारितपदे
न क्रियाफलस्य कर्तृगत्वे प्रतीते स्वरितञित इत्यादि पंचसूत्र्या यदात्मनेपदं विहितं तत्क्रियाफलस्य कर्तृगत्वे उपपदेन द्यो
तिते न प्राप्नोति। उक्तार्थानामप्रयोगात्। तत्राप्राप्तविभाषेयं। उपपदं चेह समीपे श्रूयमाणं पदं। न तु पारिभाषिकं। अ
संभवात्। इह स्वपचं सूत्री अनुवर्त्तते। स्वं यज्ञं यजति यजते वा। स्वं पुत्रमपवदति अपवदते वा। स्वं यज्ञं कारयति कार
यते वा। स्वं व्रीहिं संयच्छति संयच्छते वा। स्वां गां जानाति जानीते वा। शेषात्कर्त्तरि परस्मैपदं। आत्मनेपदनिमित्तहीनाद्धातोः
कर्त्तरि परस्मैपदं स्यात्। याति वाति। कथं तर्हि स्मरामो जुघ्नानां स्तुरमिष्ट तथा राहुतिशतैरिति सौंदर्यलहरी।। सत्यं।।

ऋ॰ २

राम॰
६४

129

रि३

नायं शानच्। किंतु चानश्। एतेन रसमानलारसेनेति माघो व्याख्यातः। अनुपराभ्यां कृञः। आभ्यां कृञः परस्मैपदं स्यात् कर्त्रगे
पि फले गंधनेदावपि। अनुकरोति। पराकरोति। ननु कर्मकर्तर्ययं पि प्राप्नोति। अनुक्रियते। स्वयमेवेति नैष दोषः। कार्यातिदेशप
क्षे कर्मवत्कर्मणोतात्मनेपदेन परेणास्य बाधात्। शास्त्रातिदेशेतु भावकर्मणोरित्यस्य पूर्वत्वात्परेणानेनयद्यपि भाव्यं तथापी
ह कर्तरि कर्मेत्यतः शेषात्कर्तरीत्यतश्च कर्तृग्रहणाद्दयमनुवर्तते तेन कर्त्रैव यः कर्त्ता तत्रायं विधिर्न तु कर्मकर्तरीति बोध्यं। अ
भिप्रत्यतिभ्यः क्षिपः। क्षिप प्रेरणे। स्वरितेत्। अभिक्षिपति प्रतिक्षिपति। अतिक्षिपति। एभ्यः किं। आक्षिपते। कर्तरीत्येव नेह। आ
क्षिप्यते स्तत्रं द्वितीयकर्तृग्रहणानुवृत्तेः कर्मकर्तर्यपि न। प्राद्वहः। वह प्रापणे। स्वरितेत्। प्रवहति। प्रात्किं। आवहते। परेर्मृषः।
मृष तितिक्षायां स्वरितेत्। परिमृष्यति। परेः किं। आमृष्यते। इह परेरिति योगं विभज्य वह इत्यनुवर्तनात्परिवहतीति केचिदिच्छंति। ह५
व्याङ्परिभ्यो रमः। रम क्रीडायां। अनुदात्तेत्। विरमति। आरमति परिरमति। एभ्यः किं। अभिरमते। उपाच्च। उपपूर्वाद्रमः प्रा
गवत्सकर्मकार्थीयमारंभः।। अकर्मकात्तु विभाषा वक्ष्यति। स्याद्वेतत्। उपपूर्वको रमिर्निवृत्तिविनाशयोर्वर्तते। उपरतोध्य
यनात्। उपरता निधेनानीति यथा।। न चानयोरर्थयोः सकर्मकता संभवति। सत्यं। अंतर्भावितण्यर्थोत्रोदाहार्यः।। तद्यथा।
यज्ञदत्तमुपरमति। उपरमयतीत्यर्थः। विभाषाकर्मकात्। उपाद्रमेरकर्मकात्परस्मैपदं वा स्यात्। उपारमति उपरमते वा।

130

शा.कौ.
६५

२८४

व्य ५

निवर्त्तत इत्यर्थः। बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः। एभ्यो णंतेभ्यः परस्मैपदं स्यास्मिन्सूत्रे तस्यापवादः। बोधयति पद्मं। योधयति काष्ठा
नि। नाशयति दुःखं। जनयति सुखं। इहाणावकर्मकादिति न सिध्यति। अचित्तवत्कर्तृत्वात्। इङ्। अध्यापयति। प्रुद्रुस्रुणां निगरण
चलनार्थेभ्यश्चेत्येव सिद्धे यद्यान चलनार्थास्तदर्थं वचनं। प्रावयति। प्रापयतीत्यर्थः। द्रावयति। विलापयतीत्यर्थः। स्रावयति स्पंदयती
त्यर्थः। स्पंदनं द्रवत्वजन्यं चलनं। न चैवं चलनार्थत्वात्सिद्धमिति वाच्यं। द्रवत्वजन्यतावच्छेदकचलनत्वव्याप्यजातिविशेषे शक्ते
तयास्य विशेषशब्दत्वेप्यपर्यायत्वात्। निगरणचलनार्थेभ्यश्च। अभ्यवहारार्थेभ्यः कंपनार्थेभ्यश्च णंतेभ्यः परस्मैपदं स्यात्। नि
गारयति। आशयति। भोजयति। चलयति। चोपयति। कंपयति। सकर्मकार्थोऽचित्तवत्कर्त्रर्थश्चायमारंभः। अदेः प्रतिषेधो व
क्तैइति काशिका। भाष्यकारास्तु गतिबुद्धीति सूत्रे इममर्थं वक्ष्यति। आदयते देवदत्तेन। गतिबुद्धीत्यादिना णौ कर्तुः कर्मसंज्ञा
प्राप्ता। आदिखाद्योः प्रतिषेध इति वचनान्न भवति। कथं तर्ह्यादयत्यन्नं बटुनेति। अकर्त्रभिप्राये भविष्यति। कर्त्रभिप्राये प्राप्त
स्य निगरणचलने त्यस्य ह्ययं निषेधो न तु शेषात्कर्तरीत्यस्य। कथं तर्हि श्रीहर्षः। इमां किमाचामयसे न चक्षुषी विरंचकोरस्य
भवन्मुखस्पृशी इति। न च नायं भक्षणार्थः। न पीयं तां नाम चकोरजिह्वया कथंचिदेतन्मुखचंद्रचंद्रिकेति। पूर्वार्धानुरोधे
न पानार्थत्वादिति वाच्यं। पानस्यापि भक्षणाविशेषात्मकत्वात्। सामान्यग्रहेण विशेषस्यापि ग्राह्यत्वात्। अन्यथेहैव सूत्रे चोपय

राम:
६५

नीत्युदाहरणसंगतेरुपेर्मदगत्यर्थत्वात्॥ इममित्यस्य कर्मत्वासंगतिप्रसंगाच्च। गत्यादिसूत्रेण ह्यत्र कर्मसंज्ञा सा च प्रत्य
वसानार्थतां विना दुरुपपादेति अत एव न पादमीति सूत्रेण ग्रहणं धेट उपसंख्यानं च संगच्छते। अन्यथा पाधेटोर्घ्याचमि
मिवत्यानार्थत्वे न निषेधो व्यर्थः स्यात्। न चैवं बुधयुधादिसूत्रे इङ्व्यतिग्रहणं व्यर्थं। चलनविशेषवाचकस्यापि चलनवाच
कतानपायादिति वाच्यं। तत्र चलनत्वाव्याप्यायां अखंडायां एव जातेः प्रवृत्तिनिमित्ततायाः उक्तत्वात्। णानं तु द्रवद्रव्यस्य ग
८ लाधः करणं। तत्र द्रवद्रव्यांशस्याधःकरणे कर्मीभूतस्याधिकस्याभानेपि भज्यतेरर्थस्याभानं निर्विवादं। यथा मंदगतौ
भासमानायां गतेर्भानं। अधिकं अविष्टनत्वतत्त्वानिःसृतित्यायात्। न च पानत्वमप्यखंडं स्पंदनत्वदिति वाच्यं। तत्सा व
धकानिरुक्तेः। दृष्टांते तु कार्यतावच्छेदकतया तत्सिद्धेरिति। उच्यते। आवामयेति लोटं तेछित्वा त्विं नाचामयेरिति
व्याख्यायां सेइति तु संबोधनं रमयेत्याः। तथाहि। अस्य स्त्री ई लक्ष्मीः तया सह वर्त्तमाना से। तस्याः संबोधनं से। स
लक्ष्मीकेत्यर्थः॥ अणावकर्मकाच्चित्तवत्कर्तृकात्। णेः पूर्वमकर्मकाच्चित्तवत्कर्तृकात् संयगात्परस्मैपदं स्यात्। शेते
कृष्णः तं शाययति गोपी। आरोणोत्कि। आरोहयमाणं प्रयुंक्ते आरोहयते। णेरणाविति सूत्रे उदाहरणत्वेन योकर्मको
निर्णीतस्तस्माद्द्वितीये णौ माभूत्। स हि णावकर्मकः निष्टन्तं प्रेषणव्यारोपितप्रेषणयोरुभयोरपि त्यागभवतीत्य

132

शा॰कौ॰ ६६ २८५

र्थपर्यवसानस्योक्तत्वात् अकर्मकात् किं। कटं कुर्वाणं प्रयुंक्ते कारयते। चित्तवत्कर्तृकात् किं। व्रीहीन् शोषयति। अत्र केचित्। चुरादि
ण्यन्ताद्धेतुमण्णौ अणावित्यस्य प्रत्युदाहरणमाहुः। तन्न भाष्यादिविरुद्धं। तथा हि। बुधादिसूत्रात् इह णौ ग्रहणमनुवर्तते।। बु
धादिभ्यश्च हेतुमण्णिरेव संभवतीति निषेधोपि तत्र सन्नेतस्यैव न्याय्यः।। तेन तु चुरादिण्यन्तादपि हेतुमण्णौ भवत्येवेदं परस्मैपद
मिति भाष्ये स्थितं।। यत्तु रूपयन्तं प्रयोजयति रूपयते इति केनचित्प्रत्युदाहृतं। तन्न चुरादिण्यन्ताद्धेतुमण्णिं च विधायतस्य च सौ
कर्यातिशयात्प्रयोजकव्यापाराविवक्षायां प्रयोज्यव्यापारमात्रवृत्त्या अकर्मकतामाश्रित्य ततो द्वितीये हेतुमण्णि विवोढव्यं।
अत एव प्रयोजयतीत्यादाविह हि पुजिनाणिचा च प्रयुक्तिद्वयं वदता हेतुमण्णिद्वयं सूच्यते। अन्यथा प्रयुंक्ते इत्येवादर्श
यिष्यत्। एवं च चेतयमानं प्रयुंक्ते चेतयते इति केषांचित्प्रत्युदाहरणं यद्वृत्तिकृता दूषितं तत्समर्थितं भवति।। स्वार्थणि
न्तादेकस्मिन्नेव हेतुमण्णौ तु रूपयति चेतयतीत्येव बोध्यं।। न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः।। एभ्यो णिजन्ते
भ्यः परस्मैपदं न स्यात्। तत्रापि वृत्तिर्निगरणार्थः। इतरे चित्तवत्कर्तृकाः।। नृतिश्चलनार्थोपि। तेनाणावकर्मकादिति निगरणा
चलनेति च प्राप्तमिह निषिध्यते। पा पाने पाययते। पा रक्षणे इत्ययं तु न गृह्यते लुग्विकरणायोरलुग्विकरणस्येति परिभाष
णात्। तेनाणावकर्मकत्वविवक्षायां परस्मैपदं भवत्येव पालयति। पा नेर्लुग्वक्तव्य इति लुगागमः।। दमु उपशमे। दमयते।

राम ६६

133

आङ्पूर्वो यम उपरमे। आयामयते नकम्पमिच मामित्यतो नेत्यनुवर्त्तमाने यमोऽपरिवेषणेऽइत्यनेन मित्त्वप्रतिषेधः। उक्का
र्यविशिष्टस्योपादानमुपसर्गइति पत्यर्थो। तेनान्यान्विता दाकारात्परस्पन। आङ्पूर्वो यस्तु प्रयत्ने। आयासयते। परिपूर्वो मुहवैचि
त्ये। परिमोहयते। रोचयते। नर्तयते। वादयते। [illegible] वासयते। वस आच्छादने इत्यस्य लुग्विकरणत्वाद्ग्रहणं। पादिषु धेट उ
पसंख्यानं। धापयेते शिशुमेकं समीची। प्रत्यवसानार्थत्वाच्छिशुमित्यस्य कर्मत्वं। समीचीइति प्रथमाद्विवचनं। वाच्छन्दसी
तिपूर्वसवर्णदीर्घः। स्यादेतत्। वत्सान्पाययति पयः दमयंतीकमनीयता मदं। अवीवदद्वीणां परिवादकेन। निन्दावासयेती शि
त्यादिप्रयोगास्तर्हि कथमिति चेत्। अत्राहुः। कर्त्रभिप्राये फले आत्मनेपदस्यापवादोयं हि तत्परस्मैपदं तस्यैवायं निषेधः।। यत्वकर्त्र
भिप्राये शेषादिति परस्मैपदं तन्निर्बाधमेवेति। वाक्यशेषः। क्यषन्तात्परस्मैपदं वा स्यात्। लोहितायति लोहितायते। नन्विह परस्मै
पदाभावपक्षे लकारस्य अयेतनत्वात् आत्मनेपदं। न स्वप्रकृतिविशेषेऽर्थविशेषे च नियतत्वात्तत्पूर्वसूत्रेणावदपवादमपनयता
प्रतिषेधेनात्मनेपदं प्रवर्त्यतेइति निर्विवादं।। स एव च प्रति[illegible]षेध इहानुवर्त्यते। तदनुवृत्तिसामर्थ्याच्चेह आत्मनेप
दविकल्पः सिध्यति।। आत्मनेपदप्रवृत्त्या विनाप्येतेन निषेधेनात्मनेपदस्य लब्धत्वात्। परिश्यतेनास्यैव विकल्पेनात्।। ते
नमुक्ते शेषात्कर्त्तरीति परस्मैपदं स्यात्। प्रवृत्तस्यार्थ नियमपक्षे एकवाक्यता विधिश्चेतिपक्षे च परस्मैपदविकल्पेपि नक

भवि १ ११२

134

श·कौ· ष्विद्रोष इत्यवधेयं। द्युद्भ्यो लुङि। द्युतादिभ्यः परस्मैपदं वा स्याल्लुङि। अद्युतत्। अद्योतिष्ट। अलुठत्। अलोठिष्ट। लुङि किं। द्यो-
तते। लोठते। अनुदात्तेत्त्वान्नित्यं तङ्। नन्विह विकल्पानुवृत्त्यैवैर्थ्यं। अनुदात्तेतङ्क्यनेन प्रतिषिद्धस्य परस्मैपदस्यानेन प्रतिप्रस-
वे कृते लस्येत्युत्सर्गेणौपपाक्षिकस्यात्मनेपदस्य सिद्धेः सत्यं। परस्मैपदे प्रतिषिद्धे आत्मनेपदं न भवति। तिङ्गप्यि तु वानुवृत्ति-
तेनानुकरोतीत्यादौ पाक्षिकमात्मनेपदं न भवति। यदा त्वनुदात्तङित इत्यादिप्रकरणेनात्मनेपदमेव विधीयते। शेषादित्यादिना
च परस्मैपदं। तदानुकरोतीत्यादौ परस्मैपदेनात्मनेपदं बाध्यते। येन नाप्राप्तिन्यायात्। पक्षे आत्मनेपदप्रवृत्त्यर्थं चेह वा ग्रहणं।
मित्यवधेयं। पक्षद्वयमपीदं अनुपराभ्यां कृञ इति सूत्रे भाष्ये स्थितं। प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रेपि मस्त्राणां विधिरूपे-
णानिषेधरूपेण वा प्रवृत्तिरिति पक्षद्वयस्यापि नत्वं निरूपितमस्माभिः तदर्थे तस्माद्भाष्यादुन्नेयमित्यवधेयं। वृद्भ्यः स्यसनोः॥
वृतु वृधु शृधु स्यन्दूभ्यः परस्मैपदं वा स्यात्स्ये सनि च। वर्त्स्यति। अवर्त्स्यत्। विवृत्सति। न वृद्भ्यश्चतुर्भ्य इति इण्निषेधः। पक्षेव-
र्तिष्यते। अवर्तिष्यत। विवर्तिषते। स्यसनोः किं। वर्तते। ननु द्युतादिष्वेव वृतादयः पठ्यन्ते गृहपाचतकौ ङित्वन्यायेनेयमा-
ख्वेर्हुयः पूर्वी प्राप्तिं बाधेते तत्र श्वाष्टतद्वर्तिष्टेति। लुङि पूर्वेण विकल्पो न सिध्येत्। तथा चोत्तरसूत्रे चकारः क्रियते। लुटि वि-
शेषविधिना स्यसनोरिष्टप्राप्तिः मा बाधीति। अन्यथा लुङि परपिवत्ताघंतमौ वादेनैनेव सिद्धे किं चकारेणेति चेत् सत्यं। द्युतादि

टूपरस्मैपदेष्वित्यतःपरस्मैपदेष्वित्यनुवर्त्ततेकृदिलासासिक इड्भावस्त्वस्येव।स्यादेतत्।स्यसनोरिस्यस्यस्यचरितेत्त्वमेऽ

पाठसामर्थ्याद्वृताद्भ्यो लुङि भविष्यतियद्वा लुङीतिस्वरयिष्यते।लुटिचक्लृपः।लुटिस्यसनोःक्लृपःपरस्मैपदंवास्यात्।कल्प्ता स्मि।कल्प्स्यति।अकल्प्स्यत्।चिक्लृप्सति।तासिचक्लृपइतीट्प्रतिषेधः।पक्षेकल्पितास्मे।कल्पिष्यते।अकल्पिष्यत।चिकल्पिषते।इहेणिनषेधोनास्ति।तत्रहिगमेरिड्वासन्वाकाषइतिवाशब्देस्यपथ्या।तथाचस्वरितेनाधिकारइत्येवसिद्धेकिंचकारेण।सत्यं। स्पष्टार्थंचकारः।।आतएवानुकर्षणार्थांस्तर्वेचकारा।भाष्येप्रत्याख्याताः।इतिश्रीशब्दकौस्तुभेप्रथमस्याध्यायस्यतृतीयेपादे [illegible]द्वितीयमाह्निकं।पादश्चसमाप्तः।आकडारादेकासंज्ञा।इतऊर्ध्वंकडाराःकर्मधारयइत्यतःप्रागेकस्यैकेवसंज्ञास्यात्। तत्रोभयोःसावकाशत्वेविप्रतिषेधेपरमितिपरैव।निरवकाशत्वेतुसैवेतिविवेकः।तत्रपरस्याउदाहरणंधनुषाविध्यतीति।शराणामपायप्रत्यवधित्वेनतस्यैवधनुषोप्यधनपतिसाधकतमत्वमित्युभयप्रसंगेपरत्वात्करणसंज्ञाअपादानसंज्ञांबाधते। तथाकोस्यपाआंगुत्रेइत्यधिकरणसंज्ञा।धनुर्विध्यतीतिकर्त्तृसंज्ञाचात्रहुक्ता।अपादानमुत्तराणीति।निरवकाशायास्तूदाहरणंअततक्षदिति।अत्रहिसंयोगेगुर्वितिगुरुसंज्ञालघुसंज्ञांबाधते।तेनसन्वल्लघुनीत्येतन्नप्रवर्त्तते।स्यादेतत्।।भपदसंज्ञाभ्यांतर्हिअंगसंज्ञाबाध्येत।तथाचगार्ग्यइत्यत्रयस्येतिचेतिलोपोनस्यात्।धात्वङ्कृतःअंगस्योप्यामानाः ३२ वृद्धिर्नस्यात्।अंगसंज्ञातुकृतेचमित्यादौसावकाशा।नहिधातुप्रत्ययेपुपूर्वस्यभपदसंज्ञेस्तः।अत्राहुः।सुपिचावहुवच

त ३

शा.कौ ६८ २८७ श्री

नेकल्पेत्। तद्धितेष्वचामादेरित्यादौ स्वादिषु तद्धितेषु चांगस्य कार्यविधानं समावेशस्य ज्ञापकं। द्विविधा हि स्वादयः। यजादयो [illegible] र्त्स्ना
[illegible]दयश्च। तत्र यथाक्रमं भपदसंज्ञाभ्यां भाव्यं। ताभ्यां चांगसंज्ञा बाध्येत निर्विषयाः एवं तन्न द्विविधयः स्युः। गुरुलघुसंज्ञे वर्णमात्रे
विधीयेते। नदीघिसंज्ञे तु ह्रस्वं तेति ताभ्यां समाविशतः। तेन वात्सीबंधुरित्यत्र नदीबंधुनीति पूर्वापदप्रकृतिस्वरत्वं। हे वात्सीबंधो
इत्यत्र गुरोरनृत इति प्लुतः सिध्यति। तथा विष्णुनाच विनारौ द्वंद्वे घीति पूर्वनिपातः। विनरा वाचष्टे विनयति। प्रविनप्यगतः
[illegible]स्य पिलघुपूर्वादितिरो रथादेशः। यथाचायादेशो कर्त्तव्येटिलोपो नस्यात्। निवर्त्तयात्रचः परस्मिन्नित्यस्मुत्पादितं। यत्तु कं।
विन्नोर्मीवौवेत्ते। इगंताच्च लघुपूर्वादित्यण्णिति। तन्निवित्य ह्रदहमनोज्ञादिभ्यश्चैवं वुञ्प्रसंगादिति कैयटः। पुरुषसंज्ञा तु परस्मैपद ति
संज्ञां न बाधते। णलुत्तमो वेति ज्ञापकात्। अन्यत्रापि यत्र समावेश इष्टः। तत्र चकारादिना व्यवस्था ने स्थापयिष्यते। माष्टे
तुपाठांतरमाश्रुपन्नस्त॥ आक्कडारात्परं कार्यमिति। अस्यार्थः। आक्कडारात्संज्ञाख्यं कार्यं परं स्यादिति। संज्ञाप्रकरणाद्धि सं
ज्ञारूपमेवेह कार्यं। परासंज्ञेत्येव तु न सूत्रितं। विप्रतिषेधे इत्यनुत्र रसूत्रे परं कार्यमित्यस्यानुवृत्तिर्यथास्यात्। तत्र यस्याः सं
ज्ञायाः परस्याः पूर्वयानवकाशया बाधः प्राप्तः सा परानेन विधीयते। एतदेव च ज्ञापकं इह प्रकरणे संज्ञानां बाध्यबा राम:
धकभावस्य। तेन परयानवकाशया सावकाशा पूर्वा बाध्यते। द्वयोस्तु सावकाशयोर्विप्रतिषेधे परया पूर्वा बाध्यत इति। अस्ति ६८

बालो पेनरा

न्यत्रे अंगसंज्ञापरा कर्तव्या। भपदसंज्ञे तु पूर्वोक्ते एवं यत्र यत्र समावेशदृष्टस्तत्र तत्र बोद्धव्यं। अस्मिन्प्रत्रे अन्यत्रियद्भ्यतिन तिष्ठति।
तथा हि अतो रुपा। छंदस्ति घसः। सितिचेति पदसंज्ञैवेष्यते। तत्र परं कार्यमिति वचनाद्भसंज्ञापि स्यात्। ततश्च ओर्गुणः उ
त्सृज्येत। पदत्वप्रयुक्तेनाच ग्रहणं सित्करणं सार्थकं स्यात्। शेषो बहुव्रीहिः शेषो घ्यसखीति शेषग्रहणं चास्मिन्प्रत्रे क
र्तव्यं स्यात्। अन्यथा हि उन्मत्तगंगमित्यादिविग्रहपदार्थे च संज्ञायामिति समासपव्ययीभावसंज्ञायां परं कार्यमिति वचना
द्बहुव्रीहिसंज्ञापि स्यात्। मतौ च स्तत्र नदीसंज्ञाविषये घिसंज्ञापि स्यात्। ततश्च गुणप्रसंगः॥ वस्तुतस्तु बहुव्रीहौ शेष
ग्रहणं पाठद्वयेपि कर्तव्यं। घिसंज्ञायां तु पाठद्वयेपि न कर्तव्यमिति तत्रैव वक्ष्यामः॥ इदं त्ववधेयं। एका संज्ञेति पाठेपि संज्ञाग्र
हणं न कर्तव्यं। एकेत्युक्तेपि संज्ञाधिकारादेव तल्लाभात्॥ स्यादेतत्॥ आकडारादित्येवोच्यतां॥ नहि चार्थे द्वंद्व इत्यतः परत्वे
दमुपयुज्यते। सत्यं। तथा सति द्वंद्वश्च प्राणितूर्यसेनांगानामिति तस्यापि बाधितत्वं संभाव्येत। ततश्च संबुद्धिसंज्ञो भवति तत्संज्ञयोः समावे
शो न स्यात्। नन्वाकडारादित्युक्तेपि आकडारात्समास इत्यस्यावधितत्वात्। वस्तुतस्तु संख्यापूर्वो द्विगुरित्यत्रैव चकारः
पाठ्यः॥ तावतैव द्विः कर्मि चात्तत्रयो जको हेतुश्चेत्यादाविव समावेशसिद्धेः। द्विगुश्चेति सूत्रांतरं तु न कर्तव्यमेव। एवं समा
नाधिकरणात्समासप्रकरणे समाप्य कर्मधारयश्चेत्येव पाठ्यं। तत्पुरुषः समानाधिकरणः कर्मधारय इति सूत्रं तु मा।

बधित्वं कुतो न स्यादिति चेत्। व्याप्तिन्यायात् लिंगाच्च। पदपंतत्पुरुषो द्विगुश्चेत्यारभ्यते। समावेशार्थं हि

श॰कौ॰
६९
२८८

स्त्विति दिक्। विप्रतिषेधे परं कार्यं। विरोधे सति कर्त्तव्यं यत्परं तत्स्यात्। विप्रतिपूर्वात्सेधतेर्घञ्। उपसर्गात्सुनोतीति षत्वं। उपसर्गवशाच्चविरो
धार्थकत्वं। कार्यमित्यत्र अर्हे कृत्यतृचश्चेति अर्हार्थे कृत्यप्रत्ययः। तेन तुल्यबलविरोधे इति पर्यवस्यति। नह्यपवादादीनां सन्निधौ उत्स
र्गादीनां कर्त्तव्यत्वं। तैर्बाधितत्वात्। तत्र नित्यमनवकाशकत्वाद्बाधकं। अंतरंगं तु लाघवात्। अपवादस्तु वचनप्रामाण्यात्। तद्भिन्नस्तु बाधकं तत्सू
त्रस्य विषयः। तदुक्तं। परनित्यांतरंगापवादानामुत्तरोत्तरं बलवत्त्वमिति। जातिपक्षे विध्यर्थमिदं सूत्रं। हझे घुवहाभ्यामित्यत्र हिल
ब्धावकाशयोरेत्वदीर्घत्वशास्त्रयोर्वृत्तिं प्रत्युत्पत्र युगपत्प्रसंगे विनिगमकाभावादप्रतिपत्तिरेव स्यात्। तदुक्तं। अप्रतिपत्तिर्वोभयो
स्तुल्यबलत्वादिति। तत्रास्माद्वचनात्परस्मिन्कृते यदि पूर्वस्यापि निमित्तमस्ति तर्हि तदपि भवति। यथाभिंधकी तत्र परत्वाद्द्विर्भावे क
ते एकच्। तदुक्तं। पुनःप्रसंगविज्ञानात्सिद्धमिति। व्यक्तिपक्षे तु लक्ष्यविषयकयोर्लक्षणयोरन्यत्र चरितार्थत्वासंभवात्तु व्यत्नेव्यानी
यत्नमिव पर्यायेणाप्राप्ते नियमार्थमिदं सूत्रं। विप्रतिषेधे परमेव न तु पूर्वमिति। एतल्लक्षणारंभाच्च तत्र पूर्वस्यानारंभो नुमीयते। तथा च जु
हुतात्त्वमित्यत्र परत्वात्तातङि कृते स्थानिवद्भावेन द्वित्वं न भवति। तदुक्तं। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति। जातिव्यक्तिप
क्षयोश्च लक्ष्यानुरोधाद्व्यवस्थेत्युक्तं पस्पशायां। नित्यादिषु तु लक्ष्यस्पष्टत्वान्निरित्युक्तं। तेन रक्षेत्यादि चित्र तत्र धायाइ जितिहद्धिं परामर्यानित्यां
बाधित्वा रधिजभोरिति नुमेव। न च सोपि शब्दांतरप्राप्त्या अनित्य एवेति वाच्यं। कृताकृतप्रसंगित्वमात्रेणापि किञ्चिन्नित्यताभ्युप

राम॰
६९

स्य सस्न [illegible] इत्यादौ सावकाशस्य परेण कर्मण्यणा बाधितत्वात्। सत्यं। मूलविभुजादित्वात्कः ५

न्नदीसंज्ञायां घिसंज्ञाभाव इति। यद्वा ईश्च ऊश्च य्वौ ताभ्यां ख्यौ इतीति ख्यन्तवर्णाः। तेन दीर्घयोरेवेयं नदीसंज्ञा। न चैवं ङितीति ह्रस्वश्चेति सूत्रेऽह्र
स्वांशे अनन्वयः स्यादिति वाच्यं। विभक्तिविपरिणामेन य्वोः सवर्णो यो ह्रस्व इति व्याख्यानात्। उदाहरणं तु। गौर्यै। वध्वै इत्यादि॥
यू इति किं। मात्रे। स्वस्रे। स्त्र्याख्यौ किं। ग्रामण्ये। स्यादेतत्। स्त्रियमाचक्षाते इति विग्रहे स्त्र्याख्यौ याविति प्राप्नोति। आतश्चोपसर्गे इति
५ कप्रत्यये ह्यावि च प्रत्ययो भविष्यति। एतेनतत्त्वख्या चान्यशास्त्रमिति जैमिनिसूत्रमपि व्याख्यातं। नन्वेवमपि स्त्रियमित्येवास्तु किं मधिके
नामेवं। आसमेता च ख्याते इति व्युत्पत्त्या नित्यस्त्रीत्वलाभार्थं तद्ग्रहणात्। तेन ग्रामणीप्रसे नान्निस्त्रिये इत्यत्र न भवति। ग्रामणीनां च न
यतीति हि क्रियाशब्दो वैतौ लिंगत्रयसाधारणौ। अत एव आख्यै आख्यायै इति भाष्योदाहरणं चिन्त्यमिति कैयटः। आख्यानकर्तृत्व
स्यापि लिंगत्रयसाधारणत्वात्। स्यादेतत्। आसमन्ताद्धीयते स्या इति विग्रहे उत्तरपदस्य नित्यस्त्रीत्वान्नदीत्वमस्तु। अथमलिंगग्रहणं
चेति वक्ष्यमाणत्वात्। अतिसत्हैम्ये ब्राह्मणायेतिवत्। न तु तो भाष्यस्य चिन्त्यतेति चेत्॥ न। तथा सति परगोदुर्लभत्वात्। गतिकारक
पूर्वस्यैवेष्यते इत्यत्र हि गतिश्चाहचर्यात्कारकपूर्वस्यापि नित्यसमासस्य ग्रहणं गतिसमासश्च प्रतिपदोक्त एव [illegible] गृह्यते। तेन दुर्धिय
निर्भियः॥ दृश्चिकभियाप्रमानस्येत्यादौ अनित्यसमासत्वान्नयणु इति पुरुषोत्तमप्रभृतयः। अत एव कृन्मेजन्त इति सूत्रे भातः समृ
स्पृहयः इति मन्त्रव्याख्यायां दुर्धिय इति कैयटेन इयङ् प्रयुक्तः। अहृश्विप्रकर्षेण बहुश्री हिरोदमर्थकथनं॥ व्याख्येयमन्त्रेऽल्प दुधं

लापर

130

श. कौ.
७१
२८०

ध्यायतीतिविग्रहे नित्यसमासो बोध्यः ॥ ततो यण् । दुरो नाशदाशदभध्येष्विति पृषोदरादिसूत्रस्थवार्त्तिकेन उत्वष्टुत्वे यत्तु तद्धी त्रिकवाक्या-
वसरे दुष्टुं ध्यायतीति विग्रहः आतश्चोपसर्गे इति कप्रत्यय इति कैयटहरदत्तादिभिरुक्तं तच्चिन्त्यम् । अतं स्वरितानुरोधेन अर्थानुरोधेन च
ख्यत्यादितिवक्ष्यमाणरूपादेशानुकरणात्तेयेव वार्त्तिकस्य व्याख्येयत्वात् । सर्वस्मद्भुद्धे: अहनिरुपद्रवः नोऽस्मान्मावधीदिति हिंसतीयवर
रात्स्येन सहान्वयः । अमेरजिरित्यनुवर्त्तमाने हंतेरंहचेत्यंहादेशो असिश्च प्रत्ययः ॥ अंहतिशब्दस्यापादेशनं निर्वयणमपवर्जनमंहतिरित्य
मरकोशादिबलाद्दानेऽहोऽतउपद्रवेषु प्रयुक्तमाभिचारिकाद्युपगभूतमेव तदिह ग्राह्यं । उणादीनामव्युत्पत्तिपक्षाश्रयणादंतोदात्तता । ब
हिवस्पार्त्तिर्भ्यपस्थिरितिचिद्ग्रहणानुवर्त्तेरिति तत्त्वं । एतेन मानोगर्वदिति भाववहारणा अपि प्रत्युक्ताः । पदद्वयत्वापाध्यापक सप्रत्ययस्ति
द्धत्वात् । वाक्यशेषानुगुणप्राच्या । तस्मादाथैर्ब्राह्मणेपदाइति भाष्योदाहरणं चिंत्यमिति स्थितं । प्राकस्तु बुत्पत्ते ये त्रसमासस्तत्रैव गतिकार
कपूर्वस्येष्यते इति परिप्रवर्त्तते इत्युक्तं श्रीपतिदत्तादीनामपि मते कैयटोक्तं चिंत्यं दृढमेवावस्तु नस्त्वा आध्यानमाधीरितिसुत्पाद्यमु
णगुणिनोरभेदविवक्षयैव प्रयोगोऽयमिति चिंत्योद्धारो वधेयः । हरदत्तस्त्वाह । नित्यस्त्रीत्वं नाम न लिंगांतरानभिधायकत्वं । किंतु अ
र्थांतरस्य समभिव्याहारं विनैव स्त्रियां वर्त्तमानत्वं तत्तु इहाप्यस्त्येव । कथं तर्हि ग्रामणी पुरःबलवेदत्यादि प्रत्युदाहृतं स्त्रियमेदृति चेत् ।
शृणु । क्रियाशब्दत्वे प्यनयोः पुंसि मुख्या प्रवृत्तिः । पुंसामेव ह्यमौत्सर्गिको धर्मः । यद्धा मनयनं वा लपवनं वा । आध्यानं तु स्त्रीपुंससा

गम:
७१

प

धारणमेवेति वैषम्यं तस्माद्युक्तमेवेदं भाष्यमिति अचवान्निकः॥ प्रथमलिंगग्रहणं च। प्रयोजनं क्विप्लुप्समासाः। अस्यार्थः। यः पूर्वं
स्त्र्याख्यः पश्चादुपसर्जनतया लिंगांतरविशिष्टं द्रव्यांतरमाह तस्य नदीसंज्ञा वक्तव्या। क्विपि कुमारीमिच्छतीति कुमारीयति। ततः क्विपि
अल्लोपयलोपौ। क्वौ लुप्तस्यास्थानिवत्त्वनिषेधान्न यण्। ह्वा कुमारयतीति कुमारी। आचारक्विबंतात् कर्त्तरि क्विप्। कुमारी ब्राह्म
णः। ङ्यंतत्वात् सुलोपः॥ तस्मै कुमार्यै ब्राह्मणाय। स्यादेतत्। इह क्यच्क्विपोः प्रकृतिभूतस्य ङीबंतस्यापि नित्यस्त्रीत्वं दुर्लभं पुल्लिं
गात् क्यच्क्विपोर्निर्दिष्टत्वे न त्रिलिंगेन समानाकारत्वादिति चेन्न। अर्थभेदेन शब्दभेदाश्रयणात्। तत्र प्रथमो ह्यहस्तस्यैव्यरूपाणि। कु
मारीमिच्छन् कुमारीवाचरन् वा ब्राह्मणः कुमारी। ङ्यंतत्वात् सुलोपः। कुमार्यौ। कुमार्यः। न चेह अचि श्नुधात्विति यङ्। असंगः एरनेका
च इति यणा बाधितत्वात्। अत एव अमि शसि तु कुमार्यं कुमार्यः। प्रध्यं प्रध्य इतिवत्। न च गतिकारकपूर्वस्यैवेति निषेधः शंक्यः।
तादृतपूर्वस्य नेत्यर्थात्। विशिष्टाभावस्य पूर्वेऽपि सत्त्वात्। ङपि। कुमार्यै। कुमार्याः। [illegible] कुमारीणां। कुमार्यां ब्राह्मणे। हे कु
मारि ब्राह्मणेत्यादि। पत्यादेस्तु संयोगपूर्वकत्वादियङ्। पत्नियौ पत्नियः इत्यादि शेषं प्राग्वत्। पुल्लिंगात् क्यचि क्यङो निष्प
न्नस्य तु अङ्यंतत्वात् सुलोपो न। कुमारीः हे कुमारीः। अनदीत्वाद्ध्रस्वो न। कुमार्यः २ कुमार्यौ॥ ब्राह्मणानां। कुमार्यां ब्राह्मणे।
इत्यादि। कुमारमात्मन इच्छंती ब्राह्मणी कुमारीत्यत्रापि कैयटमते नित्यस्त्रीत्वाभावात् पूर्ववद्रूपं। हरदत्तमते तु लक्ष्मीवत्।

कुमार्यै २

श. कौ.
७२
२९१

अमिश्रमिश्रचयरिविशेषः। प्रकृतमनुसरामः। लुप्यमनुष्य इतिल्लुप्रारव्धकुटी ब्राह्मणायायद्यप्युक्तवक्ष्यावाहत्रीत्वमस्ति। तथापि
स्वाश्रयस्य पुंस्त्वस्यापि सत्वान्नित्यस्त्रीत्वं नास्तीति कैयटहरदत्तादयः। तच्चिंत्यं। चंचाः पश्येत्यादौ शसो नत्वापत्तेः। तस्माल्लुबंतैः ख
रकुटीपचादिशब्दैः शास्त्रीयस्त्रीत्वविशिष्ट एव लौकिकः पुमानप्यभिधीयत इत्येव तत्वं। एवं च लुपः प्रयोजनत्वेन कुथंगणनेन पिचिंत्यं।
समासे अतिलक्ष्मीः। बहुश्रेयसी। ईयसश्चेति कप्निषेधः। ईयसो बहुव्रीहौ नेति पुंवत्प्रतिषेधेन कस्त्वेनौ। उभयत्रापि संबुद्धौ ह्रस्वः। ङित्सु आ
डागमादिकं च नदीकार्यं बोध्यं। अवयवस्त्रीविषयत्वात्सिद्धं। समासे तावदवयवो लक्ष्म्यादिशब्दः स्त्रियामेव वर्तत इति नद्
नीमिव संज्ञा। ततश्च वर्णसंज्ञापक्षे समुदायस्य नदंतत्वात्कार्यसिद्धिः। तदंतस्य संज्ञेति पक्षे तु अंगाधिकारे तस्य च तदुत्तरप
दस्य चेति वचनात्। वस्तुतस्तु उक्तवचनस्य प्रागेव क्षिप्तत्वात्तदंतत्वेनैव सिद्धिर्बोध्या। अतितंत्री बंधुरित्यत्रापि नदीबंधुनीति पू
र्वपदांतोदात्तत्वं सिध्यति। पूर्वपदस्य नद्या विशेषणात्। क्विप्लुयोरपि त्वंतरंगत्वात्क्विबादेः प्रागेव प्रवृत्ता संज्ञा बहिरंगेण लिंगा
नुयोगेन न निवर्तते। त्वकतिपत्के अकत्वात्। अकृतव्यूहा इत्यस्यानित्यताया अचः परस्मिन्निति सूत्रे वर्णितत्वात्। स्यादेत
त्। इयङुवङ्स्थानप्रतिषेधे यण्स्थानप्रतिषेधप्रसंगोऽवयवस्येयङ्वङ्स्थानत्वात्। यथा ह्यवयवस्य स्त्रीविषयत्वात्समु
दायस्य नदीसंज्ञेत्युक्ते तथावयवस्येयङुवङ्स्थानत्वात्समुदायस्येयण्स्थानस्यापि प्रतिषेधः स्यात्। यथाधियै। आध्यै।

राम:
७२

प्रभ्यौ। अत्राहुः। इयङुवङ्भ्यामंगमाक्षिप्यते। अंगाधिकारे तयोर्विधानात्। तेनेयस्यांगस्येयङुवङौ निवर्त्येते तस्य नदीसंज्ञानि
षेधः। आधीरित्यत्र तु अवयवस्यांगत्वं नास्ति। अंगस्य तु एरनेकाच इति यण्विधानादियङुवङ्स्थानता नास्तीति निषेधाभावः।।
एतदर्थमेव च तत्रस्थानग्रहणं। इयङुवङोर्यदा स्थितिस्तदा प्रतिषेधो यथा स्यात्। यदा त्वपवादेन बाधस्तदा माभूदिति।। एवं
ङितिह्रस्वश्चेत्यत्रापि अंगस्याक्षेपात्सोपि विधिरंगस्यैव स्त्रीत्वे भवति।। नावयवस्याशंक्यं। अतिशकटेये ब्राह्मणाय। अति
ये। अतिश्रिये ब्राह्मणाय। इह तु स्यादेव। अतिश्रिये। अतिश्रिये [illegible] ब्राह्मणायेति स्थितं भाष्ये। न चेह नित्यस्त्रीत्वं नास्ती
तिवाच्यं। हरदत्तमतेनत्वस्तत्वात्। कैयटमते तु ङितिह्रस्वश्चेत्यत्र स्त्रीग्रहणमात्रमनुवर्त्तते न त्वाख्याग्रहणं। एवं च सुधीश
ब्देपि रूपद्वयं निर्विवादं। सुध्यादयः पुंवदिति प्रक्रियालुघ्रामादिक्येव। अतिलक्ष्म्यतिचम्वेवीत प्रमीरूरूभ्यां साम्योक्तिरथ्येवं।। न
थास्वयंभूः पुंवदित्यपि प्रमादरूपं स्यादेतत्। निष्कौशाम्बिः पुमानित्यत्रापि अंतरंगतया नदीसंज्ञा स्यादतिलक्ष्म्यादौ यथास
त्यां स्यामपि तस्यां न कश्चिद्दोषः।। न च संबुद्धिह्रस्वादिप्रसंगः। ह्रस्वादेशेन नद्या अपहारात्। वर्णस्य नदीत्वात्। स्त्र्याख्य
त्वं तु तस्य शक्यत्वाश्रयतामात्रेणावोध्यं। पर्याप्त्यधिकरणतायाः अविवक्षितत्वात्। तदंतस्य नदीसंज्ञेति पक्षेपि एकदेशविका
रान्स्युपगमेन सर्वादेशस्येव चकव्यत्वात्। न च स्यानिवज्ञार्वेल्लिद्धित्वात्। अपभ्रंशत्वेऽभावार्थविशेषणानुपपत्त्या नात्र

व

स३

144

छो

शा.कौ.
७३
२५९२
२६ नः४

यशोनिषेधस्यासिद्धोतित्वादितिदिक्। निशां बैनि ष्ठौ शां बये ब्राह्मणरोपेद्रत्पत्रलुङितिह्रस्वश्चेतिविकल्पोभवत्येवेतिदिक्॥ ॥स्त्री
॥ ॥नेयङुवङ्स्थानावस्त्री॥ इयङुवङोः स्थितिः स्थानं निरपवादाश्रतक्रियंत्रतावीदूतौ नदीसंज्ञौ न स्तः स्त्रीशब्दं विना हे स्त्री॥ हे श्रीः॥
श्रस्त्री तिकिं। हे स्त्रि। कथं तर्हि विमानना सुभ्रु कुतः पितुर्गृहे इति कालिदासः। हा पितः क्वासि हे सुभ्रु इति भट्टिश्च। एकं वशब्दं भव
भ्रुवमित्रितिश्रीहर्षश्च॥ प्रमादएवायमितिवहवः। सामान्येन पुंसकमितिवा कथंचित्समाधेयं। केचित्तु तदोदावचनेन सकृद्भुद
मनित्यमितिपरिभाषा ज्ञापनमाश्रित्यानित्योयंप्रतिषेधइति समादधुः। किंत्वेतत्सकलप्रमादेषु सुवचं। तदोदावचनप्रत्याख्या
नपरभाष्यादिविरुद्धं। च। अन्येतुवामीत्यतोवाग्रहणस्यसिंहावलोकितन्यायेनानुवृत्तेस्सर्वस्थितविभाषापरत्वेनेष्टसि
द्धिमाहुः। तदपिन। सिंहावलोकितन्यायस्येहाभिमतत्वेन ग्रहणस्य वामीत्युत्तरसूत्रस्य चवैयर्थ्यापत्तेः। यत्तु केचिद्दुर्घटवृ
त्तौ। भ्रूशब्दाद्यणि जाते स्त्रियां ङि समासे उपसर्जनह्रस्वत्वेचकृते ऊङुतइति ङितस्य समुदायभक्तत्वान्नेयङुवङ्स्था
नत्वमिति। तदपि। स्थानीयः प्रत्ययस्य भक्ततया निष्क्रमाणकत्वात्। तस्याभिकस्यैकादेशस्यांतवद्भावेन भ्रूशब्दावयवता
याअप्यनपायात्। अंगाधिकारे तदुत्तरपदग्रहणस्य निर्विवादत्वात्समुदायभक्तेयुवङ्प्रवृत्तेश्च। सुभ्रु वावित्यादिरूपाणां
सर्वसंमतत्वाच्चेतिदिक्॥ ॥वामि। इयङुवङ्स्थानौ वानदीसंज्ञौ स्तः स्त्रियामामि। श्रीणां। श्रियां। भ्रूणां। भ्रुवां। हितीयेक

रामः
७३

|45

वचनं तु नेह सूत्रे गृह्यते । तत्र नदीकार्याभावात् । अस्त्री त्येव । स्त्रीणां । इह वाचि ऊकारस्थेव कुतो न कृतं । एवं हि ङितीति न कर्तव्यमिति चिंत्यं । वस्तुतस्तु सन्निपातपरिभाषया नूणामिति तु च्छन्दसात्त्वात् अत आमीत्युक्तं । पाद्मार्षेयमनेनैव ज्ञाप्यत इति ध्येयं । ङिति ह्रस्वश्च । इयङुवङ्स्थानौ ह्रस्वौ च यू नदीसंज्ञौ स्तः स्त्रियां ङिति परे । श्रियै । श्रिये । भ्रुवै । भ्रुवे । कृत्यै । कृतये । धेन्वै । धेनवे । अस्त्री त्येव । स्त्रियै स्त्रीलिंगाविति किं । अग्नये । वायवे । इह प्रथम[illegible]लिंगग्रहणं नास्ति । तेन नि[illegible]शंबिहे रिवदित्युक्तं । स्त्रियमतिक्रांतो नोति स्त्रिरित्यत्र तु विशेषः ।। अति स्त्रियौ ।। स्त्रिया इतीयङ् । अयं हि गौणत्वेपि भवति । किंतु गुणनाभावौ त्वनुङ्कृः परत्वात् सिबाध्यते ।। ल्की वेत्तु मा च स्त्रीशब्दस्य यङिति तव धार्यतां । जसि चेति गुणः ।। अति स्त्रयः । वाम्शसोः ।। अति स्त्रियं । अति स्त्रीं अति स्त्रियौ । अति स्त्रिभ्यः ।। अति स्त्रीन् । आङो ना स्त्रियां । अति स्त्रिणा । अति स्त्रिभ्यां । घेर्ङितीति गुणः ।। अति स्त्रये । अति स्त्रेः ।। अति स्त्रियोः ।। अति स्त्रीणां । अच्च घेः ।। अति स्त्रौ । संग्रहश्च । औकारे औ त्तिनित्यं स्यादम्शसोस्तु विभाषया । इयङ् ह्रस्वनद्याद्यदिति तु ह्रस्व अतिस्त्रीणां । दे शो चिनान्यत्र स्त्रियाः [illegible]स्या द्रुपसर्जने । एवं ल्की वेत्तु माइयङ्बाध्यते । तेनातिस्त्रि । अतिस्त्रिणाइत्यादि । वाखितत् ।। स्त्रियां ह्रस्वनदी संज्ञा विकल्पः ।। अस्त्रीति तु इयङुवङ्स्थानाविम्यस्येव विशेषणं । तेनं बहुस्पे वानुवृत्तु ङिति ह्रस्वश्चेति ह्रस्वांतत्वप्रयुक्तो नदीसंज्ञाविकल्पः ।। अस्त्रीति तु ... तेनातिस्त्रियै । अति स्त्रियौ औदिति बाधित्वाद् इयङ्स्यामिति ङेराम् । अन्तेः ।। न चेहाद्युत्तोभयविशेषणात् ।। प्रमाणाभावात् ।

चे २

कौ

लि ४

श॰कौ॰ ७४ २९३

तिस्त्रियां॥ पत्ये अर्थे॥ अतिस्त्रौ॥ ॥शेषो घ्यसखि॥ ह्रस्वौ यौ यू तदन्तं सखिभिन्नं नदीसंज्ञं घिसंज्ञं स्यात्। हरये। भानवे। ह्रस्वौ किं। ग्रामण्ये। खलप्वे। यू किं। मात्रे। असखि किं। सख्ये। शेषः किं। मत्यै। शेषग्रहणं व्यर्थमिति नदीसंज्ञासूत्रे एवोक्तं। समासे तु सुसखे गच्छतीत्यादौ घिसंज्ञा भवत्येव। समुदायस्य सखिशब्दाद्भिन्नत्वात्। तदन्तग्रहणं तु नास्ति। विशेष्यसंबन्धाभावात्। यत्तु ग्रहणवते त्यादिह ह्रस्वेनोपन्यस्तं ख्यात्यात्सूत्रे च कैयटेन। तत्पूर्वापरविरुद्धमिति येन विधिरिति सूत्रे व्युत्पादितं। नन्वेवं यस्येति चेति सूत्रे इवर्णस्य ईति सखीत्युदाहरणं न युज्यते। सखिशब्दात्सख्यशिश्वीति भाषायामिति ङीषि सति लोपे सवर्णदीर्घे वा विशेषाभावात्। यत्तु तत्र भाष्ये ह्रस्वेनोक्तं। असति लोपे अतिसखेरागच्छतीत्यत्र सवर्णदीर्घस्य पूर्वं प्रत्यन्तवद्भावादसखीति घिसंज्ञाप्रतिषेधः स्यादिति। तदसखीति प्रसज्यप्रतिषेधमाश्रित्येति कैयटादौ स्पष्टं। अत एवापानतः पर्युदासे स्वेवेह स्थितत्वात्। अन्यथा वाक्यभेदात्। अत्र समर्थसमासात्॥ स्तु सखेरित्यादावस्ति आपत्तेः। तस्मादीति लोपे फलं दुर्लभमिति चेत्। अत्रोच्यते॥ सखीसख्यौ सख्यङ्गत्वादावनङ्गादेशे मा भूदिति ङिलोप एषितव्यः। न च सिद्धं। तेपि प्रातिपदिकग्रहणे लिङ्गविशिष्टग्रहणात् दोषतादवस्थ्यं। विभक्तौ लिंगविशिष्टाग्रहणात्। एतेन इकारलोपस्य न दृष्टत्वं एवोदाहरणं नत्वीति परेतद्रिति वदन्तः ह्रद्गोपास्ताः॥ ॥पतिः समास एव॥ पतिशब्दः समास एव घिसंज्ञः स्यात्। भूपतये। नेह। पत्यौ। [illegible] न चोत्तरसूत्रेण तत्र खुद्रपि सर्वं घापत्तिः। बाधकाभावात्। इष्टरूपस्याप्राप्तिः पत्ये। विपरीतनियमं वारयितुमेवकारः। दृढमुष्टिना। शेषो घ्यसखिपती इत्येव सूत्र्यं। समस्तस्य तु पतेर्वेत्तरीत्या सिद्धं॥

अ… ति २

रामः ७४

147

द्वेः॥ द्वितीयस्य तु साधोरपि छंदस्य पठितस्यानापाद्यत्वात्। न चैवमुत्तरसूत्रे षष्ठीयुक्तश्छंदसि वा इत्यर्थः स्यादिति वाच्यं इष्टापत्तेः॥ एवं मे वहि
श्रीयामरणेभ्यश्छंदसीति श्रीग्रहणं नित्यं मंत्र इत्यादीनि च प्रत्याख्यातानि। संबुद्धौ शाकल्यस्येत्यत्रानार्षग्रहणमथैवं। सत्यं। यथा
सखिग्रहे गृह सखायावित्यत्र पूर्वनिपातानियमस्तथापि तिङ्हेड्वत्यत्र मा भूत्। इह हि घित्वात्पूर्वनिपात एव। बहुव्रीहिवत्सस्तु स
सखिन्पायेन घित्वाद्बहुपतिनेत्यादि बोध्यं। अथ कथं सखिना वानरेंद्रेण। पतिनानीयमानायाः पुरः शुक्रो न दृश्यति। नष्टे मृ
ते प्रव्रजिते क्लीबे च पतिते पत्यावित्यादि। अत्र हरदत्तः॥ छंदोवदृषयः कुर्वंतीति। अस्यायमाशयः॥ असाधव एवैते। त्रिशंकु
घ■जया जनादिवत्तपोमाहात्म्यशालिनां मुनीनां असाधुप्रयोगोपि नातीव बाधकः॥ अस्मदादीन्प्रति तु स्मृतिपुराणा
घच्यं यन विधिबलादेव तदंतर्गततत्तागेन बाधकः। तथा च स्यातं त्रैरोदशं यं युंजाना अस्मदादयः प्रत्यवयंत्येवेति। (नदी) सं
ज्ञा सूत्रे भाष्यकैयटयोरपि स्थितमिदं। यद्वा। सखेता ख्यातः सखिः॥ पतिं ता ख्यातः पतिः॥ तेन सखिना। पतिना। आख्यातरायंत
त्कर्मणि॥ अच इरिति पौणादिक इ प्रत्ययः। लाक्षणिकत्वाच्चैनयोर्घिसंज्ञापर्युदासे ग्रहणं नास्तीति दिक्॥ एतेनार्जुनस्य सखा कृष्णः
कृष्णस्य सखिरर्जुन इत्यपि व्याख्यातं। कथं च चोक्तस्य पतेरपीति माघः॥ नह्ययं समासः॥ अलुग्विधायकादर्शनादिति॥
सतां। तत्पुरुषे कृति बहुलमिति बहुलग्रहणादलुक्। एतेन दिवस्पतिवाचस्पती व्याख्यातौ। षष्ठ्याः पतीत्यादिना सत्वं येतु न

श०कौ
७५
२६४

त्रछंदसीत्यनुवर्त्तयंतिश्रियःपतिरित्यादिसिद्धये।तन्मतेपारस्करादित्वात्सुट्।केचित्तुद्यावापृथिवीशुनासीरमरुत्वदग्नीषोम
वास्तोष्पतिगृहमेधाच्छ्चेतिसामान्यापेक्षज्ञापकात्षष्ठ्याअलुक्।कस्कादित्वात्सत्वं।इणः।परस्यतुषत्वमित्याहुः।पदकारास्तु
वाचस्पतिंविश्वकर्माणं।वास्तोष्पतेप्रतीत्यादौपृथक्पदमधीयते॥ ॥षष्ठीयुक्तश्छंदसिवा।षष्ठ्यंतेनयुक्तःपतिशब्दश्छंदसि
घिसंज्ञोवास्यात्।क्षेत्रस्यपतिनावयं।इहयोगोविभज्यते।षष्ठीयुक्तश्छंदसीति।ततोवा।छंदसीत्येवसर्वेविधयश्छंदसिवि
कल्प्यंतेइत्यर्थः।बहुलंछंदसीत्यादिकस्त्वस्यैवप्रपंचः॥ ॥ह्रस्वंलघु।ह्रस्वंलघुसंज्ञंस्यात्।लघूपधगुणः।चेततिः।नचह्रस्व
प्रदेशेष्वपिलघुसंज्ञयैवव्यवहारःसुकरः।सर्पिष्टुमित्यादौह्रस्वात्तादौतद्धितइतिषत्वासिद्धिप्रसंगात्।गुरुसंज्ञयातत्रल
घुसंज्ञायाबाधात्।तस्मीदेकसंज्ञाधिकाराद्धिह्रस्वसंज्ञाप्रणयनंसम्यगेवकृतं।यद्येवंतर्हिदीर्घप्लुतसंज्ञाभ्यांह्रस्व
संज्ञायाःसमावेशमाशंक्यएकसंज्ञा[illegible]धिकारेअयंयोगःकरिष्यतेइतिभाष्येविरुध्यते।गुरुसं
ज्ञयालघुसंज्ञायाइवगुरुलघुसंज्ञाभ्यांह्रस्वसंज्ञायाबाधप्रसंगात्।नचनिरवकाशता।लघुसंज्ञाप्रवृत्तस्तुयापतामाचेरा
सार्थक्यात्।यथापदसंज्ञाभवतीतिव्याख्यायांपदसंज्ञायाःसत्वं।वक्रादिनासमावेशःकर्तव्यइत्याशयः।एतदपरितोषा
देववातत्रपक्षांतराण्युक्तानीतिदिक्॥ ॥संयोगेगुरु।ह्रस्वंगुरुसंज्ञंस्यात्संयोगेपरे।शिक्षा।भिक्षा।गुरोश्चहलइत्यकारप्रत्ययः

राम्मः
७५

149

दीर्घं च। दीर्घं गुरुसंज्ञं स्यात्। ईहांचक्रे॥ ॥यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गं॥ प्रत्ययो यस्माद्विहितस्तदादिशब्दः प्रत्यये प
रेऽङ्गसंज्ञः स्यात्। रामेण। विधिरिति किं। स्त्री इयती। न चेह वतुपः स्त्रीशब्दाद्विधानेऽपि सोऽविधिरस्त्वेवेति वाच्यं। संनिधानबले
न यस्माद्यः प्रत्ययो विहितस्तस्मिन्नेवाङ्गमिति व्याख्यानात्। तदादि किं। वदामि। वदिष्यामि। अतो दीर्घो यञि। इति दीर्घः। न चायमार्द्ध
भसामर्थ्यादेव भविष्यतीति वाच्यं। ययगतौ। वयगतौ। अभ्यां पङ्लुकि पापामि। पापावः। पापामः। वावामि। वा वावं वामद्गतौ दे वा
चरितार्थत्वात्। प्रत्यये किं। प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा माभूत्। एवं हि वव्रश्चेत्युरदत्वस्य परनिमित्तत्वं न लभ्येत। त
था च अचः परस्मिन्निति स्थानिवत्वाभावादकारस्य संप्रसारणाप्रसंगः न च प्रथमसूत्रेणास्याभिकङ्गावः। अल्विधित्वात्।
अत एव हि सत्यपि प्रथमलिंगग्रहणे निष्कौशाम्बादौ नदीकार्यं नेत्युक्तं। इह प्रकृत्यादिप्रत्ययेऽङ्गमित्येव लाघवादक्तुं युक्तं। प्र
कृतिमात्रस्य तु व्यपदेशिवद्भावात्सिद्धं। कर्त्ता॥ कारकः॥ इह योगविभजनेन यस्मात्प्रत्ययविधिस्तदादिप्रत्यये इति॥ परिभाषे
यं॥ प्रत्यये गृह्यमाणे यस्मात्तस्य [illegible] विधिस्तदादि गृह्यते इत्यर्थः। तेन ञ्नित्यादिरित्यादौ यत्र प्रत्ययः सप्तम्या निर्दिश्यते तत्र
तदादेर्ग्रहणं। तेन देवदत्तो गार्ग्य इति संघातस्य ञित्वेन न भवति। सुप आत्मनः क्यच्। इत्यत्राप्यनेन तदादिनियमः। तत्र तु
पाकमिणस्तदादेर्विशेषणान्नेदं तद्विधिः। तेन महान्तं पुत्रमिच्छतीत्यादौ न भवति प्रसंगो न। सति हि वाक्यात्क्यचि महत्पुत्रीयति)

150

शा.कौ.
७६
२९५५

तिस्यात्। तथा देवदत्तश्चिकीर्षतीति संघातस्य धातुसंज्ञा न। देवदत्तो गार्ग्य इति संघातस्य प्रातिपदिकसंज्ञा न। देवदत्तो गा
र्ग्यायण इति संघातात्फक् नेति दिक्। अस्यापवादः॥ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति। इह च गतिरनंतर इत्यनंतर
ग्रहणं ज्ञापकं। तद्धि अभ्युद्धृतशब्दे उद्व्यवहितस्याभिशब्दस्य प्रकृतिस्वरनिवृत्त्यर्थं। न च परत्वात्कृत्तिर्गनावितिनिघाते कृते उदा
त्तग्रहणानुवृत्त्या विधीयमानः पूर्वपदप्रकृतिस्वरेण न भविष्यतीति वाच्यं। अपादादावित्यधिकारात्पाहाहेति निघाताप्रवृत्तेः। तदा हि
नियमेनोद्धृतशब्दस्य क्तांतत्वेऽभ्युद्धृतशब्दस्याक्तांतत्वात्प्राप्तिरेव नेति किमनंतरग्रहणेन। प्रयोजनं तु समासतद्धितस्वराः। तथा
हि। अवतप्तेनकुलस्थितमित्यत्र क्तेनेत्यनुवर्त्तमाने क्षेपे इति समासः॥ तत्पुरुषे कृतीत्यलुक्। सांकूटिनमित्यत्र अभिविधौ भाव इनुण्।
इति सोपसर्गाद्दण्। अत एवादिष्टाद्विरूपसर्गाः शेषे पर्यवस्यति। आवक्रोशीत्यत्र कर्मव्यतिहारे णच्स्त्रियामिति णच्। ततो णचः
स्त्रियामित्यञ्। न कर्मव्यतिहारे इत्यैजागमनिषेधः। कृदग्रहणे गत्यत्र थाथादिस्वरेणांतोदात्तत्वं। ननु परिभाषां विनापि स
मासस्येत्यंतोदात्तो भविष्यतीति चेन्नैवं। आगम्यतेस्मैति हिकमीरिता॥ तथा च समासस्वरं बाधित्वा गतिरनंतर इति मध्यो
दात्तः स्यात्। सत्यां तु परिभाषायां थाथघञ्क्तेत्यनेन कृत्स्वरापवादेन गतिस्वरं बाधित्वा परत्वादंतोदात्तत्वं भवति। ननु थाथा
दिस्वरस्याप्यपवादो गतिस्वरः॥ सत्यं। गतेरुत्तरस्य क्तांतस्यैवांतोदात्तत्वं तस्यैवासावपवादः॥ कारकादुत्तरस्य तु थाथादिस्वर एव

राम:
७६

५१

151

ति॰ २

व भवतीति वक्ष्यते। नन्वस्तु गतिस्वरेणाद्युदात्त आगतशब्दः। ततो दूरशब्दस्य स्तोकांतिकेतिके ति समासः। पंचम्याः स्तोकादिभ्य इत्य
लुक्। ततः सतिशिष्टत्वात्समासांतोदात्त एव भविष्यति तत्र। अन्यार्थकतया परिभाषया कृदुत्तरपदप्रकृतस्वरेणाद्युदात्ते आ
गतशब्दे प्राप्ते सगते रपि कृत्त्वात्स्यानांतर्भूतत्वात् तिस्वरस्य बाधकस्यापि बाधेन स्याथाथादिस्वरो भवतीत्येवाभिप्रेतेन तु स्व
रवानन्यथासिद्धे परिभाषोदाहरणं। एषा च परिभाषा प्रातिपदिकसंज्ञायां न प्रवर्त्तते। मध्येपवादन्यायेन कृद्ग्रहणस्य प्रत्ययइ
ति निषेधमात्रबाधकत्वात्। समासेन रः पदसंज्ञकपूर्वभागघटितः संघातो न प्रातिपदिकमिति निषेधस्तु परत्वाद्बाधक एव।
तेन मूलके नोपदंशमित्यत्र न स्तु पोलुक्॥ न च समासविकल्पसामर्थ्यं। न समासइति शाकलनिषेधाप्रवृत्त्यारम्भुपदंशा
दौ तत्सार्थक्यसंभवात्। एतच्च पुंयोगादाख्यायामिति सूत्रे भाष्यकैयटयोः स्पष्टमिति दिक्। ष्यङः संप्रसारणमिति सू
त्रे भाष्ये तदादिनियमस्यापवादांतरं पठितं। स्त्रीप्रत्यये चानुपसर्जने न तदादिनियमो नेति। एतच्च वाचनिकमेवेति सर्वादिसू
त्रे व्याख्यातं। यद्वा। इह नेयङुवङ्स्थानावितितो ऽत्र स्त्रीत्यनुवर्त्तते। तच्च यद्यपि तत्र स्वरूपपदार्थकं तथापीहार्थपरं संपद्य
ते। प्रत्ययग्रहणे तदादिग्रहं स्त्री चेन्नाभिधीयत इत्यर्थः। तेन स्त्रीप्रत्यये तदादिनियमो नास्तीति फलितं। न चैवमतिका
रीषगंध्यापुत्र इत्यत्र संप्रसारणाप्रसंगः। अस्त्रीत्यनेन प्रधानस्त्रियामेव प्रतिषेधात्। गोणमुख्ययोरिति न्यायात्। तेन यावा

152

श॰कौ॰

७७

२९६

न्शब्दः स्त्रियं प्राधान्येनाह तावान्स्त्रीप्रत्ययांतः न तु ततोधिकोपीति स्थितं॥ ॥ सुप्तिङंतं पदं। सुबंतं तिङंतं च पदसंज्ञं स्यात्। ब्राह्म
णा कुचुः। अंतग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदंतग्रहणं नास्तीति ज्ञापनार्थं। गौरब्राह्मणितरा। घसंज्ञायां तरबंतग्रह
णो हिंसतीति गौरीशब्दस्य पुंवत्कर्मधारयेति पुंवद्भावं बाधित्वा पुंवद्भावात् ह्रस्वत्वं घादिके घिति ह्रस्वः स्यात्। पद्धितरेणि
वत्। ब्राह्मणीशब्दस्य च ह्रस्वो न स्यात्। कथं तर्हि प्रातिपदिकसंज्ञायां कृत्तद्धितशब्दाभ्यां तदंतग्रहणमिति चेत्। अत्र भाष्य
कारः। अर्थवद्ग्रहणं तत्रानुवर्त्तते तत्सामर्थ्यात्तदंतग्रहणमिति। स्यादेतत्। यद्यर्थवत्सूत्रे वार्त्तिकं। अर्थवत्त्वानोपपद्यते
केवलेनावचनात् इति। अथ सिद्धं त्वन्वयव्यतिरेकाभ्यामिति तत्र। यो न स्वार्त्तिकानुरोधेन प्रक्रियादशायां कल्पितमात्राविशे
वद्यते तर्हि कृत्तद्धितयोरपि स्यात्तीति चेत्सत्यं। अत एवार्थवद्ग्रहणसामर्थ्यमुक्तं। प्रत्ययांतेन ह्येकार्थीभूतेन प्रतीयमाने
र्थे गृह्यते॥ तस्य लौकिकार्थप्रतिपत्त्यासन्नतरत्वात्। मतुपः प्राशस्त्यपरतया तस्यैव ग्रहणात्। अत एव च तदुपादानं स
र्थकं। पूर्वसूत्रे अधातुरिति पर्युदासबलेनापि तल्लाभसंभवात्। नः क्ये। क्यचि क्यङि क्यषि च नांतमेव पदसंज्ञं स्यात्। क्यच्॥
राजायति। क्यङ्॥ राजायते। क्यष्। चर्मायति। चर्मायते। इहैव सामान्यग्रहणार्थं क्यषः ककारः इति वदतो वृत्तिकारस्य मते ने
दमुदाहृतं। मोष्ये तु क्यषः ककारस्य प्रत्याख्यानात् क्यच् क्यङोरेव ग्रहणं। चर्मायतीति रूपं चासाधु। क्यङंततया नित्यमात्मने प

र्थवत्तापारमार्थिकी विवक्ष्यते॰ तर्हि सा पदस्य॰ वाक्यस्य वास्ति॰ न तु कृत्तद्धितांतस्य तथा चा १

रामः

७७

आदेशप्रत्यययोरिति षत्वं। दृषएरवस्वम्भ्यपोः। दृषवर्षयुं वसु यस्य सः दृषएवसुः। एवं दृषएभ्वः। ८
षि १

दाम्सु पममात्। तथा च वक्ष्यते। लोहितडाजुभ्यः क्यषुवचनं भृशादिष्वितराणीति। एतच्चान्तीय एव स्फुटीकरिष्यामः॥ नांतमे
वेति किं। वाच्यति। स्नुच्यतीति प्रस्नाति। ननु क्य एव नांतमिति विपरीतो नियमः कुतो नेति चेत् नङिसंबुद्ध्योरिति ज्ञापकात्।
नलोपः प्रातिपदिकांतस्येति ज्ञापकवादः भवतष्ठक्छसौ। भवदीयः। ऋतोरण्। छंदसि घस्। ऋतुः प्राप्तोस्य ऋत्वियः॥ ॥
सू ४ स्वादिष्वसर्वनामस्थाने। कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परेषु पूर्वं पदसंज्ञं स्यात्। राजभ्यां। राजभिः। राजत्वं। राजता। सर्व
नामस्थाने तु। राजानौ। राजानः। भुवद्भ्यो धारयद्भ्य इति पदसंज्ञायां उपसंख्यानं। तसौ मत्वर्थे इति भसंज्ञाया अपवादः। यचि भं। य
कारादिष्वजादिषु च स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्। गार्ग्यः। राज्ञः। वाचिकः षडिकः। योस्तु यथा भत्वा भत्वे निर्वहतस्त
था पंचमे वक्ष्यते। नभोंगिरोमनुषां वत्युपसंख्यानं। नभसा तुल्यं वर्तते इति नभस्वत्। भत्वाद्रुत्वाभावः। मनुष्वदग्ने अंगिरस्वद
गिरः। जनेरुसीत्यत्र बहुलग्रहणानुवृत्तेर्मन्यतेरुसिप्रत्ययः। कर्मधारयः षष्ठीतत्पुरुषाद्वा यथासंभवं बोध्यः। इहांतर्वर्तिनीं विभक्ति
माश्रित्य पदत्वे सति नलोपः प्रसज्येत। भत्वात्तु न पदत्वं। अत एव पदांतस्येति णत्वनिषेधो न॥ अल्लोपः इति तु न भवति। अंग
संज्ञाया अभावात्। अंगस्येति च तत्राधिकारात्। उपसंख्यानान्येतानि छंदोविषयाणीति केचित्॥ ॥तसौ मत्वर्थे॥ तांतसां
तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे। विद्युत्वान्। भत्वाज्जश्त्वं न। उदकेन श्वयति वर्धते इत्युदश्वित्। क्विप्। उदश्वित्वान्। तरस्वा

ज्ञापकात्वं। अन्यथा हि नलोपः स्यादित्येव सूत्रयेत॥ सिति च॥ सितिप्रत्यये परे पूर्वं पदसंज्ञं स्यात् भसं

शकौ॰ ७८

मिति निपातनात्संप्रसारणाभावः। उदकस्योदः संज्ञायाम्। उदश्वित्वान्घोषः। यशस्वीमित्यर्थे ह्वनित्वं मतुपो विधर्मतीनां चाविशिष्टं अत उ
भयत्र भत्वप्रवृत्तिः। यथा देवदत्तशालायां ब्राह्मणानीयन्तामित्युक्ते देवदत्तोऽप्यानीयते। उद्देश्यतावच्छेदकारूपाक्रान्तत्वात्॥ ॥
अयस्मयादीनि छन्दसि॥ एतानि छन्दसि साधूनि भयदसंज्ञाधिकारात्पद्याया योगं तु भयद्वारेणास्य साधुत्वं विधीयते॥ तथा च वार्त्तिकं
उभयसंज्ञान्यपीति वक्तव्यमिति। अयस्मयं पात्रं भत्वात् रुत्वं न। अयसा विकार इत्यर्थे द्व्यचश्छन्दसीति मयट्। एतेन मयट्त्वतो भाषायामि
त्युक्तेः तं यमिह मयडित्याशङ्क्यात एव निपातनादिति वदन्तः सकतरास्तः। स सुष्टुभा स ऋक्वता गणेन। ऋक्वतेति पदत्वात्कुत्व
स्वत्वाज्जश्त्वाभावः। जश्त्वविधानार्थायाः पदसंज्ञायाः भत्वेन प्रतिबन्धात्। बहुषु बहुवचनम्। बहुत्वे एतत्स्यात्। दाराः। कथं तर्हि दारा इति।
अवयवबहुत्वस्यावयविनि आरोपाद्भविष्यति। न चैवमेकस्मिन्नपि देहे बहुवचनापत्तिः। तत्रारोपे प्रमाणाभावात्। दारादौ तु नि
त्यबहुवचनान्तत्वग्राहककोशादेर्व्यवहारस्य च मानत्वेन वैषम्यात्। द्व्येकयोर्द्विवचनैकवचने। द्वित्वैकत्वयोरेते स्तः। द्वौ। एकः। इह
द्व्येकशब्दौ संख्यापरौ। न तु संख्येयपरौ। अत एव द्व्येकयोरिति द्विवचनम्। अन्यथा बहुवचनं स्यात्॥ पूर्वसूत्रेऽपि बहुष्विति संख्याप
रमेव वा बहुवचनं तु आश्रयगतं बहुत्वं धर्ममारोप्य कृतम्। तत्फलं तु बहुः पर्वत इति वैपुल्यवाचिनो नेह ग्रहणमिति सूचनमेव वा
स्तुनोवांर्थतित॥ परत्वादेकवचनं संभवात्। यत्तु आदशतः संख्याः संख्येय इति तत्प्रायोवादमात्रं। अत्र श्लोकवार्त्तिकं सुयांकमीदर्षे

स ४ इह ५ यो ४ राम॰ ७८

प्र१

यर्थाः संख्या चैव तथा तिङां। प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा। कर्मणि द्वितीयेत्यादौ कारणस्य बहुषु बहुवचनमित्या
५२ देश्च स्वादिसूत्रेण सह एकवाक्यतया विधायत्वं। तथा बहुषु बहुवचनमित्यादिसूत्रयोस्तिबादिवाक्येना[illegible]येव वाक्यते इति पूर्वा
५३ र्धस्यार्थः। तृतीयचरणो नार्थनियम उक्तः। चतुर्थे नेतु प्रकृत्यर्थापेक्षः प्रत्ययनियम उक्तः। एषां पक्षाणां बलाबलचिंतानु तद्धि
ष्ठासर्वविभक्तिरिति सूत्र एवास्माभिः कृता। इह एकद्विबहुष्वेकवचनद्विवचनबहुवचनानीति कर्तुमुचितं। बहुशब्दस्य संख्या
वाच्येव ग्रहीष्यते। द्विशब्दसाहचर्यात्॥ अत एव हि एकशब्दः संख्यावाच्येव गृह्यतो वस्तुतस्तु इदं सूत्रद्वयं मास्तु। एकवचनादि
संज्ञानामन्वर्थतामाश्रयणेन सकलेष्टसिद्धेः॥ ॥श्री॥ ॥इति श्रीशब्दकौस्तुभे प्रथमाध्यायस्य चतुर्थे चरणे द्वितीयमाह्नि
कं॥ ॥श्री॥ ॥कारके। अधिकारोयं। व्यत्ययेन प्रथमार्थे सप्तमी। तथा च ध्रुवमित्यादेरुपरि सूत्रं वाक्यं भित्त्वा कारकसं
ज्ञा विधीयते। तथा हि। अपाये ध्रुवं कारकसंज्ञं स्यात्। ततः अपादानं। उक्तं कारकमपादानसंज्ञं स्यात्। पुनः कारकशब्दा
नुवृत्तिसामर्थ्याद्विशेषसंज्ञाभिः सह समावेशः। न तु पर्यायः। अनुवृत्तिं विनापि प्रथमवाक्यमात्रान्नसिद्धेः। ते ने
स्तंबेरमइत्यादौ अधिकरणत्वात्सप्तमी। गतिकारकोपपदात्कृदिति प्रकृतिस्वरश्च सिद्धः। घाथादिस्वरस्तु न भवति।
अपासोह चार्यादेरचेवं तत्र ग्रहणात्। न चोपपदत्वादेव कृदुत्तरपदप्रकृतिस्वरोस्त्विति वाच्यं। स्तंबकरणीयो रितिनिर्देशात्वाति

श्री कौ
७५
२५८

पदिकयोस्तथात्वेपि सप्तमीविशिष्टयोस्तथात्वात्। नहि सप्तमीविशिष्टं सप्तम्यानिर्दिष्टं येनोपपदसंज्ञा लभ्येतेतिदिक्। अन्वर्था चेयं
संज्ञा। करोतीति कारकमिति। तेन क्रियानन्वयिनो न भवति। ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति। इह हि ब्राह्मणः पुत्रविशेषणं। ननु
क्रियान्वयी। ननु पुत्रो हि कथं कारकं। प्रश्नो हि जिज्ञासा। तत्र पृष्टुः कारकत्वेपि यत्प्रति प्रश्नस्तस्य जनकत्वायोगादिति चेत्सत्यं। मा
स्तुजनकत्वं क्रियान्वयमात्रमिह विवक्षितं। तज्ज्ञासैवा एतेन संप्रदानस्य कारकत्वं माभूत्। यद्वा संप्रदानादेरपि प्रथमे बुध्या
रोहात्कारकता।। एवं जायते करोतीत्यादौ कर्तृकर्मणोरपि बोध्यं। कार्याव्यवहितपूर्वक्षणावृत्तीनां कथं कारणतेति चेत्।। यथा
यागस्येत्यवेहि।। तत्र व्यापारोस्तीति चेन्न। तावतापि यागस्य पूर्ववर्त्तितानुपपादनात्। अव्यवहितपूर्ववर्त्तित्वस्य व्यापारान्यतरकत्वं
कारणत्वमिति चेन्न। व्यापारत्वस्य कारणत्वगर्भतयात्माश्रयापत्तेः।। स्वव्यापारस्यैव स्वज्ञाकांनस्यापि प्रवेशासंभवाच्च। अत एव
ज्ञायमानं लिंगं पदं चानुमितिशाब्दज्ञानयोः करणमिति जरन्नैयायिकाः। ज्ञायमानैः पदार्थैः करणमिति च मीमांसकाः। अ
त एव च रथंतरसामादैन्द्रवायवाग्रत्वादौ निमित्तेनेत्यूह्यषो मीमांसकानां। अथवा उपसर्जनसंज्ञा यथा राज्ञः कुमार्याः राजकु
मार्यादुतादौ यथासंभवमन्वर्थापि त्र्यर्धे पिप्पलीत्यादौ वचनाद्भवति तथा कारकं संज्ञापि प्रतिसूत्रं विधीयमाना वचनात्संप्र
दानादौ भवति। प्रदेशेषु तु संज्ञाप्रकारक एव बोधः। तद्रूपप्रकारको वेत्पन्नपदेन तत्स्यादेन तद्दनस्य परीपननीत्यादौ परा विशे

त१

राम:
७५

157

षणस्यापि हस्तस्य कारकतापत्तिः हस्तात्पततीतिप्रयोगानुरोधात्। नहि अस्मदीयशब्दप्रयोगवैलक्षण्यमात्रेण एकस्यैव जनकता
जनकत्वे व्यवतिष्ठेते इति चेत्। अत्रेदं सिद्धान्तरहस्यं। कारकत्वं तद्व्याप्यकर्तृत्वादिषट्कं च वस्तु विशेषि अनवस्थिते। विशेषणविशे
ष्यवत्। नहि गोः सर्वं प्रति गोरेव। न तु केचित्प्रति गौरिति वद्विशेषणं विशेषणमेवेति स्तुवचं। तथा च किं कारकं कः कर्ता किं कर्मेत्या
दिप्रश्ने सर्वमित्युत्तरं। वह्निमारणकर्तृत्वादेश्चैत्रनेषु अन्नादिषु च निर्बाधत्वात्। कयापि च धात्वन्तया उपस्थापितेऽर्थे क्रिकं त्रीदिक
मिति प्रश्ने तु प्रकृत पचि व्यन्त्युपात्तव्यापाराश्रयः कर्ता। व्यापारव्यधिकरणफलाश्रयः कर्म व्यापारोत्तरभावित्वं क्रियाया विवक्ष
तेन त्करणं कर्तृकर्मणोराश्रयोऽधिकरणमित्यादिक्रमेणोत्तरं। विक्लृत्यनुकूलव्यापारो हि पच्यर्थः। व्यापारश्चानेकधा। तत्रोज्व
लनतात्पर्यकत्वे त्वेधाः कर्तारः। तण्डुलधारणादिपरत्वे स्थाली कर्त्री। अवयवविभागादिपरत्वे तण्डुलाः एवं कर्मकर्तृकरणक
र्त्रादिव्यवहारः। एवं स्थाल्यां पचतीत्यत्र तृतीयोपात्तव्यापाराश्रयोऽपि स्थालीकरणमेव। न तु तदा कर्त्री॥ देवदत्तो दिवापा
रस्यैव तद्धातूपात्तत्वात्। तथा आदिखादिभ्यामुपात्तेऽर्थे वटुः कर्ता। तस्मिन्नेवार्थे भक्षयतिनोपात्ते वटुः। कर्म। अधिपूर्वैः
अ२ शीङ्स्थाप्रभृतिभिरुपात्तेऽर्थे आधारः कर्म। तैरेव केवलैरुपात्ते अधिकरणमित्यादि। नन्वेवमननुगम इति चेत्सत्यं। क
स्पकैः पिता को भ्राता तेन तत्रैवानुगमनस्य केवलत्वात्। अत एव प्रयोगाणां साध्वसाधुता व्यवतिष्ठते। अन्यथाऽक चित्क

पचेरधिश्रयणतण्डुलावपनैधोपकर्षणापकर्षणफूत्कारादितात्पर्यकत्वे तदाश्रयो देवदत्तः कर्ता। द कर्तारः। अत एव प

शः कौ
८०
२९९

र्तुः सर्वत्र कर्तृनापत्तेः सर्वप्रयोगाः संकीर्येरन् । उक्तं च हरिणा । वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितं । स्थाल्या पच्यत इत्येषा व्यव
स्थादृश्यते यत इति ॥ अत एव प्रयोजकव्यापारांशस्य त्वाविशेषे पिपच्यादि धातुः प्रयोज्येन कर्मगम्या दृष्टिवत् सकर्मा तथापि वा णौ ॥
काव्यद्गुणो तिनटस्य ग्रहणो नीत्यत्र पौराणिकौ पादानं कारकं च । न टस्तुनोभयमित्यादिवत् समाराणं संगच्छते । नन्वेवं लः कर्मणि
त्यादि विधिषु किं कर्म ग्राह्यमिति चेद्द्विनिगमकाभावात् सर्वमित्यवेहि । यथा भस्येत्यत्र सर्वं भं तर्हि टिघुभादिवत् पारिभाषिकमे
कं कारकं कर्मत्वादिकं स्यादिति चेन्न । को वा ब्रूते नेति । एतावानेव परं भेदः । टिघुभादीनां शब्दसंज्ञात्वमितरेषां तु अर्थसंज्ञात्वमिति ॥
एवं च कर्मणि द्वितीयेत्यनेन यथा यस्य आधारादावपि द्वितीया विधीयत इति फलितं । रथेन गम्यते रथो गच्छतीत्यादावपि कर्तृत्वं वि
वक्षितमिति उत्सर्गो वसिद्धेति न कत्रलन्तरणा आश्रयणीयमेव घेयं । विभक्तीनां वाच्यांशनिष्कर्षस्तु करिष्यते एतेन ज्ञानस्य स्वप्र
काशत्वे कर्तृकर्मविरोधमुद्भावयन्तः परास्ताः ॥ शब्दविशेषोपाधिकस्य कर्तृत्वादेः प्रत्यक्षादावुक्तिसंभवाभावात् । एतेन पर
समवेतक्रियाफलशालित्वं चेदपादानेतिव्याप्तिरित्याशंक्य धात्वर्थतावच्छेदकफलशालित्वे तदितिपरिष्कुर्वन्तोऽपि परा
स्ताः ॥ ग्रामं गमयति देवदत्तमित्यादौ गतेरव्याप्तेः । त्वन्मते गमनस्य प्रकृत्यर्थत्वेऽपि तथात्वानवच्छेदकत्वात् । न त्वेवापा
चं यत्यादि प्रयोज्यकर्तृत्वेतिव्याप्तेः । तत्र पारिभाषिकमनुशासनोपयोगिकर्मत्वं वचनबलाद्व्यवस्थितमिति चेत् ॥ अपादा

रमः
८०

159.

नेपितर्हितन्नास्तीत्यवधेहि। एकसंज्ञाधिकारेऽनवकाशयासावकाशाया बाधनात्। अतएवात्मानमात्मा हंतीत्यादौपरत्याक अ २
र्तृसंज्ञा मा कर्मसंज्ञाबाधमाशंक्याहंकारादिविशिष्टात्मभेदमाश्रित्यतत्र तैर्भाष्ये समाहितमिति दिक्। नन्वेवं करणं कारकमि
ति सामानाधिकरण्यं कथं। अस्यांतं च्येणखुल्प्रत्ययायोगात्। अन्यथा कर्तृसंज्ञप्तौ करणसंज्ञायाः पर्यायापत्तेरिति चेत्।
उच्यते अधिकारसामर्थ्यात्कारकशब्दोपनीतेस्वातंत्र्यमिवस्यांतरगतं विज्ञायते अवस्यांतरे यत्स्वतंत्रं तत्साधकतमं क
रणमिति। यथा कुरूहे ऽस्याः काश्यां वसेतीत्यादौ। कर्तृत्वस्य सांप्रतिकं स्वातंत्र्यात्कर्तृसंज्ञायामुपपद्यते इति। यद्वा। का
रकशब्दः क्रियापरः। करोतिकर्तृकर्मादिव्यपदेशानिति व्युत्पत्तेः [illegible] न थाव अपादानादिसंज्ञाविधौ क्रियायामित्यस्योपस्थि
त्या क्रियान्वयिनामेवतत्संज्ञाः स्युः। कारकाहृत्त श्रुतयोरित्यादौ तु कारकशब्दः स्वार्थपरोऽतेनैतदधिकारोक्तं कर्त्रादिष
ट्कमेव गृह्यते इति॥ ॥ ध्रुवमपायेपादानं। अपायो विश्लेषो विभागस्तद्धेतुत्वोपहितो गतिविशेषस्तेहविवक्षितस्तस्मिन्साध्ये
अवधिभूतमपादानसंज्ञं स्यात्। वृक्षात्पततीति। ध्रुवमित्यत्र ध्रुगतिस्थैर्ययोरित्यस्मात्कुटादेः पचाद्यच्। येन ध्रुवस्थैर्यमिति प
ठंति तेषामिगुपधलक्षणः कप्रत्ययः॥ ध्रुवतीति ध्रुवं स्थिरं। एकरूपमिति यावत्। ध्रुवमस्य शीलमिति यथा ँचापाये साध्ये
यदेकरूपमित्युक्तेऽप्रकृतधात्वपात्तगत्यनाविष्टत्वे सतितदुपयोगीति लभ्यते। तच्चार्थादवधिभूतमेव पर्यवस्यति॥ ने
नपा २

160

श्र.कौ. ८१ ३००

नधावतोऽश्वात्पततीत्यादौ क्रियाविष्टस्याप्यश्वस्य प्रकृतपतिधात्वर्थक्रियांऽशेऽवधित्वं न विरुध्यते तथा परस्परस्मान्मेषावपसरत इत्यत्र
स्वधात्वर्थगतिद्वयस्याप्युपादानादेकमेषनिष्ठगतिं प्रत्यपरस्यापादानत्वं सिध्यति॥ उक्तं च हरिणा प्रकीर्णकाण्डे अपाये यदुदासीनं
चलं वा यदि वाचलं। ध्रुवमेवातदावेशात्तदपादानमुच्यते। पततो [illegible] ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ। तस्याप्यश्वस्य पतने कुड्यादि ध्रु
वमिष्यते। मेषांतरक्रियापेक्षमवधित्वं पृथक् पृथक्। मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक् इति। अतदावेशादिति॥ अपाया
नावेशादित्यर्थः॥ गतिर्विना त्ववधिना नापाय इति कथ्यते इति चेद्बोध्ये स्वधिनिरपेक्षस्य चलनस्यापायत्वाभावादिति भावः। पर्वतात्प
ततोऽश्वात्पततीत्यत्र तु। पर्वतावधिकपतनाश्रयोऽश्वस्तदवधिकं देवदत्ताश्रयं पतनमर्थः॥ पंचमीत्ववधौ प्रोक्ता। तत्राभेदेन सं
सर्गेण॥ प्रकृत्यर्थो विशेषणं॥ प्रत्ययार्थस्तु क्रियायां विशेषणं। कारणं क्रिययैव संबंधात्॥ अन्यथा असाधुत्वात्। क्रियान्व
यित्वेव हि कारकसंज्ञा तत्पूर्विका विशेषसंज्ञा व्यवस्थिताः। अत एवाहुः॥ नाम्नोर्द्वयोरेव संबंधः सर्ववाक्येष्ववस्थितः। सामानाधि
करण्येन षष्ठ्या वापि क्वचिद्भवेदिति। सामानाधिकरण्येनेति। नीलो घट इत्याद्यभिप्रायं। नीलं घटमानयेत्यादावपि तदंग
क्रियान्वयानंतरमेकक्रियावशीकृतानां पार्ष्ठिकबोधाभिप्रायेण च। षष्ठ्येति। अकारकविभक्तेरुपलक्षणं। हरये नम इति य
था॥ क्वचिदिति। अकारकविभक्तेरपि नटस्य शृणोतीत्यादौ क्रियान्वयदर्शनादिति भावः। एतेन भूतले घटो नेत्यत्र भूतलाधेय

स.४

त१ दि५ रका५ राम: ८१

त्वाभावो घटेऽस्त्वाभिधेयत्वं वा घटाभावविशेषणमिति द्वेधा व्याचक्षाणा नैय्यायिकाः परास्ताः॥ उभयथापि प्रक्रियानन्वये कार
कविभक्तेरसाधुत्वात्। अर्थाभावेऽव्ययीभावापत्तेश्च। नञ्समासनित्यसमासत्वात्। न [illegible]स्मदुक्तोऽपि बोधोऽस्मदृशेनव्युत्पन्नाना
मनुभवसाक्षिक इति चेत्। सत्यं न ह्ययं बोधस्त्वनोदेतीति ब्रूमः। सर्वे सर्वार्थबोधनसमर्था इत्यभ्युपगमात्। किं तु तस्मिन्न
र्थेऽसाधुता। तथा च निर्दिष्टशब्दार्थे संबन्ध इति वार्त्तिकव्याख्यानावसरे भाष्यकारा आहुः॥ समानायामर्थावगतौ साधुभिश्चासाधुभिश्च गम्या
गम्येति वन्नियमः क्रियत इति। उक्तं च भेदकसंबन्धोपाधिभेदनियंत्रितं। साधुत्वं तदभावेऽपि बोधो नेह निवार्यते इति। एवं च कस्मादृ
श्यात्कीदृग्बोध इति प्रश्ने योयथाव्युत्पन्नस्तस्य तादृग्बोध इति स्थितिः। कीदृशे बोधे साधुत्वं कुत्र नैतिपरं विचारविषय इति तत्त्वं॥ एते
न घटः कर्मत्वमानयनं कृतिरित्यादीनां स्वरूपायोग्यतेति परास्तं। तथा व्युत्पन्नस्य बोधानुभवात्। अन्यथाव्युत्पन्नस्य व्युत्पत्तिरूप
सहकारिविरहात्कार्यानुदयेऽपि स्वरूपयोग्यतानपायात्। एतेन प्रकृत्यर्थप्रकारको बोधो यत्र विशेष्यतया तत्र विषयतयाऽत्यय
जन्य इत्यादिकार्यकारणभावं कल्पयन्तोऽपि परास्ताः। विपरीतव्युत्पत्तिदिने व्यभिचारस्योद्भटत्वात्। सिद्धान्ते तु घटः कर्मत्वमित्याद्य
साध्वेव। तथाहि। अभिहिते प्रथमेति वार्त्तिकान्तत्कर्षं घटः कर्मत्वमिति प्रथमा घटानयनयोरानयनकर्तृप्रतिकर्मतया
कर्मणोरिति षष्ठीप्रसंगाच्चेति दिक्। निर्दिष्टविषयं किंचिदुपात्तविषयं तथा। अपेक्षितक्रियं चेति त्रिधोपादानमुच्यते॥ यत्र सा

भेघ५

न५

श॰कौ॰
८२
३०१

ज्ञाह्वालुनागतिर्निर्दिश्यते तन्निर्दिष्टविषयं अप्राप्तीति यथा। यत्र तु धात्वंतरार्थांगं स्वार्थं धातुराह तदुपात्तविषयं यथा बलाहकाद्विद्यो
तत इति। निःसरणांगे विद्योतने द्युतिर्वर्तते। यथा वा कुसूलात्पचतीति। आदानांगे पाके त्रपचिर्वर्त्तते। अपेक्षितक्रियं तु तत्। यत्र प्र
त्यक्षसिद्धमागमनं मनसि निधाय पृच्छति। कुतो भवानिति। पाटलिपुत्रादिति चोत्तरयति। अर्थाध्याहारस्य न्याय्यतया पाठे उक्तत्वा
त्। इह सार्थाद्धीयत इत्यपि निर्दिष्टविषयस्योदाहरणं। स्यादेतत्। तत्र परत्वात्सार्थस्य कर्तृसंज्ञा प्राप्नोतीति। उक्तं हि। अपादानमु
त्तराणीति। किंच सार्थस्य कर्तृत्वाभावेऽप्युज्यमानस्य कर्मसंज्ञा न स्यात्। कर्तृव्यापाराश्रयत्वाभावात्। ततश्च हीयते हीन इति क
र्मणि लकारो निष्ठा च न स्यात्। न च कर्मकर्तर्ययं लकार इति वाच्यं। जहातेः कर्तृस्थक्रियत्वात् कर्मण्ययेवायं लकार इतीदं दूने
क्तत्वात्। यत्तु अपादाने चाहीयरुहोरिति सूत्रे न्यासकारेण। संप्रदानसूत्रे कैयटेन चोक्तं कर्मसंज्ञायां कर्तृग्रहणं स्वातंत्र्यो
पलक्षणं। अतो हानक्रियायां स्वतंत्रेणापादानेनाप्यमानस्य हकर्मतेति। तच्चिंत्यं माषेष्वश्वं बध्नातीत्यत्र कर्मणोऽश्वस्य
वस्तुतो भक्षणीयत्वात् तदाश्रयकर्मसंज्ञापत्तेः। अत एव कर्मणि द्वितीयेति सूत्रशेषे कैयटेनोक्तं। प्रयोजकव्यापारस्याशद्रा राम:
र्थत्वान्न तदपेक्षं कर्मत्वमयुक्तमिति। अत्राहुः। सार्थाद्धीयत इत्यत्र कर्मकर्तरि लकारः। तथा हि। अपगमनाज्जहातेरर्थः। ८२
स च हस्त्युद्घातादिना देवदत्तस्यापगमनेन तत्समर्थाचरणं। यदा तु हस्त्युद्घातादिना स्वयमेवापगच्छति तदा कर्मकर्तृत्वात्सिद्धं

संज्ञाविधायक एतस्य तत्राभावः

स्फुटं चेदं हरदत्तमाधवग्रन्थयोः। स्यादेतत्। ध्रुवग्रहणं किमर्थं। न च ग्रामादागच्छति शकटेनेत्यत्र शकटेनेति व्याप्तिवारणाय
तदिति वाच्यं। करणत्वान्नत्र करणसंज्ञा ऽऽप्रवृत्तेः। यथा धनुषा विध्यतीत्यत्र इह [illegible] शरनिःसरणं प्रत्यवधिभावोपगमेनैव धनुषः करण
त्वे ऽपि भयप्रसंगः। वृक्षस्य पर्णं पतीत्यादौ तु वृक्षः पर्णविशेषणेन त्वयापायेन युज्यते। न च संज्ञिनिर्देशार्थं ध्रुवग्रहणं। अपाये क्रियायां
यदन्वेतीत्यस्यापि संज्ञिसमर्पकत्वात्। पा॰ ह्वाकारके इति निर्द्धारणसमर्थाश्रयणात्कारकमिति लभ्यते। पूर्वत्रापि प्र
धमार्थे तस्मीत्युक्तत्वाच्च। तस्मात् ध्रुवग्रहणं चिंत्यप्रयोजनं। जुगुप्साविरामप्रमादार्थानामुपसंख्यानं। अधर्मात् जुगुप्स
ते विरमति प्रमाद्यति वा। संश्लेषपूर्वको विश्लेषो विभागः। स चेह नास्ति। बुद्धिकल्पितस्तु गौणत्वान्न गृह्यते इति वार्त्तिका
रंभः। भाष्यकारास्तु जुगुप्सादयोत्र जुगुप्सादिपूर्विकायां निवृत्तौ वर्त्तन्त इत्युपात्तविषयमेवेदं। कारकप्रकरणे चै
गौणत्वस्यापि ग्रहणं। साधकतममिति तमग्रहणाल्लिंगात्। अपायादिपदानां स्वरितेनाधिकारः। गौणोप्यर्थो गृ
ह्यत इति व्यवस्थापनात्। तेन बुद्धिकल्पितस्याप्यपायस्य सत्त्वात् सिद्धं। पूर्वं हि बुध्यात्राधर्मं संप्राप्य ततो दोषदर्शना
न्निवर्त्तते इत्यस्त्यपायः। एवमुत्तरसूत्रेष्वपि प्रपंचतत्त्वबोध्यमिति दिक्॥ ॥ भीत्रार्थानां भयहेतुः। भयं भीः। त्राणं त्राः।
भयार्थानां त्राणार्थानां च योगे भयहेतुः कारकमपादानं स्यात्। चोरेभ्यो विभेति। उद्विजते। त्रायते रक्षति वा। भयहेतुर

स्फ॰ ३

पि॰ २

१६२

ग्रहणं चिंत्यप्रयोजनं ।। अरण्ये बिभेतीत्यादौ तु परत्वादधिकरणसंज्ञा । कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे इति रामायणश्लोकस्य सं
युगे इति योजनया व्याख्येयः ।। पराजेरसोढः ।। परापूर्वस्य जयतेः प्रयोगे असोढो असह्यो र्थोपादानं स्यात् । अध्ययनात्पराजयते । ग्ला
यतीत्यर्थः ।। आकर्मकश्चायं । तत्र षष्ठ्याः प्राप्तायाः वचनं । असोढः किं । शत्रून्पराजयते । अभिभवतीत्यर्थः ।। असोढ इति क्तार्थीभूतका
लोत्राविवक्षितः । जेनाध्ययनात्पराजेष्यते इत्यादि सिद्धं । वस्तुतस्तु असोढग्रहणं व्यर्थं । शत्रून्पराजयते इत्यत्र परत्वात्कर्मसं
ज्ञासिद्धेः ।। इह सूत्रे पराजेरिति रूपं विपराभ्यां जेरिति वत्समर्थनीयं । यत्तु परत्वाद्धेर्ङितीति गुणा इति हरदत्तेनोक्तं । तन्न । अभ
ष्यादिविरुद्धमिति प्रागेव प्रपंचितं । वारणार्थानामीप्सितः ।। वारणार्थानां प्रयोगे क्रियया आप्तुमिष्टतमं कारकमपादानं स्यात् ।
यवेभ्यो गां वारयति । वृञ् वरणे ।। चुरादिः । प्रवृत्तिविघातो वारणं । ईप्सित इति किं । यवेभ्यो गां वारयति क्षेत्रे । नन्विह परत्वादधिकरण
संज्ञा भविष्यति । यथा कटेपीप्सितग्रहणे गोष्वीप्सिततमत्वप्रयुक्ता कर्मसंज्ञा । सत्यं । चिंत्यप्रयोजनमेवेप्सितग्रहणं ।। अंतर्धौ ये
नादर्शनमिच्छति ।। अंतर्धाविति सप्तमी । येनेति कर्तरि तृतीया । नच कर्तृयोगषष्ठीप्रसंगः । उभयप्राप्तौ कर्मणीत्येवेति नियमा
त् । व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तत्कारकमपादानं स्यात् । मातुर्निलीयते कृष्णः ।। लीङ् श्लेषणे । दैवादिकः ।।
अत्रांतर्धाविति चिंत्यप्रयोजनं ।। नदिदृक्षते चोरान्निलीयते इत्यत्र हि परत्वात्कर्मता सिद्धा । इच्छतीति किं । इच्छायां सत्यां सत्यपि दर्शने यथा स्यात् ।

न१ ३१

आख्यातोपयोगे। उपयोगो नियमपूर्वकं विद्यास्वीकरणं तस्मिन्साध्ये य आख्याता तं कारकमपादानं स्यात्। उपाध्यायादधीते। उपयो ८१
गे किं। नटस्य शृणोति। जनिकर्तुः प्रकृतिः। जायमानस्य हेतुरपादानं स्यात्। पुत्रात्प्रमोदो जायते। इह जननं उत्पत्तिः। उत्पत्तिः जनि
त्पत्तिरूपव्यापारः। इन्। अजादिभ्य इति जनेर्भावे इन्। जनिघसिभ्यामिणिति गुणादिसूत्रेण एव॥ जनिवध्योश्चेति वृद्धिनि
षेधः। तस्याः कर्त्रीति षष्ठीतत्पुरुषः। कर्तरि चेति प्रतिषेधस्त्वनित्यः॥ अत एव ज्ञापकात्। यद्वा। शेषषष्ठ्या समासोऽयं। निषेधस्तु
कर्मषष्ठीविषयक इति कारक इति सूत्रे कैयटः॥ तथा चार्थमात्रस्य ग्रहणाद्धात्वंतरयोगेऽपि भवति। अङ्गादङ्गात्संभवसीति
न३८ यथा। एतेनैकस्त्रियो धातुनिर्देशे इकी निर्देशोऽयमित्याश्रित्य गमहनेत्युपधालोपप्रसंगे इति चोद्यं वयं तु मीमांसावा
र्तिककाराः समाहिताः। अत्र प्रकृतिग्रहणमुपादानमात्रपरमित्येके। अत एव प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादित्यधि
करणे ब्रह्मणो जगदुपादानतायां यतो वा इमानि [illegible] भूतानि जायन्ते इति पंचमीमुपष्टंभिकामाहुः। अन्ये तु पुत्रात्प्र
मोदो जायत इति वृत्तिस्वरसात्प्रकृतिशब्द इह कारणमात्रपर इत्याहुः॥ अस्मिंश्च पक्षे यतो वेति सामान्यशब्दोऽपि उपादान
रूपविशेषपरः॥ ब्राह्मणो वा मंत्रवर्णादिति षाष्ठन्यायात्॥ अहमेव बहु स्यामिति हि सामानाधिकरण्यं श्रूयते॥ तच्च चतुर्थी
भ्रमे। बाध्यायो॥ अभेदे। तादात्म्ये च प्रकृते नादात्म्ये। भिन्नत्वे सत्यभिन्नसत्ताकत्वं आविद्यकः संबंधविशेषो नानादात्म्य

166

श·को·
८४
३०३

मित्याघुन्नरमीमांसायांस्पष्टं।भुवः प्रभवः।भूकर्तुः प्रभवः प्राग्वत्।हिमवतो गंगा प्रभवति कश्मीरेभ्यो वितस्ता प्रभवति।तस्तु उपल
ये।भावे क्तः।विगततस्ता वितस्ता।अशोष्येत्यर्थः।।अत्रोपलभ्भेः कर्मव्यापारेऽप्रभवतिर्वर्त्तते।प्रकाशत इत्यर्थः।भीत्रार्थानामित्या
रभ्येय सन्नसूत्री भाष्ये प्रत्याख्याता।तथाहि।चोरेभ्यो बिभेति।भयान्निवर्त्तत इत्यर्थः।।त्रायते।रक्षणेन चोरेभ्यो निवर्त्तयतीत्यर्थः।
पराजयते।ग्लान्या निवर्त्तत इत्यर्थः।वारयति।प्रवृत्तिं प्रतिबध्नन् निवर्त्तयति।निलीयते।निलयनेन निवर्त्तत इत्यर्थः।अधीते
उपाध्यायान्निःसरन्तं शब्दं गृह्णातीत्यर्थः।ब्रह्मणः प्रपंचो जायत इत्यत्रापि।तन्तोपक्रीमति।यथाङ्ख्यात्फलमिति लोकप्र
सिद्धा श्रयेण अपायो बोध्यः प्रभवतीत्यत्रापि भवनपूर्वकं निःसरणमर्थः।।अत्रेदं वक्तव्यं।निवृत्तिनिःसरणादिधात्वंतरा
र्थविशिष्टे स्वार्थे वृत्तिमाश्रित्य यथाकथंचिदुक्तप्रयोगाणां समर्थनेपि मुख्यार्थपुरस्कारेण षष्ठीप्रयोगो दुर्वारः।।न
टस्य [illegible] शृणोतीतिवत्।न ह्युपाध्यायनटयोः क्रियानुकूलव्यापारांशे विशेषो वक्तुं शक्यः।अनभिधानब्रह्मास्त्रमा
श्रित्य प्रत्याख्यानं तु नातीव मनोरमं।एवं च जुगुप्साविरामेत्यादिवार्त्तिकमप्यवश्यारंभणीयं।तथा च सूत्रवार्त्तिकमतमेवेह
प्रबलमितियावद्बाधकं साधु।।तथा ध्रुवं भयहेतुरसो दद्त्यादि संज्ञिनिर्देशोपि सार्थकः।प[illegible]त्वा न तत्र संज्ञा प्राप्ता सावपि शे
षत्वविवक्षायां न माषाणामश्नीयादित्यादाविव षष्ठ्या इष्टतया तत्रापादानसंज्ञावारणीयेत्यादित्यवधेयं।कर्मणा यम

रामः
८४

भिप्रैति स संप्रदानं। कर्मणा करणभूतेन कर्त्ता यमभिप्रैति संबध्नाति ईप्सितत्वात् कारकं संप्रदानसंज्ञं स्यात्।। न च युक्ता
यत्कर्मत्वं करणत्वं च कथमिति वाच्यं। क्रियाभेदेनाविरोधात्। दानक्रियायां हि कर्म अभिप्रायणक्रियायां करणं। दीय
मानया गवा हि शिष्य उपाध्यायमभिप्रैति। उपाध्यायाय गां ददाति। अत्राभिप्रैतीति पदत्रयं। न तु समासः। उदात्तवता गति
मता च तिङा गतेः समासो वक्तव्य इति वार्त्तिकस्य छंदोविषयत्वादिति हरदत्तः। भाषाविषयत्वे बाधकं तु तत्रैव वक्ष्यामः।।
अत्रेष्टिकाराः।। अन्वर्थसंज्ञेयं सम्यक् प्रदीयते यस्मै तत्संप्रदानं। तेनेह न। रजकस्य वस्त्रं ददाति। पृष्ठतः पृष्ठं ददाति। इह
हि ददातिर्गौणः।। न तु वास्तवं दानमस्तीत्याहुः।। भाष्ये तु नैतत्स्वीकृतं। खंडिकोपाध्यायस्तस्मै चपेटां ददाति। न शूद्राय
मतिं दद्यादित्यादिप्रयोगात्। रजकस्य ददातीति तु शेषत्वविवक्षायां बोध्यं। नन्वेवमजां नयति ग्राममिति नयतिक्रियाक
र्मभिरजैः संबध्यमानस्य ग्रामस्य संप्रदानत्वं स्यादिति चेन्न। यमभिप्रैतीत्युक्त्या हि यमिति निर्दिष्टस्य शेषित्वं कर्मणेति
निर्दिष्टस्य गवादेः शेषत्वं च प्रतीयते। यथा कर्त्रभिप्राये क्रियाफल इति कर्त्तुः शेषित्वं क्रियाफलस्य शेषत्वं च। न चेह
ग्रामं प्रत्यजाशेषभूता। तथा च प्रयोजकलक्षणाप्राशनवन्मैत्रावरुणाय दंडप्रदानमित्यधिकरणे क्रीते सोमे मैत्राव
रुणाय दंडं प्रयच्छतीति दंडदानं न प्रतिपत्तिः। किं तु द्वितीयापेक्षया बलीयस्या चतुर्थीश्रुत्याऽर्थकर्मत्वमुक्तं। अत्र वार्त्ति

168

शा.कौ.

८३५

३०४

न ४

कं। क्रियाग्रहणं कर्तव्यं। पत्ये शेते। भाष्यकारास्तु संदर्शनप्रार्थनाध्यवसायैराप्यमानत्वात् क्रियापि कृत्रिमं कर्म। तथा च सूत्रे
णैव सिद्धं। प्रतीयमानक्रियापेक्षोपि हि कारकभावो भवत्येव। प्रविश पिंडीमितिवत्। सूत्रकारस्त्वाह। क्रियार्थोपपदस्य च कर्मणि स्था
स्थानिन इति। न चैवमथ यद्दातिकर्मत्वे क्रियाग्रहणं कर्तव्यमेवेति वाच्यं। भाष्ये अन्वर्थसंज्ञात्वास्वीकारात्। नन्वेवं कटं करो
ती त्यादावपि संप्रदानत्वं स्यात्। वचनबलाच्च कर्मसंप्रदानत्वयोः पर्यायप्रसंगः॥ अत्राहुः। नेदं वार्त्तिकं सार्वत्रिकं। किंतु प्रयो
गानुसारान्नियतविषयं। धातूपात्तफलानाधारत्वे सतीति भाष्यमते तु यत्र संप्रदानत्वमिष्टं तत्र संदर्शनादीनां क्रियायाश्च
भेदो विवक्ष्यते। न तु स्नानेनाप्यमाना क्रियापि कृत्रिमं कर्मेति सिद्धं तया अभिप्रेयमाणस्य संप्रदानत्वं। यत्र तु तन्नेष्टं तत्र भेदो
न विवक्ष्यते। ततश्चोत्पत्तिविक्लित्त्याद्येकफलावच्छेदेनैकीकृतया क्रियया आप्यमानस्य कर्मत्वमेव भविष्यति। कटं करोत्यो
दनं पचतीति॥ गत्यर्थेषु तु भेदोऽभेदश्चेत्युभयं विवक्ष्यते। तेन भेदविवक्षायां ग्रामाय गच्छतीति प्रयोगः। अभेदविवक्षायां तु ग्रा
मं गच्छतीति। तथा च गत्यर्थकर्मणीति सूत्रं प्रत्याख्यास्यते। उक्तं च हरिणा। भेदस्य च विवक्षायां पूर्वापूर्वां क्रियां प्रति। पूर्वस्या
गस्य कर्मत्वात् क्रियाग्रहणं कृतं। क्रियाणां समुदाये तु यदेकत्वं विवक्षितं। तदा कर्म क्रियायोगात्स्वाख्ये वोपचर्यते॥
भेदाभेदविवक्षा च स्वभावेन व्यवस्थिता। तस्माद्गत्यर्थकर्मत्वे व्यभिचारो न दृश्यते। विकल्पेनैव सर्वत्र संज्ञे स्यातामुभे यदि।

त्र ४

पा ५

राम:

८४

आरंभेशानयोगस्पशत्याख्यानं समं भवेदिति। अस्यार्थः। कर्मसाध्ये येव क्रियेप्सिततमत्व प्रयुक्त कर्मसंज्ञयैव उपचर्यते सूवन्हियते।
नतु संप्रदानसंज्ञया। गत्यर्थकर्मणि तु भेदाभेदौ द्वावपि विवक्षितेते इति कूपद्यपारि इति। व्यभिचारो नि प्रसंगस्तु न दुष्यते। विवक्षा
या व्यवस्थितत्वादेव। एतदेवद्रढयति विकल्पेनेति। समतुल्य फलकं नन्त्वा मन्त्र च घात्या चक्षाणस्य भगवतो विवक्षा नियमो
मितः। गत्यर्थेषु विवक्षाद्वय॥ पत्ये शेते इत्यादौ तु भेदविवक्षैव। ओदनं पचतीत्यादौ वभेदविवक्षैवाचेष्टायामन ध्वनीत्येतद्
त्तु दाहरणयोरपि अभेदविवक्षैव। मनसा हरिं व्रजति। अध्वानं गच्छतीति। त्रिधा चेदं यदाह। अनिराकरणात्कर्तुस्त्यागांगकर्म
णोप्सितं। प्रेरणानुमति भ्यां च लभते संप्रदानता मिति। अनिराकर्तृ यथा। सूर्यायार्घ्यं ददाति। नात्र सूर्यः प्रार्थयते न वानुमन्यते
न वनिराकरोति। प्रेरकं यथा॥ विप्राय गां ददाति। अनुमंतृ यथा। उपाध्यायाय गां ददाति। ननु दानस्य तदर्थत्वात्तादर्थ्ये चतु
र्थी सिद्धैव। तत्किं संप्रदानसंज्ञया। मैवं॥ दानक्रियार्थे हि संप्रदाने। न तु दानक्रियायास्तदर्थी। कारकाणां क्रियार्थत्वात्॥ संप्रदा
नार्थं तु दीयमानं कर्मेति वाक्यार्थभूतायादानक्रियाया अतादर्थ्ये चतुर्थी अप्राप्तौ सत्यामारंभादिति हेलाराजः। तदेत
त्सूचितं त्यागांगकर्मणोप्सितमिति। कर्मसंप्रदानयोः कारकत्वेवाचो। पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः॥
एतच्च वचनं उक्तोदाहरणमात्रविषयं। अत एव बहुव्याप्त्या येन सिद्धत्वात्प्रत्याख्यायते। लोके तु यजेः पूजार्थत्वात्पशोः॥

तादर्थ्ये

द्र४

६१

करणत्वं सिद्धं॥ ॥रुच्यर्थानां प्रीयमाणः॥ संप्रदानं स्यात् देवदत्ताय रोचते मोदकः॥ अत्राहुः हेतुत्वे कर्मसंज्ञायां शेषत्वे चापि कारकं
रुच्यर्थादिषु शास्त्रेण संप्रदानाख्यमुच्यते॥ अस्यार्थः अन्यसमवेतो ऽभिलाषो रुच्यर्थः रोचते ऽभिलाषविषयो भवतीत्यवगम्यते। वि
षयी भवं तं मोदकं देवदत्तः प्रयुङ्क्ते॥ लोल्यानंदानुगुणमाचरतीति देवदत्तस्य हेतुसंज्ञायां प्राप्तायां संप्रदानसंज्ञा कथ्यते। तथा चेह
हेतुसंज्ञाविरहे णिजभावाद्धेतुसमवायिन्या द्वितीयस्याः क्रियाया अप्रतीतेर्मोदकः स्वक्रियायां धातुवाच्यायां कर्त्ता भवति। ननु
कर्मसंप्रदाने तु प्रीणयतीत्यर्थः। तदा कर्मसंज्ञायां प्राप्तायां वचनं तथा च प्रीयमाण इति विशेषणं। प्रीत्र तर्पणे इत्यस्मात्कर्म
कालकर्मणि लट् देवादिकस्तुङिदकर्मः॥ तर्प्यमाण इत्यर्थः। यत्तु समर्थसूत्रे रोचयामहे इति हरदत्तेन प्रयुक्तं तदो ऽस्मिन्नेव पक्षे
ध्यारोपितप्रेषणापन्नमाश्रित्येत्यवधेयं। यदा तु देवदत्तस्य यो ऽभिलाषस्तद्विषयो भवतीत्यर्थस्तदा शेषत्वात् षष्ठ्यां प्राप्तायां वचनमि
ति। प्रीयमाणः किं। देवदत्ताय रोचते मोदकः पथि। कर्मादाविवाधिकरणे मा भूत्। अत्र त एवादितो रोचनं इत्यत्र दीप्त्यर्थे संज्ञा न भवति
॥ ॥श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः॥ एषां प्रयोगे बोधयितुमिष्टः संप्रदानं स्यात्। देवदत्ताय श्लाघते श्लाघा स्तुतिः। देवदत्तं स्तौती
त्यर्थः। एवं हि देवदत्तः शास्यते ज्ञापयितुं। अन्ये त्वाहुः देवदत्तायात्मानं परं वा श्लाघ्यं कथयतीत्यर्थ इति॥ तथा च भट्टिकाव्ये। श्ला
घमानः परस्त्रीभ्यस्तत्राङ्गाद्राक्षसाधिपः॥ इति। आत्मानं श्लाघ्यं परस्त्रीभ्यः कथयन्नित्यर्थः॥ तत्राद्ये पक्षे कर्मत्वे प्राप्ते द्वितीये तु

रामः ८६

कारकशेषत्वात्षष्ठ्यां प्राप्तायां वचनं। ह्नुङिति। अभ्यन्तरयोश्चार्थोपसर्जनज्ञापनावचनत्वात्सकर्मकाः। तथा च ज्ञीप्स्यमान इति संज्ञिविशे
षणमुपात्तमिति हेलाराजः। देवदत्ताय ह्नुते। देवदत्तं ह्नुवानस्तामेव ह्नुतिं तमेव बोधयति॥ सन्निहितमपि देवदत्तं धनिकोदूरपलपती
त्यर्थः। अथवा ह्नोतव्यं देवदत्तं बोधयतीत्यर्थः। देवदत्ताय तिष्ठते। इहेदृशोऽहमिति स्वस्थानेन बोधयतीत्यर्थः। देवदत्ताय शपते। शपथेन
किंचित्प्रकाशयतीत्यर्थः। ज्ञीप्स्यमानग्रहणाद्देवदत्तः श्लाघते गार्गिकया श्लाघते पथीत्यादौ कर्त्रादिविषये संज्ञा न भवति। ज्ञीप्स्य
माने विवदंत इति शयउपालंभने इति वार्त्तिकोदाहरणव्याख्यायां कैयटः। तत्र यस्मा आख्यायते स ज्ञीप्स्यमान इति मते आख्याय
मानः अत्युदाहरणं तस्माच्च द्वितीया। देवदत्तं श्लाघते इति॥ आख्यायमानो ज्ञीप्स्यमान इति मते तु यस्मा आख्यायते स प्रत्युदाह
रणं तस्माच्च षष्ठी। देवदत्ताय श्लाघते विष्णुमित्रो यज्ञदत्तस्येति॥ ज्ञयमिच्छेति चुरादिकात्सनि कर्मणि शानचि ज्ञीप्स्यमानरूपं बो
ध्यं न तु ज्ञाधातोः॥ तस्य बोधने मित्वाभावात् ज्ञापयतीत्यादि भाष्यप्रयोगात्॥ अत एव मारणतो षणोऽत्र निशानेष्वि
ति पाठो न तु निशामनेष्विति। निशानं तनूकरणं। शपते लुङ्। संज्ञपितः पशुरित्युदाहरणं। आपृच्छस्व धामीदितिवत्तत्र बोधपि
ज्ञप्योर्ग्रहणमिति हि सिद्धान्तः॥ चौरादिकस्य मारणतोषणनिशामनेषु वर्तते इति माधवः॥ धारेरुत्तमर्णः॥ अयमुक्तसंज्ञः
स्यात्। धृङ् अवस्थाने। ण्यन्तः। उत्तमर्णो धनस्वामी। उक्तः स्वार्थहेतेः च्छेदात्तमपि द्विकर्मकत्वाद्दामभावः। अर्तेः। क्तः। ऋणं॥

शा.कौ.
८७
३०६

ऋणमाधमर्ण्ये इत्यत्र कालांतरदेयद्रव्यविनिमयोपलक्षणार्थमाधमर्ण्यग्रहणं॥ तेनोत्तमर्णोपि नत्वं भवति। अस्मादेव निपात
नान्लिष्ठात्तस्य परनिपातो बहुव्रीहौ बोध्यः॥ देवदत्ताय शतं धारयति। ध्रियमाणं स्वरूपेण विनिष्ठमानं स्वभावादप्रच्यवमानं शतं
प्रयुङ्क्ते इत्यर्थः॥ कारकशेषे षष्ठ्यां प्राप्तायामिदं वचनं। उत्तमर्णः किं। देवदत्ताय शतं धारयति ग्रामे। पत्वादिहाधिकरणसं
ज्ञा भविष्यतीति चेन्न। उत्तमर्णोपि तर्हि हेतुसंज्ञा स्यात्॥ ॥स्पृहेरीप्सितः॥ स्पृह ईप्सायां। चुरादा वदंतः। अस्य प्रयोगे
अभिप्रेतः संप्रदानं स्यात्। पुष्पेभ्यः स्पृहयति। ईप्सितमात्रे यं संज्ञा। प्रकर्षविवक्षायां तु परत्वात्कर्मसंज्ञा। पुष्पाणि स्पृ
हयति यदा त्वीप्सितमीप्सिततमं वा शेषत्वेन विवक्षितं तदा षष्ठ्येवेति हरदत्तादयः। हेलाराजस्तु हेतुत्वे कर्मसंज्ञायामिति प्रामु
क्ते श्लोकमाख्यावसरे स्पृहयतियोगे कर्मसंज्ञायाः शेषषष्ठ्याश्च बाधिके यं संप्रदानसंज्ञेत्याह। वाक्यपदीयस्वरसोप्येवं।
अस्मिन्पक्षे परस्परेण स्पृहणीयशोभमिति कर्मणि पनीयर् दुर्लभः। दानीयो विप्र इतिवत्संप्रदान एव तु व्याख्येयः। तथा
कुमार्यै इव कांतस्य त्रस्यंति स्पृहयंति चेति षष्ठ्यप्यसंगता। विभक्तिविपरिणामेन कांताय स्पृहयंतीति तु व्याख्येयं। हरदत्त
मते तु यथाश्रुतमेवेवो क्तप्रयोगो निर्बाधावित्ति॥ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः॥ क्रुधाद्यर्थानां धातूनां प्रयोगे यं प्र
ति कोपः स तत्कारकं संप्रदानं स्यात्। देवदत्ताय क्रुध्यति द्रुह्यति ईर्ष्यति असूयति वा। वाक्चक्षुरादिविकारानुमेयः प्रकृष्टः को

राम:
८७

पोत्र क्रोधः ॥ अपकारेच्छा द्रोहः असहनमीर्ष्या गुणेषु दोषाविष्करणमसूया ॥ ननु चित्तदोषार्थेनामित्येवास्तु किं क्रोधादीनां विशि-
ष्योपादाने नेति चेन्न ॥ द्विषादावतिप्रसंगात् ॥ योऽस्मान्द्वेष्टीत्यादौ ■ ह्यनभिनंदनं द्वेषार्थः ॥ अत एवाचेतनेष्वपि प्रयुज्यते ॥
क्रोधं द्वेष्टीति ॥ यं प्रतीत्यादि किं ॥ भार्यामीर्ष्यति ॥ मैनामन्योद्राक्षीदिति ॥ नात्र भार्यां प्रति कोपः ॥ किं तु परैर्दृश्यमानत्वं न
क्षमते इत्येवम् ॥ क्रुधद्रुहोरकर्मकतया कारकशेषत्वान्नटस्य शृणोतीतिवत्षष्ठ्याः प्राप्ताया वचनं ॥ इतरयोस्तु सकर्मकत्वाद्द्वि-
तीयायाः प्राप्तायाः ॥ ॥ क्रुधद्रुहोरुपसृष्टयोः कर्म ॥ सोपसर्गयोरनयोर्यं प्रति कोपस्तत्कारकं कर्मसंज्ञं स्यात् ॥ पूर्वसूत्रापवादः ॥ दे-
वदत्तमभिक्रुध्यति ॥ अभिद्रुह्यति ॥ ॥ राधीक्ष्योर्यस्य विप्रश्नः ॥ एतयोः कारकं संप्रदानसंज्ञं स्यात् यदीयो विविधः प्रश्नः क्रिय-
ते ॥ कृष्णाय राध्यति ईक्षते वा ॥ पृष्टो गर्गः ॥ शुभाशुभं पर्यालोचनमिह धात्वर्थः ॥ शुभाशुभरूपयोः कर्मणो धात्वर्थेनोपसंग्रहा-
दकर्मकावेतौ ॥ षष्ठ्याः प्राप्ताया वचनं ॥ अत एव राध्यतीति श्यन् ॥ अकर्मकादेव तद्विधानात् ॥ तथा च दिवादौ गणसूत्रं ॥
राधोऽकर्मकाद्वृद्धावेवेति ॥ अस्यार्थः ॥ एकारो भिन्नक्रमः ॥ राधोऽकर्मकादेव यथा वृद्धावेवेति ॥ अत एव कर्मवत्कर्मणेति ॥ राध्य-
त्योदनः स्वयमेवेति भाष्यं संगच्छते ॥ तत्र हि सिध्यतीत्यर्थः ॥ एतेन ॥ न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति ॥ क्रियासमभिहा-
रेण विध्यन्तं क्षमेत क इति माघप्रयोगो व्याख्यातो ॥ एतेनैतयोः कर्मकारकं संप्रदानं स्यादिति व्याचक्षाणाः ॥ परास्ताः ॥ यस्येत्य-

वि ६

सूत्रे ३

रा

पतीत्यर्थः ॥ शुभाशुभमपर्यालोचे ५

श॰कौ॰
८८
३०७

नर्थकं यत्प्रतीत्यनुदृष्टत्वैवेष्टसिद्धेः॥ प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता। प्रतिपूर्वं आङ्पूर्वं श्रृणोतिरभ्युपगमे वर्त्तते। तस्य पूर्वो व्यापारः प्रव
र्त्तनक्रिया तस्याः कर्त्ता संप्रदानं स्यात्। विप्राय गां प्रतिशृणोति आशृणोति वा। विप्रेण मह्यं देहीति प्रवर्त्तितः प्रतिजानीते इत्यर्थः। हेतु
मण्णिजायामाज्ञायां देवदत्तेन प्रतिशृणोतीति प्रयोगनिवृत्तये वचनं। विवक्षान्तरे तु देवदत्तो गां प्रतिश्रावयतीति भवत्येवेति हरदत्तः॥
अत्रेदं चिंत्यं॥ उक्तरीत्या देवदत्तो रोचयति मोदकमित्यपि प्रयोगो दुर्वारः। न चेष्टापत्तिः। तत्रत्यस्वग्रन्थेन हेलाराजग्रन्थेन च विरोधात्।
तत्र हेतुत्वबाधात्तु रोजिनियद्दर्शितं हि प्रकृते पि तुल्यं। तस्मादिह वैषम्यं दुर्वचमिति॥ अनुप्रतिगृणश्च॥ अनुपूर्वस्य प्रतिपूर्वस्य च
गृणातेः कारकं पूर्वस्य कर्तृभूतं संप्रदानं स्यात्। अनुप्रतिभ्यां गृणः अनुप्रतिगृणः। तस्येति विग्रहः। अनुप्रतिपूर्वं गृणातिः
शंसितुः प्रोत्साहने वर्त्तते। तत्र पूर्वो व्यापारः शंसनं। होत्रे अनुगृणाति। होता प्रथमं शंसति तमध्वर्युः ओथामोदैवेत्यादिभिः शब्दैः
प्रोत्साहयतीत्यर्थः॥ साधकतमं करणं॥ क्रियायां प्रकृष्टोपकारकं करणसंज्ञं स्यात्। यद्व्यापारानन्तरं क्रियानिष्पत्तिः तत्प्रकृष्टं। उक्तं च। क्रिय
याः परिनिष्पत्तिर्यद्व्यापारादनन्तरं। वैवक्षिकं करणत्वमस्तीत्युक्तं। आह च। वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितं॥ स्थाल्या
पच्यत इत्येषा विवक्षा दृश्यते यतः। ननु कारकाधिकारादेव सिद्धे साधकत्वे पुनः श्रुतिः प्रकर्षार्था तु किं तमपा सत्यं। अस्मिन्प्रकर
णे तमपो ग्रहणं प्रकर्षेणाश्रीयत इति ज्ञापयितुं तमप्ग्रहणं। तेन गंगायां घोष इत्यादि सिद्धं यदा च तीरधर्म आधारत्वं प्रवाहे उप

स्यस त्यादीनामपि ३

प्रतिगृणाति ५

रामः
८८

नां३

चर्यतेतदेदंप्रयोजनं।यद्वालुगंगाशाहूरवतीरेवर्त्ततेतद्दानप्रयोजनं।तत्राद्येविभक्तिर्लाक्षणिकी।सुब्विभक्तौनलक्षणेतिद्वयेन
विधिरितिसूत्रेरेवनिराकृतं।द्वितीयेतुप्रकृतिर्लाक्षणिकी।ननुउभयंमुख्यमस्तुपरंपरातंवस्तुसंसर्गः।मैवंकारकविभक्त्य
र्थीप्रकृत्यर्थस्यात्सासंबंधेनविशेष्यतायाःव्युत्पन्नत्वात्तत्रअपादानप्रकरणोक्तानिचबहून्युदाहरणानितमप्रग्रहणस्यप्रयोजनं
नीतिबोध्यं।दिवःकर्मच।दिवःसाधकतमंकर्मसंज्ञंस्यात्।चकारात्करणसंज्ञा।करणशब्दानुवृत्तावस्यमाणोसामनरसां
गृहणस्यापकर्षणेनवासंज्ञयोःपर्यायेलब्धेसमावेशार्थश्चकारः।तेनमनसादीव्यतीतिमनसादेवइत्यत्रकर्मणःकर
णत्वेतृतीयाचेत्युभयंसिध्यति।मनसःसंज्ञायामित्यलुक्।किंचअक्षैर्दीव्यतेयज्ञदत्तेनेत्यत्रसकर्मकत्वाद्दाणिकेर्तृणोकि
र्मत्वेन।अणावकर्मकादितिपरस्मैपदंचनेतिदिक्।स्यादेतत्।।यदिसमावेशस्तर्हिअक्षान्दीव्यतीत्यत्रपरत्वात्तृतीया
स्यात्।तथाहि।करणसंज्ञायाअवकाशः।विदेवनाअक्षाः।करणेल्युट्।कर्मसंज्ञायाअवकाशःदीव्यंतेअक्षाः।भावक
र्मणोरितियगात्मनेपदे।अक्षानित्यत्रतुउभयसंज्ञाप्रयुक्तकार्यप्रसंगेपरत्वात्तृतीयैवप्राप्नोति।अत्राहुः।कार्यकालपक्षे
कर्मणिद्वितीयेत्यत्रघटस्योपस्थानेतस्यानवकाशत्वात्द्वितीयेति।ननुदीव्यंतेअक्षाइत्यत्रकर्मण्यभिहितेपिकरणत्वस्या
नभिधानात्तृतीयास्यात्।तथादेवनाअक्षाइतिल्युटाकरणत्वस्याभिधानेपिकर्मणोनभिधानाद्द्वितीयास्यात्।मैवं।।

श॰ कौ॰
८९

३०८

एकैव ह्यत्र शक्तिः संज्ञाद्वययोगिनी। तथा चोभयत्राप्यभिधानमेव। ननु नभिहितत्वं परिक्रयणे संप्रदानमन्यतरस्यां नियतकालं
वेतनादिना स्वीकरणं परिक्रयणं। तस्मिन्साधकतमं कारकं संप्रदानसंज्ञं वा स्यात्। शताय शतेन वा परिक्रीतः। परिशब्दः सामीप्यं
द्योतयति। क्रयो नामात्यन्तिकं स्वीकरणं नियतकालं तु तत्समीपमिति भावः। आधारोऽधिकरणं॥ आध्रियन्तेऽस्मिन्क्रिया इत्या
धारः। अध्यायन्त्या योर्द्धवितादिना करणे द्यत्र क्रियाश्रययोः कर्तृकर्मणोर्धारणात्परंपरया क्रिया प्रतीयत आधारस्तत्कारक
मधिकरणं स्यात्। कटे आस्ते। स्थाल्यां पचति। स्यादेतत्। साक्षात्क्रियाधारयोः कर्तृकर्मणोरेव कुतो न प्रसंगेति चेत्। न। परत्वात्क
र्तृकर्मसंज्ञाभ्यां बाधितत्वात्॥ अत एवाहुः। कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियां। उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं विदु
रिति। अत एवंभूतले घट इत्यादौ आसत्त्याहारो नियतः। यथा पुष्पेभ्य इत्यत्र स्पृहयतेः॥ अत एव च तत्रा सहकारकान्वयं व दंतः प
रास्तीः। त्रिविधं चैतदधिकरणमिति संहितायामिति सूत्रे भाष्ये। औपश्लेषिकं वैषयिकमभिव्यापकं चेति। कटे आस्ते। गुरौ वसति। ति
लेषु तैलमिति। अधिशीङ्स्थासां कर्म। अधिपूर्वाणामेषामाधारः कर्म स्यात्। अधिशेते। अधितिष्ठति। अध्यास्ते वा वैकुंठं हरिः॥
अभिनिविशश्च। एतत्पूर्वस्य विशतेराधारः कर्म स्यात्। ग्राममभिनिविशते। अभिनिवेश आग्रहः। तद्यान्तभवतीत्यर्थे अकर्मको
यात्तत्राधिकरणस्य कर्मसंज्ञा विधीयते। प्रवेशनार्थे तु सिद्धैव। परिक्रयणे संप्रदानमिति सूत्रादिहान्यतरस्यांग्रहणमनुवर्त्त

राम:
८९

ते। मंडूकप्लुतिन्यायेन। व्यवस्थितविभाषा चेयं। एष्वर्थेष्वभिनिविष्टानामिति समर्थसूत्रस्थभाष्यप्रयोगश्चेह मानं। तेन पापेऽभिनिवे
शइत्यादि सिद्धं। इह सूत्रे नेरल्पाच्तरस्य परनिपातकरणमीदृशानुपूर्वीकसमुदायविवक्षार्थं। तेनेह न। निविशते यदि शूकशि
खा पदे इति। कर्मत्वविवक्षायां तु तत्रापि भवितव्यमेव द्वितीयया। उपान्वध्याङ्वसः। एतत्पूर्वकस्य वसतेराधारः कर्म स्यात्। उपवस
ति अनुवसति अधिवसति आवसति वा ग्रामं सेना। वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः। अर्थशब्दो निवृत्तिवचनः। वधिकरणेष
ष्ठ्यो। वा अवा चक्रभावः षष्ठ्यर्थः। भोजननिवृत्तेर्वाचको यो वसतिः तस्य नेत्यर्थः। ग्रामे उपवसति। कथमुपोष्य रजनीमेकामि
ति। कालाध्वनोरिति द्वितीया भविष्यति। कथमेकादश्यां न भुंजीतेति। उपपदविभक्तेः कारकविभक्तिर्भविष्यति। कर्तुरीप्सितत
मं कर्म। कर्त्रा यदाप्तुमिष्यते तन्मात्रं कर्मसंज्ञं स्यात्। यद्यपि पराश्रयत्वादसौ कर्त्री। तेनैव व्यापारेणाप्तुमिष्टमिति सन्निधाना
ल्लभ्यते। तेन क्रियाफलशालित्वं पर्यवस्यति। क्रिया हि फलेच्छापूर्वकेच्छाविषयः। फलमेव त्विष्टतमं। तत्र धातुनोपात्तमिति तद्धि
शिष्टत्वेनेच्छाविषयोऽत्र संज्ञी स च त्रिविधः॥ उक्तं च। निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतं। तत्रेप्सिततमं कर्म चतुर्धान्यत्तु
कल्पितं। औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितं। संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकं। तथा। यदसज्जायते सद्वा जन्म
ना यत्प्रकाशते। तन्निर्वर्त्यं विकार्यं तु कर्म द्वेधा व्यवस्थितं॥ प्रकृत्युच्छेदसम्भूतं किंचित्काष्ठादिभस्मवत्। किंचिद्गुणान्तरोत्प

स॰कौ॰
१०॰
३०९

त्वात्सुवर्णादिविकारवत्। क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते। दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते इति। तत्र निर्वर्त्यं यथा। घटं
करोतीति। घटो ह्यसन्नेव जायते वैशेषिकादिमते। सांख्यादिसत्कार्यवादिमते तु सन्नेवाभिव्यज्यते इत्यस्ति विशेषलक्षणं। सामान्यलक्ष-
णं तु कर्तृव्यापारेणोत्पन्नाख्यफलशालित्वात्। एतेन करोतिर्य[illegible]र्थक इति मतं प्रत्युक्तं। यतते इतिवदकर्मकतापत्तेः। न च जानातिवद्विष-
यत्वापादनपर्यन्तार्थाभ्युपगमेनापि निर्वाहः। लाघवेनोत्पादनमात्रपरत्वात्। कर्तृस्थक्रियतया कर्मवद्भावातिप्रसंगाच्च। प्रकृतेः
प्रकृतिभूतस्यात्मन उच्छेदसंभूतं प्राप्तं तद्यथा। काष्ठं भस्म करोतीति। गुणान्तरोत्पत्त्या यथा। सुवर्णं कुंडलं करोतीति। इह भस्मकुं-
डलयोर्निर्वर्त्यत्वमेवेति बोध्यं। प्राप्यं तु आदित्यं पश्यतीति। तथा युक्तमिति द्विविधं। द्वेष्यमितरच्च। अकथितं चेत्यपरं। संज्ञान्तरा-
संगे वान्यत्। दिवः कर्म चेत्यादि तदित्यं सप्तविधं कर्मेति स्थितं। इह प्राप्ये यद्यपि विषयतारूपः क्रियाकृतविशेषोऽस्त्येव। अन्यथा
कर्मत्वानुपपत्तेः। तथापि प्रतिपन्नव्यतिरिक्तपुरुषापेक्षया विशेषो न गम्यते इत्युक्तं। विकार्यं तु काष्ठादेः कथं धीन्द्रपात्तफलाश्रय-
त्वेऽपि विशिष्यते। तत्रेदं तत्त्वं प्रकृतिविकृत्योरभेदविवक्षया तिरूढया उत्पत्त्याश्रयता। यद्वा। काष्ठादि विकुर्वन् भस्मोत्पादयतीत्यर्थः
। तंडुलान्विक्लेदयन्नोदनं निर्वर्त्तयतीतिवत्। एतच्च द्व्यर्थः पचिरिति प्रक्रमभाष्येऽप्युत्पादितं। तत्र तंडुलानोदनं पचतीति प्रयोगे
तंडुलनिष्ठविक्लित्तेरोदनोत्पत्तेश्चानुकूलो देवदत्तनिष्ठो व्यापार इत्यर्थः। तंडुलान्पचतीत्यत्र तु विक्लेदयतीत्यर्थः। ओदनं पचतीत्यत्र

राम:
१०॰

तु विक्लित्त्या निर्वर्तयतीत्यर्थः॥ उक्तं च। संबंधमात्रमुक्तं च श्रुत्या धात्वर्थभावयोः। तदेकांशनिवेशोऽत्र व्यापारोऽस्मान विघ्नते इति। तस्मा
द्धातुत्वेन धात्वपात्तो भावनांश इति पचित्वेन पक्वपात्री विक्लित्तिः कर्मितया करणतया वा यथायथं संबध्यते इति स्थितं। इदं त्वव
धेयं। क्रियाया धातुना कर्तुरपि देवदत्तादिशब्देन लाभाद्यथा न द्वितीयार्थता तथा इष्टतमत्वादेरपि। प्रयोगोपाधिमात्रत्वात्। अ
धिशीङ्दिवत्। एवं च तथायुक्ते स्थल इवेहापि धात्वपात्तफलाधारमात्रमर्थः॥ आधेयमेव वा। तच्चाभेदेन फले न्वेति। अनन्यलभ्य
ःशब्दार्थ इति न्यायात्। अन्यथा तथायुक्तत्वानीप्सितत्वयोरपि वाच्यतापत्तेः सकलतांत्रिकविरोधाच्च। एवं तु फलाश्रयः कर्मेत्ये
वास्तु किं द्विसूत्र्येत्यवशिष्यते। तत्रेदमुत्तरं अग्नेर्माणवकं वारयतीत्यत्र माणवकस्य अपादानसंज्ञां बाधितुं ईप्सिततममिति
तावद्वक्तव्यं। तस्मिंश्चोक्ते द्वेष्योदासीनयोः संग्रहार्थं तथायुक्तमित्यपि सूत्रणीयं। अनीप्सितग्रहणं तु प्राक्प्रत्याख्यातं॥ त
था च कर्तृकर्मविभक्त्योरुभयोरप्याधारो वाच्यः॥ आधेयं वा। व्यापारेण फलेन चान्वय इति तु पूर्ववत्पदवाक्यबोधे वैषम्यमिति
स्थितं। गोदोहनीयक्तायवक्त इत्यादिकं दत्तानां तु नामार्थाभेदान्वयानुरोधादाधार एवार्थः। फलभावनयोस्तु विशेषणविशे
ष्यभावो विपरीत इत्यवधेयं। तथायुक्तं चानीप्सितं। ईईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कर्मसंज्ञं स्यात्। ग्रामं गच्छ
न्विषमूलान्युपसर्पतीति॥ चौरान्पश्यति। अकथितं च। अपादानादिविशेषैरविवक्षितं कर्मसंज्ञं स्यात्। नटस्य शृणोतीत्या

न२

शा.कौ.
९१
३०१०

दावतिप्रसंगं वारयितुं परिगणनं कर्तव्यं । दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ । ब्रुविशासिगुणेन च यत्सचते तत्
दकीर्तितमाचरितं कविना ॥ नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च । द्विकर्मकेषु ग्रहणं कर्तव्यमिति निश्चयः ॥ दुहप्रछी त्यत्र छे चे
ति लुङ्कृतः । आगमशास्त्रस्यानित्यत्वात् तेनाद्यं ता धातवः इकोयणचीतिवत् । उपयुज्यत इत्युपयोगो मुख्यं कर्म क्षीरादि । तस्य नि
मित्तं गवादि । दुह्यादीनां मुख्यकर्मणा संबध्यमानमितियावत् । तथा ब्रुविशास्योर्गुणेन कारणेनाकर्मणेतियावत् । कारकाणां
क्रियां प्रति विशेषणत्वात् तत्रापि कर्मण एव प्रकृतत्वात् । यत्तच्च ते संबध्यते षचसमवाये । स्वरितेत्त्वात् । केचित्तु परस्मैपदिभिः स्वहेन
धातुं पठन्ति । षच समवाये इत्यत्र षच व्यक्तायां वाचीति । तन्मते षच सेवने इत्यस्यानुदात्तेतो धातोर्नानेकार्थत्वात्समवायेऽप्यवृत्तिर्बोध्या ॥
उभयथापि संबध्नातेः कर्मव्यापारेऽस्य वृत्तिर्वर्तते । अत एव कर्तृपदस्य कर्मपदेनार्थकथनं न विरुध्यते । राध्यत्योदन इत्यस्य पच्यत इत्य
नेनयथा । उभयत्राप्योदननिष्ठा विक्लित्तिर्भाना विशेषात् । कविना । मेधाविना सूत्रकारेण तदकीर्तितमित्याचरितं व्यवहृतमि
त्यर्थः । अपूर्वविधाविति । पूर्वोक्तानामपादानादिसंज्ञानां विषयश्चेन्नास्तीत्यर्थः । नन्वेवं वक्ष्यमाणयोर्हेतुकर्तृसंज्ञयोर्विषयेति
प्रसंगः स्यादिति वाच्यं । एकसंज्ञाधिकारे या परा स्यात् हेतुकर्तृज्ञाभ्यां कर्मसंज्ञाया बाधात् ॥ प्रावत्तु पूर्वग्रहणसामर्थ्यमात्रोपलक्ष
णं । तेन वक्ष्यमाणयोर्हेतुक[illegible]र्तृसंज्ञयोर्विषये नातिप्रसंगः । सूत्रे यत्कथितमिति कथनं निष्टत्तिपराणां नोदनायां भूतकालो न वि

कै ४

राम:
९१

वद्यते। यथापराजेरसोढः। तत्रासहिष्यमाणस्याथपादानसंज्ञा भवति॥ अध्ययनात्पराजयते इति तथेहापीत्याहुः॥ तद्वितं उक्त्रीताय
घा श्रुतेपि सर्वस्मात् जस्यात्। नीवह्योरिति श्लोके गत्यर्थानां मिप्तुश्रसत्रौ प्राप्तानामुपलक्षणं। चकारोऽजयतन्द्योगः स्वंतेइतिकेयटः॥
माधवोयाह। जयतेः कर्षतेर्मथेर्मुषेर्दंड्यतेः पचेः॥ तारेरग्राहेस्तथामोचेः स्मा जेर्दीपिष्कृसंग्रहः॥ कारिकायां चशब्देन स्तुधाकरमु
खेः कृतइति। एतन्निष्कर्षस्तु करिष्यते। क्रमेणोदाहरणानि। गांदोग्धि पयः। अविनीतं विनयंयाचते। गामवरुणद्धि व्रजं। माणा
वकं पंथानं पृच्छति। पौरवंगामिक्षते। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते शास्ति वा। अजां नयति ग्रामं। वहति भारंग्रामं। हरति
वा। गां नयति ग्राममित्यादि। जयतेः शतं जयति देवदत्तं। कर्षति शाखां ग्रामं। क्षीरधिं सुधां मथ्नाति। मुष्णाति शतं देवदत्तं। गर्गा
न्शतं दंडयति। तंडुलानोदनं पचति। तारयति कपीन्समुद्रं। आहयति वटुं वेदं। मोचयति। ताजयति कोपं देवदत्तं। दीपयति शा
स्त्रार्थं शिष्यान्॥ स्यादेतत्। दुहादीनामर्थनिबंधनेयं संज्ञा। न तु स्वरूपाश्रया। अहमपोदम चोद्यं चोद्य इति तद्राजसूत्रभाष्येपि
द्विपर्यायस्य च दुदेरपि द्विकर्मकत्वदर्शनात्। तथा च भट्टिः॥ स्फारस्फुरत्नो स्मेरमुखो जगाद मारीचमुच्चैर्वचनं महार्थं। कालिदा
सोपि। शिलोच्चयोपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेवेति। भारविश्च। उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे न
रेंद्रः इति। तथा च भिन्नेरर्थपरत्वाद्याचेरपि सिद्धं। तुल्यार्थत्वात्। पौरवं गामर्थयते इति यथा। तर्हि याचेः पृथग्ग्रहणं नेति चेत्॥

182

श·कौ·

८२

३२१ ए ३

अत्राहुः॥ अनुनयार्थोऽत्र याचितिः। विनयं याचते। विनयायानुनयतीत्यर्थात्। अस्तु तर्हि याचेः स्वग्रहणात्तस्यानेकार्थत्वाद्भिक्षेरपि सिद्धमिति चेन्न। अर्थभेदेन शब्दभेद इति दर्शनमाश्रित्यानुनयार्थस्य याचेरिह ग्रहणात्। अतएव हि नयतिग्रहणेनानुनयार्थस्यापि न गतार्थता। स्पष्टार्थं भिक्षेः पृथग्ग्रहणमित्यन्ये। चकारेणापचेर्ग्रहणमिति माधवादिभिरुक्तं तन्मतभेदेनात थाच कर्मवत्कर्मणेति सूत्रे दुहियाच्योर्बहुलं सकर्मकयोरिति वार्तिकव्याख्यावसरे पचेर्द्विकर्मकता कैयटेन स्फुटीकृता॥ यत्तु कर्तुरीप्सिततममिति सूत्रेऽयमर्थः पचिरित्यादि भाष्यं तन्मतान्तरेण। अन्यथा तण्डुलानोदनं पचतीति प्रयोगस्य यथाश्रुतस्योपपत्तौ किंमुधाक्लेशेन। अतएव अकथितशब्दोऽयं यद्यप्रधानार्थोऽपि स्यात्तदा पाणिनाकांस्यपात्र्यां दोग्धि पय इति पाणिकांस्यपात्र्योरतिप्रसङ्गः। कारणाधिकरणयोस्तूपचत्यादिरवकाशः। न हि तत्रास्य प्रसङ्गो दुहादिपरिगणनादित्यकथितसूत्रे कथयतः कर्मवत्कर्त्रे तु द्विकर्मकतां ब्रुवतो हरदत्तस्य न पूर्वापरविरोधः। मतभेदपरत्वात्। अतएव पचिधातुनिरूपणे तण्डुलानोदनं पचतीति प्रयोगं द्विकर्मकतयैव माधव उदाहृतवानिति दिक्। तथाप्याहेर्द्विकर्मकत्वं बहवो न मेनिरे॥ अतएव तमाश्वै कुलविद्यानामर्थमर्थिविद्वरः। पश्चात्पार्थिवकन्यानां पाणिमग्राहयत्पितेति कालिदासश्लोके पूर्वार्द्धे ग्रहेर्दुह्यर्थतया गतिबुद्धीति सूत्रेणाणौ कर्तुः कर्मत्वात्कर्ममिति योजयित्वा उत्तरार्द्धे तेनेति विभक्तिविपरिणामेन व्याचख्युः॥ अतएव च। अजिग्रहत्तं जनको धनुस्तद्येनार्दि

ग२

रामः

८२

रा१

दहेत्रिपुरंपिनाकी॥जिज्ञासमानोबलमस्यबाह्वोर्हसन्नभांक्षीद्रघुनंदनस्तदितिभट्टिप्रयोगोजयमंगलायामित्थंव्याख्यातः।अजिग्र
हत्॥अनेनधनुषाभगवतात्रिपुरदाहःकृतइतिबोधितवानिति॥युक्तंचैतत्॥श्रीरघुपतिंप्रतिनियोगकथनानौचित्येनस्वरूपोपस्था
पनस्यैवकर्तव्यत्वात्॥एतेन॥अयाचितारंनहिदेवदेवमद्रिःसुतांग्राहयितुंशशाकेतिव्याख्यातं।ग्रहेर्बुध्यर्थत्वात्तयद्वा।इषिशके
स्तुमुनंतसमभिव्याहृतयोर्द्विकर्मकतायाभाष्येस्थितत्वात्सिद्धमेतदितिमाधवः।ग्राहेर्द्विकर्मकताभ्युपगमपक्षेतुजायाप्रतिग्राहि
तृगंधमाल्यामितिनसिध्येत्।तत्रहिण्यंतेकर्तुर्ब्बकर्मत्वादितिवक्ष्यमाणरीत्याप्रयोज्येधेनुरूपेकर्मणिक्तःस्यात्।तथाचजाययागंधमा
ल्यंप्रतिग्राहितायेतिविग्रहेबहुव्रीहिरेवनस्यात्।त्रिकतःशेषस्यभाष्येस्थितत्वात्।सत्यपिवातस्मिन्नुंवद्भावोदुर्लभः।सिद्धांतेतुप्र
तिग्राहितेगंधमाल्येययेतिविग्रहः॥जायानिष्ठप्रेरणाविषयीभूतंगंधमाल्यकर्मकंयस्यप्रतिग्रहणंतत्कात्रीमित्यर्थः।अन्यपदा
र्थीजन्मीवेशोवविशेषणविशेष्यवैपरीत्येनैवैकार्थीभावकल्पनात्।मासजातादिवत्।व्यपेक्षापक्षेतुअषष्ठीविभक्त्यर्थेबहुव्री
होसर्वत्रव्युत्पत्तरकल्पनात्स्यैव।प्राप्तोदकमितस्यहिउदकर्तृकप्राप्तिकर्मीभूतमर्थः।ऊढरथः।रथकर्मकवहनकर्ता।उप
हृतपशुः।पशुकर्मकोपहारसंप्रदानं।उद्धृतोदना।ओदनकर्मकोद्धरणापादानं।वीरपुरुषकः।वीरपुरुषकर्तृकस्थितत्वधि
करणमितिदिक्।स्यादेतत्।अपादानाद्यविवक्षायांद्विकर्मकत्वात्तु।तद्विवक्षायांतुजायांप्रतिग्राहितेत्यादिस्यात्।मैवं।ह

विशेषाविवक्षायां कर्मत्वेपि कर्तृत्वविवक्षायां तस्य निर्बाधत्वात् २५

शा.कौ. ९३ ३१२

हरतेश्चेति चकारेण समुच्चितानां जयत्यादीनामकथितस्तत्रविषयत्वेपि तत्रैवचवेति समुच्चितानामणौ कर्तुर्णौ कर्मताभ्युपगमात्ताग
त्पर्थैः साहचर्यात्। अत एव तार्यादयः पृथग्गेभ्यः गृहीताः। युक्तं चैतत्। गृहणाकर्तृत्वस्याविवक्षायां प्रयोजकस्य हेतुत्वाभावेणि चोदु
र्लभत्वात्। न चैवं दीपि ग्रहणावैयर्थ्यं। अकर्मकत्वादेवाणौ कर्तुर्णौ कर्मत्वसिद्धेरिति वाच्यं। तथुं नास्ति चिन्तत्वार्थैक्यात् शीष्यास्त
वं दीपयति तान्नसौ प्रेरयतीति त्वर्थः। नन्वेवं तथाजेः संगृहीतत्वाद्यद्यपि तथाजितेः फलमुक्तवानिति। मुक्ताहारं चिरपरिचितेत्याजितो दे
वगण्येत्यादि सिद्धं। तथापि गवा पयस्तत्या जयतीत्यर्थ इति कैयट हरदत्तादिग्रंथो विरुध्येतेति चेन्नोत्पादेतत्। कर्तुरीप्सिततमं कर्मेति तथा
युक्तं चानीप्सितमिति सूत्रभाष्ये सर्वमिदं सिद्धं। तथा हि। यथा विक्लित्तुपसर्जनं विक्लेदनं पचेरर्थः। नाग्भवनं रुहेः। द्विधाभवनं भिदेः॥
तथा त्यजनोपसर्जनं त्याजनं दुहेः। दापनं याचेः। भिक्षेश्च। अंगीकारणमपि याचेः। प्रवेशोपसर्जनमवस्थापनं रुधेः। आख्यापनं पृच्छेः।
मोचनं चिञः। प्रतिपादनं ब्रूञः। तद्विशेषस्तु शासेरित्यादि। एवं च धात्वर्थव्यापारविषयाश्रयत्वं गवादेः स्पष्टमेवेति। अत एवाकडारसू
त्रे अपादानमुत्तराणि। गां दोग्धीत्यत्र परत्वात्कर्मसंज्ञेति भाष्यं संगच्छते। पंचकं प्रातिपदिकार्थ इति पक्षेऽवधित्वफलाश्रयत्वायोर्यु
गपद्विवक्षायां चेदं। अवधिभूतया गोः क्षीरनिष्ठीयःक्षरणानुकूलव्यापारस्तद्विषयिणी गोनिष्ठा प्रेरणेत्यर्थात्। अत्रोच्यते। कर्मणः
शेषत्वेन विवक्षायां न माषाणामश्नीयादिति वत्षष्ठी वाधितुं सूत्रं। अणदानत्वमात्रविवक्षायां तूपचम्पेव। गोः क्षीरविशेषण

रामः ९३

पयः २

लेतु षष्ठी भवत्येवेति न कश्चिद्दोषः। तथा चेह षष्ठीवत्संबंधमात्रे द्वितीयार्थ इति स्थितं। अथेदं विचार्यते। कर्मणि विधीयमाना ल
कृत्यक्तखलर्थाः किं द्विकर्मके भ्योमुख्ये कर्मणि स्युर्गौणे चेति। अत्र भाष्यं। प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणां। अप्रधाने
दुहादीनां ण्यंते कर्तुश्च कर्मणः इति। अभिधाने इति शेषः। अत्र द्विकर्मणामित्यनेन नीवह्योर्हरतेश्चेति चशब्दसमुच्चितः कृषिर्नी
यत्यादयश्चात्र यउच्यंते। अन्येषां विशेषस्य वक्ष्यमाणत्वात्। तथा दुहादीनामित्यनेन कारिकोपात्ता [illegible] चशब्दसमुच्चितेष
हेतुमदर्थे णिजंतौ आदयश्चोच्यंते ण्यंत इत्यनेन तु गत्यादिसूत्रोपात्ताश्चशब्दसमुच्चिता स्तायदश्च। तत्र अणौ कर्ता णौ कर्मात
स्याभिधाने लादय इत्यर्थः। तत्रापि बुद्धिभक्षप्रत्यवसानार्थशब्दकर्मकेषु गुणकर्मणीति मतांतरं। तथा च भाष्यं। कथिते त्वभि
हिते त्वविधिस्त्वमतिर्गुणकर्मणि लादिविधिः सपरे। ध्रुवचेष्टितयुक्तिषु चाप्यगुणे तदनल्पमतेर्वचनं स्मरतेति। अ
त्र प्रधानकर्मणि लादिभिरभिहिते गुणकर्मणि षष्ठी त्वेकीयमतदूषणपरः प्रथमपादः त्वस्याः षष्ठ्याः विधिरितीयं त्वस्या
न्यस्य मतिर्न तु ममेत्यर्थात्। सपरे। गत्यादिसूत्रोपात्तसहिते दुह्यादौ गुणकर्मणि लादयः। गुणकर्मणि पुरुषप्रवृत्तेः प्रयः
षम्नत्यर्थत्वा दुहादाव प्रधाने गत्वा दुह्यते। एवं तैः शब्दतः प्रयोजकव्यापारस्य प्राधान्येऽप्रयोज्यव्यापारस्य त्वप्राधान्यमिति तदा

तु

एपं ५

186

श. कौ.
९७४
३१३

यं धर्मो ब्रूयते। ध्रुवयुक्तयोः कर्मका॥ चेष्टितयुक्तयोगतपर्था॥ एष गुणो प्रयोज्ये। न च बुद्धिप्रत्यवसानार्थशब्दकर्मकेषु गुणकर्म
ण्येव स्यात्॥ णयंते कर्त्रुश्चेत्स्यात् पर इत्यनेन बाधादिति वाच्यं। अपरत्राहेति भाष्येणामतां न रता ध्यवसायात्। अत्रायं संग्रहः॥ गौणे
कर्मणि दुह्यादेः प्रधाने नीहृकृषवहां। बुद्धिभक्षार्थशब्दकर्मकर्तुश्चेष्टया। प्रयोज्यकर्मण्यन्येषां णयंतानामिह निश्चिते॥ लक्
ष्यतु खलर्थानां प्रयोगो भाष्यपाठयोः। तत्र नीप्रभृतीनां प्रधानकर्मत्वं बोधोत्तरंगः। दुह्यादीनां तु विपरीतं। तेन तद्दर्शनान्यायसिद्धो नियमः
इतरत्तु सर्वं वाचनिकं क्रमेणोदाहरणानि॥ गौर्दुह्यते पयः॥ दोह्या। दुग्धा। सुदोहा। अजा ग्राममनीयत नेया। नीता। सुनया। बोध्यते मा
णवकं धर्मः॥ ~~माणवकं धर्मम्~~ माणवको धर्ममिति वा। देवदत्तो ग्रामं गम्यते गमयितव्यः। गमितः। सुगम इति। यत्तु कौमुद्यां दुह्या
च्यर्थत्वादिना दुह्यादीन्न्यादींश्च द्वेधा श्येन पठित्वा न्यादयो मुख्ये दुह्यादयो गौण इत्युक्तं। तत्र ग्रहेः पाठो निर्मूल एव। जग्राह घृतं रु
शक्रमित्युदाहरणं चायुक्तं। इतरेषां तु द्विकर्मकतामात्रतात्पर्यकः पाठः। न्यादयो दुह्यादयश्चेत्युभयत्रापि आदिशब्दः प्रकारे इति स्थितं
तद्विशेषेण व्याख्येयं। यथाश्रुते हि दंडिमुषिभ्यां मुख्ये स्यात्। तथा च गर्गाः शतं दंड्यंतामिति भाष्यं विरुध्येत। शतं ह्यत्र प्रधानं। नग
र्गाः॥ अर्थितश्च राजा नो हिरण्येन भवंतीति वाक्यशेषात्। दंडिश्चेह ग्रहणार्थो न तु निग्रहार्थः अतएव ह्यत्र समुद्राये वाक्यसमाप्तिः

राम:
९७४

ना १

दमु ४

गुणानुरोधेन प्रधानाद्वृत्तेरसंभवात् । तथा मंथेरपि प्रधाने स्यात् । इष्येत तु गौणे । तथा च भारविः । येनापविद्धसलिलः स्फुटनागसद्मा देवासुरैरमृतमंबुनिधिर्ममंथे इति ॥ अमृतं ह्यत्र दृश्यतया मुख्यं । अंबुनिधिस्तु गौणः ॥ यदपि क्रमेणैव यथा रुचीमुत्का गोपी हावमकार्यत मावम्हेना मनंते नेत्युदाहृतं । तदपि नाएर्यं तेकर्तृष्वकर्मणा इति सिद्धांतात् । यद्वा । कृ विज्ञाने इति चुरादावात्मनेपदी बोपदेवेन पठितः । तस्येदमुदाहरणं । बुध्यर्थेषु पक्षद्वयस्योपपादितत्वात् । यत्तु श्रीहर्षः प्रायुंक्त । स्वक्रीडाहंसमोहग्रमर्किलशिशुभ्रमशप्रार्थितो न्विदु च दैति । तच्चिंत्यं । शिशुना चंद्रं प्रार्थिते त्यप्रधाने क्तप्रत्यये बहुव्रीहियोगात् ॥ वक्ष्यति हि । अप्रथमाविभक्त्यर्थे चायमिति । न च वंद्रे क्तः । अप्रधाने दुहादीनामित्युक्तेः । अत एव काकपक्षधरमेत्य याचित इति कालिदासः कृतषष्ठी गुणमुख्याभ्यां कर्म्म प्राप्यते पृथक् । अविशेषात् द्वितीयावन्नैर्गामस्य गोरिति । यत्र ह्येकेन शब्देन भिन्नकक्ष्ययोरुभयोरभिधा न शक्यते तत्र युक्तमेकसेवोपजीवनं २ प्रधाने नियता षष्ठी गुणे त्वन्यथा भवेत् इत्याह गौणकापुत्र इति भाष्यात् दुहादय २ नेताश्वस्य स्रुघ्नस्य स्रुघ्नं वा । इह प्रधाने कर्मणि नित्या षष्ठी । भाष्यकारवचनात् गुणकर्मणि वैकल्पिकी इति स्थितं । नन्वकर्मकाणां प्राकृतकर्माभावात्कथं द्विकर्मकता । तथा च ण्यर्थकर्मणि प्रत्ययोस्तु आस्यते माणवक इति ॥ मासमिति तु प्रयोगो संगतः ॥ ध्रुवचेष्टितयुक्तिषु चाप्यगुणा इति । [illegible] श्लोके ध्रुवग्रहणं च व्यर्थमिति चेन्न । कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मकाणां । देशश्चाकर्मकाणामि

ना ५

188

शं॰ कौ॰ १०५ ३२४ स्व ४

तिमाष्यात्।। गंतव्योध्वा। आध्वगंतव्यः।। अस्मादेव निपातनाद्धंतव्यशब्दस्य परनिपातः। गंतव्यतया लोके प्रसिद्धस्य नियतपरिमाणः क्रोशयोज
नादेरेवग्रहणार्थं गंतव्यग्रहणं। तेनाध्वानं स्वपितीति न भवति। मासमास्ते। गोदोहमास्ते। यावता कालेन गौर्दुह्यते तावंतं कालमास्ते इत्य
र्थः।। क्रोशमास्ते। कुरून् स्वपिति। जन्ममात्रकालोपाधिरिति पक्षे गोदोहादेर्यद्यपि कालत्वात्सिद्धं तथापि लोके मासादेरेव तथात्वेन प्र
सिद्धत्वात् पृथग्भावग्रहणं।। देशशब्देन च ग्रामसमुदायविशेषाः कुरुपंचालादयो गृह्यंते इति कैयटः। तेनाधिशीङ्स्थासां मित्यादे
वैयर्थ्यमिति ध्येयं। कालाध्वनोरत्यंतसंयोगे इति तु गुणाद्युपयोगार्थे आरंभणीयं। क्रोशं कुटिला।। मासं गुडधाना इत्यकर्मकार्थं चू
मासं वेदमधीते।। यद्वा। आरंपादयस्तत्पूर्वके व्यापनेवर्तते। तथा चोक्तमार्गेणैव सिद्धं। मासमासनेन व्याप्नोतीत्यर्थात्।। तथा च द्वितीये
भाष्यं।। प्राकृतमेव दंकर्मेति। नैवं सकर्मकेष्वति प्रसंगः।। लक्ष्यानुरोधेनाकर्मकाणामेवोक्तप्रकारस्युपगमात्। आह च काल
भावाध्वदेशानामंतर्भूतक्रियांतरैः। सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते इति। हेलाराजस्त्वाह। सकर्मकेष्वपि मासमोदनं पचतीति भव
त्येव। अत एवोक्तं सर्वैरिति। अकर्मकैरिति त्वविवक्षितमिति कैयटोऽप्येवं।। अस्मिन्नेव मासमास्तेत्यत्र टइति कटादेरपि द्वितीयाप्राप्ता। तथा
पि कालादेरेव व्यापनकर्मत्वं न तु कटादेरिति हेलाराजः। अनभिधानं चेह शरणं। अधिशीङित्यादिज्ञापकं वा बोध्यं। इह च कर्मणोभा
वे च लकारो दृश्यते तेनास्यते मासो मासं वेति रूपद्वयमपीष्टं। स्यादेतत्। भावे चाकर्मकेभ्य इति वचनान्मासादिकर्मकात्कथं भावे लइति चे

स्व १ राम: १०५

ता उच्यते। अकर्मकेऽभ्यन्तरत्वेनान्तरङ्गं द्व्यकर्मकत्वमुदस्यतेन तु बहिरङ्गं कालादिकर्मकर्मणा। तत्र तु व्यक्तिपक्षाश्रयणादन्तरङ्गात्सन्नि
धौ बहिरङ्गे कालादिकर्मण्यपि प्रवृत्तिरविरुद्धा॥ जातिव्यक्तिपक्षयोर्लक्ष्यानुरोधेन व्यवस्थेति सिद्धान्तात्। उक्तं च हरिणा। प्राप्तिप्र
माणसंख्यादेर्द्रव्यधर्मो हि शिष्यते। क्रियास्तु कालयोगात्तः प्राप्योऽद्व्यकर्मणोति। अतस्तैः कर्मभिर्धातुर्युक्तो द्व्येकर्मकः॥ लसकर्म
णि भावे च निमित्तत्वायकल्पत इति च। एतेन मासमास्ते माघमघाभिघातिषम्नु नागं गोधसंघेययेति श्रीहर्षप्रयोगो व्याख्यातः॥ ॥गतिबुद्धि
प्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ। गत्याद्यर्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात्। निय
मार्थमिदं। णिजर्थेनाथमानस्य यदि भवति तर्हि गत्यर्थादीनामेवेति। तेन पाचयति देवदत्तो यज्ञदत्तेनेत्यत्र प्रयोज्ये पूर्वं प्रवृत्तकर्तृसं
ज्ञाया एव निरपवादत्वेनावस्थानात्तृतीया सिध्यति॥ आह च। गुणक्रियायां स्वातन्त्र्यात्प्रेषणे कर्मतां गतः॥ नियमात्कर्मसंज्ञायाः स्वध
र्मेणाभिधीयते इति कर्तुः स्वधर्मेणात्तृतीययेत्यर्थः॥ गमयति माणवकं ग्रामं। ग्रामः कर्म। कंयहमवनं तदनुकूलव्यापाराश्रय इत्य
र्थः॥ नीवह्योः प्रतिषेधो वक्तव्यः॥ यद्यप्येतयोः प्रापणार्थत्वं न तु गतिस्तथापि विशेषणात्तया गतिरपि वाच्येत्येकोटिनिविष्टत्वेन तावन्मा
त्रेण प्राप्तिं मत्वा प्रतिषेध उक्तः॥ नाययति वाहयति वा भारं देवदत्तेन॥ वहेर्नियन्तृकर्तृकस्यैव प्रतिषेधः॥ नियन्तृकर्तृकस्य प्रयोगः
कर्मेति वक्तव्यमिति फलितोऽर्थः॥ वहन्ति वाहाः॥ वाहयति रथिनं वाहान्सूतः॥ याप्राणाद्यन्त्र तु गतिरेव प्राणाशह्यार्थः॥ यातिग

श.कौ.
९६
३२५

श्यतीति एकार्थप्रतीतेः॥ तेन कालं यापयतीत्यादौ प्रयोज्यस्य कर्मता बोध्या॥ बुध्यर्थग्रहणेन ज्ञानसामान्यवाचिन एव ग्रहणं॥ न तु त-
द्विशेषवाचिनः स्मरत्यादयः॥ अत एव सूत्रे दृशेरुपसंख्यानं करिष्यते बोधयति माणवकं धर्मं। प्रत्यवसानं भक्षणं। भोजयति आश-
यति माणवकमोदनं। आदिखाद्योः प्रतिषेधो वक्तव्यः॥ आदयति खादयत्यन्नं वटुना। भक्षेरहिंसार्थस्य निषेधो वक्तव्यः॥ हेतुमण्णिजन्ते
विधिरिति प्रतिषेधोपपत्तिः। वितर्यं सन्निधानात्तद्विषयः॥ तेन चुरादिणिजन्तेपि भक्षयतेः प्राप्तिसत्त्वात्प्रतिषेध उपसंख्यातः॥ भक्षयत्य-
न्नं वटुना॥ अहिंसार्थस्य किं। भक्षयति बलीवर्दाः सस्यं भक्षयति बलीवर्दान्सस्यं हेत्रस्यान्नं यवानां भक्षणेना हिंसादृष्टत्वात्तस्या-
मवस्थायां तेषां चेतनत्वाभ्युपगमात्। शब्दः कर्मकारकं येषां ते शब्दकर्माणः। न तु शब्दकर्मव्यापारा इत्यत्र कर्मशब्दः क्रियापरः।
गतिबुद्धिप्रत्यवसानशब्दार्थेति वक्तव्येऽर्थग्रहणात्कर्मशब्दस्य पृथगुपादानात्। अध्यापयति पाठयति माणवकं वेदं। जल्पतिप्रभृ-
तीनामुपसंख्यानं। जल्पयति विलापयति आभाषयति पुत्रं देवदत्तः॥ दृशेश्चोपसंख्यानं। दर्शयति हरिं भक्तान्। नयद्यपि दृ-
शेर्ज्ञानसामान्यपरत्वे बुध्यर्थत्वात्सिद्धं। तथापि ज्ञानविशेषार्थतायां न सिध्यतीत्युपसंख्यानमारब्धं। श्रावयति श्लोकं देवदत्तमि-
ति तु शब्दकर्मत्वात्सिद्धं शब्दक्रियाणामिति व्याख्याने तु अग्रेणेनोपसंख्येयं स्यात्॥ ह्वयतिक्रन्दत्योश्च प्रतिषेधो स्यात्। ह्वाययति क्र-
न्दयति वा देवदत्तेन। दृशेस्तूभयथाप्युपसंख्येयं। शब्दायतेश्चोभयथा प्रतिषेध्यः। अकर्मकत्वादपि त्यच्चप्रसंगः। शब्दलक्षण

राम.
९६

मास २

स्यकर्मणोऽनभावात् । कर्मान्तरायोगाच्च । शब्दाययति देवदत्तेन । अकर्मकग्रहणेन तु येषां कालादिभिन्नं कर्म न संभवति ते गृह्यन्ते । तेन
त्वविवक्षितकर्मणोऽपि । तेन मासमासयति देवदत्तमित्यादौ कर्मत्वसिद्धं । देवदत्तेन पाचयतीत्यादौ च न भवति । गत्यर्थाकर्मक[illegible]श्लिषेति
सूत्रेऽप्येवं । अत एवाविवक्षितकर्मकेभ्यः पचिदहातिप्रभृतिभ्यः कर्तरि क्तो न । अन्यथा पक्ववान् दत्तवानित्यर्थे पक्वो दत्त इति स्यात् ।
लः कर्मणीति सूत्रे तु अविवक्षितकर्मणामसंभवत्कर्मणां वा ग्रहणं । अत एवाविवक्षितकर्मणां न भावे लादय इति सूत्रे वदन्तो
गौरवेणावितत्र तु नेह प्रवृत्तेरिति भावे लकार इति ब्रुवतो हरदत्तस्य मतभेदपरत्वान्न पूर्वापरविरोध इति दिक् । हृक्रोरन्यतरस्यां । हाच

ति ८

काचेति विग्रहः ॥ हृक्रोश्चेति वा ॥ अनयोरणौ कर्ता णौ कर्म स्यात् । नवैविभाषा सूत्रे उभयत्र विभाषा स्विदं वार्तिककृता पठितं । तथा
हि । अभ्यवहारयति माणवकं मोदनं माणवकेनेत्यत्र प्रत्यवसानार्थत्वात्प्राप्ते । विकुर्वते छात्राः । विकारयति छात्रान् छात्रैर्वेत्यत्रा
कर्मकत्वात्प्राप्ते । इतरत्र त्वप्राप्ते विभाषेयं ॥ अभिवादिदृशोरात्मनेपदे वेति वक्तव्यं ॥ अभिवादयते दृशेश्च णौ विभाषा । दृशेस्तु बुध्यर्थ
त्वात् नित्यं प्राप्ते ॥ अभिवदति गुरुं देवदत्तः ॥ अभिवादयते गुरुं देवदत्तं देवदत्तेन वा ॥ णिचश्चेत्यात्मनेपदं । परस्मैपदे तु
अभिवादयति गुरुं देवदत्तेन । दर्शयते राजानं भृत्यैर्भृत्यान्वा । कर्मसंज्ञाभावपक्षे कर्मान्तरस्याभावात्स्मरणाविवक्षात्मनेपदमन्य
त्र तु णिचश्चेति प्राप्तः । वस्तुतस्तु णिचश्चेत्येव युक्तं । गौरवाणिवृत्त्यस्तु नायं विषयः । णिज्वाच्च प्रयुक्तिभेदादिति तत्रैवोपपादितं ॥ स्व

श॰कौ॰
८७
३१६

तंत्रः कर्त्ता॥ क्रियायां स्वातंत्र्येण विवक्षितोर्थः कर्त्ता स्यात्। धात्वर्थव्यापाराश्रयत्वं स्वातंत्र्यं॥ आह च। धातुनोक्तक्रियेनित्यं कारके कर्तृते
इति कर्मकर्त्तर्यप्यस्तीदं। फलव्यापारयोर्वैयधिकरण्यमात्रं पचावोत्सर्गिकस्य परित्यागः॥ विशकलितशक्तिपक्षे विशिष्टशक्तिपक्षे
चेदं तुल्यं। निवृत्तप्रेषणाकर्म स्वक्रियावयवे स्थितम् इति पक्षे तु प्रधानभूतधात्वर्थ एवेह क्रिया। धातुत्वं तु भूतपूर्वभावनाश्रित्वात्। ए
तेन कारकाणां क्रियान्वयनियमोपि दृष्टव्यो व्याख्यातः। देवदत्तः पचति। स्थाली पचति। अनेनैव भस्मशब्दार्थत्वादाश्रयो लकारार्थः। देव
दत्तेन पच्यते। देवदत्तरूपोय आश्रयस्तद्विशिष्टो विक्लित्त्यनुकूलव्यापार इत्यर्थः। वैशिष्ट्यं चाधेयतारूपं संसर्गमर्यादया भासते। तत्प्र
योजको हेतुश्च॥ तस्य कर्त्तुः प्रयोजको हेतुसंज्ञः स्यात् चात्कर्तृसंज्ञः॥ संज्ञासमावेशार्थश्चकारः। कुर्वन्तं प्रेरयति कारयति। इह णिङ् हेतु
त्वात् तद्व्यापारे हेतुमति चेति णिच्। कर्त्तृत्वात् कर्त्तरि लकारः। इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य चतुर्थे पादे तृतीयमाह्निकं
॥ ॥ श्री॥ ॥ प्राग्रीश्वरान्निपाताः॥ अधिरीश्वरे इत्यतः प्राक् प्राग्निपाताद् इत्यधिक्रियते। तत्राद्याश्रयणात्। तेन पूर्वं निपातसंज्ञाः
सतः पश्चाद् उत्यादिसंज्ञा इत्यर्थात्संज्ञासमावेशः सिध्यति। अन्यथा गत्युपसर्गकर्मप्रवचनीयसंज्ञानां निपातसंज्ञायाश्च पर्यायः स्यात्।
तेनादोषमाणां तु प्रागग्रहणं सामर्थ्यमेव॥ अन्यथा रीश्वराद् इति पंचम्येव दिक्शब्दाध्याहारणं किं तेन न च परशब्दाध्याहारप्रसंगः। चादयोस
त्विपादय इत्येतयोर्विधेयालाभेनानन्वयापत्तेः रेफविशिष्टग्रहणं किं। ईश्वरे तोसुन्कसुनौ इति स्यवाति न्यायेनावधित्वमा भूत्। वस्तु

राम॰
९०

तत्तु मास्तु रेफः। प्रत्याहारेणाभिमतसिद्धेः॥ अव्ययीभावस्याव्ययसंज्ञारंभाच्च। नञ्‌सो समासे अव्ययीभाव एवेति नियमार्थस्यादिति
वाच्यं। गौरवप्रसंगाद्व्याप्तिन्यायमाश्रित्य नियमार्थत्ववर्णनापेक्षया प्रत्याहारे विध्यर्थतायाश्च न्याय्यत्वात्। अत एव नलोकेति सूत्रेऽ
व्ययात्पृथक्लोकादीनां ग्रहणमप्युपपद्यते इति दिक्। चादयोऽसत्त्वे। चादयो निपातसंज्ञाः स्युः नतु द्रव्ये। निपातत्वादव्ययत्वं। चवाइ
त्यादिवत्। सत्त्वलक्षणं यत्र सर्वनाम प्रयुज्यते इदमित्युच्यते सोऽर्थोऽत्र सत्त्वेन विवक्षितः। लिंगसंख्यान्वयि द्रव्यमिति वा। असत्त्वे किं। प
शुना व्रजेत्। पशुशब्दस्यादिः। चः समुच्चये इत्याद्यपि प्रत्युदाहरणं। न चात्र प्रकृतिवदनुकरणमित्यतिदेशान्निपातत्वं दुर्वा
रमिति वाच्यं। अतिदेशस्यानित्यतया अल्लुक्सूत्रे एवोपपादितत्वात्। असत्त्वप्रतिषेधः किं। वानीति वाः। विप्रातीति विप्रः। इह
क्रियाविशिष्टद्रव्यवाचकतया क्रियायाश्चासत्त्वरूपत्वान्निपातता स्यात्। ततश्च विप्रशब्दस्याव्ययसंज्ञा स्यात्। प्रयोजनं सर्वनामाव्य
यसंज्ञायामित्युक्तत्वात्। अथ चादयः। च। वा। ह। अह। एव। एवं। नूनं। शश्वत्। युगपत्। भूयस्। कूपत्। प्रश्नवितर्कप्रशंसास्वयं। ए
वं सूयदपि कुविदिति भूर्यर्थे। योगप्रशंसातिभावेषु च। नेदिति शंकायां। नेज्जिह्मायन्तो नरकं पताम। नेद्देवमायुन जन्मत्र देवा इ
त्यादौ तु नञ्‌ इति पदद्वयं पठ्यते। तस्मान्निपातसमुदायोऽयं बोध्यः। निपातैर्यद्यदीति निघातनिषेधः। प्रतिषेधविचारसमुच्चयेष्वय
मिति तु शाकटायनः। चेत्। चण्। अयं चेदर्थे णित्। समुच्चयादौ त्वननुबन्धकः। इदं च निपातैर्यद्यदीत्यत्र स्फुटी भविष्यति। कच्चित्।

स४

194

माङ्॰। मा ३

श॰ कौ॰ यत्र। नह निश्चित निषेधे। हंत हर्षेनुकंपायां च। माकिः। माकीं। एतौ निषेधे माकिर्नेशो माकीरिषन्माकीं संशारिके वटो। नकिः। नकिं। इंद्लतुन्नरः

९८ नकि त्वायथात्वं हि किंस्तकं नु कं आकीं न किं नकिः माकीं माकिः ४ आकंतमिति वेदनिघंटुः। आमि। आ। शानवोन्नराणीति तद्व्याख्या। यांस्कः पा २

३२७ डिलु माङ्॰ ... ङिति विशेषणार्थो ङकारः। माभवतु माभविष्यतीत्यत्र अनिरनुबंधो माशब्दः। नञ्। जकोनलोपो नञ् इति विशेषणार्थः। नस्येत्युक्ते तु पामनपुत्र इत्यत्रापि स्यात्। न च सिद्धांते पित्रैणपुत्रेति प्रसंगंवारयितुं अलुगुत्तरपद इत्युत्तरपदाधिकारेन पूर्वपदेन न ञो वश्यंविशेषणीयत्वान्नेनैव पामनपुत्रस्यापि सिद्धेः किं ञकारेणेति वाच्यं। नैकधा। नागमिकर्मीकृतं नैकनीदृत्तेत्यादौ निषेधार्थेन नशब्दे न समस्य सुप्सुपेति समासे निव्याप्तिं वारयितुं ञित्वस्यावश्यकत्वात्। नञः पूर्वपदस्य विशेषणेपि अनन्यार्थं ञित्वस्य निपातस्यैव ग्रहणं न तु हृच्छ्याचरितार्थस्य नकारस्य तद्धितस्यापीति तत्वाचायग्रंथस्योक्तिः संभवो बोध्यः। यावत्। तावत्। त्वै। न्वै। एतौ वितर्के। औषट्। वौषट्। स्वाहा। वषट्। स्वधा। ओ३म्। तथा। हिरुक्। खलु। किल। अथ। सुष्ठु। आदह। इतिहिंसोपक्रमकुत्सनेषु। आदह स्वधामन्वित्यत्र तु पदकारा आ दिति पृथक् पठंति। उपसर्गविभक्तिस्वरप्रतिरूपकाश्च। अवदत्तं विदत्तं प्रदत्तं चादिकर्मणि। सुदत्तमनुदत्तं च निदत्तमिति चेष्यते। अच उपसर्गात्त इति द्योस्तत्वं न भवति। उपसर्गप्रतिरूपकत्वेप्यनुपसर्गत्वात्। विभक्तिप्रतिरूपका यथा। अहंशुभं। अहंयुः। रामः ९८ शुभंयुः। अहंशुभमयोर्युस्। चिरेण। अंतरेण। ... चिराय। चिरात्। अकस्मात्। चिरस्याममममत्वं गततराज्यस्य। वेलायां। मात्रायामि

बि २

195

त्यादि। एते नु गेये केनु विनीतौ वामिति व्याख्यातं। वामित त्वाव्यय स्यप्युवामित्यर्थात्॥ आहआ सेत्यादीनि ठतिङंतप्रतिरूपकाणि॥ स्वस्तस्त
संबोधनानुकंपनो भर्त्सनपादपूरणप्रतिषेधेषु यथा सभवंबोधा॥ अअपेहि आएवमन्यसे। इइंइंपश्यई ईशः। उउत्तिष्ठ। ऊऊषखेबी
जवपति। एइतो भव। ओश्रावय। अअल्ल ऐत्रौ। एते मंत्रसौ भाः। पश्चिति सम्प्रगर्थे। लोधंनयति पश्च मन्यमानाः॥ हइक मिति शो प्रेत्व
यथाकथा तेत्वनादरो। पाट्प्याट्अंग। हेहे। भोः॥ अये इत्यादयः संबोधने। चो तिहिंसा यां। प्राति लोम्य पादस्वरोषु। विषुइतिना। नार्थे॥ ए
केपदे इत्यकस्मादर्थे। निहंतरीनेकपदे। पुनइति कुत्सायां। कुत्सितमव यवं ह्रादयती तिपुष्ठ। उपुलिति लांतमिति शाकटायनः॥
कुत्सितकसति गच्छतीति पुल्कसः॥ आस्मीत्यहमर्थे। त्वामस्मि वच्मि विदुषां समुदायो त्र तिष्ठति। आ नइति इतो। पीत्यर्थे। इत्यादि॥ आक
तिगणाश्चायं॥ प्रादयः। एते निपातसंज्ञाः स्युर्न तु सत्वे। प्र। परा। अप। सं। अनु॥ अव निस्। निर् दुस् दुर्। वि। आङ्। नि। अधि। अपि। अ
ति। सु। उत्। अभि। प्रति। परि॥ उपएते प्रादयः। त्रिमित्स्उ सदमो सांतो। निसत्तपतावनासेवने इति निर्देशादिति उपसर्गस्यायमाविति
त ४
ति। सू। उत्। अभि। प्रति। परि॥ उप। एते प्रादयः। ...सूत्रेहति। निरंकुषः। स्युदुरो र विधिकरणादित्वाच्चनुरो भातरेफांता वपीति तत्रैव सूत्रे हरदत्तः॥ अदश्चेकिं। किः पत्नी। प्रराः सेनाः। उप स
र्गाः॥ क्रिया योगे॥ प्रादयः क्रिया योगे उपसर्गसंज्ञाः स्युः॥ गतिश्च। प्रादयो गतिसंज्ञाः स्युः क्रियायोगे। पुल्लिंगो यं गति शब्दः॥
र्गे नन्तरइति लिंगात्। अव्युत्पन्नश्चायं नि जत्तोवा। ननिविदीर्घश्चासे निति तु न प्रवर्तते। अत एव निर्देशात्। उपसर्ग संज्ञया सहस स्त
नि १

शा॰कौ॰
१९८
३२८

मावेशार्थश्चकारः॥ अन्यथा पर्यायः स्यात्। तेन प्रणायमित्यादौ णत्वं कृदुत्तरपदप्रकृतिस्वरश्च सिध्यति। निपातसंज्ञायां तु समावेशः।
आग्रहणेन साधित एव। इह च क्रियायुक्ताः प्रादयस्तत्र अन्येव गत्युपसर्गसंज्ञाः। योगग्रहणं सामर्थ्यार्थं। तेन प्रहृष्टं कृतं प्रकृतमित्य
त्र गतिरनंतर इति स्वरेण। कर्मणि क्तांतं प्रत्यगतित्वात्। कृदर्थविशेषकत्वे तु प्रहैवात तथा प्रहृष्टो भावः प्रभाव इत्यत्र श्रिणीभुवोनु
पसर्ग इति घञ्सिद्धः। एवं प्रणायमित्यादौ प्रकृत्यर्थगतप्रकर्षाभिमुख्यद्योतकतायां णत्वप्रत्वे स्तः। णपर्थविशेषक
त्वे तु नेति बोध्यं। निपातसंज्ञा तु क्रियायोगं विनाप्यस्ति। एतदर्थमेव हि प्रादय इति योगो विभक्तः॥ तेन प्रगत आचार्यः प्राचार्य इत्य
त्राव्ययपूर्वपदप्रकृतिस्वरः सिध्यति। उपसर्गसंज्ञायां मरुच्छब्दस्योपसंख्यानं मरुत्तः। उपसंज्ञाविधानसामर्थ्याद् अंतत्वाभावेप्य
च उपसर्गात् इति त्वं प्रवर्त्तते इत्याहुः। एवं च मरुत्तमपनीत्यत्र णत्वमपि प्राप्नोति। तस्मान्नत्वं एव संज्ञा वक्तव्या। अत एव किं बुधि इ
च न भवति। निपातसंज्ञा तु नास्त्येष्टा तेन तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरेण मरुत्तशब्दो मध्योदात्तः। निपातत्वे त्वाद्यु
दात्तः स्यात्। न चोपसर्गाश्चाभिवर्जमिति फिट्सूत्राद्यो पतादवस्यांशं क्यं। निपातात्राद्युदात्ताद्येव सिद्धे अभेः प्रतिषेधमात्रार्थत्वात्
त्रारेभादिति हृदगाद्यः। अत एव नाभेरितिवत्सूत्रयतां॥ मात्तु वा तदपि स्वादिषु अभेः सुपठत्वादित्यवोचाम। एवं च तत्पूर्वं मरुत्त्वामि
ति मरुत्तशब्दस्तु तादने उपायांतरं बोध्यं तत्र चतपः पित्वमेव तन्मते। तत्त्विति नित्वपाठस्तु काचित्कः प्रामादिकः। अन्यथा मरुत्तशब्दस्या

सर्ग ६

राम:
१९९

घुदात्ततापत्तौ प्रकृतस्वरस्य कैयटादिविरोधापत्तेः॥ मत्वर्थीयप्रकरणे तेन नित्यं मकृत्त्रशब्दस्याद्युदात्ततां चावलंब्य प्रवृत्तो हृदरन्नग्र
थस्तु चिंत्यः॥ पर्वतस्मिन्नहिहद्दो विभायेत्यादौ पच्यमानं पर्वतशब्दस्याद्युदात्तत्वं तु डेधापिपितिध्याति॥ [illegible] निसंतस्येति पर्वशब्दस्या
घुदात्तत्वं तुडेधापिपितिध्याति॥ न त्विषयस्य निसंतस्येति पर्वशब्दस्याद्युदात्तत्वात्॥ अब्दस्यादि धाउपसंख्यानं॥ अद्यामिदादिपाठात् अद्रा
ऋद्धेति निपातनाद्वासिद्धेः॥ अंतःशब्दस्याङ्किविधिणत्वेषूपसर्गत्ववाच्यं॥ एतच्चांतरपरिग्रहे इत्यत्र भाष्ये स्थितं॥ अंतर्द्धिः॥ अंतर्हरणयात्॥
हंतेरत्पूर्वस्येति णत्वं॥ एवं चांतर्देशे इति न कर्त्तव्यं देशेतु हंतुर्मा दित्वासमत्वाभावः॥ अयनं चेत्यपि न वक्तव्यं कृत्यचइतिसिद्धेः॥ देशे तु हंतुरत्रो
दितावोधो निवेप्पटः॥ देशे निषेधार्थं सूत्रद्वयमिति तु हरदत्तः॥ पक्षद्वयेपि अंतरीयति अंतर्भवणीत्यादौ यथायथं णत्वबोध्यं॥ स्तुदुरोः
घतिषेधो नुन्दिविधित्वेणत्वेषु॥ सुलभं दुर्लभं॥ उपसर्गात्खलघञोरिति नुम्॥ एतच्च प्रयोजनमापाततः॥ न सुदुर्भ्यां केवलाभ्यामिति
सूत्रस्याश्यारभ्यत्वात्॥ अन्यथा अतिसुलंभमित्यत्र नुम्न स्यात्॥ तत्त्वं॥ सुदत्तं॥ अच उपसर्गादिति तत्वं मा भूत्॥ षत्वादुस्थितिः॥ प्रक्रि
याजालदुस्थं॥ सुसिक्तं॥ सुस्तुतं॥ सुः पूजायामिति तु कर्त्तव्यमेव॥ पूजायामिति विशेषणार्थं॥ तेन सुषिक्तं किं तवात्रेत्यादौ षत्वं भवते
व॥ कथं तर्हि॥ फलवद्भावनोद्भूतकथं भावति रोहिताः॥ नेवांगानां कथं भावाः प्रादुष्यंति कथं च नेति॥ सत्यं नेदमुपसर्गत्वप्रयुक्तं किंतु
पसर्गप्रादुर्भ्यामित्यत्र प्रादुषः पृथग्ग्रहणप्रयुक्तं॥ एतेन प्रादुष्पतीति पठित्वा पश्चाद्दुरइत्युपसर्गत्रिकपूर्वस्यस्य तेरूपसर्गात्तु नो

पत्र ५
४७

अत्र णत्वं चिंत्यं

शा॰कौ॰ १०० ३२९

नीत्यादिना षत्वमिति प्राप्तणत्वात्तः परास्ताः॥ दुरुपसर्गतायाः षत्वविधौ निषेधात्। स्पतेरर्थस्य प्रकृतार्थसंबंधाच्चाणत्वं। दुर्नीतं दुर्नयः॥ एतेन दुरः परस्य णत्वं नेति केचिदिति पठित्वा सिद्धान्ते णत्वमिति भ्रामयंतः परास्ताः॥ गतिसंज्ञायां कारिकाशब्दस्योपसंख्यानं। कारिकाकृत्या कारिकाकृत्य कारिकाः करोति। तिङि चोदात्तवतीति गतेर्निघातः। निपातत्वादव्ययत्वे सति विभक्तेर्लुक्। कारिका क्रिया मर्यादा स्थितिरित्यर्थः। यत्नइत्यपरे। धात्वर्थनिर्देशइति ण्वुल्। यस्तु कर्त्री ण्वुलंतः कारिका दासीति यश्च श्लोकवाची तयोर्नेह ग्रहणं। क्रियार्थीगइति कारिकाशब्दस्य विशेषणात्क्रियार्थत्वेनैव ग्रहणात्। पुनश्चनसौ छंदसि गतिसंज्ञाविति वक्तव्यं। पुनराधेयं। गतित्वात्समासः॥ कडुत्तरपदप्रकृतिस्वरेण अयतो नाव इति धेशब्द उदात्तः। पुनरुत्स्यूतं वासः। इहापि गतित्वात्समासः। स्वरस्तु थाथादेराकृतिगणत्वादंतोदात्तत्वं। काठके हि तोदात्तः पठ्यते। शेषनिघातेन पुनःशब्दोनुदात्तः। गतिर्गताविति निघातं वदन्वृत्तिकारस्तु परत्वात्समाप्यतां मन्यते। चनो हितः चायेरन्नेरुस्वश्चेत्यसुनंतत्वा[illegible]न्निपातत्वाद्वा। आद्युदात्तस्य चनःशब्दस्य गतिरनंतर इति प्रकृतिस्वरः। ऊर्यादिच्विडाचश्च। एते गतिसंज्ञाः स्युः क्रियायोगे। कृभ्वस्तियोगे च्विडाचौ विहितौ। तत्साहचर्यादूर्यादयोपि तद्योग एव प्रयुज्यंते नान्यत्र॥ अनभिधानाच्च। तत्राप्याविः प्रादुःशब्दौ मुक्त्वा अन्येषां करोतिनैव योग इति माधवादयः। यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदंतविधिर्नास्ति तथापीह सामर्थ्याच्च्विडाजंतग्रहणं। नहि प्रत्ययमात्रस्य क्रियायोगः संभवति। स्वार्थिकत्वेनानर्थकत्वात्। च्वेरव्ययत्वाच्च॥

रामं॰ १००

ऊरीकृत्य। शुक्लीकृत्य। पटपटाकृत्य। इहेदमवधेयं॥ औषड्ढादीनां स्वाहान्तानां चादिष्वपि पाठादत्र क्रियायोगेऽपि निपातत्वं। आविः शब्दस्य सा
हचर्यात्स्यस्तिषु पाठात्कृञो योगे विकल्पः। स्वास्ति योगे तु नेनैव नित्यमिति। कथं तर्हि वारुणीमदविशंकमथाविष्कृतुषो भवदस्ताविवरा
ग इति माघः। अभवद्युगपद्विलोलजिह्वायुगलीवो भयस्तकभागमाविरिति च। निरंकुशाः कवय इति हरदत्तः। वस्तुतस्तु नेह दोष
लेशमपि पश्यामः। तथाहि। गतिर्बाहुलतोः प्राक्प्रयोगः प्राप्नोतीति तदीयपूर्वपक्षः सर्वं स्वातं तच्च भाष्यवार्तिकयोरेव निराकृतप्रायं तेप्रा
ग्धातोरिति सूत्रं हि द्वेधा व्याख्यातं। प्रयोगनियमार्थं संज्ञानियमार्थं चेति। तत्रात्यपक्षे प्राक्प्रयोगे प्राक्प्रयोक्तव्याः प्राकु प्रयुज्यमानाः संज्ञां
लभंते इति स्थितं। इममेव च पक्षमाश्रित्यानुकरणं चेति सूत्रेऽनितिपर[illegible]मिति प्रत्याख्यातं। एवमेव च्छंदसि परे पिण्यवहितान्नेति
सूत्रद्वयमपि प्रत्याख्यातं॥ अत एव ने प्रागिति सूत्रे स्तुकंदकराणि वीरणानीति भाष्यं कर्तृकर्मणोश्च भूकृञोरिति सूत्रे स्वाद्यं भवमि
तिभाष्यष्टतिग्रंथो चार्थयोः किं॥ स्वाद्येन भूयते इतिशिष्टप्रयत्नहरदत्तोक्तपाततः पक्षान्तरे रपि परिहारा भवंतीति न्यायेन संज्ञानि
यमपक्षे सर्वस्य सामंजस्यात्। एतेन पुरोऽपसमस्य गुहुवांचकार ज्वलनेव पुरिति भट्टिः। तस्यापि त्वा कथमपि पुर इति कालिदासस्य स
मर्थितः॥ नच पुरो व्ययमित्यस्य कर्मात्र विषयत्वेऽप्रमितत्वात् कर्तोनधिकारात् तात्पुरात् ताहं पुरो धायेत्यादिप्रयोगाच्चेति दिक्। ऊरी उ
ररी एते ऽर्ययोगी कारे विस्तारे च। विताली च्चमीरतो विस्तारे। शाकला त्वं सकला च सकला भ्र सकला एते च त्वारो हिंसायां। शा

इति ग्रंथ भ्रसंगच्छते। एतेन वृत्तेः प्रमादिकत्वं वदन् आद्योनस्य भ्रयत इति पाठः वृत्तिस्य इति ४

मितिर

ऊरीर

शा. कौ.
१०१
३२०

कलाकृत्येत्यादि। हिंसित्वेत्यर्थः॥ गुलुगुधा पीडार्थे॥ गुलुगुधाकृत्य। पीडयित्वेत्यर्थः॥ सजूः सहार्थे॥ फलफली विक्ली। आक्ली॥ एते विकारे॥ अलोष्ठी। केवाली। सेवाली। शेवाली। वर्षाली। मस्मसा। मस्मसा। एते हिंसायां। वषट्। वौषट्। स्वाहा। स्वधा। पांपी करुणाविलापे। पांपीकृत्य। करुणां विलप्येत्यर्थः॥ प्रादुः प्राकट्ये। श्रत् श्रद्धार्थे। श्रत्कृत्य। आविः प्राकट्ये। आविष्कृत्य। गणरत्ने त्वन्येपि संगृहीताः। तथा हि। पांपाली। संकला। केवासी। एते हिंसायां। वार्दाली। पार्दाली। आलंबी। एते प्राकाश्ये हिंसायां च। इत्यूर्यादयः॥ अनुकरणं चानितिपरं॥ गतिः स्यात् क्रियायोगे। खाट्कृत्य। अनितिपरं किं। खाडिति कृत्वा निरष्ठीवत्। सति हि गतित्वे प्रयोगनियमपक्षे धातोः प्राक् प्रयोगः स्यात्। अनुकरणत्वजात्याक्रान्तस्येतिशब्दे परे यं निषेधः॥ तेन श्रौषट् वौषड् इति कृत्वा निरष्ठीवदित्यत्र श्रौषट्शब्दस्यापि निषेधः॥ संज्ञानियमपक्षे तु अनितिपरग्रहणं न कर्तव्यं। इतिपरस्य तत्प्राप्तेरेवाभावात्॥ आदरानादरयोः सदसती॥ क्रमाद् इति संज्ञे स्तः। सत्कृत्य। असत्कृत्य। प्रीतिपूर्विकाऽस्तु क्रिया नाद्रि विषयान्तरे आदरः। अवज्ञया प्रत्युत्थानादावुपेक्षा त्वनादरः एतयोः किं। सत्कृत्वा। असत्कृत्वा। शोभनमशोभनं वा कृत्वेत्यर्थः॥ भूषणेऽलं॥ गतिसंज्ञः स्यात्। अलंकृत्य। भूषणे किं। अलं कृत्वौदनं गतः। पर्याप्तमित्यर्थः॥ अनुकरणमित्यादयस्त्रयो योगाः स्वभावात्कृञ्विषया इति माधवः॥ अन्तरपरिग्रहे। स्पष्टं। अन्तर्हत्य। मध्ये हत्वेत्यर्थः। अपरिग्रहे किं। अन्तर्हत्वा मूषिकां श्येनो गतः। परिगृह्य गत इत्यर्थः॥ अत्रेदमवधेयं। हत्वा गमनं द्विधा। हतं त्यक्त्वा परिगृह्य चेति॥ आद्यमुदाहरणं द्वितीयं प्रत्युदाहरणं॥ अपरिग्रहे इति च प्रयोगोपाधिर्न तु वाच्यकोटिनिविष्टमिति॥ कणेमनसी श्र-

राम:
१०१

प१

अ२ द्धाप्रतीघाते। गती स्तः। कणेहत्य पयः पिबति। मनोहत्य। कणेशब्दः सप्तमीप्रतिरूपको निपातः। अभिलाषातिशये वर्त्तेते मनःशब्दोप्येवं। अति
शयेनाभिलष्य तृप्तिपर्यंतं पिबतीत्यर्थः। तत्र तृष्णाया अपगमान्न तत्प्रतीघातो धात्वर्थसमुदायगम्यः। श्रद्धाप्रतीघाते किं। कणे ह
त्वा गतः। मनो हत्वा। सूक्ष्मा तंडुलावयवाः कणाः। तस्मिन् हत्वेत्यर्थः। मनःशब्दस्तु चेतसि। पुरोऽव्ययं। पूर्वाधरावराणामिति सूत्रादितोऽसिप्र
त्ययांतोऽव्ययं तथाभूतः पुरःशब्दो गतिसंज्ञः स्यात्। पुरस्कृत्य। नमस्पुरसोरिति सत्वं। अव्ययं किं। पूः पुरौ पुरः कृत्वा। अस्तं च। अस्तमिति मांतम
व्ययं गतिसंज्ञं स्यात्। अस्तंगत्य। अव्ययमित्येव। अस्तं कांडं क्षिप्तमित्यर्थः। अच्छगत्यर्थवदेषु। अव्ययमित्येव। अच्छगत्य। अच्छोद्य। अभिग
त्य अभिमुखमुक्त्वा चेत्यर्थः। अव्ययं किं। जलमच्छं गच्छति। अदोऽनुपदेशे। अदःशब्दस्त्यदादिः सोऽनुपदेशे गतिः स्यात्। अदःकृत्य। अदःकृतं
यदा स्वयमेव त्वं पर्यालोचयति तदेदमुदाहरणं। अनुपदेशे किं। परं प्रति कथने मा भूत्। अदः कृत्वा गतः। तिरोऽन्तर्द्धौ। तिरोभूय। अंतर्द्धौ
किं। तिरोभूत्वा स्थितः। पार्श्वतो भूत्वेत्यर्थः। विभाषा कृञि। प्राप्तविभाषेयं। तिरोऽन्तर्द्धावित्यनुवृत्तेः। तिरःकृत्य। तिरस्कृत्य। तिरसोऽन्यतरस्या
मिति वा सत्वं। प्रत्युदाहरणे तु न सत्वं। तद्धियोगतिग्रहणानुवृत्तेः। तिरःकृत्वाष्ठं। केचित्तिहापि सत्वमिच्छंति। पराभवे तिरस्कारशब्दश्चानु
रुधानाः सत्वविधौ गतिग्रहणं निवर्त्तयंतीति माधवः। उपाजेऽन्वाजे। एतौ कृञि वा गतिसंज्ञौ स्तः। विभक्तिप्रतिरूपकौ निपातौ। विमोढुर्बल
स्य सामर्थ्याधाने वर्त्तेते। उपाजेकृत्य। उपाजेकृत्वा। अन्वाजेकृत्य। अन्वाजेकृत्वा। उपष्टभ्येत्यर्थः। साक्षात्प्रभृतीनि च। एतानि कृञि वा

अ
रो

का३

च्व्यंता च्वौ ४

श॰कौ॰ १०२ ३२१

गतिसंज्ञा निस्युः॥ च्व्यर्थ इति वक्तव्यं। साक्षात्कृत्य। साक्षात्कृत्वा॥ आसाक्षाद्भूतं साक्षात्क्रियते चेत्तदायं प्रयोगः। न तु साक्षाद्भूतस्यैव रूपांतरस्या
दने। च्व्यंतेषु पूर्वविप्रतिषेधादूर्यादिच्वीति नित्यैव संज्ञा। तेन लवणीकृत्येत्यत्र मांतत्वं न भवति। तद्धि विकल्पसन्नियोगेन ह गणे निपात्यते।
यद्वा। लवणशब्दस्य लवणमिति मांत आदेशः। तथा च मांतत्तु पूर्वविप्रतिषेधः॥ त्रैशब्द्यं हि नः साध्यं। लवणंकृत्य। लवणीकृत्य। लव
णीकृत्येति। तत्राद्यंतयोः पाक्षिके लवणमादेशे समरूपं परेणापि विकल्पेन मुक्ते लब्धा। तसन्निपातसंज्ञेति न कश्चिद्दोषः। इहामेव
शे पश्चात् तयो विभक्तिप्रतिरूपका निपाताः॥ प्रादुराविः शब्दयोरूर्यादित्वात्प्राप्ते विभाषा। साक्षात्। मिथ्या। चिंतेति मनोव्यापारे। चिंताकृ
त्य। भद्रा। आलोचना प्रशंसा मंगलेष्वयं। रोचनेति श्लाघ्योत्पादे प्रशंसायां च। अमेति सहः साहित्ययोः। आस्था। श्रद्धा। प्राजर्या। बीजर्या। ज
रुहा क्रियायां। प्राजरुहा बीजरुहेति रुहिक्रियायां॥ लवणं। उष्णं। शीतं। उदकं। आर्द्रं लवणादीनां पंचानां गतिसंज्ञासंनियोगेन
मांतत्वं निपात्यते। मांतादेशो वेत्युक्तं। अग्नौ। वशे। विकंपने। विकसने। प्रहसने। संतपने। प्रादुस्। आविस्। नमस्। आकृतिगणोयं।
अनत्याधान उरसि मनसी। एतौ निपातौ कृञि वा गतिसंज्ञौ स्तः। उरसिकृत्य। उरसि कृत्वा॥ अभ्युपगम्येत्यर्थः। मनसिकृत्य। मनसि
कृत्वा। निश्चित्येत्यर्थः॥ अत्याधानमुपश्लेषः। तत्र न। उरसिकृत्वा पाणिं शेते। मध्येपदे निवचने च। एते त्रयः कृञि गतिसंज्ञा वा स्युरन
त्याधाने। मध्येकृत्य। मध्येकृत्वा। पदेकृत्य। पदेकृत्वा। एदंतत्वे निपातौ। निवचनं वचनाभावः। (अस्या विशेषेणास्दंतता निपात्यते न तु

गम॰ १०२

संज्ञासंन्नियोगेन। व्याख्यानात्। निवचनेकृत्य। निवचनेकृत्वा वाचं नियम्येत्यर्थः॥ अनत्याधाने किं। हस्तिनः पदे कृत्वा शिरः शेते॥ नि
त्यं हस्ते पाणावुपयमने। एतौ निपातौ कृञि नित्यं गतिसंज्ञौ स्तः उपयमने। दारकर्मणीत्येके। स्वीकारमात्रे इत्यन्ये। हस्तेकृत्य पाणौकृत्य
कन्यां महास्त्रीणां वा। उपयमने किं। हस्ते कृत्वा सुवर्णं गतो मत्यः। प्राध्वं बंधने। प्राध्वमिति चादिषु पाठान्मांतमव्ययमानुकूल्ये वर्त्तते। तत्कृ
ञि नित्यं गतिसंज्ञं स्याद् बंधनहेतुकं चेदानुकूल्यं। प्राध्वंकृत्य। बंधने किं। प्राध्वंकृत्वा। प्रार्थनेनानुकूलं कृत्वेत्यर्थः॥ जीविकोपनिषदावौ
पम्ये। कृञि नित्यं गतिसंज्ञौ स्तः॥ जीव्यतेनेनेति जीविका जीवनोपायः। जीविकामिव कृत्वा जीविकाकृत्य। उपनिषदमिव कृत्वा उपनिषत्कृ
त्य। गतिसमासस्य नित्यत्वेपि स्वार्थमात्रनिष्ठत्वादगतिना विग्रहो तत एव तत्र इवशब्दप्रयोगः॥ औपम्ये किं। जीविकां कृत्वा॥ ते प्राग्धातोः॥ ते ग
तिसंज्ञा धातोः प्रागेव प्रयोज्याः॥ छंदसि परेपि। व्यवहिताश्च। स्पष्टं। हरिभ्यां याह्योकआ। आमंद्रैरिंद्र हरिभिर्याहि। इह संज्ञानियमपक्षोपि
भाष्येस्थितः। तेइत्यनेन प्राग्रीश्वरान्निपातपर्यंतानां स्वरूपेण परामृश्य धातोः प्राक्प्रयुक्तानामेषां पूर्वसूत्रैकवाक्यतया संज्ञाविधाना
त्। अस्मिंश्च पक्षे छंदसि परेपि व्यवहिताश्चेति सूत्रद्वयं अनिति पर ग्रहणं चानकर्त्तव्यमिति स्थितं। हुकटं करणीति भाष्यं च सं
गच्छते। प्रयोगनियमपक्षे तु कृत्वल्युट् इति बहुलग्रहणेन समर्थनीयं स्यात्। यत्तु खलः स्वित्करणसामर्थ्यादनव्ययस्य प्राक्प्र
योगो निर्णीतेस्तोः परिशेषाद्व्यवधानं सिध्यतीति। तच्चिंत्यं। सामर्थ्याद्व्यवहितेष्वमुमः संभवात्। कटकृह रोगतिपूर्वस्यापि ग्रहणाच्च।

दिना ४

शा·कौ· १०३ ३२२ प

ईषद्दुःस्वागतिसंज्ञकतयाईषदाढ्यंभवद्भ्यत्र खलः खित्त्वस्योपहतत्वात्वात्वेतिक। धातोः किं। प्रकर्तुमिच्छत्यभिचिकीर्षतित्यत्र सनः प्राक्प्रयोगो मा भूत्। कर्मप्रवचनीयाः। रीश्वरात्प्रागिदमधिक्रियते। कर्म क्रियां प्रोक्तवंतः कर्मप्रवचनीयाः। बाहुलकात्कर्तर्यनीयर्। तच्च भूते। तेन संप्रति क्रियां न द्योतयंतीति लभ्यते। आह च। क्रियाया द्योतको नायं संबंधस्य न वाचकः। नापि क्रियापदाक्षेपी संबंधस्य तु भेदकः इति। तथा हि। शाकल्यस्य संहितामनुप्रावर्षदित्यत्रानुना न क्रियाविशेषो द्योत्यते। अनुभूयते सुखमित्यादौ यथा। नापि षष्ठ्यवसंबंध उच्यते द्वितीययैव तस्योक्तत्वात्। नापि प्रादेशं विपरिलिखतीति विना योगे लिखतीत्यत्र विशब्देनार्थान्तरे क्रियेव क्रियान्तरमाक्षिप्यते। कारकविभक्तिप्रसंगात्। किंतु संहितासंबंधि वर्षणमिति द्वितीयावगतः संबंधो लक्षणलक्षणभावरूप एवेत्यवगम्यते। संबंध एवानुना विशेषावस्थाप्यते। क्वचित्तु क्रियागतविशेषद्योतकेपीयं संज्ञा वचनात्प्रवर्तते। सुः पूजायामतिरतिक्रमणे चेति यथा।

अनुर्लक्षणे। लक्षणे द्योत्ये अनुः कर्मप्रवचनीयः स्यात्। लक्षणेत्थंभूतेत्यादिना सिद्धे हेतौ तृतीयां बाधितुमिदं सूत्रं। तथा हि। लक्षणे कर्मप्रवचनीयसंज्ञाया अवकाशः। यो न हेतुः। वृक्षमनु विद्योतते विद्युदिति। हेतुतृतीयाया अवकाशः। धनेन कुलमिति। संहितामनुप्रावर्षदित्यत्र तु भूतसंहितोपलक्षितं वर्षणमित्यर्थाद्धेतुभूते लक्षणे परत्वात्तृतीया स्यात्। पुनः संज्ञाविधानसामर्थ्यात् द्वितीयैव भवति। आह च। हेतुर्हेतुमतोर्योगपरिच्छेदेनुना कृते। आरंभाद्बाध्यते प्राप्ता तृतीया हेतुलक्षणेति। न च तृती

पा३ गम० १०३

हेतु२ सू२ मा१

यार्थे इति सूत्रेण गतार्थता शंक्या। तस्य पुरस्तादपवादन्यायेन सहयुक्तेऽप्रधाने इत्येतावन्मात्रबाधकत्वात्। तृतीयार्थे। अस्मिन्द्योत्ये
अनुरुक्तसंज्ञः स्यात्। नदीमन्ववसिता सेना। नद्या सह संबद्धेत्यर्थः। षिञ् बंधने ऽस्मात्कर्तरि क्तः। हीने। हीने द्योत्ये अनुः प्राग्वत्। अ
नु हरिं सुराः। हरिप्रतियोगिकापकर्षरूपसंबंधवन्त इत्यर्थः॥ उत्कृष्टादेव द्वितीया न त्वपकृष्टात्। शक्तिस्वभावात्। उपोऽधिके च। अधिके
हीने च द्योत्ये उपः प्राक्संज्ञः। उपखार्यां द्रोणः। खारीतोऽधिको द्रोण इति। उभयमस्तीति फलितोऽर्थः। यस्मादधिकमिति सप्तमी। हीने। उ
प हरिं सुराः। अपपरी वर्जने। एतौ वर्जने द्योत्ये प्राग्वत्। अपविष्णोः परिविष्णोः संसारः। पंचम्यपाङ्परिभिरिति पंचमी। परेर्वर्जने इ
ति द्विर्वचनं। तद्धि पंचमीसहितेन कर्मप्रवचनीयेन द्योतितेऽपि वर्जने भवत्येव। उभयोरपि विधानसामर्थ्यात्। वर्जने किं। परिषिंचति। स
र्वत इत्यर्थः॥ अत्रोपसर्गत्वात्षत्वं॥ आङ् मर्यादावचने। आङ् प्राग्वत्। मर्यादाशब्दो यस्मिन्सूत्रे उच्यते तत्रत्यश्चेत्। आङ् मर्यादाभि
विध्योरित्यत्रोपात्तो द्व्यर्थः। आ मुक्तेः संसारः॥ आबालेभ्यो हरिभक्तिः॥ लक्षणेत्थंभूताख्यानभागवीप्सासु प्रति[illegible]पर्यनवः॥
एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञा वा स्युः। लक्षणे। वृक्षं प्रति पर्यनु वा विद्योतते विद्युत्॥ कंचित्प्रकारं प्राप्त इत्थंभूतः। तदा
ख्याने यथा। साधुर्देवदत्तो मातरं प्रति पर्यनु वा। भागे। यदत्र मां प्रति स्यात् परि स्यात् अनु स्यात्। यो यत्र मम भागः स दीयतामित्यर्थः।
स्वस्वामिभावो द्वितीयार्थः। वीप्सा व्याप्तुमिच्छा। साकल्येन प्रतिपिपादयिषेति यावत्। भक्तं भक्तं प्रति पर्यनु वा प्रभुः। सकलभक्ता

इत्सपर्व४

श॰ कौ॰ १०४

३२३

नाभित्यर्थः॥ नन्विहेत्थंभूताख्यानइत्येवमिति कृ इदं तर्हि दुदाहरणं। वृक्षं वृक्षं प्रति सिंचति परि सिंचति अनु सिंचति इह वीप्सा द्विर्वचने नैव द्यो
त्यते। परिशब्दस्तु क्रियायैव सम्बध्यते। न चैवं तस्य कर्मप्रवचनीयत्वं न स्यादिति वाच्यं। वीप्सायां विषयत्वानपायात्। अत एव वीप्सायां वि
षयभूतायामिति वृत्तिग्रंथमवतारयन् हरदत्त आह। एते च लक्षणादयो यथा विभक्तिसमीपाद्योत्या अर्थाः नैवं प्रत्यादीनामर्थाः॥
किं तर्हि संज्ञायां प्रत्यादीनां विषयत्वेन निर्दिष्टा इत्याहेति। द्वितीया तु कर्मत्वात्। कर्मप्रवचनीयसंज्ञा तूपसर्गत्वनिवृत्त्यर्था। तेनोपसर्गात्सुनो
तीषत्वं न। परिशब्दयोगे पंचमी तु न भवति। पंचम्यपाङ्परिभिः इत्यत्र वर्जनार्थेनायेत नेन साहचर्यात्। अभिरभागे। भागवर्जे लक्षणादावभि
रुक्तसंज्ञः स्यात्। वृक्षमभि विद्योतते। साधुर्मातरमभि। वृक्षमभिषिंचति। अभागे किं। यदत्र ममाभिष्यात्तद्दीयतां। प्रतिः प्रतिनिधि
प्रतिदानयोः। उक्तसंज्ञः स्यात्। अभिमन्युरर्जुनात्प्रति। तस्य प्रतिनिधिरित्यर्थः। तिलेभ्यः प्रतिपच्छति माषान्। प्रतिनिधिप्रतिदाने च यस्मा
दिति पंचमी। अधिपरी अनर्थकौ। उक्तसंज्ञौ स्तः। कुतोऽध्यागच्छति। कुतः पर्यागच्छति। इहाधिकार्या विरहादनर्थकत्वमधिपर्योः। धात्वर्थमा
त्रानुवर्तित्वात् प्राप्ता गतिसंज्ञा। तद्बाधः संज्ञाफलं। तेन गतिर्गतिरिति निघातो न भवति। सुः पूजायां। सुसिक्तं। सुस्तुतं। अनुपसर्गत्वान्न षः
पूजायां किं॥ सुषिक्तं किं तवात्र। क्षेपोयं। न पूजा। कथं तर्हि सुष्टुतिरिति। अति [illegible] शायमाश्रित्य विवक्षितेन न तु पूजेत्याहुः। पठंति
च प्रशंसानुमते पूजा प्रशंसकस्तु सुविषु सुरीति। अतिरतिक्रमणे च। अतिक्रमणे पूजायां चातिः कर्मप्रवचनीयसंज्ञः स्यात्। अतिक्र

रामः १०४

संभावनायां लिङ्

ना१

मरणांउचितादाधिक्यस्यानुष्ठानं। अतिसिक्तं। अतिस्तुतं। बहुतरं समीचीनं वा सिक्तं स्तुतं चेत्यर्थः॥ अपिः पदार्थसंभावनान्ववसर्गगर्हास
मुच्चयेषु एषु द्योत्येष्वपिरुक्तसंज्ञः॥ सर्पिषोपि स्यात्। प्रार्थनायां लिङ्। तस्या एव विषयभूते भवने कर्तृदौर्लभ्यप्रयुक्ते दौर्लभ्यं द्योतयन्न
पिशब्दः स्यादित्यनेन संबध्यते। अनुपसर्गत्वान्न षः॥ सर्पिष इति षष्ठी। तत्र अपिशब्दबलेन गम्यमानस्य बिंदोरवयवावयविभावसंबंधे॥
५३ इयमेव ह्यपिशब्दस्य पदार्थद्योतकता नाम। कर्मप्रवचनीययुक्ते द्वितीया तु नेह प्रवर्त्तते। सर्पिषो बिंदुना योगो न त्वपिनेत्युक्तत्वात्।
नं संभावनं नाम शक्त्युत्कर्षमाविष्कर्तुमत्युक्तिः॥ अपि सिंचेन्मूलसहस्रं। अपि स्तुयाद्विष्णुं। अन्ववसर्गः कामचारानुज्ञा। अपि सिंच। अ
पि स्तुहि। गर्हायां॥ धिग्देवदत्तमपि स्तुयाद्वृषलं। समुच्चये। अपि सिंच अपि स्तुहि। सिंच च स्तुहि चेत्यर्थः। यथायथं उपसर्गप्रादुर्भ्या
मिति उपसर्गात्सुनोतीति च प्राप्तं षत्वं कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया बाधितत्वान्न भवति। अधिरीश्वरे॥ स्वस्वामिभावे द्यो
त्ये अधिः कर्मप्रवचनीयः स्यात्। इह स्वात्स्वामिनो वा पर्यायेणाकर्मप्रवचनीयविभक्तिर्न तु हीने उपोऽधिके चेत्यत्रेवान्यतरस्मादेव॥
अधिभुवि रामः॥ अधि रामे भूः। एतच्च संज्ञासूत्रं नारंभणीयं। उत्तरार्थत्वे तु योगो न विभजनीय इति यस्मादधिकमित्यत्रैव ह्यामः॥
विभाषा कृञि। अधिः करोतौ प्राक्संज्ञो वा स्यात्। ईश्वर इत्यनुवर्त्तते। प्राप्तविभाषेयं। यदत्र मामधिकरिष्यति। विनियोक्ष्यत इत्यर्थः। इह
विनियोक्तुरीश्वरत्वं गम्यते कर्मत्वात् द्वितीया। इह तिङ्ङि चोदात्तवतीति निघातो न। गतिसंज्ञाया बाधितत्वात्। किंच मामधिकृत्येत्य

शब्दकौ. १०५ ३२४

त्र्यादिसमासेन।कर्मप्रवचनीयानांप्रतिषेधस्तूक्तः॥यद्वात्राधिकृतेतिबोध्यं।लःपरस्मैपदं।लकारस्यादेशाःपरस्मैपदसंज्ञाःस्युः।य
चंतपश्यातङानावात्मनेपदं।तङ्प्रत्याहारोलादेशौशानचौचैतत्संज्ञाःस्युःपूर्वसंज्ञापवादः।अस्ते।आसीनः।चक्राणः।शानच्कानचोरेवेहग्रह
णंलादेशत्वात्।नतुशानन्चानशोः।तेनस्तुत्यजोःशानन्यजेरकर्तृगेपिफलेभवति।दसमानस्तास्तोनेत्यादौपरस्मैपदिभ्योपिचान्श्भवति २२३
॥ ॥तिङस्त्रीणित्रीणिप्रथममध्यमोत्तमाः॥कृतद्वंद्वानामेकशेषोत्पथमेतादृयषट्संज्ञाः।तिङःषट्त्रिकाःक्रमात्प्रथमादिसंज्ञाः
स्युः।शतृक्वसोःशावकाशापिपरस्मैपदसंज्ञाप्रथमादिसंज्ञाभिर्नबाध्यते।सिचिवृद्धिःपरस्मैपदेष्वितिलिंगात्।तथापरस्मै
पदेलब्धावकाशापिप्रथमादिसंज्ञातङ्स्वात्मनेपदसंज्ञयानबाध्यते।कृतद्वंद्वानामेकशेषोतिङ्स्वप्रतिपदविधेरुक्तत्वात्।नचैवमपिपर
स्मैपदात्मनेपदसंज्ञाभ्यांपुरुषसंज्ञायाःपर्यायःस्यादितिवाच्यं।एकस्मिन्नेवेतसस्तामान्यापेक्षज्ञापकत्वात्।इहसूत्रत्रयेपिमहासंज्ञाकर
णंपूर्वाचार्यानुरोधात्।इहत्रीणित्रीणीतिकंपदं।द्वेवेतिहरदत्तः।तन्न।सत्यामथवांतरपदसंज्ञायांमहापदसंज्ञामाश्रित्यसंहितैकपदेनि
त्येतस्यप्रवृत्तेः।अन्यथासमासादावपिपृथक्छेदापत्तेः।द्विरुक्तमध्येपदांतरप्रयोगापत्तेश्च।अतएवतापिडानामित्यादौवेदेऽवग्रहः ता२
क्रियतेयथाचद्विरुक्तेमहापदसंज्ञात्रावांतरपदसंज्ञाचतथानित्यवीप्सयोरित्यत्रवक्ष्यामः॥ ॥तान्येकवचनद्विवचनबहुवचनान्य एम्नः
न्येकशः।तानिलब्धपुरुषसंज्ञानित्रीणित्रीण्येकशःक्रमेणएकवचनसंज्ञानिस्युः।तानीत्युक्तिःसमावेशार्थी।अमध्यापुरुषवचनसंज्ञयोः १०५

दि।

[illegible] पर्यायः स्यात् ततश्चायुष्मदस्मदोत्यादिकार्यप्रवृत्तेनप्रवर्तेत । एकशइति प्रथमा तादृशी स्वौजस् । सुपः । सुपस्त्रीणि त्रीणि क्रमादे
कश उक्ता संज्ञानिस्युः । इहान्वर्थतामाश्रित्य द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमिति शक्यं वक्तुं । एकवचनस्यौत्सर्गिकत्वेपि
उपसर्जनकर्मप्रवचनीयादिसंज्ञावद्यथासंभवमन्वर्थतायाः स्ववचत्वात् । विभक्तिश्च । सुप्तिङौ विभक्तिसंज्ञौ स्तः । चकारः पुरुषवचन
संज्ञाभ्यां समावेशार्थः । तिङो विभक्तिसंज्ञायाः प्रयोजनंन विभक्तौ तुस्माइति । सुपां तु त्यदाद्यत्वादिकमपि । युष्मद्युपपदे समानाधिकर
णे स्थानिन्यपि मध्यमः । लकारेण समानाधिकरणे युष्मदि प्रयु[illegible]क्ते प्रयुक्तेपि मध्यमः स्यात् । त्वं पचसि हे दृश्यसे च । समानाधिकर
णे किं । त्वां पश्यति । त्वया दृश्यते । इह युष्मदि मध्यमोस्मद्युत्तम इत्येवास्तु । युष्मद्यस्मदि च यो लकार इत्यर्थे सर्वसामंजस्यात् । त
था तु न कृतमित्येव । अत्वं त्वं भवति त्वद्भवती तत्र तु न मध्यमः ॥ विकृतेरकर्तृत्वात् । प्रकृतिरेव हि विकाररूपापन्ना कर्त्री । तथा च मंत्रः
यदग्ने स्यामहं त्वं त्वं वा घा स्या अहमिति । अहं त्वं स्यां त्वं वा अहं स्या इति प्रकृत्याश्रय एवेह पुरुषः । स्यादेतत् भवान्करोतीत्यत्रापि स्था
निन्यपीति मध्यमः स्यात् । अत्राहुः । अलिंगः [illegible] सि संबोधनैकविषयश्च युष्मदर्थः
सलिंगः संबोध्यासंबोध्यसाधारणश्च भवदर्थ इति । न च युष्मदर्थः संबोधनैकविषयत्वेन ततः संबोधन एव प्रथमा स्यात् ॥ ततश्चामे
त्रिता । घुदात्तत्वं परात्परत्वे निघातश्च स्यादिति वाच्यं ॥ संबोधनस्य प्रातिपदिकार्थ एवांतर्भावात् । संबोधने चेति सूत्रे हि संबोधनाधिक्या

ध्या २

श्री कौ
१०६
३२५

र्यमितिहि वर्त्स्यतोयत्नुके विदिष्टा। पत्निं कुर्वाणाः पठंति। संबोधनार्थे सर्वत्र मध्यमे केश्चिदिष्यते तथा संबोधने सर्वं प्रथमां युष्मदो विदुः
युष्मदर्थस्य सिद्धत्वान्नियताचाद्युदात्तता। युष्मदः प्रथमांतस्य परस्त्वेन पदादसाविति तन्न। उक्तन्यायविरोधात् लक्ष्यविरोधाच्च।।
दृश्यते हि पादादावयंतोदात्तत्वं पदात् परत्वे च निघातश्च तद्यथा। युवं हगर्भं जगतीषु धत्थः। युवं पातस्वस्तिभिः। हयेदेवा युयमिदा
पयः स्थेति। प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च। मन धातुरूपपदं यस्य धातोस्तस्मिन्प्रकृतिभूते सति मध्यमः स्यात् परिहासे ग
म्यमाने मन्यतेस्तूत्तमः स्यात् स चैकार्थस्य वाचकः स्यात्। द्वयोर्बहुषु च मंतृषु एकवचनमेव स्यादिति फलितोर्थः। एकवच्चेत्यन्वाचयेच
कारः। तेनैकवद्भावाभावेपि प्रधानशिष्टौ मध्यमोत्तमौ स्त एव। सतर्थादनेपरिहासशीलः शालकादिः प्रतारयन्प्रयुङ्क्ते। एहि मन्ये ओ
दनं भोक्ष्यसे भुक्तः सोतिथिभिः। एतं एत वा मन्ये ओदनं भोक्ष्येथे भोक्ष्यध्वे।। ओदनं भोक्ष्ये भोक्ष्यावहे इत्यादि मन्यसे मन्येथे इत्यादिरर्थः।
युष्मद्युपपदे इत्याद्यनुवर्तते नेह न। एतु भवान्मन्यते ओदनं भोक्ष्ये इति। रूपनानिर्देशान्नेह। एहि मनुष्ये रथेन यास्यामीति। प्रहासे किं।।
यथार्थकथने माभूत्। एहि मन्यसे ओदनं भोक्ष्य इति भुक्तः सोतिथिभिः। अस्मद्युत्तमः।। लकारसमानाधिकरणे स्मदि स्थिते स्थानि
न्यप्युत्तमः स्यात्। अहं पश्यामि दृश्ये वा। युष्मदस्मद्भ्यां सामानाधिकरण्ये तु परत्वादुत्तम एव। अहं च त्वं च वृत्रहन्त्संयुज्याव सनिभ्य आ शे
षु प्रथमः। मध्यमोत्तमविषयादन्यत्र प्रथमपुरुषः स्यात् पचति पचतः पचंति।। परः सन्निकर्षः संहिता।। अतिशयितः सन्निधिर्वर्णानायः

तृः ३

राम:
१०६

नन्वविदमयुक्तम् हेत्वोः सद्भावाऽव्यापकत्वस्यैवेति चेन्न ॥ हेतुनिरूपितास्याप्यस्य अव्यापकत्वं स्यात् ॥ अथवा पक्षतावच्छेदकाव्यापकत्वं स्यात् अथवा [illegible] हेतोः [illegible]
निरूपितमव्यापकत्वं स्यादिति भावः ॥ अव्यापकत्वोपनिरितिश्च [illegible] ॥

शा·कौ·
१०७
२२६

संसंहितासंज्ञः स्यात्। प्रदेशाः संहितायामित्यादयः। विरामोवसानं। वर्णानामभावोवसानसंज्ञः स्यात्। [illegible] संज्ञाप्रदेशाववसाने इत्यादयः।
अभावस्यापि बुद्धिकृतयोर्विपर्ययमस्त्येव। यश्चोच्चरितप्रध्वंसिनां नित्यविभक्तानां वा वर्णानां त्यद्वा। विरम्यते अनेनेति करणे घञ्। वरमवर्णाश्च संज्ञी।
अव[illegible]स्मिन्सूत्रे खरवसानयोरित्येकापि सप्तमी विषयभेदाद्भिद्यते। खरि परे रेफस्य विसर्गः। अवसाने च रेफस्यानिनी ति।
अत्र वार्त्तिकं। संहितावसानयोर्लोकविदितत्वात्सिद्धमिति। तथा च सूत्रद्वयं मास्त्विति तत्त्वार्थः।। ।।इति श्रीपदवाक्यप्रमाणपारावारपारीणस
लक्ष्मीधरसूरेः सूनुना भट्टोजिभट्टेन कृते शब्दकौस्तुभे प्रथमस्याध्यायस्य चतुर्थे पादे चतुर्थमाह्निकं।। ।।पादश्च समाप्तः।। ।।शुभमस्तु

राम·
१०७

213

पुाक्षिरिसादिसिध्यचेत्तथापिनसर्वा

॥मु॰को॰४

॥१॥

॥श्री॥ न धातुलोप आर्द्धधातुके॥ धात्वेकदेशलोपनिमित्ते आर्द्धधातुके परे तन्निमित्तके गुणवृद्धी न स्तः। लोलुवः। पोपुवः। मरी इको
मृजः। लोलूयादिभ्यो यङन्तेभ्यः पचाद्यच्त्रिवृत्ते यङोऽचि चेति यङ्लुकि कृते लुङ्निमित्तभूतमचमेवाश्रित्य प्राप्ते गुणवृद्धी
निषिध्येते। यद्यपि कृत्स्नस्य धातोरपि क्वचिल्लोपोऽस्ति। तद्यथा। दुरीणो लोपश्च। दुःशब्दे उपपदे इणो धातो रक्प्र
त्ययो भवति। धातोश्च लोपः। दुःखेन ईयते प्राप्यते इति दूरम्। तथाप्येवंविधे विषये गुणवृद्ध्योः प्राप्तिविरहात्
निषेधवैयर्थ्यम्। अतोऽत्र धातुशब्देन तदेकदेशो लक्ष्यते। धातुलोप इति यदि षष्ठीतत्पुरुषः स्यात्तदार्द्धधातुकग्रह
णं लोपविशेषणं वा गुणवृद्ध्योर्विशेषणं वा। तत्रावृत्त्यादिभिरुभयविशेषणं वेति त्रयः कल्पाः। तत्राद्यपक्षे आर्द्ध
कनिमित्ते धातु धातुके लोपे सति यत्किंचिन्निमित्ते इको गुणवृद्धी न भवत इति सूत्रार्थः स्यात्। ततश्च प्रपूर्वाद्दिधेः क्तप्रत्यये तन्निमि
त्तके नलोपे सति उपेद्धः प्रेद्ध इत्यत्र प्राप्नुवन् गुणोऽपि निषिध्येत। यो हि षष्ठीनिर्दिष्टयोः स्थाने भवति लभतेऽसा
वन्यतरव्यपदेशम्। इति इकः स्थानिकत्वस्यापि सत्त्वात्। न चैवमपि इग्लक्षणत्वविरहात् न निषेधः लेगवायने ओ रम
गुणस्यैवेति वाच्यम्। न हि अस्मिन् सूत्रे इक इत्यस्य स्वरूपपरतायां प्रमाणमस्ति। उत्तरसूत्रे तु चकार इति शब्दार्थकः प्र

माणमित्याहुः।अस्तुवार्थाधिकाराश्रयणबलेनेहापि एकइतिस्वरूपपरं।तथापि भिद्यतइत्यादौगुणोनस्यादिति तृतीयपक्षेवक्ष्यमाणो।
दोषआद्यपक्षेप्यस्त्येवेतिबोध्यम्।ननूपेद्धः प्रेद्धइत्युदाहरणस्येहोक्तिसंभवएवनास्ति।तथाहिपूर्वंधातुःसाधनेनयुज्यतेइतिमतेइद्धमित्य
स्यनलोपेंतरंगः।प्रथमोपनतप्रत्ययापेक्षत्वात्।पूर्वंधातुरुपसर्गेणेतिदर्शनेतुगुणोन्तरंगः।उभयथापिगुणोभविष्यति।ब
हिरंगस्यगुणस्यनिषेधायोगात्।बहिरंगस्यनिषेधस्यासिद्धौगुणप्रवृत्तेर्निर्बाधत्वात्।असिद्धंबहिरंगमितिपरिभाषानेहप्रवर्त्ततेनाजानंत
र्यैबहिष्टुप्रकॢप्तिरितिनिषेधात्।यत्रांतरंगेबहिरंगेवाअचोरानंतर्यमाश्रीयतेतत्रैषापरिभाषानेतिव्याख्यानादितिहरदत्तानुयायिनः।
किंत्वस्मिन्पक्षेएतेएइतीर्यचावेदंपचामेदइत्यादावेतेएत्वंकुतोनेत्याशंक्यबहिरंगत्वेनासिद्धत्वान्नेतिहरदत्तेनवक्ष्यमाणंविरुध्ये
त।तथाबहिरंगस्यासिद्धत्वाबलेनप्रेद्धमित्यादिसिद्धमितिप्रतिपादनपरमिदंभाष्यमपिविरुध्येत।तस्मादत्रोत्तरकालप्रवृत्ति
केअचआनंतर्येतत्रबहिरंगपरिभाषानस्यादितिकैयटसंमतएवनाजानंतर्यइत्यस्यार्थःसाधुः।पचावेदमित्यादौहिपूर्वंगुणप्रवृ
त्तिः।तत्रचाजानंतर्याश्रयणेपिगुणोत्तरप्रवृत्तिकेएतेएइत्यत्रतदनाश्रयणाद्युक्तएवबहिरंगत्वयोद्धारः।उपेद्धःप्रेद्धइत्यादौतुगु
णःप्राप्यनिषेधःकार्यइत्युत्तरकालप्रवृत्तिकोनिषेधः।तत्राजानंतर्याश्रयणाभावाद्बहिरंगपरिभाषयासिद्धमेवेतत्।अतोऽ
त्रभाष्यमपिसंगच्छते।ननुषत्वतुकोरसिद्धइतिसूत्रेएषापरिभाषाज्ञापयिष्यतेतत्रचकोसिचत्कोस्येत्यादौप्रथमप्र
वृत्तिकेएङःपदांतादिस्यस्मिन्नजानंतर्येनत्तूत्तरकालप्रवृत्तिकेषत्वेपीतिकथंकैयटमतंसमर्थनीयम्।तस्मादत्रांतरंगेबहिरंगे
वाअचोरानंतर्यमितिहरदत्तोक्तरीतिरेवशरणीकर्त्तव्येतिचिन्त्या।कैयटमतेअचोरितिद्वित्वस्याविवक्षायांसर्वसामंजस्यात्।अ

इये
चासत्वे।
गुणस्या
सत्रे
ग

॥शु॰ कौ॰ ७॥
॥२॥

स्सिद्धितत्र प्रवृत्तिकेषत्वे चास्थानंतर्योऽभ्यर्णादणः परस्य सस्ये सुकेः । एवं च प्रथमपक्षे प्रेद्धइत्यादौ दोषाभावेपि भेद्यते इत्याद्यसिद्धिरेव दूषणमिति दिक् ।
द्वितीयपक्षे तु यस्मिंश्चिन्निमित्ते धातुलोपे सति आर्द्धधातुके निमित्ते इको गुणवृद्धी न स्त इति सूत्रार्थः स्यात् तत्र चक्रीयितृ इत्यस्माण्णिचि पुक्क्रिय
लोपे सति पुगं तल्लक्षणो गुणो निषिध्येत तथा चक्नोपयतीति न सिध्येत् । यदि तु चेलेक्नोपं इति निर्देशाद्गुणस्तर्हि हापि भेद्यते इत्यस्यासिद्धिरेव दो
षः तृतीयपक्षे त्वार्द्धधातुकनिमित्ते धातुलोपे सति आर्द्धधातुकनिमित्ते गुणवृद्धी न स्त इति सूत्रार्थः स्यात् तत्रैतन्नाप्रसाध्याभ्यर्णप्रयुक्तं गौरवं तावत्
स्पष्टमेव । लोपेन सह गुणवृद्ध्योरेकनिमित्तत्वं च न लभ्यते ततश्च भेद्यते इत्यत्र भिदेर्ण्यन्तात्कर्मणि यकि भिद् इय इति स्थिते निष्ठत्वा ण्णिलोपे कृते प्रत्
ययलक्षणेन णिचमाश्रित्य क्रियमाणो गुणोपि निषिध्येत । न च णिलोपात्प्रागेवांतरंगत्वाद्गुणोस्त्विति वाच्यं । विभज्यान्वाख्यानपक्षे तदसंभवात्
रूपं ज्ञनिष्पमाणनिमित्तोप्यपवादउपसंजातनिमित्तमप्युत्सर्गं बाधत इति न्यायाच्च । अन्यथा दध्यतीत्यादावंतरंगत्वात्सोतर इत्तवत्ताद्रूः प्रस
ज्येत । न च श्नो द्वित्वे च कृतेंतादेशस्य स्थानिवद्भावेनाद्भ्यस्तादित्यस्य प्रवृत्तिरस्त्विति वाच्यं । अभ्यासिष्योः स्थानिवद्भावासंभवात् । किंच समर्थानां प्रथ
माद्वेति सूत्रे इतरत्रव्यूहाः पाणिनीयाः वृत्तमपि कृत्स्नं निवर्तयंति इति ज्ञापयितुं समर्थग्रहणमिति वक्ष्यते । द्वे एते परिभाषे समानफले तथा चेहापि पू
र्वे गुणो न क्रियेत कृतोपि वा निवर्तेत नतु मुपइत्यादावित्यादिवत् । तस्मात् द्वान्तो लोपो यस्मिन्निति बहुव्रीहिरेव साधुः । एवं हि लोपस्य गुणवृद्ध्योश्चैक
निमित्तत्वं लभ्यते इति न कश्चित्पूर्वोक्तदोषः स्यादेतत् आरभ्यमाणेप्यस्मिन्सूत्रे लोलुव इत्यादौ गुणो दुर्वारः । तथा हि । इहसूत्रे निषेध्यसमर्पके क्वि
मिस्याकांक्षायां पूर्वत्र निर्णीता इक्पदोपस्थितिरेव संबध्येत । धात्वंशलोपनिमित्ते आर्द्धधातुके इक्पदं नोपतिष्ठते इति । ततश्च बेभिदो मरीमृ
जो भिन्नो मृष्ट इत्यादौ च नन स्याद्गुणवृद्धिप्राप्तिः परमेतत्स्यप्रघट्टकस्य फलं स्यात् । लोलुवादौ तु स्यादेव गुणः । न च परिभाषाप्रवृत्तिरुपिभृत्तयोरर्थतः
प्रधानयोर्गुणवृद्ध्योरेव निषेधोस्त्विति वाच्यं । शास्त्रबोधेशाद्धप्राधान्यस्यैवान्वयनियामकताया उचितत्वात् । न हि राजपुरुषमानयेत्यादावर्थतः प्र

राम

धानभूतोपि एज्ञाज्ञान यनेन्वेति। अपि तु पुरुष एव। प्रकृते च ॥ इत्थं प्राधान्येन वाक्यार्थभूतायाः पदोपस्थितेरेवा कारकविशिष्टक्रियाया वाक्यार्थ इति सिद्धांतात्। आ
हत्वा। साकांक्षावयवं भेदपरा नाकांक्षम्। इत्युक्तं। कर्मप्रधाने गुणत्वे एकार्थं वाक्यमुच्यते। इति। किंच सिद्धांते प्रसज्यप्रतिषेधे सर्वत्र क्रिययैव सह नञोन्वयः। ननु नामार्थ
नात्तदुक्तं। प्रसज्यप्रतिषेधोयं क्रियया सह यत्र नञिति। अत एव पुरुषवचनयोरसंकरः। अन्यथा हि घटो नास्ति त्वं नासि अहं नास्मीति पुरुषव्यवस्था न स्यात्। घटा
भावस्त्वद्भावो मद्भावश्चास्तीतिवत्सर्वत्र प्रथमपुरुषापत्तेः। न हि परमते त्वं नासि त्वद्भावोस्तीति अनयोरर्थे कश्चिद्विशेषोस्ति। नञर्थप्रतियोगित्व पदोप
स्थापितस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन संसर्गेण प्रकारत्वाभ्युपगमेपि युष्मत्सामानाधिकरण्यस्याविशिष्टत्वात्। एवं वाय्वोरूपाणामभा
वोस्तीतिवद्रूपाणि न संतीत्यपि कृयवचने स्यादित्यन्यत्र विस्तरः। एवं कारकविभक्तेरपि क्रियायोग एव साधुत्वं। न त्वन्यथापीति कारक इति सूत्रे वक्ष्यमाणत्वा
त्। भूतले घटो नास्तीत्यादौ अधिकरणत्वे क्रियान्वय्येव न तु नञर्थान्वयि ■। ननु तथा च सकलकारकविशिष्टक्रियायां नञर्थान्वयः। नञो द्योतकत्वमिति नि
षेधपक्षे तु क्रियापदस्यैव तद्विरहपरत्वमिति सिद्धांतः। उभयथापीह गुणवृध्योः प्रतिषेधो दुर्लभ एवेति। अत्राहुः। क्रिययैव सह विधेरिव निषेधस्याप्यन्वयः। आ
ह इति स्वरूपमेव। किंतु क्रियैवेति संक्षेपः। यदुक्तं हर्या। संनिहितापीक्ष्य पदोपस्थिति विरहेन संबध्यते। तथा हि सति दीधीवेवीटां इति सूत्रस्य वैयर्थ्यापत्तेः। न हि तत्र
क्षपरिभाषा निषेधानिषेध्ययोः फले विशेषोस्ति। एवं स्थिते अस्ति भवतीति परे प्रयुज्यमानोप्यस्तीति प्रातिपदिकार्थ सूत्रे वक्ष्यमाणरीत्या भवत इत्यस्योपस्थित
स्य गुणवृद्धी इत्यादिभिरन्वितस्य निषेधान्वये सति गुणवृध्योरभावः फलितो भवतीत्येतावता गुणवृध्योर्निषेध इत्युच्यते। यथा ह्यग्निहोत्राधिकरणे
प्रतीतेः सर्वोपि विशिष्टविधिरेव तात्पर्यतस्तु कश्चिद्गुणविधिरिति सिद्धांत इति। तद्वन्निषेधेपि बोध्यं। न्यायसाम्यात्। अत एव विधिनिषेधयोर्वाक्या
र्थगोचरत्वेप्यभियुक्ताः। तस्मात् लोलुवः पोपुवो मरीमृजः इत्युदाहरणं सिद्धं। प्रत्युदाहरणं तूच्यते। धातुलोप इति किं। आर्धधातुके विधिनिषेधाभ्यां षोड
शीग्रहणाग्रहणयोरिव गुणवृध्योर्विकल्पो माभूत्। आर्धधातुक इति किं। तुर्वी थुर्वी दुर्वी धुर्वी हिंसायां। मुर्छा मोहसमुच्छ्राययोः। एभ्यो यङ्लुगंते
भ्यस्तिबादौ सार्वधातुके पितो तोर्ति मोमोर्ति इत्यादौ निषेधो माभूत्। यङ्लुप इति चेत्। लोपस्य गुणस्य चैकनिमित्तत्वात्। एवं च यङ्लोप इत्यत्र किंग्रहणान्न तु व

तिपक्षमाश्रित्योक्तं। तदनुवृत्तिपक्षे तु तोत्तो मीत्यास्युत्तमपुरुषैकवचनमुदाहरणं बोध्यं। अनुनासिकादिप्रत्ययत्वेन तत्र राल्लोपप्रवृत्तेः। ननु तोत्तोर्तीत्या उदा
हरणमस्तु। रल्लोपाप्रवृत्तावपि लोपो व्योरिति लोप इति चेन्न। तस्य वर्णमात्रनिमित्तकतया गुणेन संदेहे कृनिमित्तकत्वाभावात्। न हि प्रत्ययग्रहणं तदाक्षेपकं वा
किंचिदस्ति। अत एव गोधेरादिषु प्रत्ययपरतां विनापि यलोप इति दिक्। रुकाविति किं। अभानिरागः। भजेश्च चिणि घञि च भावकरणयोरित्युपधालोपे कृते वृ
द्धिर्यथा स्यात्। कथं तर्हि पापचकः स्यान्न च वृद्धिप्रतिषेध इति चेच्छृणु। पापच्यतेर्ण्वुलि यस्य हल इत्यत्र अहर्यी दमयी दित्यादिवारणाय यस्येति संघातग्रह
णेऽपि आदेः परस्येति हल्मात्रलोपे कृते अतो लोप इति पृथगल्लोपे तस्य स्थानिवद्भावेन पापचकः स्यादेनं वृद्धिः। न त्विह न धातुलोपसूत्रस्य कश्चिदपि व्या
पारः। यङ्लुगन्तात्पूर्ण्वुलि तु पापाचक इति भवत्येव वृद्धेर्न वावेतिवत्। एतेन न धातुलोप इति सूत्रे इक इत्यनुवर्त्य पापाचक इति वदन् न धातु सूत्रे बेभिदिताम
रीमृजितेत्युदाहरन् कौमुदीकारः परास्तः। पृथगल्लोपस्यान्याय्यत्वे भाष्यादिसंमतत्वे च सति वृद्धेरसंभवात्। अत एव वृत्तिकारादयोऽप्यत्र सूत्रे अचू
२ प्रत्ययांतान्येवोदाजह्रुः। मिदिमृज्योस्तु यङि यङ्लुकि तु तर्हि तस्यानिमित्तकत्वाद्गुणवृद्धी स्त एव। बेभिदिता मरीमृजितेति यथा। यदि तु य
स्येति चेत्यवयवलोपस्तर्हि स्थानिवद्भावादेव गुणाद्यप्रसंगः। उभयथापि नेतत्सूत्रोदाहरणत्वमित्यवधेयं। भाष्यकारस्तु यस्येति लोप इव अचि लुक्य
पि पृथगल्लोपमात्रे इत्येतत्सूत्रं प्रत्याचख्यौ। न चैवमेनं नाप्राप्तिन्यायेनाचि लुगन्तो लोपं बाधेतेति वाच्यं। यस्य हल इत्यत्र यस्येति योगविभज्यातो लोप
इति चानुवर्त्य यङ्हल्स्यातो लोपविधानेन लुग्बाधनात्। अवकृष्टव्यञ्जनमात्रे लुकोऽवकाशः। ततश्चाल्लोपस्य स्थानिवत्त्वादेव मरीमृजितापाप
चकः स्यादिवल्लोलुवादयोऽपि सिध्यन्तीति किं सूत्रेण। न चैवं नोनावः स्यादेः पृथगल्लोपापत्तिः। चकारानुकृष्टबहुलग्रहणाज्ज्ञायमानस्यानैमित्तिकस्य लु
कोऽन्तरंगतया लकारे सतेः प्रागेव समुदायप्रवृत्तेः। नन्वेवं लोलुवश्चेक्रियस्तोत्तुव इत्यादावल्लोपस्य स्थानिवत्त्वाद्यथा गुणो न एवमियङुवङावपि न
स्यातामिति चेत्सत्यं। अचमाश्रित्य न भवत एवोक्तयुक्तेः। किंतु स्थानिवद्भावेन लब्धमकारमाश्रित्य भविष्यतः। स हि यकारे लुप्ते प्रत्ययसंज्ञकः। स्या
देतत्। लोलुवादिष्वकारे लुप्ते यङ्लुगिति क्रमः। तत्र यकारस्य स्थानकाले अकारेण प्रत्ययत्वेन लब्धमेवालुप्तेऽपि तस्मिन्नकारे नांस्येवत्ततः प्रागेव लोपात्॥

सोऽयमसन्कथंप्रत्ययतां लभेत। तल्लोपस्य स्थानिवत्त्वेन प्रत्ययत्वमिति चेत् स्थानिनि दृष्टं हि कार्यं तद्वदतिदेश्येत न तु लभ्येत न तु तत्राऽदृष्टमपि। अत्राहुः। तत्र संभावितमा
त्रमतिदिश्यते। यदि हि लोपस्य स्थानिभूतो कारः हलुसेयकारेति प्रत्ययतां लभेत उवङादिकं च प्रवर्त्तयेदिति कथं नाति देशः। वेरिनिषेधश्च हलिगः सहि
यातेर्यङ्न्ताद्वरचि अल्लोप यलोपयोः कृतयोः स्थानिवद्भावेनातो लोपः टेश्चेति आ लोपो माभूदित्येतदर्थं क्रियते स्थानिदृष्टस्यैवातिदेशस्तु किं तेन। नहि
याया यङ्लस्यामवस्थायामातो लोपस्य प्राप्तिः अनजादित्वादिति दिक्। नन्वेवं वेक्रियस्तोष्टुरिति अन्तरङ्गानपीति न्यायेनाकृत एवावृद्धौ वेधातुके
यो रिति दीर्घे यङो लुकात तो लोपस्य स्थानिवत्वे सत्यपि चक्षिभ अतोऽष्टुअअ इति स्थान्यक्षोरणसहलघूपधं मंत्रं प्रत्ययपरं ज्ञानमिति लघूपधगुणः
स्यादेवासत्यां अन्तरङ्गाविय‍ङुवङौ भवतः। यथा हवार्त्तिककारः श्वायुङुत्त स्यान्तरङ्गलक्षणत्वादिति। तथा चरिपिगत्तो धिधारण्येडस्पर्धेपांतत्त्वादित्वाच्छंव
तेरिय। तिर्भवति। अग्लोश्च यत्तः प्रादुद्रुवत्त। प्रास्रुस्रुवत्त। इति चणिश्रीतिचङि इयङुवङौ भवतः। तस्मात् स्थगल्लोपेनैव सकलनिर्वाहे न धातुलोप इति
सल्लेनारम्भणीयो। नचैवं मरीमृजः इत्यत्र मृजेरजादौ संक्रमइति पाक्षिकवृद्धिप्रसंगः। हरदत्तादिमते मुख्याजादावेव तत्प्रवृत्तेः। निष्कर्षस्तु यथोत्तरं मु
नीनां प्रामाण्यादिष्टापत्तेः व्यवस्थितविभाषा वास्तु। अत्र वदन्ति। गुणोपधा लोपयुटां नलोपाल्लोपयोरपि प्रसंगात् स्थगल्लोपो लुकि वक्तुं न त्रास्यते
तथा हि। सर्वत्र रुस्यात्तेषु देर्घीतेषु चेयङुवङौ। कृते याल्लघूपधे गुणः प्राप्नोति। न च हस्थानिवद्भावः। आदिष्टादचः पूर्वत्वात्। किंचाजंगमइत्यत्र ग
महनेत्युपधालोपः स्यात्। अथात्राङितीति प्रतिषेधः तर्हि रीरीदृत्युइत्यत्र ऋदृशोऽङीति गुणः स्यात्। अपिच देद्युइत्यत्र दीङोयुडचीति युट् स्यात्।
किंच सनीस्रसो दनीध्वंसः अनिदितामिति उपधानलोपः स्यात्। अपिच यायायाः यावाः इत्यादिष्वाकारलोपः स्यात्। तस्मात् समुदाय
लुगेवेष्टव्यो लोलुवादिसिद्धये च सूत्रमारंभणीयमिति अत्रोच्यते। लोलुयादिषु गुणस्तावन्न भवति। स्थानिद्वारकस्यानादिष्टादचः पूर्वत्व
स्य सत्त्वेन स्थानिवद्भावात्। अत एव हि नपदान्तसूत्रे सवर्णग्रहणं कृतं। शिण्ढीत्यादावनुस्वारस्य स्थानिद्वारेणादिष्टादचः पूर्वत्वमाश्रित्य तत्

कम

पियतिधिय

न

लक्षणेन

स्यसवर्णकर्त्तव्ये अभसोरल्लोपस्य स्थानिवद्भावो मा भूदिति। नन्वनादिष्टादचः पूर्वत्वस्य शास्त्रीयकार्यत्वाभावात्कथमतिदेश इति चेत्। अनादिष्टादचः पूर्वत्वा
पेक्षणेचः परस्मिन्नित्यतिदेशः कर्त्तव्ये स्थानिवदादेश इत्यस्य प्रवृत्तिसंभवात्। सवर्णग्रहणव्याख्यावसरे सर्वैरित्थमेवोपपादितत्वाच्च। ननु यो आदेश उवङ् सो ना
दिष्टादचः पूर्वत्वं स्थानिद्वारा कथं चेल्लभतां न तु तस्येह किंचित्कार्यं विधीयते। येनाल्लोपः स्थानिवत्स्यात्। यस्य च कार्यं विधीयते उकारस्य नासावादेशो ये
न स्थानिद्वारापि पूर्वतां लभेत। सत्यं। सर्वे सर्वपदादेशा इत्याश्रयणात् स्थान्यादेशभावस्तावदर्थवृत्ति विश्राम्यति। अत एव एरुरित्यस्य स्तेस्तु रित्ति पर्यव
सितार्थमादाय स्थानिवत्सूत्रेणैव सिद्धत्वादेकदेशविकृतस्योपसंख्यानं नारब्धव्यमिति वक्ष्यते। एवं चेहापि लोलूयस्य लोलुव इत्यादेशः सन्नानाभ
स्थानिवद्दिस्तु — तो संबंधिशब्दत्वादेवादेशः इत्यस्य लाभे सिद्धे पुनरादेशग्रहणमानुमानिकस्याप्यादेशस्य परिग्रहार्थमिति वक्ष्यते। +
अत एव स्थानिवद्दिस्तु — तो संबंधिशब्दत्वादेवादेशः इत्यस्य लाभे सिद्धे पुनरादेशग्रहणमानुमानिकस्याप्यादेशस्य परिग्रहार्थमिति वक्ष्यते। किंच ज्ञाजनोर्जेति शङ्के अत इति च सूत्रे दीर्घोच्चार
दिष्टादचः पूर्वः स्थानिवद्भावात्। तस्य च लोलूव इत्यादेशः कर्त्तव्ये अल्लोपः स्थानिवदितियुक्तमेव। किंच ज्ञाजनोर्जेति शङ्के अत इति च सूत्रे दीर्घोच्चार
णेनांगवृत्ते पुनर्वृत्ताववि विधिर्निष्ठितस्येति परिभाषा ज्ञापयिष्यते। तेनावङि कृते गुणो न भविष्यति। दीर्घ इत्यत्र गुणस्तु न भवति प्रश्लिष्टपदोक्तस्याङो
ग्रहणात्। अदर्शनादिति यथा। यङस्तु अकार उपदेशवेलायां न प्रत्ययः किंतु तदवयवः यकारे लुप्ते तु नासौ ङकारविशिष्टो न वाश्रूयते किंतु तेकेकगो
चरत्वात्। क्षणिकत्वं चद्विलक्षोपस्थितिकः। नन्वेवमनङीति पर्युदासेप्यस्याग्रहणाज्जंगम इत्यत्र ल्लोपः स्यादिति चेन्न। अनङीति पर्युदासेनाङ्स
हचरितस्य श्रूयमाणनाङोऽपध्यालोपविधानात्। अथवानेनाङ्गुणविधौ प्रगृह्यत इति तु न सम्यक्। विकरणानामनर्थकत्वात्। यत्तु द्यङ्स्त्रयुङ्स्या
दिति तन्न। अनुबंधनिर्देशात्। भ्रदुक्तं। श्तिपा शपानुबंधेन निर्दिष्टं यद्गणेन च। यत्रैकाज्ग्रहणं चैव पंचैतानि न यङ्लुकि। ति। दीङोयुडचीति सूत्रे दी
ङित्यनुबंधनिर्देशोऽयङ्लुङि इत्यर्थ इति त्वये वोक्तत्वादिति। अत्रलापकः। एकाच उपदेश इति सूत्रेयङ्लुङिनिवृत्तिमुद्दिश्य क्रियमाणमेकाज्ग्रहणं
न हि कृतेपि तस्मिन्नुक्तपरिभाषां विना बेभिदितेत्यादि सिध्यति। बिभित्सतीत्यादि सिद्ध्ये तत्रावश्याश्रयणोपदेशग्रहणस्याभयविशेषणत्वायाः
सिद्धांत यिष्यमाणत्वात्। नन्वेवमपि इति पाशपेत्याशयैषांतरेक कथं ज्ञापकमिति वाच्यं। एकदेशानुमतिः पूर्वाचार्यपरिभाषाज्ञापनस्य गतिकारकोप
द्वर पठित

मपि

पदानामित्यादौ बहुलं दृष्टत्वात्। नन्वेवमेकाच इति विधीयमानं द्वित्वं यङ्लुकि न स्यात् इति वाच्यम्। गुणो यङ्लुकोरिति ज्ञापकेन तत्प्रवृत्तेः। यङ्लुकि बेभिदि
तेत्यादौ इडागमे तु कृते परिभाषेव कारणं। द्विःप्रयोगो द्विर्वचनं षाष्ठमिति वक्ष्यमाणतया धात्ववतरस्य वक्तुमशक्यत्वात्। बेभिदितेति यङः तेतुरथग
ल्लोपाभ्युपगमात्तस्य च स्थानिवद्भावान्नेष्टसिधः। पूर्वस्मादपि विधौ स्थानिवद्भाव इति वक्ष्यमाणत्वात्। किं च यस्येति लोपस्य त्वयाप्यचयवल्लोपत्वेस्वी
कृतत्वात्तत्र यद्यपि देद्यक इत्यत्र युट् स्यादिति नापादनीयं। हलः परत्वाभावेनेह लोपाप्रवृत्त्या देदीयक इति रूपाभ्युपगमात्। सनीस्रंसक इत्यादौ नलोपो
पि सर्वसंमतत्वादेव नापाद्यः। या याचको वावायक इत्यादौ अल्लोपो पि नापाद्यः। यलोपविरहेणाजादि कित्परत्वाभावात्। तथापि गमे
र्यङः ताण्वुलि जंगमक इत्यादौ अल्लोपस्य स्थानिवद्भावाद्द्वित्वाभावापत्त्या लोपः स्यात्। अथात्रान् ङिति प्रतिषेधस्तर्हि दरीद्रशक इत्यत्र गुणः स्यात्। अ
चयदाङ्गपरिभाषया संज्ञापूर्वको विधिरनित्य इति वा समाधीयते। तर्हि यङ्लुक्यपि सनीस्रंस इत्यत्र नलोपो याया वावा इत्यादावल्लोपश्च नकु
र्यः समाधानस्य तुल्यत्वादिति दिक्। क्ङिति चेत्यत्र इक इत्यनुवृत्तेरुच्चार्य विहितौ गुणवृद्धी। गिति किति ङिति च [illegible] निमित्ते तयोर्न्निर्दिश्यमाने ये प्राप्नुतस्ते न स्तः
गित्। जिष्णुः। ग्लाजिस्थश्च ग्स्नुः। न चायं किदेवास्त्विति वाच्यम्। स्थास्नुरित्यत्र घुमास्थेतीत्त्वप्रसंगात्। नन्वेवं भूष्णुरित्यत्रेट्प्रसंगः। श्र्युकः कितीत्य
त्रापि चर्त्वेन गकारप्रश्लेषमाश्रियत निषेधात्। नन्वेवं चर्त्वस्यासिद्धत्वाद्द्विसंज्ञेनीयो न स्यात्। रोरुत्वं चनप्रवर्ततेति वाच्यम्। नमुने इत्यत्र योगविभागा
त्सौत्रत्वाद्वा। तथा च ग्लाजिस्थश्चेति सूत्रे श्लोकवार्तिकं। ग्स्नोर्गित्वान्न स्थ ईकारः। क्ङितो रीत्वशासनात्। गुणाभावस्त्रिषु स्मार्यः श्र्युकोऽनिट्त्वं गको
रिति। रिति। नयादित्याप्येवं। वामनस्तु ग्लाजिस्थश्चेत्यत्र स्था आ इत्याकारं प्रश्लिष्य क्स्नुप्रत्ययांतः स्यातिष्ठतेराकार एव न तु ईत्वमिति व्या
[illegible] ख्यानादेव स्थास्नोः सिद्धो न कापि गकारप्रश्लेषः कार्य इत्याह। न चेत्तमते दंक्ष्णोः दस्युपसंख्यानमिति केसोदंक्ष्णवः पत्नावद्रत्य
नानिर्दिष्तामित्तिनलोपः स्यात्। सत्यां प्छांदसत्वात् समाधेयः। कित्। चित्तः। स्तुतः। मृष्टः। ङित्। चिनुतः। सुनुतः। मृष्टात्। निमित्त सप्तम्याश्र

॥श्रीः कौ॰
॥५॥

यणं किं। व्यवहितेपि यथा स्यात्। छिन्नो भिन्नो ऽर्दुः इति किं। कामयते। गृद्ध्यापाराश्रयणं किं। हेरगवायन इ। ओर्गुणे ... हिर एव प्रवर्तते न तु तुन्नेर्वु
ओरिति निर्दिष्टस्थानिकत्वात्। तदुक्तं। तद्धितकाम्या रिकु प्रकरणादिति। ननु क्ङितीति सप्तमी निर्देशात् तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपति
ष्ठेत। तत्र नि... ग्राह्ये नेरेतये परत्वादिग्लोश्चोच्चारणक्रियत्वाद्व्यवहितेर्वारितं स्य निषेधः स्यात्। ननु छिन्नभिन्नमित्यादिरपीति चेत्। भवेदेवं य
दि क्ङितीति एतन्निषेध्यया क्रियया साक्षात्संबध्येत। इह तु गुणवृद्धिभ्यां संबध्यते। यस्य च भावेनेति सप्तमी। क्रियान्तराश्रयणादौत्सर्गिकस्य
ताक्षेपः। ततश्च क्ङितिसति प्राप्ते ये गुणवृद्धी ते न भवत इति संबन्धे कृते सिद्धसाध्यसमभिव्याहारन्यायेनोपलक्षणीभूतसत्ताश्रयणस्य निमित्तत्वमुत्सर्गतः
फलति। न तु हविर्विशेषनिमित्ततायां सप्तमी विधानमस्ति। न चात्र निर्दिष्टपरिभाषा संभवति। विध्यंगभूतानां परिभाषाणां साक्षाद्विधेयनि
षेध्यक्रियान्वयिन्येव प्रवृत्तेः। इदं तु क्रियान्वयिनो विशेषणं न तु क्रियायाः। अतोत्र परिभाषाप्रवृत्तिः। अन्यथा वृद्धिर्यस्याचामादिरित्यत्र षपरि
भाषोपस्थाने शालीयादिर्न सिध्येत्। न ह्यैकः स्थाने वृद्धिः। अत एवोदीचामातः स्थाने इति स्थानेग्रहणं कृतं। आतः स्थाने इत्यनूद्यमानस्य वि
शेषणे आत इत्यस्मिन् षष्ठी स्थानेयोगेति परिभाषाया अप्रवृत्तेः। गुणानां च परार्थत्वादसंबंधः समत्वादिति न्यायोप्युक्तानुसंधेयः। ननु त
र्हि नैनैव न्यायेन क्ङितीत्यत्र प्रधानभूत... यात्क्रियया संबध्यतां न तु तच्छेषभूताभ्यां गुणवृद्धिभ्यां प्रधानान्वयस्य संभवे स्यागायोगादिति चेन्न
यत्र हि गुणः कृतात्मसंस्कारः प्रधानोपकाराय मलं तत्र भवति तत्रात्मनोपि संस्कारमनुभूय प्रधानेन संबध्यते यथा पानीयमेलादिभिः पुरुषे
ण। तदुक्तं। गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते। प्रधानस्योपकारे हि तथा भूयसि वर्तते। इह गुणवृध्योः क्ङिद्ग्रहणेन विशेषितयोः प्र
धानस्य महानुपकारो भवति। व्यवहितस्यापि निषेधसिद्धेः। क्नोः कित्करणं चात्र लिंगं। अन्यथा प्रधानेनैवान्वये निर्दिष्टपरिभाषाया
श्चोपस्थितौ सत्यां व्यवहितेपि निषेधाप्रवृत्तौ व्यर्थमेव क्नोः कित्वं स्यात्। तस्माद्यथाव्याख्यानमेव साधु। ननु यशोन परसप्तमीति हि उक्त्वा

स्य

हा

योश्ल

स्यूतं

अंतरंगत्वादियङुवङोः प्रवृत्तेः। धिधारणे रिपिगतौ पिपिगतौ तुदादयः। धियति रियति पियति र्णों
ङंते [illegible] दोषः। लघूपधलक्षणगुणप्राप्तेरितिचेन्न। [illegible] तस्यांतरंगलक्षणत्वादिति।
श्रियतः। अदुद्रुवत्। असुस्रुवत्। इह तु णिचमाश्रित्य प्राप्तो गुणो बहिरंगः [illegible] भाष्ये। अस्यार्थः। संक्रामतोपक्रामतो
मृजेरजादौ संक्रमे वृद्धिर्वक्ष्यते इति काशिकायां। इदं चैको गुणवृद्धी इति सूत्रे प्रसंगाद्वैयाकरणांतरमतत्वेनोक्तं [illegible] योगरूढेः। तेन मरीमृजः तत्र धात्वंशलोपनि
गुणवृद्धी अस्मादिति सुसत्ता गुणवृद्धिप्रतिषेधनिमित्तभूत [illegible] त्रसंक्रमग्रहणेनोच्यते योगरूढेः। तेन मरीमृजः तत्र भाष्ये उक्तं मृजेति। मार्जे
गुणवृद्धी अस्मादिति सुसत्ता गुणवृद्धिप्रतिषेधनिमित्तभूत [illegible] प्रवर्त्तत एव लघवधेयं। अत एव क्ङिति चेति वचनं तत्र भाष्ये उक्तं मृजेति। मार्जे
ततश्च वृद्धिप्रतिषेधहेताव [illegible] पि अन्यस्य येनासो विकल्पः प्रवर्त्तत एव लघवधेयं। अत एव क्ङित्यचि चेति वचनं तत्र भाष्ये उक्तं मृजेति। मार्जे
तति। अत्र हरदत्तः। अचिरत्युच्यमाने पियस्मिन्विधिस्तदादावल्ग्रहणे इति सिद्धं आदिग्रहणं मुख्याजादिग्रहार्थं तेन व्यपदेशिवद्भावेना
ति। अत्र हरदत्तः। अचिरत्युच्यमाने पियस्मिन्विधिस्तदादावल्ग्रहणे इति सिद्धे आदिग्रहणं मुख्याजादिग्रहार्थं तेन त्वया दुक्कार्थाल
जादेः यूयं मृमजन्त्वया ममृजे इत्यादौ न भवति। तच्चिंत्यं। मुख्याजादिग्रहे प्रमाणाभावात्। न हि भाष्ये आदिग्रहणं कृतं येन त्वया दुक्कार्थाल
भ्येत। किं तु क्ङिति चेति वचनं पठितं। यत्तु ततः प्राग्उक्तं भाष्ये। इहान्ये वैयाकरणाः मृजेरजादौ संक्रमे विभाषावृद्धिमारभंते इति। तत्तु तदादिपरिभाषा
ज्ञापयतु। अत एवात्रेयाः मृजेति भिदादिपाठाद्दुगणपाठा
बलल्लब्धवाक्यार्थानुवादमात्रं। न तु परकीयविधिवाक्यं तु शेरमिदं येन त्वदुक्तार्थं ज्ञापयेत्। अत एवात्रेयाः मृजेति भिदादिपाठाद् गणपाठा
भ्येत। किं तु क्ङिति चेति वचनं पठितं। यत्तु ततः प्राग्उक्तं भाष्ये। दुर्घटवृत्तौ तु तदपरिमृजः इत्युभयं दर्शितं। दुर्घटवृत्तौ तु तदपरिमृजः त्वत्र व्यवस्थित विभा
देवृद्ध्यभावमाहुः। अत एव रक्षितेनापि धातुप्रदीपे तु दपरिमार्जः तुदपरिमृजः इत्युभयं दर्शितं। दुर्घटवृत्तौ तु तदपरिमृजः त्वत्र व्यवस्थितविभा
वललब्धवाक्यार्थानुवादमात्रं। न तु परकीयविधिवाक्यं तु शेरमिदं येन त्वदुक्तार्थं ज्ञापयेत्। ह्लादिर्नो पि मन्ते तिवृद्धिविकल्पादुर्वारः। तथा
देवृद्ध्यभावमाहुः। अत एव रक्षितेनापि धातुप्रदीपे तु दपरिमार्जः तुदपरिमृजः इत्युभयं दर्शितं। यत्तु मुख्याजादिग्रहणवादिनो पि मन्ते तिवृद्धिविकल्पो दुर्वारः। तथा
देववृद्ध्यभावमाहुः। अत एव रक्षितेनापि धातुवृत्तिषु यूयं ममृज ममार्जेति रूपद्वयमुदाहृतं। यत्तु मुख्याजादिग्रहणवादिनो पि मन्ते ति वृद्धिविकल्पो दुर्वारः। तथा
षयाद्वृद्धिर्नेत्युक्तं। अत एव धातुवृत्तिषु यूयं ममृज ममार्जेति रूपद्वयमुदाहृतं। यत्तु मुख्याजादिग्रहणवादिनो पि मन्ते ति वृद्धिविकल्पो दुर्वारः। नैवं विधिवेयर्थ्यं। णलादि
षयाद्वृद्धिर्नेत्युक्तं। अत एव धातुवृत्तिषु यूयं ममृज ममार्जेति रूपद्वयमुदाहृतं। यत्तु अकारोदेशोऽगलोंत्यस्येत्यंत्यस्य प्राप्नोति। नैवं विधिवैयर्थ्यं। णलादि
हि। मध्यमपुरुषबहुवचनस्य परस्मैपदानामिति सूत्रेण विधीयमानोऽकारोदेशः। अलोंत्यस्येत्यंत्यस्य प्राप्नोति। अकारद्वयात्मको यमनेकाल्त्वात्सर्वादेशः। यद्वा धातोरि
हि। मध्यमपुरुषबहुवचनस्य परस्मैपदानामिति सूत्रेण विधीयमानोऽकारोदेशोऽलोंत्यस्येत्यंत्यस्य प्राप्नोति। अकारद्वयात्मको यमनेकाल्त्वात्सर्वादेशः। यद्वा धातोरि
त्यधिकारादंदः परस्येति थकारमात्रस्याकारः। तत्र पक्षद्वयेपि अतो गुणे इति पररूपं स्यात्। परस्मिन्निति तिस्था निवद्भावान्मुख्याजा
नां यथासंख्यसंपादनेन चरितार्थत्वादित्याशंक्य भाष्ये एवं द्वेधा समाधास्यति। अकारद्वयात्मको यमनेकाल्त्वात्सर्वादेशः। यद्वा धातोरि
त्यधिकारादंदः परस्येति थकारमात्रस्याकारः। तत्र पक्षद्वयेपि अतो गुणे इति पररूपं स्यात्। अचः परस्मिन्निति स्थानिवद्भावान्मुख्याजा

॥श्री०कौ०
॥६॥

मिश्र

दित्वमस्त्विति केचिद्वदन्ति तन्मते दूषणमुक्तं तन्न। आद्यन्तवदित्यतिदेशादस्य स्थानिवद्भावे पि मुख्यत्वाभावस्य सुवचत्वादित्ति दिक्। स्यादेतत्। अचिनो
दर्मा इत्यादेः स्थानिवद्भावेन तिपो ङित्वात् क्ङिति चेति गुणवृद्धिनिषेधः स्यात्। न चाल्विधित्वात् स्थानिवद्भावासंभवः। अनुबन्धकार्येषु अनल्विधा
विति निषेधाप्रवृत्तेः। अन्यथा चिनवम ममार्जमित्यादावपि ङित्वेन सार्वधातुकमपिदिति निषेधाप्रवृत्तेः। इह च ज्ञापकं नल्पपीति सूत्रं। अन्यथा त्वपः कित्वा
भावादेव ङित्वाप्रवृत्तौ किं तन्निषेधार्थेन सूत्रेण। यत्तु सेद्योपि चेत्यपिद्वचनं ज्ञापकमिति। तन्न। श्नुणो हि विधितः प्रतीत्यादेः स्थानेन्तरतमपरिभाषयापि
त्वादनुदात्तस्य पितः स्थानेनुदात्तस्यैवेहः प्राप्तो उदात्तसंपादनेन चरितार्थत्वात्। अपित्वसामर्थ्याद्धि तन्नान्तरतमपरिभाषा बाध्यते। प्रतिपत्तिलाघ
वार्थमुदात्त इति वक्तव्ये अपिद्वचनं ज्ञापकमिति वास्तु। न्यायसिद्धोयमर्थः। अनुबन्धानामनेकान्तत्वेन स्थानिकोटावप्रविष्टत्वा स्थान्यलाश्रय [illegible]
निषेधविधिविषयकस्यानल्विधावि स्याप्रवृत्तेः। अनुबन्धा[illegible]कान्ता[illegible] इति मतेपि स्थानिवत्प्रतीतिः प्रागेवान्तरङ्गेणालोपेन तेषामपहारात्। तस्मा
लुङादेशानां तिबादीनां स्थानिवत्त्वेन ङित्वं दुर्वारमिति। अत्राहुः। यासुट्परस्मैपदेषूदात्तो ङिच्चेति सूत्रे ङिद्वचनं ज्ञापकं ल्वादेशानां स्थानिवद्भावेन द्भाव
ङित्वं न भवतीति। तथा च वार्त्तिकं। ल्वकारस्य ङित्वादादेशेषु स्थानिवत्प्रसंग इति चेद्यासुटो ङिद्वचनाल्लिद्धमिति। ननु स्तुयादित्यादावनिग्ल
क्षणवृद्धिप्र तिषेधार्थं चिनुयुरित्यादौ जुसि चेत्यस्य प्रतिषेधार्थं यासुटो ङित्वमस्तु उक्तार्थज्ञापकत्वं तु क्ङिति हलीत्यत्र हि उत इति निर्दिष्टस्थानिकत्तया
इक्परिभाषानोपतिष्ठते। जुसि चेति क्ङिति चेत्यस्यापवादः एवं तथा च स्थानिवत्त्वे ङित्वस्तु याच्चिनुयुरित्यत्र वृद्धिगुणौ निषेद्धुं नार्हः। पुनर्ङित्व द्भाव
सामर्थ्यात्तु तदुभयनिषेधो भविष्यति। तथा च वृद्धिगुणनिषेधे चरितार्थया सुटो ङित्वं कथं ल्वादेशेषु लाश्रयङित्वस्य विरहं ज्ञापयेदिति
चेदुच्यते। उतो दितिवत्क्ष्ये च इग्रहणं संज्ञापूर्वको विधिरनित्य इति यथा स्यादित्येवमर्थं। तेन स्तुयादित्यादौ न वृद्धिः। तथा च चिनुयुरित्य
त्र न गुणः। कसस्याचीत्यतो चीत्यनुवर्त्य अजादौ जुसि गुणविधानात्। मिदेर्गुणो जुसि चेत्यकारप्रश्लिष्याच्चासावुसश्चेति कर्मधारयाश्र
येनाजादावुसि गुणविधानाश्रयणेनतु च कुंडेहुरित्यादावतिप्रसंगः। गुणेति लुप्तविभक्तिकं उन्नुसिइति च च्छेदः। उकारादौ जुसीति चार्थः।

त्तियोगं विभज्य ङिति चा

ज्ञुसिरगुणेयासुट्प्रतिषेध इति वार्त्तिकमपि उक्तरीत्या सिद्धार्थकथनपरमिति तावद्वार्त्तिकहृदयं। भाष्यकारमते तु सार्वधातुकमपिदिति सूत्रेऽपिदि
नुवर्त्य आवृत्तिं चा[...]श्रिसङिच्च पिन्न भवति पिच्च ङिन्न भवतीति वाक्यार्थद्वयं वक्ष्यते। इदं चा हलः श्न इति सूत्रे भाष्ये स्पष्टा। तेन भूतादित्यत्र भूवर्णाना
तङ् ओपदेशिकेन ङित्त्वेनान्तरङ्गेण आतिदेशिकस्य बहिरङ्गस्य पित्त्वस्य बाधात्। अतिदिष्टादुपदिष्टं बलीय इति न्यायात्। अचिनोदित्यादौ लोपादे
शिकेन तिबादीनां पित्त्वेन लाश्रयमातिदेशिकं ङित्त्वं बाध्यते। तेन गुणादिसिद्धिः। अस्मिंश्च पक्षे यासुटो ङित्त्वं न ज्ञापकं किंतु मृज्यादित्यादावप्रासङि
त्वविधायकं। तेन च पित्त्वस्य चिनोतीत्यादौ सावकाशस्य बाधः। अतस्सुयादित्यादौ पिति हलीति विधीयमाना वृद्धिर्न प्रवर्तते चिनुयुरित्यादौ तु
प्राग्वदेव समर्थनीयं। पूर्वोदाहृतवार्त्तिकमते तु भूतादित्यत्र इट् प्राप्नोति आगमशासनमनित्यमिति तु कथंचित्समर्थनीयः। वस्तुतस्तु हलः श्नः
शानज्झौ इति शानचः शित्करणेन क्वचिदनुबन्धकार्येष्वनल्विधाविति निषेधः प्रवर्तते इति ज्ञाप्यते तेन भूतादित्यादौ न कश्चिद्दोष इति अतए
व भाष्यमते भविषीष्टेत्यत्र ङित्त्वेनाक्रियमाणत्वात् गिल्लक्षणः श्चिल्लक्षणश्च ङिन्नेति दिक्। दीधीवेवीटां। दीधीवेव्योरिटश्च गुणवृद्धी न स्तः।।
आदीध्यनं आदीध्यकः। आवेव्यनं आवेव्यकः। अकणिषं अरणिषं कणिता श्वः रणिता श्वः। इह अनमं प्रति सिजन्तमङ्गं तिपादेशं प्रति तु कणिदिति तां
तमङ्गं तस्यामङादेशश्च सार्वधातुकं निमित्तीकृत्य लघूपधगुणः प्राप्तो नेन निषिध्यते। वृद्धिस्त्विटो न सम्भवत्येव। लुङ् तत्तां स्फारयितुश्च इ तथस्य
प्रयोगः। न हि तत्र नैतेतत्र जतेवा इटो गुणप्राप्तिः प्रसक्त्यावयवत्वात्स्या। अथ दीङ् क्षये धीङ् अनादरे वेञ् तन्तुसन्ताने वी गत्यादिषु। एतेषामिह ग्र
हणं कृतं नेति चेन्न। अवयवप्रसिद्ध्यपेक्षया समुदायप्रसिद्धेर्बलवत्त्वात्। किंच चतुर्णां ग्रहणमभिप्रेतं चेत् संदेहार्थं दीवेधीवीटामित्येव ब्रूयात्।
इट् चा आगम एव गृह्यते न तु इट गतौ इति धातुः। ननु धातुसाहचर्याद्धातुरेव गृह्यतामिति वा। साहचर्यस्य सर्वत्रानियामकत्वात्। अन्यथा
द्विस्त्रिश्चतुरिति कृत्वोर्थे इति सूत्रे कृत्वोर्थग्रहणं न कुर्यात्। द्विस्त्रिरिति सुजन्ताभ्यां साहचर्येण चतुरित्यस्यापि सुजन्तस्य ग्रहणसम्भवात्।५
अत एवागमापेक्षया प्रकृतेरभ्यर्हितत्वाद्दीधीङः पूर्वनिपातस्सूत्रे कृतः। इटोपि धातुत्वेन प्रवृत्तिसत्त्वाविशेषेपि अल्पाच्तरत्वात्तस्यैव पूर्वनिपातः स्यात्।५

॥श॰कौ॰
॥७॥

वेवी

अत्रेदमवधेयं । दीध्यङ्वेवीङ्क्ययङ्ङित्यदृष्टत्वात् दीधीवेव्योर्णिलुङि रूपं न तु ण्यन्ताभ्यामपि । यत्रिह यीवर्णयोरिति सूत्रे हरदत्तेनोक्तं । वर्णग्रहणं वर्णे विस्ता
र इति धातोः पचाद्यजन्तः श्रूयमाण एव वर्णे यथा स्यात् लुप्ते मा भूदित्येवमर्थः । तेन ण्यन्ताभ्यां लुङि णिलोपस्य पूर्वविधौ स्थानिवत्त्वेऽपि श्रूयमा
णत्वाभावाल्लोपाभाव इति णिवृत्तेर्दीध्यकोवेव्यकोऽङि निश्चुङ्न समानो कारस्रूपभवतीति । तदेतन्नाग्लोपीति सूत्रे भाष्यकारैरेव वर्णितत्वस्य दीध् कुङ्इति
इति रूपं शुद्धस्य दीध्यक इति व्युत्पादितत्वात् सिद्धान्तविरोधादुपेक्ष्यं । तत्र हि वर्णग्रहणं लुप्तेपीवर्णे यथा स्यादित्येवमर्थमित्याङ्गस्य स्थानिवद्भावेन
सिद्धत्वात् गत्वाणिणिलोपात् प्राग्यीवर्णयोरिति लोपसिद्धेश्च वर्णग्रहणं प्रत्याख्यातं । न च वर्णग्रहणं कुर्वतः सूत्रकारस्यायं भाष्यकारोक्ताद
न्यमेवानुसृत्य भ्रम इति चेत्सत्यं । तथापि यथोत्तरं मुनीनां प्रामाण्यात् रूपान्तरसिद्धिस्तदवस्थैवेति दिक् । स्यादेतत् । दीधीवेव्योर्ङित्वात् क्ङितिचे
तिसूत्रेणैव निषेधोऽस्तु । किमिह दीधीवेवीग्रहणेन । मैवं । इग्लक्षणयोर्हि स निषेध इत्युक्तं । न चात्रो ञ्णितीति वृद्धिरिग्लक्षणा । किं च कार्यिणो

सिद्धि॰ निमित्तत्वपूर्वेण संभवत्यपि न च कार्यी निमित्ततयाश्रीयते । व्यवहितपूर्वत्वाद्यपि गुणनिषेधापत्तेः । अत्रालिंगं कुर्यादिम ध्येकूङ्ङूद्धृ
त्यस्य पाठः । स्थण्डिलाच्छयितरीति निर्देशाच्च । यत्तु प्रवृत्तस्य तेदीधीवेव्योर्ग्रहणमेवैतत्परिभाषाज्ञापकमिति । अनिग्लक्षणवृद्धिनिषेधेन
चारितार्थ्यात् । भाष्यमतेऽप्येतत्सूत्रस्य प्रत्याख्यास्यमानत्वेनापरिभाषायां लिंगान्तरस्यैवानुसर्तव्यत्वाच्च । स्यादेतत् यदि कार्यी निमित्त
त्वेन नाश्रीयते । कथं तर्हि दुर्गुणविधितीत्यत्र द्विर्वचनेचीति नुड्ग्रहणस्यादित्वा इत्यस्याजादित्वेऽपि द्वित्वं प्रति कार्यमध्ये प्रविष्टत्वान्निमित्तत्वा
संभवात् । सन्यङोरिति षष्ठीमाश्रित्य सन्नन्तस्य द्वित्वविधानात् । अन्यथा प्रतीषिषतीति सनो द्वित्वं न स्यात् । यत्तु सन्यङोरिति सप्तम्याश्र
यणेऽपि सन्यङोरकारोच्चारणसामर्थ्याद्द्वित्वं भविष्यतीति । तन्न । आदित्सधित्सादिष्वाद्यङुत्पत्तिप्रतिबन्धेनाचोयदितियत्प्रत्ययोत्पादनेन
चाकारोच्चारणस्य चरितार्थत्वात् । अन्यथा ऽरिरिषतीत्याद्यसिद्धेश्च । यदि हि तत्रापि स्थानिवत्स्यात् । इष्टो द्विर्वचनेऽरिरिषतीति स्या
त्

अत्रोच्यते। कार्यमनुभवन्नेव कार्यी निमित्ततया नाश्रीयते इति परिभाषार्थः। अरिरिषतीत्यत्र अजादेर्द्वितीयस्येति रिस इत्यंशे द्वित्वप्रवृत्तिः तदन्तर्गतश्चेस्
इति नासौ द्वित्वप्रवृत्तिनिमित्तं कार्यभाक्त्वात्। रुरुत्सुन विषतीत्यत्र तु न वृद्धस्य द्वित्वप्रसङ्गः तदन्तर्गतश्च नाः सनाद्यन्त इति भवत्येव निमित्तं तद्भावभावित्वा
इति मात्रेण हनिमित्तत्वं सन्यङोरिति सूत्रे भाष्यकारैरेव स्फुटीकृतत्वात्। तथा च द्विर्वचनेचीति स्थानिवद्भावात् ऊर्द्धस्य द्वित्वमुचितमेव। अयं तु द्विर्वचनेची
ति सूत्रे अचि किं जेघ्रीयते देध्मीयते इति प्राचां प्रत्युदाहरणं तदापाततः। घ्री यूध्मीयूङ्त्यस्य द्वित्वभान्तत्वात् घ्राध्मोर्यङीति ईत्वं प्रति निमित्तभूतस्य
यङो द्वित्वं प्रत्यनिमित्तत्वात्। तस्मान्नाचीत्यस्याधिजगे इत्येव व्यावर्त्यं बोध्यं। गाङ् लिटीति द्वित्वकारकं निर्देशमाश्रित्य लावस्थायामेव गाङादेश
विधानात्। अन्यग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्येति तन्त्रसर्वातिकमपि अधिजगे इत्येतस्मिन्नुदाहरणे कार्यो ति द्विरन्याश्रयणे अन्यग्रहणं देयं स्या
दिति एवं योज्यं इति दिक्। अयं च सिद्धवत्सूत्रे एव वक्ष्यते। अन्यग्रहणं समानाश्रयप्रतिपत्त्यर्थं इति। अत्र आश्रयत्वं स्थानितया निमित्ततया वा कथंचिदा
श्रयणमात्रेण न तु निमित्तत्वे एवाग्रहः। तेन ऊढो इति ढाभावो रे धिलेके कर्तव्ये सिद्धो भवति। अन्यथा धिलेहेः कार्यित्वया निमित्तत्वाभावाद्
सिद्धत्वं न स्यात्। अत एव समानाश्रयमाभीयमाभीये असिद्धं इत्येवाहुर्न तु समाननिमित्तकमिति। इदं च सूत्रं भाष्यवार्त्तिकयोः प्रत्याख्यातं
तथा हि। दीधीवेव्योश्छन्दोधातुत्वान्न तु लोके प्रयोगार्हौ। छन्दसि चानयोर्गुणो दृश्यते। होत्रायवृत्तः कृपयन्नदीधेत्। अदीधयुर्दाशुषे वृत्ता
स इत्यादौ। न चायं बाहुलकेन समाधेयः तथा सति निषेधसूत्रानारम्भस्यैव लाघवेनोचितत्वात्। तथेटोऽपि ग्रहणं व्यर्थं। आर्द्धधातुकस्येडि
त्यन्नाइने इ श्री ति सूत्रादिड्ग्रहणमनुवर्तते तच्चेटो विकाराभावार्थं। इड्ड्डेव न तु विकृत इति व्याख्यानात्। तेन लघूपधगुणाभावात्सिद्धं।
कणिता श्वो रणिता श्व इत्यादि। न चैवं पिपठीरित्यत्र दीर्घो न स्यादिति वाच्यं। तस्य नियमं प्रत्यसिद्धत्वात्। अपाठीदित्यत्र सवर्णदीर्घस्तु नवा
यते। सिज्लोपएकादेशो सिद्धो वक्तव्य इति ज्ञापकात्। यदा गाधिकारे क्रियमाणो नियमोऽङ्गमेव विकारं व्यावर्तयति। तेन वैरित्ति अकः स

वर्णे दीर्घो विभक्त्येव । गृहीतेत्यत्र तु ग्रहोऽलिटि दीर्घ इत्यारम्भसामर्थ्याद्दीर्घो भवत्येव । इदं त्ववबोध्यं । पिपठीः पिपठिषि ब्राह्मणकुलानीत्यत्र सांतमहत र्गति दीर्घत्वेन
भाव्यं सिद्धत्वादङ्गत्वात् । तत्रासीत्यादौ चरितार्थत्वाच्च । पिपठीरपाठीदूहीतीत्यादिभ्योऽस्येवेलक्ष्यादिति । अत्राहुः । पिपठिषीति प्रयोगोऽसाधुरे
व । न ह्यत्र नुमागमो लभ्यते । अल्लोपस्य स्थानिवद्भावेनासलन्तत्वात् । न चैवमजन्तलक्षणप्रयुक्तो नुम्स्यादेवेति वाच्यं । तस्य सकारादुत्तरत्र प्रसक्त्या दीर्घ
स्य तथाप्यप्रवृत्तेः । सान्तसंयोगाभावात् । वस्तुतस्तु अजन्तलक्षणप्रयुक्तो नुमत्र न भवत्येव । स्थानिवद्भावासम्भवात् । अनादिष्टादचः पूर्वस्यैव विधौ सः
न चाजन्तमनादिष्टादचः पूर्वं येन तस्य नुम्विधित्वेऽल्लोपः स्थानिवत्स्यात् । ननु सलन्तलक्षणप्रयुक्तो नुमस्तु वीरः । न च तस्मिन्कर्तव्ये स्थानिवद्भावः सू
क्यः । क्वौ लुप्तं न स्थानिवदिति निषेधात् । अन्यथा सखीयतेः सखीः सुतीयतेः सुतीरित्यादि न सिध्येत् । अल्लोपस्य स्थानिवद्भावेन यणादेशप्रसं
त् । अत्रोच्यते । क्विलुगुपधात्वचङ्परनिर्ह्रासेषूपसंख्यानमिति तावद्वार्त्तिककाराशयः । तत्र क्वीत्यंशो यद्यपि द्विधा व्याख्यायते । क्वौ लुप्तं न स्थानि
वदिति क्वौ विधिं प्रति न स्थानिवदिति चेद्वयतेः क्विपि दयूरित्यादेरन्यत्र व्याख्यानाश्रयणेन सिद्धावपि सखीयतेः सखीरित्यस्याद्यव्याख्यानं
विना सिद्धेः । लवमाचक्षाणो लौरित्यस्य द्वितीयव्याख्यानं विना सिद्धेश्च । तथापि क्वौ विधिं प्रतीति द्वितीयव्याख्यानमेव सार्वत्रिकं । क्वौ लु
प्तमिति तु क्वाचित्कं । ख्यत्यात्परस्य मपर्यन्तस्यात्र च भाष्यादावाश्रितं न तु सार्वत्रिकं । अत्र वेड्ग्रहणप्रत्याख्यानपरमत्रत्यभाष्यमेव प्रमा
णं । कथमन्यथा पिपठीः पिपठिषावित्यस्य स्पष्टत्वे सत्त्वरीत्यात्वत्तृभिः इड्ग्रहणं प्रत्याचक्षीत । तस्मात् पिपठिषि ब्राह्मणकुलानीत्येव रूपं भवतीति स्थि
तं ॥ हलोऽनन्तराः संयोगः ॥ अज्भिः अव्यवहिताः हलः संयोगसंज्ञाः स्युरिति । संज्ञाप्रदेशाः संयोगान्तस्येत्येवमादयः । इहान्तरशब्देन छिद्रवाचि
ना बहुव्रीहौ निश्छिद्रा इत्यर्थलाभादेकवचनग्रहे संज्ञा न भाव्या । आधेयप्रधानेनान्तरेणाव्ययेन सह बहुव्रीहौ तु आधेयनिषेधप्रतीतेरे
कवग्रहेऽपि संज्ञा भाव्यमेव संज्ञया । न हि तत्रान्तरा मध्ये किंचिदस्ति । किंतु मध्यमात्रं वर्तते । मात्रान्तरं स्वस्त्रावदचग्रहान्तरमिति प्रातिशा

ख्यबलेन तत्र मात्राकालावसानाभ्युपगमात्। यत्तु प्रातिशाख्यान्तरे। अर्द्धमात्रो ऽवग्रह इति तत्तु सर्वत्र संहितायां अर्द्धमात्राकालस्य सत्वात्ततो ऽतिरि
क्तो ऽर्द्धमात्राकालो ऽवग्रहे स्त्वीत्येवपरं। अतः प्रातिशाख्ययोर विरोधः। तदिह कतरः पक्षो ग्राह्य इति चेत्। उभयथाप्यदोष इति भाष्यकाराः। नन्वप्सु इत्या
दौ सत्यां संयोगसंज्ञायां संयोगे गुरु इति गुरुत्वाद्गुरावन्त इति प्लुते न भाव्यं न त्वस्य र्थेति महान्फले विशेषः। तत्कथं पक्षद्वयाभ्युपगम इति चेन्न। अ
प्सु इत्यस्याधिकरणवेदूराद्भूत संबंधासंभवात्। विचार्यमाणानामित्यादौ तु वाक्यस्य टेरित्यनुवर्तते न तु गुरोरनृत इति। नन्वप्सु भवो ऽप्स
व्यः। दिगादिषु पाठाद्यत्। अपो योन्याय्यन्मत्तुप्सु चेति सप्तम्या अलुक्। ततः सबुद्धौ हे अप्सव्येत्यत्रस्याद्देव फलभेद इति चेत्। अत्राहुः। नैवं विधे
विषये ऽवग्रहं पदकाराः कुर्वन्ति। अत्र च संप्रदाय एव शरणं इति बोध्यं। युक्तं चैतत्। गोभ्यो गातु गोभिर्मदाय। चित्र इद्राजा। राजका इदन्यके। इ
त्यादौ गोभ्यो गोभिः राजका इत्यादीनां सत्यपि पदत्वे ऽवग्रहाकरणात्। इयिवांसमतिस्निधः इत्यादौ इयिवांसमिति विनापि पदसंज्ञा कुसो
ः पूर्व इडागमात्ते ऽवग्रह करणाच्च। एतेन सिसासन् उक्थशासः रिरिषः इत्यादौ पदकाले सत्वरुत्वत्वादयो व्याख्याताः। यत्तु मानो महान्तमि
ति मन्त्रे वेदभाष्यकारैरुक्तं छान्दसः पदकालीनो ह्रस्व इति तदपि संप्रदायमात्रपरतया कथंचिन्नेयं न लक्षणेन पदकारा अनुवर्त्या इति भा
ष्यपदविभागः पो ष्येय इति कैयटादिभिरुक्तत्वादिति दिक्। कथं तर्हि तन्त्र तत्रावग्रहे विशेष उच्यते इति चेत्। अवान्तरपदत्वे सत्यवग्रहः क्रि
यते इत्युत्सर्गमभिप्रेत्येति गृहाण। अप्सु योनिर्वा अश्व इत्यादावपि सुशब्दात्पूर्वेणास्यावग्रहः। अवान्तरपदसंज्ञानेकत्वे उत्तरकालप्रवृत्ति
कत्वाद्वग्रह इति वैदिकसंप्रदायात्। अत एव मयूररोमभिरित्यत्र भिसः पूर्वमवग्रहः न मउक्तिभिरित्यत्राप्येवं। इद्धः प्रणवः पुर एतवेति
अत्र चेव शब्दात्प्रागे इति दिक्। महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं। संयुज्यन्ते ऽस्मिन्समुदाये वर्णा इति तेनात्र समुदायवाक्यपरि
समाप्तिर्न तु गुणवृद्ध्यादिसंज्ञावत् प्रत्येकं। तथाहि सतिनिर्याय्यादित्यादौ यकारः संयोग इति वा अस्य संयोगादेरित्येत्वं स्यात्। सिद्धान्ते
तु अचो रहाभ्यामिति द्वित्वे सत्यपि तस्यासिद्धतया निर्याय्यादित्यादावेत्वं न भवति। किंच प्रत्येकं संयोगसंज्ञेति पक्षे संदृषीष्टेत्यत्र ऋत

230

स्त

संयोगादेरितीट् स्यात्। संस्क्रियेते इत्यत्र गुणोर्तिसंयोगाद्योरिति गुणः स्यात्। दृषत्करोतीत्यत्र ककारसंनिधौ दकारस्य संयोगांतलोपः स्या

नकार त्। शक्ता वेत्यत्र सलिंपरत्वे स्कोरिति लोपः स्यात्। निर्यातः इत्यादौ संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं स्यात्। जातौ चेद्बहुवचनं हल

इति ज्ञात्याख्यायामेकस्मिन्निति वचनात्। तेन द्वयोरपि संयोगसंज्ञा भवति। अतः शिक्षेत्यादौ गुरोश्च हल इत्यप्रत्ययः सिध्यति। यत्र तु बहवो ह

द्वयो लः संश्लिष्टास्तत्र बहूनां वा विशेषणसंज्ञा। नन्वेकाचो द्विर्वचनन्यायेन समुदायस्यैव स्यादिति वाच्यं वैषम्यात्। तथा हि। द्विर्वचनं समुदायेनैका यावय

चो द्वित्वं युगपत्कर्तुमशक्यं। संज्ञा तु शक्या। तथा समुदाये द्विरुक्ते अवयवा अपि द्विरुक्ता भवंति। वृक्षः प्रचलन् सहावयवैः प्रचलतीति न्यायात्।

इह तु समुदायप्रवृत्तया संयोगसंज्ञया नावयवानां तत्कार्यसिद्धिः। अतो विशेषणं द्वयोर्बहूनां च संज्ञेति स्थितं। यदि तु बहूनामेव स्यात्तर्हि

संस्क्रियेते इत्यत्र गुणोर्तिरिति गुणो न स्यात्। गोमान्करोतीत्यत्र संयोगांतलोपो न स्यात्। निर्ग्लानः इत्यादौ निष्ठानत्वं न स्यादिति दिक्। ननु यदि

द्वयोरपि संयोगसंज्ञा तर्हि दिद्रापयिषति इति सनि दिदरिद्रिषतीति न स्यात्। इह हि संयोगो द्वौ न दो दरे च। तत्र नकारस्येव दकारस्यापि नंद्राः इ

ति निषेधः स्यात्। नैष दोषः अत्र हि अजादेरिति वर्तते। सा च कर्मधारयात्सप्तमी। तेनादेरचः परे नदराः संयोगादयो न द्विरुच्यंते इति सूत्रार्थः।

एवं च पूर्वसूत्रे द्वितीयस्येति न कर्तव्यमेवेति वक्ष्यते। हलः किं। तितउभ्यां। अचत्तनोतेर्डउः सन्वच्चेति डउः सन्वद्भावाद्द्वित्वं सन्यतः इतीत्वं चाव्य

स्तोऽच्चारणसामर्थ्याद्गुणाभावः। यदि ह्यचोरप्यनंतरयोः संयोगसंज्ञा स्यात्तर्हि हसंयोगांतस्य तु उकारस्य लोपः स्यात्। अनंतराः इति किं। पन

सः। यदि ह सकारनकारयोः संयोगसंज्ञा स्यात्तर्हि स्कोरिति सूत्रेण सकारलोपः स्या दिति दिक्। मुखनासिकावचनोनुनासिकः ॥८॥

सहिता मुखेन नासिकया मुखनासिका। तयोच्चार्यमाणोऽनुनासिकसंज्ञः स्यात्। संज्ञाप्रदेशास्तु आङोनुनासिकश्छंदसीत्यादयः। अभ्र आँ अपो

वृणाना। गभीर आँ उग्रपुत्रे। इह उच्यते इति वचनः। कृत्यल्युटो बहुलमिति बाहुलकात्कर्मणि ल्युट्। राजभोजनाः शालय इतिवदिति वृ सानुना

सिकाः। भाष्यकैयटयोस्तु उच्यतेऽनेनेति वचनं करणे ल्युट् सामान्येन पुंसकं शक्यं च वक्तुं सुपं हन्तुमिति वत्। तेन तुल्यक्रियाचेत्सं स्तृत भस्मा

मित्यनेन

इति वक्ष्यः। इदं च विशेषणानां चाजातेरित्यत्र वक्ष्यमाणे। न पदसंस्कारपक्षे गुणवचनानां इत्यादिवाचनिकेन सह यथा न विरुध्यते तथा तत्रैव वक्ष्यामः॥
ततो मुखनासिकावचनं यस्येति बहुव्रीहिः। मुखेति किं। यमानुस्वाराणामेव माभूत् इति भाष्यं। तत्र वर्गेष्वादितश्चतुर्णां पंचमे परे तन्मध्ये पूर्ववर्ण
समानाकारं वर्णांतरं प्रातिशाख्येष्वागमं त्वेतद्यमसंज्ञं। यम इव यमः। यमो हि लोके प्रायेण समानाकारो भवतः। तथा पलिक्नी। चक्नतुः। अग्निः
अग्नमित्यत्र कखगघ इत्येतेभ्यः परभागे तत्सदृशो यमागमः। यत्तूक्तं विवरणे। वर्गपंचमयुक्ताः प्रथमाद्या यमा इति। तच्चिंत्यं। अयोगवाहत्वप्र
तिपादकेन हयवरट्सूत्रस्थभाष्येण विरोधात्। केवलानुनासिक्यप्रतिपादकेन यमानुस्वाराणामेवेति भाष्यविरोधात्। अनेनैव भाष्येण केवलनासि
क्यत्वपरं। किंतु ओं इत्यादीनां भागत्रयेणानासिक्यं। यमानुस्वाराणां तु मुखनासिक्यत्वेपि प्रासादवासिन्यायेन नासिक्यत्वमप्यस्ति। न तु तदीयभा
गमात्रं तत्स्थितिएवं परं। तथाप्यादितश्चतुर्णां तदसंभव एव। किंचैवं नैव दोषो नैव प्रयोजनमिति तदुत्तरभाष्यविरोधः। यदुंघ्नतीत्यादौ यरोनुनासिक इत्य
स्य प्रवृत्त्यापत्त्या दोषस्योद्भटत्वात्। अत एव प्रातिशाख्येस्पर्शाद्यमांनु [illegible] नासिकाः स्वान्परेषु स्पर्शेषु अनुनासिकेषु इत्युपक्रम्य प्रदोधुवश्छन्न
स्पृष्टं यत्र यमं निषिद्धमार्व्येन स्पर्शस्योष्मप्रकृतेः परस्ताद्यमापत्तिमिति सूत्रे परस्तादिति प्रयुक्तः। यमः प्रकृत्यैव सदृक्श्रुतिर्वा यमेन मुख्या
स्तिसमानकालेत्यादिसूत्रांतरेष्वपि स्पष्टमेव यमस्य वर्णांतरत्वं। तथा नारदीयशिक्षायामपि। अनंत्यश्च भवेत्पूर्वो ह्यन्त्यश्च परतो यदि। तत्र मध्ये
यमस्तिष्ठेत्सवर्णः पूर्ववर्णयोरिति। सवर्णः सदृशः। अत्र पूर्ववर्णयोरिति द्वित्वमविवक्षितं। यज्ञ इत्यादौ जकारद्वयसत्त्वेपि जभ्या अत्र च
सवोरंतदेवा इत्यादौ जकारद्वयाभावादिति तद्व्याख्यातारः। तथा ऋक्तंत्रव्याकरणाख्यस्य छंदोग्यलक्षणस्य प्रणेता औदव्रजिरप्याह सू
त्रयत्। अनंत्यसंयोगमध्ये यमः पूर्वस्य गुण इति। पूर्वस्य गुण इत्यस्य पूर्वभक्त इत्यर्थः। एतेनागमत्वं स्फुटीकरोति। तथा संयोगभ्रंशं
खलायां गोतमशिक्षाया मपि। अथ चतुरक्षराणामुदाहरणं। सयमा यमाभ्यां समौ येस्ताव यथाग्निरिति द्वौ गकारौ यमनकारो यज्ञ

न
वि

232

इति द्वौ ञकारौ यमञकारौ वितिआदि। तथा तेनैव ग्रंथान्ते। अथ अयस्पिंडो दारु पिंड उर्णा पिंडश्चेति त्रेधा संयोगं विभज्य यमसहित मयस्पिंड मुक्त्वा अंतस्थ
यमसंयोगे विशेषो नोपलभ्यते। अत्र शिक्षायां प्राहुः अंतस्थः पिंडनायक इत्युक्ते। अंतस्थो वर्गपंचमः। अत्र शिरः इति स्वरभक्त्यादि विशेषज्ञ लिपि विशेष शून्य
मित्यर्थः। लक्षणवशेनैव तदीय स्थल विशेषनिश्चय संभवात् लिपि संप्रदाय प्रवर्तकाचार्यैः स्वरभक्तेः विंदुवञ्जकी भूता लिपिर्न प्रवर्तितेति अर्थः रलयोरू यमस्यापि
ष्मणि परे ध्येमे स्वरभक्तिरितिहि प्रसिद्धं शिक्षादौ। यत्र तु नैवं विध नलक्षणेन स्थलावधारणं कर्तुं शक्यते तत्र गत्या लिप्यंतरं प्रवर्तितं यथा विसर्गादेः॥
पाणिनीय शिक्षायां। त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमते मताः। प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा। स्वरा विंशतिरेकश्च स्पर्शानां पंचविंश
तिः। यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः। अनुस्वारो विसर्गश्च ꣵꣵ पौ चापि पराश्रितौ। दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव चेति। अत्र हि यमा
नां पृथग्गणना स्पष्टमेव वर्णान्तरत्वे गणना विशिष्य। अइउऋ इति चत्वारो ह्रस्वदीर्घप्लुतभेदात् त्रैविध्ये द्वादश। लृकार एकः। एचां दीर्घप्लुतभेदादष्टौ। एवं स्व
रा एकविंशतिः। स्पर्शाः पंचविंशतिः। यरलवशषसहेति अष्टौ। यमाश्चत्वारः। प्रथमद्वितीययमादिभेदेन विभजनात्। अत एव कुं खुं गुं घुं इति चतुष्टयं यम
न्यासादावुदाहृतं। कचटतपाः कुः खछठथफाः खुरित्यादि परिभाषामाश्रित्य तत्तद्रूतस्या शिरस्यापि कथं चित्प्रदर्शनं तात्पर्यं कं चेदमिति ध्येयं। अनुस्वार
विसर्ग ꣵꣵ पाश्चत्वारः दुःस्पृष्टश्च वक्ष्यमाणप्रसिद्धः। एवं द्वौ ळ्हेइति इथं त्रिषष्टिः। लृकारस्य प्लुतसंभवात्तेन सह चतुःषष्टिः। तदेतदुक्तं संभवतइति। ह्वरद्
सूत्रे क्षीरोदकारेप्याह। वर्गीत्येन त्यासरेत्तयोर्मध्ये वर्ति नासिकास्थानीय मइति। यत्तु केश्चिदाह। यमाश्चादेशाः। न च तेषामानुसिक्यपक्षे तद्दृष्टः तद्दृश
तीत्यादिषु यशानुनासिकत्व नुसीकादेशापत्त्या नैव दोषो नैवप्रयोजन मिति भाष्य विरुध्यते इति वाच्यं। व्यवस्थित विभाषाश्रयणादिति तं तुच्छं। प्रागुक्त
प्रातिशाख्यनारदीयशिक्षादिसकलग्रंथ विरोधेन आदेशपक्षस्यैव गभस्त्या वेणे वगतत्वात्। व्यवस्थित विभाषाश्रयणस्य निर्मूलत्वाच्च। एतेन एतदीय
३ लेखन प्रामाण्य भ्रमेण अनुपसर्गा सेदित्यादौ चवर्गा भावदृष्टी रूत्य श्रुत्या भावं साधयंतस्तदनुगामिनो पि परास्ताः। नारदेन यसिद्धत्वं चकार द्वयस्य स्पु
ट मभिधानात्। तस्येन स्य त्रयस्या स्पृश्यत्वात् पर्वणां इतीत्यारण्यक प्रयोगे इति सजातीय समभिव्याहार स्य स्पष्टो मेद इति स्पष्टत्वा स्त्रे अत एव न व्यंजनपर

स भा नो

नैत्तिरीय

स्यैकस्यानेकस्य वा विश्लेषोऽस्तीति भाष्यं। व्यञ्जनात्परस्य व्यञ्जने परं यस्येति [illegible]भूतस्य (च) दुर्लक्ष्यो भेदाभेदविभाग इत्येवंपरतया तत्र तत्रैकेयटेन व्याख्यातं। अत एव
चवहुषु पुस्तकेषु तन्लोपयत्ना वार्य इति भाष्यग्रंथः। अनुपर्गाद् इति सूत्रे भिकेषांचित्तु श्चुत्वपाठः संमत एव। पाठांतरं तु अल्पाचूतरं आद्युचूतद सह्न्ने
इति वर्त्से त्रैलादसंहितया वा समाधेयमिति दिक्। तदेतत्सकलमभिधाय प्रक्रियाप्र[illegible]काद्रौ [illegible] गुरुत्वरणे रुक्ता तत्स्थानमित्यादौ श्चुत्वं भवत्येवेति॥
यमश्च मुखनासिक्यः केवलनासिक्या[illegible]स्थानो वेति मतद्वयं। नासिक्या नासिकास्थानाः। मुखनासिक्यान्वेति प्राप्तिराख्या। अनुनासिक
विषयेतु दर्शनत्रयं। तत्र रलो वर्णो मुखेन नासिकया चोच्चार्यत इत्येकं। पूर्वो[illegible]णो मुखेन परो नासिकयेति द्वितीयं। तद्वैपरीत्येन तृतीयं। द्वितीयतृती
ययोर्भागमात्रस्य नासिक्यत्वेऽपि तदुपरागाद्भागांतरमपि तद्वदवभासत इति। तथा च नासिकान्वयस्य भागमात्रविषयतया नासिकावचनग्रहणेन
मुखनासिक्यो वर्णो न गृह्येत। किंतु मतविशेषे केवलनासिकास्थानतया यमादयो [illegible]गृह्येरन्। ततश्च विधिप्रदेशे भाज्ञेनु नासिक इत्यादौ य
मानुस्वारा एव विधीयेरन्। विड्वनोरनुनासिकः स्यादित्यादौ तु अनुवादे[illegible] अप्रतिपत्तिरेव स्याद् इति उदाहृतभाष्याशयः। तस्माद्दर्शनद्वये मुखपदोपादानं सा
र्थकमिति स्थितं। प्रथमदर्शने तु प्रासादवासिन्या[illegible]न्याश्रयेणोभयवचनानामपि सिद्धा संज्ञा। आंतरतम्याच्च विधिप्रदेशेषु यमानुस्वाराणामप्रवृत्तिः। त
था चेमुखग्रहणोपादानेन कर्तव्यमिति भाष्ये स्थितं। मुखवचन इत्येवोक्ते तु कचटतपादीनामपि स्यात्। तथा च शक्त इत्यत्र कलोपः स्यात्। पक्व इत्यत्रैव
कारलोपः स्यात्। तत इत्यत्र पलोपः स्यात्। ओदनपाकमित्यादौ अनुनासिकस्य [illegible] दीर्घः स्यात्। अनु पश्चात् नासिकाया ध्रियते यस्मिन्निति नासि
या पश्चान्मुखव्या श्रियते [illegible] यस्मिन्निति वान्वर्थसंज्ञेयं। तेन नासिकायाः आपारस्य भाग[illegible]विषयकत्वसूचनात्प्रासादवासिन्यायस्याविषयो
यं इति ध्वनितं। एतच्च सूत्रे प्रत्याख्यानेऽपि संज्ञाप्रदेशेषु वाक्येष्वेव प्रागुक्तस्य नासिकामनुगत इत्यस्य वाक्योगस्याश्रयणेन सकलेष्टसिद्धिरिति दिक्। तुल्या
स्यप्रयत्नं सवर्णं॥ ताल्वादिस्थानमाभ्यंतरप्रयत्नश्चेत्युभयं यस्य वर्णस्य येन वर्णेन समानं स तस्य सवर्णो बोध्यः संज्ञाप्रदेशा अकः सवर्ण इत्यादयः। अपि तु
ल्यास्यं मितं तुल्यमित्यवयवार्थः। नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेष्विति सूत्रेण तुलाशब्दात्संमि
तेयद्विधानात्। तथाप्ययं सदृशमात्रे रूढः शब्दः। अस्यंति उच्चारयंति वर्णाननेनेति आस्यं। असु क्षेपणे। बाहुलकात्करणे ण्यत्। यद्वा आस्यंदतेऽन्नं प्राप्यश्रवी
ने

234

भवतीत्यास्यं। अन्येष्वपि दृश्यत इति डः। अस्य अन्नेन द्रवीयत इत्यास्यं। अंतर्भावितण्यर्थात्कर्मणि डः। परितः खाततापरिखेतिवत्। तत्र भवमास्यं
ताल्वादिस्थानं। शरीरावयवाद्यत्। यस्येति लोपे हलो यमां यमि लोप इति यलोपः। न चाल्लोपस्य स्थानिवद्भावः शंक्यः। यलोपे कर्तव्ये तन्निषेधात्।
प्रयत्नो यत्नः। प्रयत्नः प्रकर्षश्चाभ्यन्तरत्वं। प्रारंभे यत्नो वा प्रयत्नः। आभ्यंतरप्रयत्ना हि वर्णप्रारंभकाल एव व्याप्रियंते। तथा च तुल्यो स्थानप्रय
त्नो यस्येति द्वंद्वगर्भो बहुव्रीहिः। यद्वा तुल्यः आस्ये प्रयत्नो येषामिति त्रिपदो बहुव्रीहिः। आस्ये इति विशेषणाद्बाह्यप्रयत्नव्युदासः। आस्ये
इति एकत्वं विवक्षितं। तद्धितांतास्यपदोपादानसामर्थ्यात्। तेन भिन्नस्थानानामर्थाद्व्युदासः। यद्वा तुल्य आस्ये तुल्यास्यः मयूरव्यंसकादि
त्वात्साधुः। तुल्यास्यः प्रयत्नो यस्येति विग्रहः। यद्वा मास्ये प्रयत्नो आस्यप्रयत्नं सत्तुल्यो यस्येति एकत्वविवक्षादिकं प्राग्वत्। तदेवं समासत्र
तुष्टयमपि भाष्ये स्थितं। द्वंद्वगर्भो बहुव्रीहिः त्रिपदो वा। पूर्वभागे तत्पुरुषगर्भः उत्तरभागे वेति। तुल्यशब्दस्य संबध्यमानशब्दसापेक्षत्वाद्येन सह तुल्य
स्थानप्रयत्नं तेन सह सवर्णमिति लभ्यते। न हि माता पूज्येत्युक्ते स्वस्य माता भार्या पूज्यते। किंतु पूजकस्यैव मातेति दिक्। तुल्यस्थानमिति
ति किं। तुल्यप्रयत्नानामपि कचटतपानां माभूत्। तेन तर्सेत्यत्र झरो झरि सवर्ण इति पकारलोपो न भवति। यत्नग्रहणं किं। इकारचकारयोर्माभूत्।
सति हि सावर्ण्ये वाक्श्च्योततीत्यत्र शकारलोपः स्यात्। आभ्यंतरत्वविशेषणमप्येतदर्थमेव। अस्ति हि श्वासाघोषविवाराख्यबाह्यप्रयत्न
साम्यं शचयोरपि। ननु अल्पप्राणत्वमहाप्राणत्वकृतभेदोऽस्तीति चेत्। किं ततः न हि सर्वप्रयत्नसाम्यं विवक्षितुं शक्यं अकितइत्याद्यसिद्धि
प्रसंगात्। कङयोरपि बाह्यप्रयत्नभेदात्। सर्वप्रयत्नसाम्यस्य स्वस्य स्वेनैवापत्तिनत्तुपरेण। तथा च सवर्णसंज्ञाप्रणयनमपि व्यर्थं स्यात्।
अणुदि [illegible] तुल्यास्यप्रयत्नस्येत्युक्तौ सर्वसामंजस्यात्। झरो झरीत्युक्ते हलो यमां यमीत्यत्रैव यथासंख्यप्रवृत्त्या माहात्म्यमित्यादौ म
कारस्येव म्रिष्ठीसादौ डकारस्यापि लोपो न स्यादिति सिद्धांते सवर्णग्रहणं कृतं। सवाच्यासिद्दोषो यावत्प्रयत्नसाम्यविवक्षायां तद्

235

वस्थ एव स्यात्। अथ यावद्बाह्यप्रयत्नसाम्यं यावदाभ्यन्तरसाम्यं वा विवक्ष्येत। एवमपि मधुलिट्स्थानमित्यत्र झलो झलीति सलोपः स्यात्। सकारथकारयोः
श्वासाघोषविवारमहाप्राणत्वरूपबाह्यप्रयत्नसाम्ये चतुष्टयेनापि साम्यात्। अथ स्थानप्रयत्नविवेकः। अकुहविसर्जनीयाः कण्ठ्याः। इचुयशास्तालव
व्याः। ऋटुरषा मूर्धन्याः। लृतुलसा दन्त्याः। उपूपध्मानीया ओष्ठ्याः। एऐ कण्ठतालव्यौ। ओऔ कण्ठोष्ठ्यौ। वकारो दन्तोष्ठ्यः। जिह्वामूलीयो जिह्वामूलस्था
नः। अनुस्वारो नासिक्यः। यत्नो द्विधा। आभ्यन्तरो बाह्यश्च। तत्राभ्यन्तरश्चतुर्धा। स्पृष्टता ईषत्स्पृष्टता विवृतता संवृतता चेति। तत्र स्पृष्टता स्पर्शानां
ईषत्स्पृष्टता अन्तःस्थानां। ह्रस्वस्यावर्णस्य प्रयोगे संवृतता। शास्त्रीये कार्ये विवृततापि प्रतीलायत इति अइउण्सूत्रे प्रतिपादितं। प्लुतः संवृता इति प्रा
तिशाख्योक्तत्वान्न सर्वसाधारणं। ऊष्मणां स्वराणां च विवृतता। एषां चतुर्णामपि आभ्यन्तरत्वं। वर्णोत्पत्तिप्राग्भावित्वात्। तथा हि। नाभिप्रदे
शात्प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्ध्वमाक्रामन् उरःप्रभृतीनि स्थानान्याहन्ति। ततो वर्णस्य तदभिव्यञ्जकध्वनेर्वोत्पत्तिः। तत्रोत्पत्तेः प्राग्यदा जिह्वा
ग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं ताल्वादि सम्यक्स्पृशंति तदा स्पृष्टता। ईषद्यदा स्पृशंति तदा ईषत्स्पृष्टता। समीपावस्थानेमा
त्रे संवृतता। दूरत्वे विवृतता। अत एव इचुयशानां तालव्यत्वाविशेषेपि तालुस्थाने सह जिह्वाग्रादीनां चवर्गोच्चारणे कर्तव्ये सम्यक्स्पर्शः यकारे ईष
त्स्पर्शः। शकार इकारयोस्तु दूरे स्थितिरिति। त्यादि शिक्षोक्तिमनुभवं चानुसृत्य विवेचनीयं। भाष्यकारास्तु नाज्झलाविसूत्रप्रत्याख्यानावसरे ऊ

विवृतत्वं

ष्मणां स्वराणां च ईषद्विवृतत्वं चेति वैलक्षण्यं वक्ष्यंति। तदप्यनुभवानुसारेणैवेति सुहृदयैरेकलनीयं। बाह्यप्रयत्नाश्च पुनरेकादश। विवारः संवार
श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति। एते च वर्णोत्पत्तेः पश्चान्मूर्ध्नि प्रतिहते निवृत्तप्राणाख्ये वायो उ
त्पद्यंते। अत एव बाह्या इत्युच्यंते। गलबिलस्य संकोचात् संवारः। तस्यैव विकासाद्विवारः। एतौ च संवृतविवृतरूपाभ्यां भिन्नावेव। तयोः समी

अव

पावस्थानदूरावस्थानरूपत्वादिति ध्येयं। तत्र वर्गाणां प्रथमद्वितीयाः शषसविसर्जनीयजिह्वामूलीयोपध्मानीया यमौ च प्रथमद्वितीयौ च विवृतकण्ठाः श्वा
सानुप्रदानाः अघोषाः। वर्गे यमानां प्रथमे अल्पप्राणाः इतरे सर्वे महाप्राणाः। वर्गाणां तृतीयचतुर्थाः अंतस्थाः हकारानुस्वारौ यमौ च तृतीयचतुर्थौ सं

॥शु॰कौ॰
॥१२॥

वृतकंठा नादानुप्रदाना घोषवंतः। वर्गाणां तृतीया अंतस्थाश्चाल्पप्राणा यथा तृतीयास्तथा पंचमा आनुनासिक्यमेषामपरो गुण इति शिक्षासु स्थितं॥
संग्रहश्च। खयां यमाः खयः ≍क ≍पौ विसर्गः शर एव च। एते श्वासानुप्रदाना अघोषाश्च विवृण्वते।१। कंठमन्ये तु घोषास्तु संवृता नादभागिनः। अयुग्मा
वर्गयमगा यणश्चाल्पासवः स्मृताः।२। यद्यप्येते बाह्यप्रयत्नाः सवर्णसंज्ञायामनुपयुक्तास्तथाप्यांतरतम्यपरीक्षायामुपयोक्ष्यंत इतीह आभ्यंतर
व्या विशेषणव्यावर्त्यतयाप्युपादिताः। ननु इह प्रयत्नग्रहणं व्यर्थं तद्धितांतात्स्य शाद्वलादेवत्ताल्वादिस्थानस्य प्रयत्नस्य च लाभादिति चेन्न। प्रत्येकं व्यापारनि
रासार्थमुभयोरुपादानात्। तेन स्थानप्रयत्नोभयसाम्ये सत्येव संज्ञा न त्वन्यतरसाम्येपि। एवं स्थिते यत्फलितं तत्स्पष्टत्वार्थमुपन्यस्यते। अष्टादश अव
र्णाः परस्परं सवर्णाः। एवमिवर्णोवर्णौ। ऋकारा अष्टादश ऌवर्णास्तु द्वादशेति त्रिंशन्मिथः सवर्णाः। ऌवर्णस्य दीर्घा न संतीत्युक्तत्वात्। ऋ ऌ वर्णयोः
मिथः सावर्ण्यमपि संख्यानाच्च। एचस्तु द्वादश मिथः सवर्णाः। न तु एकारैकारौ ओकारौकारौ वा मिथः सवर्णाः। यथा चैतत्तथा अइउण् इत्यत्रैव प्रति
पादितं। अकारेणाप्येचां न सावर्ण्यं प्रयत्नभेदादितीहैव सूत्रे भाष्ये स्पष्टं। अत एव एदैतोरपि ऋकारेणासावर्ण्य इति तेषां नाज्झलाविति सूत्रे उदाहरण
त्वं नास्ति। न चात्र स्थानभेदेन निर्वाहः। एचामकारेण सह कंठस्थानसाम्यात्। एदैतोः ऋकारेण तालुस्थानसाम्याच्च। न हि यावत्स्थानं तत्साम्यं विव
क्षितं। ञमङणनानां स्ववर्ग्यैः सह सावर्ण्यापत्तेः। यवलानां सानुनासिकनिरनुनासिकानामसावर्ण्यापत्तेश्च। न हि निरनुनासिकानामपि नासिका स्था
ना येन सर्वे साम्यं स्यात्। ननु तद्धितांतास्य शाद्वलस्य वलानां ताल्वादिसाम्ये पात्रे लभ्यते। ओष्ठात्प्रभृति प्राक् काकलकाद्धि आस्यं काकलकं च ग्रीवायामुन्न
तदेशः। यः कंठमणिरित्याचक्षते। तत्कंठनासिकास्थानभेदेनासवर्णत्वमापद्येतेति चेत्। नासिका हि नान्यवाह्यावर्णोत्पत्तौ निमित्तं तत्र जिह्वाग्रादि
व्यापारविरहात्। किंतु अंतरास्ये विततचर्मास्ति पणवचर्मवत्। तत्संबद्धो रेखाविशेषो नासिकास्येव वर्णोत्पत्तौ निमित्तमिति सिद्धांतात्। तस्याश्च ओ
ष्ठादिभ्यो विशेषात्। वर्ग्यो वर्ग्येण सवर्णः। तुल्यास्यप्रयत्नत्वात्। रेफस्य रेफ एव सवर्णः। एवमप्यूष्मणामपि ऊष्माण एव सवर्णाः। नेदन्योन्यतुल्या
स्यप्रयत्नताभावात्। शषसहानां यथा ऋ इकार ऋ ऌकाराकाराः सवर्णाः। नाज्झलाविति निषेधात्। भाष्यकारमते प्रयत्नभेद एवेति वक्ष्यते।
सूत्रमते यद्यपि तुल्यास्यप्रयत्नास्तथापि

द्यस्थानभेदादप्राप्तां सवर्णसंज्ञां विधातुं वार्त्तिकमारभ्यते। ऋकारऌकारयोः सवर्णविधिरिति। होतृ ऌकारः होतॄकारः। उभयांतरतमस्य दीर्घो न संभव
तीति परिशेषादृकारः। स्यादेतत्। अकः सवर्णे दीर्घ इत्यत्र ऋति ऋ वा ऌति ऌ वा वचनमिति वक्ष्यते। तस्यायमर्थः। अकः सवर्णे ऋति परे पूर्वपरयोः स्था
ने वा ऋ अयमादेशो भवति। द्विमात्रोयं मध्ये द्वौ रेफौ तयोरेकामात्रा अभितो ऽभितो रपरा ईषत्स्पृष्टश्चायं [struck] तत्र प्रयत्नभेदादृकारेण स
अग्रहणादनच्त्वान्नदीसंज्ञाया अभावादप्राप्तोयं विधीयते। ऌति ऌ वेति। अयमपि द्विमात्रः। ईषत्स्पृष्टश्च। मध्ये द्वौ लकारौ तयोरेकामात्रा। अभितो ऽभ
तो ऽरपरा। पूर्ववदप्राप्तो विधीयते। तत्र वा वचनं दीर्घसमुच्चयार्थं भविष्यति। वास्याद्विकल्पोपमयोरेवार्थे पि समुच्चये ऽत्यभिधानात्। तेनाप्राप्त एव दी
र्घो भविष्यति। तत्किं सवर्णसंज्ञया। ननु ऌति ऌ वेत्यत्र सवर्ण इत्यनुवर्त्तते न वा। आद्ये होतृ ऌकार इत्यत्र ऋ ऌवर्णयोः सवर्णसंज्ञाविधानं विना नेष्टसिद्धिः
अंत्ये दध्यृकारो मध्वृकार इत्यादावतिप्रसंगः। इति चेन्न। प्रथमवार्त्तिके ऋति इत्यपनीय ऋत इति पंचम्यंतपाठेनैव सर्वसामंजस्यात्। सवर्णे इति पूर्ववा
र्त्तिके तु वर्त्तता। तेन धात्रंश इत्यादौ नातिप्रसंगः। द्वितीयवार्त्तिके तु सवर्णग्रहणं निवृत्तं। ऋत इत्यनुवर्त्तते। तस्मादकः सवर्णे इत्यत्रावश्यकर्त्तव्येन वच
नद्वयेनैव सकलनिर्वाहादृकारऌकारयोः सवर्णविधिरिति इदं वार्त्तिकं व्यर्थमेवा। मैवं। इदं हि एकं वार्त्तिकमाश्रित्य पाठवचनद्वयप्रत्याख्यानस्ये
ष्टत्वात्। तथा हि। तद्वचनद्वयं कुर्वतापि रेफद्वय ऌकारद्वयगर्भौ स्तद्विधेययोरच्त्वं तावदेष्टव्यं। तन्निर्वाहार्थं वर्णसमाम्नाये तौ पठनीयौ
अन्यथा हि विधानमात्रमनयोः स्यान्न तु कार्यं। प्लुतस्तद्विधाने हि अचश्चेति परिभाषया अच इत्युपतिष्ठते। ननु ईषत्स्पृष्टस्थानत्वान्माभूत् प्लुतः
विवृतस्य तु ऋकारस्यास्त्वेन प्लुतः सिद्ध एवेति चेल्लस्यैव विवृतः प्लुतः सिद्धः ईषत्स्पृष्टो तु प्लुतो रेफद्वयलकारगर्भो न सिध्यतः। अत एवाच्संज्ञाभावे
णापि न निर्वाहः। ग्रहणकशास्त्रप्रवृत्तेस्तावन्मात्रेण निर्वाहात्। किंतु अण्सु पाठोपेक्षणीय इत्युक्तं। सति त्वण्सु पाठे तयोस्त्रिमात्रयोरपि
ग्रहणात् प्लुतसंज्ञायां सत्यां पक्षे ईषत्स्पृष्टो प्लुतो भवतः। एवं स्थिते पाठवचनद्वयमास्तु। तद्विधेययोरपि दीर्घतया अकः सवर्णे इत्यनेनैव सिद्धेः। ५

238

॥सि॰कौ॰
॥१३॥

ननु स्थानेन्तरतमपरिभाषया विवृतस्थानिनो विवृतावेव दीर्घौ स्यातां। न त्वीषत्स्पृष्टाविति चेन्न। रेफद्वययुक्तस्य स्थानिनो रेफद्वययुक्त एवादेशः सुसदृश इत्य
पि हि संभवति। तथा च किं रेफद्वययुक्तत्वमादर्तव्यं किंवा विवृतत्वमित्यत्र विनिगमकाभावेन पर्यायेणोभयप्रवृत्तौ सिसाधयिषितस्य रूपद्वयस्य निर्वाहात्
ऌकारेपि कदाचिदकारान्तरतमो विवृतदीर्घः स्यात् कदाचित्तु ऌकारान्तरतमो ऌकारद्वयगर्भ ईषत्स्पृष्ट इति सकलेष्टसिद्धिः। तदेवं षाष्ठवचनद्वयं न कर्तव्यं
इति स्थितं। ननु तदेवास्तु संज्ञाविधानमास्थितिचेन्न। वचनाद्वयारंभे गौरवस्य स्पष्टत्वात्। किंच संज्ञाभावे ऋत्यकः उरण्रपरः इत्यादिषु ऋकारेण ऌका
रग्रहणं न स्यात्। नन्वेवं सिद्धान्तेपि तवल्कार इत्यादौ लपरत्वप्रसंगः। रप्रत्याहारपरत्वस्य वक्ष्यमाणतया लपरत्वसिद्धिः। ऋदितो ऌदितौ च धातू
नां अनुबन्धकार्येषु संकरस्तु न भवति। धातूपदेशे पृथगनुबन्धकरणसामर्थ्यात्। विधिवाक्येष्वपि पृथगनुवादसामर्थ्यात्। अन्यथा हि सर्वान् ऋदि
त एव ऌदित एव वा पठित्वा विधावपि तेनैव रूपेणानुवदेत्। संभवत्येकरूपे वैरूप्याश्रयणायोगात्। नाज्झलौ। अज्झलौ सवर्णौ न स्तः। अकार
हकारयोरिकारशकारयोर्ऋकारषकारयोर्ऌकारसकारयोश्चेति स्थलचतुष्टये पूर्वसूत्रेण प्राप्तं सावर्ण्यमनेन निषिध्यते। तेनानडुहं चर्म वै
पाशो मत्स्य इत्यत्र यस्येति चेति हकारशकारयोर्लोपो न। अन्यथा हि यस्येत्यनेन दाक्षाणामिव हकारशकारयोरपि ग्रहणं स्यात्। तथा दंडहस्तः
दधि शीतं कृतं षड्‌ इत्यादौ सवर्णदीर्घः स्यात्। दधि सान्द्रमित्यादौ यणादेशश्च स्यात्। इहाज्झलौ तु स्यापि न सवर्णौ इति वाक्यार्थो न त्वाज्झलः
संज्ञाप्रणयनवैयर्थ्यापत्तेः। विहितप्रतिषिद्धत्वेन विकल्पे तु लाघवात् तुल्यास्यप्रयत्नं सवर्णं वेत्येव सूत्रयेत्। नाप्यचामज्भिर्हलां हल्भिः सावर्ण्यं
निषिध्यते। नाज्झलावित्यनेनैव सूत्रे सवर्णदीर्घस्य झयो ह इति पूर्वसवर्णादेशस्य च निर्देशो न तु सूत्रे वात्र निर्दिष्टो न तु हल्त्वावत्तैवेष्टसिद्धि
रिति चेत् तर्हि दीर्घनिर्देश एव ज्ञापकोऽस्तु। न ह्यचामज्भिः सावर्ण्यमनिषिद्धमिति ज्ञापिते परिशेषादज्झलोर्मिथो निषेध एव पर्यवस्यति
झरो झरि सवर्ण इति ज्ञापकाच्च। यत्तु नाज्झलाविति सवर्णकृतोऽनस्त्रितमिति तन्ना कर्तृषड्ढं दधि सान्द्रमित्याद्यसिद्ध्यापत्तेः। ऋकारऌकारयो

ते

मिथः

नेन व्याख्यातृ रुद्रं वन्याय्यभावात्कल्पनं संज्ञादिष्विति वार्त्तिकाद्बुध्यते तथाहि लृकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थ इ
ति पूर्ववार्त्तिकाद्बुध्यते लृकारोपदेशस्य प्रयोजनत्रयमुक्तं दध्यृत्तकार्य देहीति यदृच्छाशब्दः कुमारीलृतक इत्याहेति अशक्तिजानुकर
णं प्लुतादिर्द्विवचनं स्वरितत्वं अप्लुत्यादयः एतदर्थं लृकारोपदेश इति हि तस्यार्थः तत्र प्रथमप्रयोजननिराकरणाय देवार्त्तिकं न्याय्य
भावो दिनेत्ति अस्यार्थः ऋक्ति स्ताव दत्ते रायङिति निर्दिष्टः सौत्रो धातुः तत्र हि एवं सूत्रितं कुर

॥ अथशुद्धकौस्तुभंलेखयतुंक्रियं॥

रनणत्वात्॥ ग्रहणकसूत्रातिरिक्तेपूर्वेएवाणित्युक्तत्वात्। अस्तुवापरेणतथाप्यजपेक्षया व्यक्तिगौरवमेवस्यादित्यनग्रहणमपनीयाण्ग्रहणं क्रियं
ताम्मिति शङ्कायागर्भस्रावेणेवगतत्वात्। शूलं शङ्कोत्तु व्यक्तिगौरवे सत्यपि वर्णोच्चारणे विशेषो नास्तीत्येवोत्तरं। यस्तुनस्तुनाकुशलाविल्येवसूत्रयि
तुमुचितं। स्यादेतत्। शरैः शर्भिरपि सावर्ण्यं निषिध्यते ते हि इकारादिभिर्गृहीतत्वादच्संज्ञकाः हलूपदेशाद्वलश्च न ब्यास्मौ निषेधादिकारा देव
दयो न सवर्णा इति वाच्यं। एतद्वाक्यार्थबोधात्प्राक्पदार्थोपस्थितेरेवमुच्यतया तस्यामवस्थायामिकारादिभिः शरामुपस्थानस्य दुर्वारत्वात्
ततश्च पररूपत्वाः रामष्वष्ठः यशूस्सारमित्यादौ शरोषरीत्यस्य प्रवृत्तिर्न स्यात्। ततश्चैकेकशृ त्रयं श्रूयते। इष्यते तु द्वयं। तथाच पूर्वपक्षवार्तिकं। अ
स्सलोः प्रतिषेधे शकारप्रतिषेधोऽझलत्वादिति। अत्र शकारग्रहणं शषसामुपलक्षणं। किंच वर्णस्याष्टादशधाभिन्नस्य परस्परं सावर्ण्यं न स्यात्
ए ततश्च दण्डाग्रमित्यादौ दीर्घो न स्यात्। तथाहि हकारेग्रहणादकारो हल् अक्षुपाठाच्चाच्। न चास्मिन्नेव सूत्रे एतस्य प्रवृत्तिः। येन ग्रहणकशास्त्रमसावर्ण्या
न प्रवर्तेतेति। अत्र सिद्धान्तवार्तिककार आह। सिद्धमनच्त्वाद्वाक्यापरिसमाप्तेर्वेति। तत्र सूत्रप्रत्याख्याने नोत्तरं प्रथमवार्तिकेभिप्रेतं। तथा हि शि
क्षा वाक्य विवृतमूष्मणामिति योगो विभज्यते। तत्र चेषदित्यनुवर्तते। स्वराणां चेत्यत्र विवृतमित्यनुवर्तते ईषदिति निवृत्तं। तथाच प्रयत्नभेदादूष्म
स्वरयोः सावर्ण्याप्राप्तौ किं सूत्रेण। तथाच शषसामनच्त्वादित्यर्थः। उपलक्षणं चेदं। आकारस्य हल्त्वादित्यपि बोध्यं। सूत्रारम्भमभ्युपेत्येदं। वस्तुत
स्तु शरीत्यासूत्रं नारम्भणीयमित्यर्थः। ईषदित्यस्यानुवृत्तिं समानप्रयत्नतां च स्वीकृत्य सूत्रारम्भपक्षेप्याह। वाक्यापरिसमाप्तेर्वेति। अथ
र्व माशयः। इह वर्णानामुपदेशः ततः इत्संज्ञा ततः आदिरन्त्येन सहेतेति प्रत्याहारसिद्धिः। ततो नाज्झलावित्येतद्वाक्यार्थबोधः। ततोपवादविषय
परिहारेण सवर्णसंज्ञानिश्चये सति ग्रहणकशास्त्रप्रवृत्तिः। न चैतत्सूत्रनिष्पत्तिसमये। अन्यथा एतत्सूत्रेणैवकारशकारादीनां सावर्ण्यनि
षेधादिकारेण शकाराग्रहणेऽस्य झलत्वादिति हेतोरसिद्ध्या तद्दोषः पूर्वपक्षो संभवदुक्तिक एव स्यात्। अथ पदार्थज्ञानस्य वाक्यार्थबोध
हेतुतया एतद्वाक्यस्थपदार्थबोधकाले एतद्वाक्यार्थग्रहाभावादिह सूत्रे इकारेण शकारग्रहः स्यादेव इतः पूर्वं सावर्ण्यनिषेधाग्रहादिति [illegible]

तर्हीतः पूर्वग्रहणकशास्त्रमेव निष्फलमिति कथं न पर्यालोचयेः न त्वेवं तुल्यास्यप्रयत्नं नाज्झलाविस्यादो अकः सवर्णे दीर्घो न प्रवर्तेतेति चेन्न
सवर्णसंज्ञा घुत्तरकाल प्रवर्तमानस्य दीर्घशास्त्रस्य दंडाठकादाविवेहापि अप्रतिबंधप्रवृत्तिकत्वात् । उद्देश्यतावच्छेदकरूपाक्रांतत्वावि
शेषात् । न च सवर्णे दीर्घविधानात्प्रागेतत्सूत्रार्थबोधानुपपत्तिरित्तिवाच्यं ॥ पदार्थोपस्थितिप्रभृतिसामग्रीसंपन्नोसत्यां । वाक्यार्थज्ञानेवि
लंबेन शाब्दबोधे विलंबादर्शनात् । अन्यथा व्याकरणशास्त्रपरिशीलनविकलानां कापि शाब्दबोधो न स्यात् । तथा वैयाकरणानामपि व्याकर
ण सूत्रघटकशब्देषु व्याकरणादेव साधुत्वबोधेनदुत्तरकाले च वाक्यार्थावगतो आत्माश्रयचक्रकाणां दुर्वारत्वादिति दिक् । साधुत्व
ज्ञानं तु न शाब्दबोधे हेतुः । अस्तु वाभियुक्तवाक्ये सत्साधुत्वानुमितिः । ततः शाब्दबोधे जाते लक्ष्यांतरेष्विव लक्षणवाक्यांतर्गते ष्वपि लक्ष
णमवर्त्तिरित्तिदिक् । वस्तुतस्तु शारंपरस्परं सावर्ण्यनिषेधेऽस्त्यपि न क्षतिः । परःशतादिषु रूपद्वयं सिद्धांतेपीष्यते । शतात्पराणीति वि
ग्रहे कृते करणे कृता बहुलं इति बहुलवचनाद्वा सुप्सुपेति समासे कृते पारस्करादित्वात्सुटि सकारस्य श्चुत्वं ततो न चिचेति द्वित्वे ननु शारो
वीति अनचीति वा द्वित्वनिषेधोस्त्विति चेन्नात्र नाशंसलाविति निषेध्यादिकारेण शकारग्रहणात् । ततो झरो झरीति लोपविकल्पा
द्विशकारं त्रिशकारं रूपमिति सावर्ण्यनिषेधेपि सिध्यत्येवेदं रूपद्वयं । अनचि चेति द्वित्वस्यापि वैकल्पिकत्वात् । यरोनुनासिकेनुना
सिके वेत्यतो वे तोनुवर्तनात्सर्वत्र शाकल्यस्येति पाक्षिकनिषेधाद्वा । लोपस्य वैकल्पिकत्वं तु झयो होन्यतरस्यामित्यतोन्यतरस्या
मित्यनुवृत्ते [illegible] रित्यवधेयात्तस्मात्सावर्ण्ये सत्यसति वा परश्शताः इति द्विशकार । कत्रिशकारकरूपयोरविशेषः । परश्शता
याः स्ते येषां परा संख्या शतादिकात् इत्यमरः । एवं रामष्षष्ठो यशास्सारो सूत्यादावपि । अत एव भाष्ये अपर आह स्तुपक्रम्य वार्त्तिक
द्वयमपि एके हेतुतया व्याख्यायास्तु वा ग्रहणमिकारादिभिः शकारादि नामिति वाक्यशेषाध्याहारेण प्रतिज्ञा विकल्पार्थो वा शाब्द

भि

तियाख्यातं। तत्रापर आह। अत्यपरितोषोद्भावनेन तद्बीजं तु उक्तरीत्या ऋषु सावर्ण्यनिषेधानिषेधयोः फलाविशेषेपि प्रागुक्तरीत्या दण्डाग्रमित्यादि
न सिध्येत्। तदर्थं च सूत्रप्रत्याख्यानस्य वाक्यापरिसमाप्तिन्यायस्य वाश्रयणे आवश्यके ऋकारॡकाराभ्यां सावर्ण्याभावाभ्युपगमो निर्मूल प
एवेति स्यादेतत्। अगृहीतसवर्णानामेव नाज्झलाविति निषेध इति तावत्स्थितं। तत्राचां [illegible]कारादीनां ऌकार[illegible]भिः सावर्ण्यानि
षेधात् कुमारी ईहत इत्यादौ सवर्णदीर्घः स्यादित्याशङ्क्य व्याचीत्यनुवृत्त्या समाहितं। एवं स्थिते मालासु इत्यादौ षत्वं स्यात्। हकारेणाकारग्रहणे
गौरी हि इत्यादौ इवर्णः परत्वानपायात्। किं च निश्वपाभिरित्यत्र हो ढः इति ढत्वं स्यात्। वागाग्नीरित्यत्र झयो होन्यतरस्यामित्याकारस्य घकार
स्स्यात्। गासीधृत्यत्रेणः षीध्वमिति मूर्धन्यादेशः स्यात्। दासीष्वित्यादौ दादेर्धातोर्घत्वं स्यात्। राम आयातीत्यादौ हशि चेत्युत्वं स्यात्। देवा
आ यान्तीत्यादौ हलि सर्वेषामिति नित्यो यलोपः स्यात्। चारवायिनेत्यादौ यस्य हल इति लोपः स्यात्। दुयेनायितेत्यादौ क्यस्य विभाषेति लो
पः स्यात्। निचाय्येत्यादौ हलो यमां यमि लोप इति लोपश्च स्यादिति बहूपप्लवप्रसंगः। अत्रोच्यते। आकारेण हकारस्य सवर्णः। अइउण्सूत्रोदाहृत
द्विक्षारीत्या भिन्नप्रयत्नत्वात्। सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादिति वार्तिकमतेन तु हकाराकारयोरेकजात्यनाक्रान्तत्वादेव
नातिप्रसंगः। यद्वाकारसहितोऽच् आच् सहहल् च आज्झलाविति सूत्रे आकारप्रश्लेषो व्याख्येयः। तेन आकारस्य अचो च हल्भिः
सह सावर्ण्यं निषिध्यते। आकारप्रश्लेषे लिंगं तु कालसमयवेलासु तुमुन् इत्यादिनिर्देशाः। अत्र पक्षे आ श्च आ श्चेति द्वंद्वेन सवर्णदी
र्घेण च नाज्झलाविति सूत्रे दीर्घोऽपरः प्लुतोपि व्याख्येयः। तेन पिपासो इत्यादौ गुरोरनृत इति प्लुतादाकारात्परस्य सनः षत्वं नेत्या। वृ
ध्येयं। भाष्यमते तु ऊष्मणामीषद्विवृतत्वाभ्युपगमेन सावर्ण्यप्रसक्तिरेव नास्तीति सूत्रप्रत्याख्यानात् सर्वमनाविलं॥ इति श्रीभट्टोजि
विरचिते शब्दकौस्तुभे प्रथमाध्यायस्य प्रथमे पादे चतुर्थमाह्निकं॥ शके १७८१ पौ॰ शुद्ध १३ वा॰ ५ जयकृष्ण शास्त्रिणा लिखितं॥

244

व

॥श्रीगणेशाय नमः॥ ईदूदेद्द्विवचनं प्रगृह्यसंज्ञं स्यात्। हरी एतौ। विष्णू इमौ। गंगे अमू। तपरकरणमसंदेहार्थमिति वृत्तिकाराः॥ अन्यथा हि यणादेशे
कृते ह्रस्वस्यापि निर्देशः स्यादिति संभाव्येत। ततश्च अकुर्वे स्व नेत्यादावतिप्रसंगः स्यादिति भावः॥ भाष्ये तु व्यक्तिः पदार्थो भेदकाश्च गुणा इति पक्षमा
श्रित्य गुणान्तरयुक्तानां दीर्घाणां संग्रहार्थं तपरकरणमित्युक्तं। ईदं च ईदिति प्रथमतकारस्यैव फलमित्यवधेयं। तावतैव उकारेऽपि सिद्धेः॥ नाप्य
ईदिति पंचमीसमासपक्षस्यापि स्थितत्वात्। एकारस्य ऐत्वादेवा गुणदिसूत्रेण सवर्णग्राहकता सिद्धेः॥ ईदूतोः परम नण्हा गुणान्तरयुक्तसंग्रहाय पु
नोचेत्॥ तस्माद्भाष्यमतेपि उदेत्तो तपरकरणमसंदेहार्थमेव गुणानामभेदकत्वे तु ईदित्यपि तथेत्यभिप्रेत्य ऐकारस्य वृत्तिनुद्धृतं। ईदूत्परइति सू
त्रे पंचमीसमासो नास्तीत्यभिप्रेत्य ईदिति तथाश्रुतपरत्वमेकारेण निर्दिष्ट इत्यपि सवचं स्यादेतत्। असंदेहायापि क्रियमाणं तपरत्वं प्लुतं व्यावर्तयेदे
व घटायां मीलितं चक्षुः परं न हि न पश्यतीति न्यायात्। अथायं दकारः ऋतोरन्नितितदिति चेत्। एवमप्येकारो गृह्णन्तु प्लुतं भवत्यात्। नतीदूतौ वाक्यापरिस
मात्रिन्यायेन नत्वात्। नातिपरे निर्देश इति चेत्। तर्हि ह्रस्वे प्रप्यातिप्रसक्तिः दीर्घव्यक्तिरपि विशेषणीभूता विवक्षितेति चेत् कथं तर्हि प्लुतसंग्रहः। न च प्लुत
व्यावृत्तिरिष्टैवेति वाच्यं। अग्नी इतीत्यत्र अप्लुतवदुपस्थित इति सूत्रेण प्लुतस्य प्रगृह्ये प्रवृत्तिभावे निषिद्धेपि प्रगृह्यत्वप्रयुक्तस्य तस्य श्रूयमाणत्वात्। अप्लुतव
दित्यस्य तु देवदत्ते तीत्यादौ चरितार्थत्वाद्वैयर्थ्यं न शंक्यं। तथा च षष्ठवार्तिकं वक्ष्यते न प्लुतकार्ये प्रतिषेधार्थं प्लुतप्रतिषेधे हि प्रगृह्यप्लुतप्रतिषेधप्रसंगो
न्येन विहितत्वादिति। अत्राहुर्भाष्यकाराः यथोद्देशं संज्ञापरिभाषं इत्याश्रयणात् प्रगृह्यसंज्ञा प्रतिप्लुतोः सिद्धः। तथा च द्विमात्रत्ववुद्धेरप्रतिघातात्सिद्धा सं
ज्ञा कार्यकालपक्षे परं प्रगृह्यसंज्ञायाः अप्यप्रगृह्यस्येत्येनदेशानपायं प्रतिप्लुतस्य सिद्धत्वेन अनुनासिकः प्रवर्तते तेनेति स्यादेव दोषः। एतेन अग्नी इ
ति इत्यादौ प्रवृत्तिभावोपि व्याख्यातः। प्लुतप्रगृह्या अचीति ज्ञापकेन रसंधिषु प्लुतस्य सिद्धेपि संज्ञाप्रसिद्धान पायात्। यथोद्देशप

का ३

245

॥मा०कौ०५
॥१॥

श्रुतस्य प्लुतः प्रकृत्येत्यस्यार्थस्यया आपत्तिः अनुपपत्तिः प्लुतस्यासिद्धत्वात् तन्मूलकं वाक्यान्तरं

स एवेहाश्रीयते इत्युक्तं स्यात् । एवं तर्हि तस्य अनुनासिकः प्रकृतिभाव इत्येनेनैवेह यथोद्देशपक्षाश्रयणे प्रकृतिभावस्तु कार्यकालपक्षेऽपि सत्पूर्वपा
दः । न च प्रगृह्यः प्रकृत्येत्यनेनैकवाक्यतापन्नां संज्ञां प्रति प्लुतस्य सिद्धतया त्रिमात्रस्य संज्ञा दुरुपपादेति वाच्यं प्लुतस्य सिद्धतायां नी
जाभावात् । यन्तूक्तं प्लुतः प्रकृत्येत्येतदेव ज्ञापकमिति तन्न । प्लुतशब्देन तत्स्थानिनो लक्षणया सर्वसामञ्जस्ये तु न चैवं लक्षणैव
दोष इति वाच्यं । श्रुतार्थापत्तिमूलवाक्यान्तरकल्पनापेक्षया लक्षणाया एव लाघवाद्धि तल्लाभ स्तु वा विशेषापेक्षे ज्ञापकासिद्धः
प्लुतः । प्लुतत्वप्रयुक्ते प्रकृतिभाव इति न तु प्रगृह्यत्वप्रयुक्तेऽपि तत्स्यात् कार्यकालपक्षमाश्रित्य प्रकृतिभावस्य समर्थयितुं शक्यत्वेऽपि
अनुनासिकप्रवृत्तिनाऽरणाय चेह यथोद्देशपक्षाश्रयणमिति स्थितं । अत्र ह्रस्वः न न यद्यपि संज्ञायामसिद्धः प्लुतस्तथाप्यनुनासि
कपर्युदासे सिद्ध एव । तत्र च यस्याने सता भूताद्विमात्रस्थानसोऽनुनासिकविधौ स्थानी किन्तु त्रिमात्रः न च स्थानिवद्भावेन स्यापि प्रगृ
ह्यसंज्ञा प्रत्तिविधित्वात् । किञ्च अवश्यं सिद्धः प्लुतः स्वरसन्धिः क्षिप्राश्रयणीयं दंड आ३ इढक मिति प्लुतस्य दीर्घेण निवृत्तिर्यथा स्यात् अत
एव सुश्लोका३ इति सुश्लोके तीत्यत्र गुणो भवन् प्लुतमेव निवर्त्तयति न तु प्लुतस्थानिनं अन्यथा तादेशरूपे प्लुतं श्रूयेत तदिह यथोद्देशे
पि सत्त्वापरिभाषे कथमिवेष्टसिद्धिः कथं वा ग्रन्थेषु पूर्वापरविरोध इति निष्कर्षितः प्रष्टव्याः इति । अत्राहुः यद्यपि द्विमात्रस्त्रिमात्रेणाने
पत्तृतस्तथापि पूर्वत्रासिद्धमिति शास्त्रासिद्धत्वबोधनात् त्रिमात्रेऽपि द्विमात्र एवायमिति बुध्या प्रगृह्यसंज्ञा क्रियते । अत एव अमु नेत्यत्र
मुखे कृते तदुपजीवनेन नाभावे चक्तेसुपि चेति दीर्घो मुख्यानां द्वस्य दक्षायोपमिति बुध्या प्राप्तो । तं तत्परिहाराय तत्रावृत्याश्रयणेन नाभा

क

ने

वा

त्वेऽपि प्लुतः प्रत्यासन्नत्वेनाप्लुतस्य संज्ञाकरणं ...

वेक. तं ब्यो कृते च सति चप्रभावो नासिद्ध इत्यष्टमे व्याख्यातं 'कृतेऽपि तत्सूत्रे च सन्निपातपरिभाषया समाहितं' न सिद्धं द्विमात्रे कृतां संज्ञां
स्छानि वद्धीवन त्रिमात्रे आनयामः येनानन्विधाविति निषेधः शं वचेत ... नहि रञ्जत अमप्रयुक्ता प्रवृत्तिः श्रुतिं न गौ. चरवतीति पुत्रे।
तत्ताविनेव परं विशेषः रञ्जत अमो अनाहार्यः प्रवर्तकः इत्तु शास्त्रप्रामाण्यादाह्वयति रोपोपिं तत्तच्छास्त्र प्रवृत्ताव प्रवृत्तौ च नियामक इ
ति तदेतत्स्फुटमेव स्फुटीकृतं यदाह हरदत्तः सिद्धत्वाश्रयणाच्च प्लुतबुद्ध्या वसत्वं प्रगृह्यत्वे विधीयमाने द्विमात्रत्वबुद्धिः प्रवर्त्तते तथा च
वक्ष्यति असिद्धवचनमुत्सर्गलक्षणभावार्थमादेशलक्षणप्रतिषेधार्थं चेति षत्वतुकोरसिद्ध इत्येतत्सूत्रस्थं वार्त्तिकमिदं उत्सृज्यते निव
र्त्यते आदेशेनेत्युत्सर्गः स्थानी स लक्षणं निमित्तं यस्य कार्यस्य तुगादेः तस्य प्रवृत्त्यर्थमित्यर्थः तथा चैकरूप्यार्थं सर्वत्र शास्त्रासिद्धत्वमे
वेति भावः एतेन पस्पानेन संज्ञाकृतान सोऽनुनासिकविधौ स्थानीति प्रथमदूषणमुद्धृतं यद्यपि दशाष्टकं सुश्लोकेतीत्यादौ आदेशे प्लुतः
या श्रूयेतेति तदपि न उकारीतत्रा प्यादेशेन प्लुतस्यैव निवृत्तेः प्लुतो मयाप यद्यपि तरतीति बुद्धिः परं तस्य नास्तीत्यन्यदेतत् यत्तु षष्ठे भाष्यकारो वक्ष्य
ति सिद्धः प्लुतः स्वरसंधिष्विति तत्तु एतान्नुनासिकपर्युदासानुरोधाद्यथोद्देशपक्षएवाश्रयणीयमिति स्थिते स्वरसंधिसामान्यापेक्षतापक्षाश्र
यणेऽपि न दोषः इत्याशयेन 'ननु सामान्यापेक्षतायामेव किंचिदागृहीतमस्तीति दिक् ननु उदाहरणेषु ईदादिकमेव द्विवचनं न तु तदंतमिति चे
न्न व्यपदेशिवद्भावेन तदंतत्वात् ननु ईदूदेदंतं द्विवचनांतमित्येव कथं न व्याख्यातं एवं हि सति व्यपदेशिवद्भावो नाश्रयणीय इति चेन्न कुमार्यो
रगारं कुमार्येगारं वध्वोरगारं वध्वगारमित्यत्र प्रत्ययलक्षणेन द्विवचनांते अतिव्याप्तेः संज्ञाविधौ प्रत्ययग्रहणे तदंतग्रहणं नास्तीति सुप्ति
ङंतं पदमित्यत्र तदंतग्रहणेन ज्ञापितत्वाच्च एतेन ईदाद्यंतं यत् द्विवचनं तदंतं प्रगृह्यं कुमार्यगारादौ लुप्तस्याकारांतं द्विवचनं न त्वीदाद्यंतमिति परास्तं।

॥श्र·को·५
॥२॥

य

संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणात् । यत्तु अस्मिन्पक्षे दम्पत्यां तन्मते अभ्रुकुंभ्रुकुं समप्रयोगे तां भ्रुकुंसात् तां वस्त्रेरस्य च शब्दां तर प्राप्त्या अनि
सं लुकं बाधित्वा परत्वात् छीभावे कृते तस्य लुक् प्रत्ययलक्षणेन भ्रुकुंसी । सत्यं प्रगृह्यता स्यादिति । न च । अंतरंगान पि विधीन् बहिरंगोपि
लुग्बाधते इति परिभाषया ओकारस्यैव लोपात् तस्य चेदाद्युतत्वे निरहात् । अस्तु तर्हि ईदादि विशेष्यं तथा च द्विवचसं ईदादि
प्रगृह्यमित्यर्थ इति चेत् न गंगे इत्यादेः सिद्धावपि हरी एते इत्याद्यसिद्धेः द्विवचनावयवत्वोपयमेकारो न तु द्विवचनां किंच । प्रगृह्यमित्यस्य सं
निहितत्वात् द्विवचनमेव संततिं न तु ईदादि विप्रकृष्टत्वात् । तस्माद्यथा व्याख्यानमेव मनोरमं । अर्थवृत्तिकारः मल्लीवादी नाप्रतिषे
धोवृक्ष परवश्यतां मल्लीवदोदसौ गृहंपती वृजंपती वेत्यूदाजेनु पुनिन्न्यानुक्रमादप्रमाणमिदमिति केप्यदारयः एवं च वदुद्धिः समा

ति

न्यायतया अन्येषां मुनित्रयानुक्तानां वृत्तिकृन्मात्रोक्तानां तु रीयत्वे ष्टः इत्यसिद्धिरिगुहिभ्यो वा ज्ञमेके छदसि इत्यधिकृत्य भाषायां च अंगगान
केभ्यः स्त्रिष्यते इत्यादीनाम नार्तव्योक्ता । मल्लीवोष्ट्रस्यलेखोत इति तु इवार्थके नवाशब्देन निर्वाण्यमित्याद्युः । न्यासकारस्तु तंत्रबुद्धोशास्त्रे
ता बितिशाक्त्यग्रहणस्य सिंहावलोकित न्यायेन इहसंबंधाद्धुवरिष्ठत विभाषाश्रयणाच्चेदं लभ्यत इत्याह । केचित्तु इवार्थे यवशब्दः प्रयुक्तो
भीमो भीमसेनवदिति वत् कादंबरव्युत्पत्तिदलानि वपंकजानीत्यादिवच्चेत्याहुः । वस्तुतस्तु वद्या यथा तथैवैवं साम्यस्य मरणयेव वेति पाठमाश्रित्य
शान्त्ववे वपयुर्यश इति कालिदासप्रयोगस्य तद्व्याख्यातृभिरुदाहरणात्सर्वसुस्थं । युक्तश्चायमेव पाठः प्रातिपदिकप्रक्रमे तद्धितस्य वतेरननुग

न

ण त्वात् । एतेन स्फुटोत्पलाभ्यां मलिरंपती वृद्धिलोचनाभ्यां कुचकुंभलाशया निपत्यबिंदुहरिकज्जला विलोमल्ली वनीतो तरलो विरेजतुरिति

त्य

अहिरस्य प्रयोगोपि गतार्थः अदसो मात् । अस्मात्परावीदूतौ प्रगृह्यौ स्तः अमी ईशाः रामकृष्णावमू आसाते नचअमुरेत्र रामहरणं पूर्वस्त्रे

त

248

एगतार्थमितिवाच्यं। तस्मिन्कृते वृत्वस्यासिद्धत्वात् अदसो मादिति सूत्रं प्रति तु नासिद्धत्वं आरंभसामर्थ्यात् तथा च वार्तिकं आश्रयात्सि
द्धत्वं च यथा रोरुत्वे इति पुंद्विवचनमेव चेहोदाहरणं स्त्रीनपुंसकयो द्विवचने तु मत्वस्यासिद्धत्वे प्येकारांतत्वाभावेन एत्व सिद्धसंज्ञा। ततश्च
प्रकृतिभावो नुनासिकपर्युदासश्चासिद्धत्वे स्ववधेयं यत्तु हरदत्तेना [illegible] अणो प्रगृह्यस्येत्यत्र उपस्थितेन पूर्वसूत्रेणेत्संज्ञायां क्रियमाणा
यामुत्वस्य सिद्धत्वाद् ङ्गन्त्र योपि द्विवचनेः नुनासिकपर्युदासः पूर्वेणैव सिद्धः एतत्सूत्रारंभस्तु अद्विवचनार्थः पुंसि द्विवचने प्रकृतिभावा
र्थश्चेति। तच्चिंत्यं प्लुतसंग्रहानुरोधेन पूर्वसूत्रे यथोद्देशपक्षस्यैव स्थापितत्वात्। तस्मात् पुंसि द्विवचने अनुनासिकपर्युदासो प्येतत्सूत्रस्य फलं।
ननु प्रकृतिभावमात्रमित्यवधेयं अथापि कथं चिद्धरदत्तोक्तिः समर्थयितव्या [illegible] समर्थनीया पूर्वसूत्रे कार्यकालपक्ष एवास्तु न चैवं प्लु
तस्यानुनासिकपर्युदासो न स्यादिति वाच्यं। ई३ इत्, ऊ३ उत् इति दीर्घात्परभागे प्लुतस्यापि प्रश्लिष्टनिर्देशात् एकारस्तु अएत्वांशप्लुत गृ
ह्णीष्यति। न च तादपि परत्वत्पर इति तत्कालग्रहणापत्तिः अदोश्रितिवद्धकारणवायमिसाद्यात् प्लुते चैतत् यथोद्देशपक्षे प्लुतात्प्रागेव
संज्ञाप्रवृत्तौ सत्यां ततः प्लुते कृते लिङ्गमेवं द्विमात्रत्वबुध्यापन्नस्याऽपि संज्ञायाः पुनः प्रवृत्तौ बीजाभावात् नाभावस्तु मुभावात्प्रागप्राप्तः
ततो मुत्वनिमित्तकं नाभावं मात्रिस्य मुभावे दत्र अन्दोय मिति बुध्या प्राग्भुवं दीर्घः प्रतिविधीयतत्वस्तु चितं। नह्यसौ प्लुतात् प्राक्प्रगृह्यसंज्ञा
वत्मुभावात्प्रागेव प्रवृत्तः येन पुनर्न प्रवर्तेत एतेन पूर्वसूत्रस्थहरदत्तग्रंथोप्युन्नीतिरति यावद्बाधं साधुभाष्यकैयटयोस्तु अयं भावः
प्लुतात्प्राक् प्राप्तापि प्रगृह्यसंज्ञा फलाभावान्न प्रवर्तते न च प्लुते नुनासिकप्रवृत्तिरेव फलमस्त्विति वाच्यं संज्ञाया अप्रवृत्ताव पि तल्लाभात्। वृ
प्रगृह्यत्व प्रयुक्त पर्युदासस्यैव विधिस्पृश्यस्य [illegible] इति सुश्लोकं त्यादावप्यंतरंगत्वात् प्लुतः अंतरंगबलीयस्त्वापात्
यु ती

॥कू॰ कौ॰ ५
॥३॥

प्रकृतमनुसरामः नन्वारभ्यमाणेप्यस्मिन्सूत्रे पूर्वसूत्रेणैकस्यार्थं यथोद्देशपक्षस्त्वाश्रयणीयः तथा च रुहस्योक्तं प्रतीचप्रगृह्यसंज्ञां
प्रत्येवमुत्वमीतयोः सिद्धत्वं स्यात्। नस्यादौ नत्यपितत्रश्याममी आसते इत्यत्र अयादेशप्रसंगः अमू असाते इति पुंस्यावादेशः अमी अत्रे
त्येऽः पदांतादतीत्येकादेशप्रसंगश्च नच संज्ञां प्रत्येव सिद्धत्वे वचनानर्थक्यं स्यादिति वाच्यं अनुनासिकपर्युदासेन चरितार्थत्वात् अत्रो
च्यते यद्यनुनासिकपर्युदासमात्रप्रयोजनं स्यात्तर्हि संज्ञासूत्रं न प्रणयेत् अणोप्रगृह्यस्यानुनासिकः अदसोनेत्येव ब्रूयात् असो अमुके
अमुकाभ्यामित्यादौ नु सिद्धांतेपि न भवत्येवानुनासिकः अणवानेदनतसानसाच्च अतस्तन्नमात् गृह्णामी दूदूत्तणवानैकत्तव्यं नचैवं द्रूअ
स्वव इससत्रापि निषेधापत्तिः स्यदादीनां संबोधनविभक्तिविरहस्यैव औत्सर्गिकत्वात् अतः संज्ञारंभसामर्थ्यात्प्रकृतिभावार्थत्वमप्यस्यावि
ज्ञायते तद्बलाच्च अयादिविरहोपि सिध्यति प्रकृतिभावस्यापवादरूपतयाऽपसंजाते निमित्तेप्युत्सर्गोऽपजनिष्यमाणनिमित्तेनाप्यपवा नि
देन बाध्यत इति परिभाषाबलाच्च यत्तु संज्ञारंभसामर्थ्यादीत्यादीन्संज्ञां च प्रतिमुत्वमीत्वयोः सिद्धत्वज्ञापनाद्यादीन्बाधित्वापरत्वा
न्मुत्वमीहो इति तन्न अपवादभावज्ञापनेन लाघवात् अर्थापत्तेर्हि साक्षादुपपादकविषयता औत्सर्गिकी किंच मुत्वमीत्वयोरेकपदा
श्रयत्वेन बलीयस्त्वं अंतरंगं बलीय इति न्यायात् तत्कथं विप्रतिषेधोपन्यासः नाजानंतर्ये इति निषेधस्तु असिद्धं बहिरंग
मित्यस्यापवाद ननूदाहृतपरिभाषायाः यद्यप्यसिद्धं बहिरंगमंतरंगे इत्यनयैव गतार्थत्वादंतरंगं बलवदिति पृथक्परिभाषा
नकर्तव्येति विप्रतिषेधे परमिति सूत्रे भाष्यकृद्दर्शयति। तथाप्यभ्युच्चयमात्रं तत् सापवादनिरपवादत्वाभ्यां फले विशेषात्

वृक्षइइ हेयत्र सप्तम्येकवचनेन सह गुणोन्तरंगः सवर्णदीर्घस्तु बहिरंगं न चैतदसिद्धपरिभाषया गुणो लभ्यते नाजानन्तर्य इति निषे
धात् अत एव वाचः परस्मिन्निति सूत्रे भाष्ये वृद्ध्यस्पति आरभ्यमाणेऽपि नित्यो सौ परश्चासौ व्यवस्थया युगपत्संभवो नास्ति बहिरं
गेण सिध्यतीति एतच्च तत्रैव स्फुटीकरिष्यते अत एव चोक्तं वार्तिककृता इचङन्तस्यांतरंगलक्षणत्वादिति धिपति अद्
द्रुवदिस्यादि च तच्चोदाहृतं लापकं चौं ओं माङीश्च स्यात् ग्रहणं तद्विरच्च आकृष्टेऽपि पर मपि सवर्णदीर्घबाधित्वाधा
त तूपसर्गयोः कार्यमंतरंगमित्यंतरंगाद्गुणे कृते वृद्धिप्राप्तौ सत्यां पररूपं यथा स्यादिति क्रियते एतच्च संप्रसारणाच्चेति सूत्रे
भाष्ये स्पष्टं कथं तर्हि वार्तिककृतोक्तं विप्रतिषेधादिति सत्यं अत एव परितोषाद्वा अकारेण अथ वेति पक्षांतरमाश्रितमिति
दिक् मालिकं अमुकेन नचिह्न सूत्रे ईदूतावेवानुवर्तेते न तु एकारः सत्यं माद्ग्रहणे एकारो नानुवर्तते अदसो मात्परस्य तस्यासं
भवात् अन्यथा सनुवर्तेत एकदेशानुवृत्तिः स्यादुर्लभा तस्यादेकारानुवृत्तितात्पर्यग्राहकं माद्ग्रहणमिति स्थितं अत्रेदं चिंत्यं ई
तु दौ सप्तम्यर्थे प्रगृह्यौ अदसः एच्च द्विवचनं इत्येव कृतो न सूत्रितं एवं हि पूर्वसूत्रस्थमीदूद्ग्रहणं प्रकृतसूत्रे माद्ग्रहणं च कर्तव्यमिति मह
ल्लाघवं एकदेशानुवृत्तिश्च नाश्रयणीया भवतीति शे अयं प्रगृह्यः स्यात् अस्मे इंद्राबृहस्पती चतुर्थी बहुवचनस्य स्थाने सुपां
सुलुगिति सूत्रेण शे आदेशः शित्वात्सर्वादेशता शे बेल्लोपः नपुंषवाजबंधकः युष्मास्वित्यर्थः अत्र पदपाठकाले युष्मे इतिइसुदाह

सू॰कौ॰५
॥४५

रणं बोध्यं संहितायां लक्षणाभावेन सत्यसति वा प्रगृह्यत्वे विशेषाभावात् एवं हेरायः सुदृशस्तेत्यभ्याशस्यादीनामपि पदपाठकाले उ
दाहरणत्वेन बोध्यं लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं तेनेह न कशेकुशे वंशे हरिशे बभ्रुशे हरिबभ्रुशब्दाभ्यां लोमादित्वाच्छ
प्रत्ययः ततः सप्तम्येकवचनं निपात एकाजनाङ् एकोऽज्निपात आङ्भिन्नः प्रगृह्यः स्यात् अनिषेधाधिक्षेपयोः अ अवधे इ विस्म
ये इ इंद्रः उ अनुकम्पासंतापान्वर्थाद्यर्थेषु उ उमेशः एकाजिति कर्मधारयः वृत्तिपदार्थप्राधान्येनांतरंगत्वात् व्याहरति मृग इत्यादिनिर्देशाच्च ते
नेह न प्रेदं ब्रह्म वृत्रतूर्ये इत्यादिषु प्रेद्ध इत्यादि स्यादेतत् यद्यपि कर्मधारयस्तर्हि एकग्रहणं व्यर्थं निपातो यश्च इत्येतावतैवाभिमतसिद्धेः नच
अजन्तो यो निपातस्तस्यार्थः स्याद्विशेषणेन तदन्तविधेरिति वाच्यं तथासति व्यावृत्त्यलाभेन विशेषणवैयर्थ्या
विपरीतविशेषणविशेष्यभावेन अजन्तो यो निपात इत्यर्थः स्याद्विशेषणेन तदन्तविधेरिति वाच्यं तथासति प्रकृतिभावाद्दोषत्वं न स्यादिति वा
पतेः न च हलन्तं व्यावर्त्यं तस्य संज्ञायां सत्यामपि बाधकाभावात् न च पुरो स्त्रीत्यादौ हलन्तस्य संज्ञायां सत्यां प्रकृतिभावाद्दोषत्वं न स्यादिति वा
वाच्यं प्रगृह्यमिति संज्ञा प्रतिरहस्यासिद्धत्वादोषाभावात् न च सान्तस्यरूपा प्रगृह्यसंज्ञा एकदेशविकृतस्यानन्यत्वात् एकान्तस्यापि स्यादे
वेति प्रकृतिभावप्रसंगस्तदवस्थ इति वाच्यं प्रगृह्यत्वं प्रतीव प्रकृतिभावं प्रत्यपि रुत्वस्यासिद्धत्वात् सकारान्तस्य तु न किंचिदपि सिद्धकार्यं स्थं प्रा
वेति प्रकृतिभावप्रसंगस्तदवस्थ इति वाच्यं प्रगृह्यत्वं प्रतीव प्रकृतिभावं प्रत्यपि रुत्वस्यासिद्धत्वात् सकारान्तस्य तु न किंचिदपि सिद्धकार्यं स्थं प्रा
प्नोति पक्षे प्रकृतिभावेन व्यावर्तेत तस्मादजन्तनिपातस्य विशेषणे अज्ग्रहणं व्यर्थमेव स्यादिति सुष्ठूक्तं ननु अजन्तस्यैव यथा स्यादत्रापि तस्य मा
भूदित्येवमर्थं विशेषणं किं न स्यादिति चेन्न व्यपदेशिवद्भावेन तस्याप्यजन्तत्वानपायात् विशेषणसामर्थ्याद्व्यपदेशिवद्भावेन प्रवर्तेत इति चे
न्न तदन्तविधिपरित्यागे नापि तस्सार्थक्यस्य सुवचत्वात् तस्याप्यन्यतरपरित्यागे आवश्यके विनिगमकं किमिति चेत् अनाङ् ग्रहणमे

वेश्यवेहि तद्विद्यप देशिवद्भावमात्रबाधेव्यर्थं स्यात् तस्माद्यो विशेषणत्वेपि अनादेः ग्रहणात् ज्ञापकात् तदंतविधिर्न अयो विशे
ष्यत्वेपि तु न तदंतविधिरिति उभयथापि एकग्रहणं व्यर्थमेवेति स्थितं ननु अच्समुदायनिवृत्त्यर्थमेकग्रहणमस्तु अइउअ
पेहीति समुदायस्यैव संज्ञा स्यात् नावयवानां एकाचो द्विर्वचनन्यायादिति चरमस्यैव प्रवृत्तिभावः स्यान्न तु पूर्वयोरितिमेवं
अजित्येव स्यत्वे विवक्षयेव समुदायनिरासस्संभवात् अत्राह भाष्यकारः अच्समुदायग्रहणशंकानिरासार्थमेकग्रहणं कु
र्वन् ज्ञापयति वर्णग्रहणेषु व्यक्तिसंख्या न विवक्ष्यते किं तु जातिरेव निर्दिश्यत इति तेन दंभेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्ध
मिति वार्तिककृता वक्ष्यमाणं सूत्रेणोक्तं पितं भवति दंभेः सिद्धमित्यन्वयः अत्र हेतुः हल्ग्रहणस्य जातिवाचकत्वादिति तेन दंभेः
सनि हलंतेसन्नीवंतेति विकल्पादिडभावे दंभ इच्छति इदीतौ अत्र लोपोभ्यासस्येत्यभ्यासलोपे हलंताच्चेति सनः किसान्नलोपे भ
ष्भावे चर्त्वे धिप्सति धीप्सतीति रूपद्वयं सिध्यति हल्ग्रहणस्य व्यक्तिपरत्वे तु योनेकः समीपोहल् नकारः न ततः परः सन् यस्माच्च परः
सन् भकारात् नासाविकः समीप इति कित्वं न स्यात् तथा तृह हिंसायां तुदादिः ऋदित्वादिड्वा तितृक्षति तितृंहिषतीति स्यादेतत् अइ
उअपेहीत्यत्राकारान्न द्विर्वचनन्यायोपन्यासो न युक्तः समुदायसंज्ञयावयवानामननुग्रहात् अतएव हि निर्ग्लायान्निर्ग्लेयादित्यादौ
बहूनां सन्निपाते द्वयोरपि संज्ञा स्वीकृता नापि निपातसमुदायस्य निपातग्रहणेन ग्रहणं एकैकस्मिन्निपाते संज्ञाविधानसंभवात् सत्यं
एकाच्समुदायग्रहणशंकामात्रं तु स्यादेव तन्निरासार्थेव क्रियमाणमेकग्रहणं प्रागुक्तमर्थं ज्ञापयति वस्तुतस्तु अपृक्तसंज्ञायामेक

ग्रहणस्य परित्यागएव । आपानूनिपातइतिकिं चकारात्तथा अततेईः अः हे अ आगच्छेत्यपि प्रत्युदाहरणं आङः नाङ्गै

र्व्यवस्थामाह भाष्यकारः ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः एतमातङ्ङितं विद्याद्वाक्यस्मरयोरङित् इति इहत

तच्छब्देन पूर्वमनिर्दिष्टस्यादेतमित्यस्य एनादेशो न कृत इति केचित् तन्न अन्वादेशश्च कथितानुकथनमात्र

न तु इदमेव कथितस्येदमा अनुकथनमिति भाष्यकृता वक्ष्यमाणत्वात् । तस्मादत्र किंचिद्विधाय वाक्यान्तरेणान्य

दुपादिश्यते सोऽन्वादेशः इह तु ईषदर्थादौ यो वर्तत इति वृत्तिर्नैविधेया किंतु परिचायकतामात्रे तात्पर्यात् अतो न तत्र नादे

शः एतेन नन्तं भीरुरस्येयमेव तादिमं राधे गृहं प्रापयेत्यपि व्याख्यातं । भीरुत्वस्य विधेयत्वाविवक्षणात् सिद्धस्यैव हे

तुत्वेनानुवादादिति दिक् । ईषदर्थे आउष्णं आङ्गुलिषदर्थे इति कुगतीति सूत्रे वार्तिकसूत्राङि क्वचिद्वत्तः क्रियायोगे आ

ऋतः एतः प्रादिर्बाह्रिङि स्थितः मर्यादाभिविधौ चेति समाहारद्वन्द्वे आगमशासनस्यानित्यत्वान्नुमभावः मर्यादया सहि

तः एतः प्रादिषाह्निङि स्थितः मर्यादाभिविधौ आ अच्छिन्नात्

तेऽभिविधाविति मध्यमपदलोपी वा समासः मर्यादायां आउदकान्तात् ओदकान्तात् अभिविधौ आ आच्छिन्नात्

तेऽभिविधाविति मध्यमपदलोपी वा समासः मर्यादाभिविधिः आङ्मर्यादाभिविध्यो रिति चाङि निर्दिष्टः पूर्वं प्रक्रान्तस्य वा

आच्छिन्नात् विनाते नेति मर्यादा सहते नेत्यभिविधिः आङ्मर्यादाभिविध्योरिति चाङि निर्दिष्टः पूर्वप्रक्रान्तस्य वा

वाक्यार्थस्यान्यथात्वद्योतनाय आकारः प्रयुज्यते आ एवं नु मन्यसे नैवं पूर्वमसंस्थाः संप्रत्येवं मन्यस इत्यर्थः वाक्यारंभ

सूचनाय आकार इत्यपरे तथा स्मृतेः सूचक आकारः प्रयुज्यते ततः स्मृतोऽर्थो निर्दिश्यते आ एवं किल तदिति अत्र

च वा वच स्मा रूणा पो रू डि॰ दित्यत्रैवता सर्थ अनो वा वच स्मरणाध्या मन्यत्रईषदर्थाद्यभावे पि डि॰ संबोध्यं तेन आमेन्यस्य रजसो
यद अ आं अ पो वृणा ने सत्र सप्तम्यर्थे ऽर्थ्याकारस्य डि॰ तेन आ कोनु ना रिसकृच्छ्रं दसीति प्रवर्तत इति षष्ठे इदं नादयः पुनः चेतत् डि॰
दडि॰ तोरन्यतरस्तल्लक्षणमात्रेणार्थाद्भयविवेकतामेतन्नापिलाघवादडि॰ लक्षणेतात्पर्यमाश्रित्य भागांतरस्यानयुत्यानुवाद
रूपत्वात् ओत् ओदंतो निपातः प्रगृह्यसंज्ञः स्यात् आहो इति उताहो इति निपात इति किं देवोसि वपटूले विस्पावासंआ नायवा
याहि विछ्णोवा यनुगविस्पयमाहे स्पेत् देवनिपातग्रहणस्य व्यानर्थमिति तन्न प्रगृह्यसंज्ञायां सत्याम पिक्षस्य भावात् ॥
नचैवं प्रकृतिभावापत्तिः प्रकृतिभावविधौ पदांताधिकारात् नचायं पदांतो भवत्येवेति भ्रमितव्यं अनुकार्यानुकरणयोरभेद
विवक्षया अर्थवत्ताभावेन प्रातिपदिकत्वादिभक्तेरनुत्पत्तावेवएतद्रूपाभ्युपागमात् । अन्यथा विभक्तिश्रवणापत्तेः नचैवम
पदस्य प्रयोगासंगतिरिति वाच्यं अपदं न प्रयुंजीतेत्यु द्घोषस्य अपरिनिष्ठितं न प्रयुंजीतेत्येवंपरत्वात् तस्य च सुन्निरुनदि
प विषकतन्नद्विधिशास्त्रमूलकत्वात् इदं तूक्त रीत्या सुद्विभक्तेरप्यप्राप्त्या गो इति स्वरूपस्येव परिनिष्ठितत्वात् अतएव हल्लो
पः श्राकल्ये स्येत्यपि न प्रवर्तते कथं तर्हि पूर्वसूत्रे ओर्थवद्ग्रहणादिति वार्तिके एङः पदांतादिति पूर्वरूपं कृतं इति चेत् तत्रानुका
र्यानुकरणयोर्भेदं विवक्षित्वा विभक्तिं च कृत्वा शेषु अर्थवान्योर्थवानिति समासेन सुपो लुकं कृत्वा व्याख्यानात् एतेन उत्तरसूत्रे संबुद्धा
विति किं गानित्यमाहे स्पदाहरणे वृत्तिकाराअपि प्रसूताः तस्मादिह देवोसीत्यादिकमेव प्रत्युदाहरणं बोध्यं नच एङः पदांतादिसा

शा॰कौ॰५
११६५

नचेह ओदंतस्य कार्यितया

रंभस्य सामर्थ्यादेव तत्सिद्धिः हरेव गच्छेत्यादौ चरितार्थत्वात् नचैव एङः पदांतस्य सामर्थ्ये उ॰ सिउ॰ स्योश्चेत्युत्तरार्थत्वात् उत्तरसूत्रेणानुसंबुद्धिग्रहणा
भावे आङो इतीत्यादावपि परत्वाद्विकल्पापत्तिः पूर्वसूत्रस्य आङो ईशा इत्यादौ उत्तरस्य तु वि[ष्णो] इतीत्यादौ लब्धावकाशतया विप्रतिषेध
संभवात् उत्तरत्र तु विशेष्यासंनिधानेन तदंतविधिविरहाद् ओकारमात्रस्य कार्यित्वाभिन्नविषयकत्वे कथं विप्रतिषेध इति वाच्यं।
त्रपूर्णामित्यादौ प्रकृतिप्रत्ययावयवयोर्नुम्नुटोरिवेहापि फलविरोधेन विषयभेदेपि विप्रतिषेधसंभवात् अथाधिकारपक्षे
उत्तरसूत्रे प्योकारांतस्य संज्ञित्वाच्च शब्दाधिकारपक्षेपि एकोसंलिप्यत्र तु नाक्षिप्तस्य धातोरिकाविशेषणत्वादिहापि संबुध्या
क्षिप्तायाः प्रकृतेरोकारेण विशेषणे तदंतविधिसंभवाच्च तस्मात्सूत्रद्वयेपि गविस्यप्रमादेशिप्रत्युदाहरणं नोक्तिस्थितं प्रकृतिभा
वे पदांतग्रहणं न संबध्यते रस्याशये न तु श्रुतिग्रंथो योग्यः अस्मिंश्च पक्षे मंडूकप्लुतिन्यायेन इकोसवर्ण इत्यत्र पदांतग्रहणं संबंध
नीयमेव अन्यथा गोर्यौ गोर्यैरित्यादावतिप्रसक्तेरिति दिक् स्यादेतत् निपातसमुदायापत्ते आहउ आहो उत्त उ उतो इत्यादि तत्रश्च
आदितद्वावा निपात एकाजित्यनेनैव सिद्धा संज्ञा नचैवमाहोइतीत्यादिषु ऊँ इत्यस्य प्रसंगः निरनुबंधकोयमुकारः न तु उञ् इति स
मापानात् अत एव उञ इति सूत्रे अकारोच्चारणमपि सार्थकं अत एव च उञ ऊँ इत्यत्र भाष्यश्लोकं द्वावुकारावि मौ एकोनुबंधः
कः अपरः सानुबंधक इति नचैवमपि आउओ इत्यत्र आङ् नाङो रेकादेशस्य [illegible] अनाङिति प्रतिषेधे प्राप्ते प्रतिप्रस

ष्णो

त्रे

च

256

वा पदमिति वाच्यं अनाङिः सूस्य पर्युदासाश्रयणे नाङः आङो रेफादेशस्य आदिवद्भावादनाङ्ग्रहणेन ग्रहणात् प्रसज्यप्रतिषे
धे हि असमर्थसमासो वाक्यभेदश्च स्यात् भाव्येपि प्रतिषिद्धार्थमेतदित्युक्तिरभ्युच्चयमात्रं कथमन्यथा अनुपदमेव अदोभव
दित्यत्रातिप्रसंगमाशंक्य प्रतिपदोक्तस्यैव ओकारस्य ग्रहणमिति समादधीत तस्मादिदं सूत्रं विनापि सर्वं लक्ष्यं निर्व्यूढ
मेवेति चेत् अत्रोच्यते आहो उताहो इत्यादौ न निपातसमुदायाः किंत्वेक एव तानत्र एतत्सूत्रबलात् प्रतिपदोक्तस्य ओकारस्य ग्र
हणमिति भाष्यबलाच्चाध्यवसीयते तेन आम् आहो देवदत्त इत्यत्र आम एकान्तरमामन्त्रितमिति निघातप्रतिषेधः सिद्धः अत
एव पदकारैरपि ओ पुवर्तम रुतः तस्मादो ओ इति स्यादि एकपदे नेत पठ्यते तदेवं सूत्रकारभाष्यकारपदकाराणां संवाद एवेति स्थि
ते निपातसमुदाय एवायमित्याश्रित्य एतत्सूत्रप्रत्याचक्षाणाः परास्ताः स्यादेतत् अनदः अदः समभवददो भवदित्यत्रातिप्रसं
गः ... तस्य निपातत्वात् ऊर्यादिच्विडाचश्चेति गतिसंज्ञाविधानेपि प्राग्रीश्वरान्निपाता इत्यस्याधिकारात् न च लक्षणप्रतिप
दोक्तपरिभाषया लाक्षणिक ओकारो व्यावर्त्यतामिति वाच्यं वर्णग्रहणेषु तत्परिभाषाया अप्रवृत्तेः अथापि चोयवायावः इत्यपि
हरयेऽ इत्यादौ न प्रवर्तेत स च केचक्रिरे इत्यादौ प्रतिपदोक्ते चारितार्थ्यात् वर्णस्य प्राधान्ये मास्तु परिभाषाविशेषणे तु स्यादेवेति चे
न्न अविशेषणप्रवृत्तेः सप्तपाद इत्यात् तथा [illegible] वक्ष्यामः अभ्युपेत्यापि ब्रूमः अगो गोः समभवद्गोभवदित्यादौ गमे
ओ इत्योकारस्य प्रतिपदोक्तत्वेन नयातिप्रसंगः स्यादेव न चेह गौणमुख्यन्यायेन समाधानमस्तु तथा हि सर्वे भवति

न्

श्रात्मणा स्त्रद्भवति रेषस्तः मद्भवस्तित्वं तद्भवाम्यहमित्यादौ वचनपुरुषव्यवस्थानुरोधेन चित्प्रत्ययस्थले सर्वैव प्रवृत्ते
रेव कर्तृत्वमिति सिद्धांतस्थितिः तथा च प्रवृत्तौ आरोपेण वर्तमाना द्विवृत्तिर्वा चकाच्छब्दाच्चेतनो चित्प्रत्ययं प्रति
प्रवृत्तिमूलस्य वाहीकादिवृत्ते गोशब्दस्य गौणार्थता स्पष्टैव अत एव महान्महान् [illegible] भूतो महद्भूतश्चन्द्रमा इत्यादावा
न्महत इत्यात्वं न प्रवर्तत इति चेन्न दृष्टांतदार्ष्टांतिकयोर्वैषम्यात् तथा हि त्रिविधरूपोपादाने गौणमुख्यन्यायः तस्या
थैवदूहणे नानर्थक्ये सत्येतस्य शिभाषामूलकत्वात् अर्थोपस्थितेश्च स्वरूपविशेषग्रहसापेक्षत्वात् तथा चान्महत इति वि
श्लिष्टरूपग्रहणेन विधीमानमात्वं गौणेन भवतीत्युक्तं इह तु ओदिति वर्णपुरस्कारेण विधीमाना प्रगृह्यसंज्ञा कथं गौ
णार्थवृत्तेर्न भवेत् निपातसंज्ञा तु तस्यापि मुख्यैव अत एव हि संज्ञा श्वशुरस्यापत्यं श्वाशुरिरिति अत्र राजश्वशुराद्यत् प्र
वर्तते अत इञ् तु प्रवर्तत एव अन्यथा इञोयतश्च तुल्ययोगक्षेमत्वेव स्यात् अत एव हि गौर्वाहीको ब्रूते गां वाहीकं पाठयेसा
त्यादौ वृध्यात्स्त एव एतयोरपि वर्णाश्रयत्वात् गोत इति परत्वमोकारांतोपलक्षणार्थमिति व्याख्यानात् तथा च ओ
तो मिति सूत्रे भाष्यकृद्वक्ष्यति गामित्यत्र परापि वृद्धिर्निरवकाशेन आत्वेन बाध्यत इति तन्नैवं केयटोपि वक्ष्यति ओत इति
सूत्रं पाठ्यं ओकारांतोपलक्षणतया वा गोतः स्येत व्याख्येयमिति वृत्त्यादिग्रंथेष्वप्येवमेव स्थितं यनुवदंति मुख्य एव स्वा

१

२ य

र्थे सास्नादिमति गोशब्दो वृत्त्या तेन लभते ततो वाहीकादिशब्दांतरसन्निधानाद्गौणता प्रतीतिः गोभवदित्यत्र गोत्वार्थत्वं तां विना
स्थिरेव दुर्लभमिति वैषम्यं तस्मात्स्वरकार्येऽयं न्यायो न प्रातिपदिककार्येऽपीति स्थितमिति तच्चिंत्यं वाक्यसंस्कारपक्षे वृत्त्यास्य
प्रवृत्तितः प्रागेव गौणार्थावगतेः यत्तु कारकाणां क्रिययैव श्रौतः संबंधः तत एकक्रियावशीभूतानामरुणैकहायनीन्याये
न पार्ष्ठिकः परस्परावच्छेदः तथा च गामानयेत्यन्वयवेलायां न गौणार्थता किंतु वाहीकेन सह पार्ष्ठिकावच्छेदवेलायां न
चांतरंगत्वेन प्रवृत्तः पदसंस्कारो बहिरंगगौणत्वप्रतीतावपि निवर्त्तेत इति तदपि न तावतापि क्लृप्ते पाठेऽतिक्रियान्वयापेक्षेव गौ
णताया आश्रयणीयत्वात् करोऽपि कर्मभीष्मादयोऽपीति पक्षे कथंचिदुक्तिसंभवेऽपि सामानाधिकरण्या द्वीपादेर्द्वितीयेत्येवंह
पे भाष्योक्तपक्षांतरे त्वदुक्तन्यायानवतारात् श्वाग्भिर्भगुरित्यत्र इओपभावापत्तेश्च । शब्दप्रयोक्ता वाहीके निष्ठस्य कर्मत्वादे
र्विवक्षितत्वाच्च तस्माद्गौणाश्रयत्वाद्वृत्त्यात्व इत्येव तत्त्वं न तु प्रातिपदिककार्यत्वादिति अतएव एकाच्च प्राचामित्यादौ प्रातिप
दिककार्यत्वेऽपि न स्मार्यदेयः तिशिरूपपुरस्कारेणैव सर्वनामसंज्ञाविधानात् अभिव्यक्तपदार्थायेत्यपि गौणमुख्यन्याय
सिद्धार्थकथनपरं प्रसिद्धाप्रसिद्धयोरप्रसिद्धे मुख्यत्वे गौणत्वे इत्यन्यत्र विस्तरः अतएव सर्वादिसूत्रे संज्ञोपसर्जनप्रतिषेध इति वा
र्त्तिकं प्रत्याचक्षाणेन हरदत्तेनाह संज्ञाप्रतिषेधस्तावन्न वक्तव्यः अभिव्यक्तपदार्थायेत्येव सिद्धत्वादिति यत्तु तत्र कैयटो वक्ष्य

ति प्रसिध्यप्रतिद्वंद्ववशात्संभवन्नपि गौणमुख्यन्यायो नेह्योक्तः परकार्यैषयं न तु प्रातिपदिककार्येष्विति ओत्सूत्रे उक्तत्वादिति तद
प्युच्चयमात्रं युष्मदस्मदोः स्वरूपमात्राश्रयणं कार्याणामुपसर्जनतायामिव संज्ञाया प्रवृत्त्यापत्तेः युष्मदादिपदं असाधुत्वमर
स्यादावपि तदापत्तेश्चेति दिक् तदेवमदोभवद्वोभवदित्यादौ ओदिति प्रगृह्यसंज्ञा अव्ययत्वादिवदैवोरेति पूर्वपक्षः पर्यवसन्नः अ
त्रोच्यते पूर्वसूत्रे अनाङिति पर्युदासादाङ्सदृशाः प्रतिपादपठिता एव निपाता गृह्यन्ते इहाप्यर्थाधिकारेण अनाङ्ग्रहणानुवृ
त्त्या वा तथैवेति सर्वं सुस्थं तथा च सर्वादिसूत्रे अकारात्कारो अनुपसर्जने त्यस्य तस्यैव भवतः इति प्रपट्टके तदोः सः साविति सत्वं तद्धि
नित्रोषि तत्साद्गुणतायामपि स्यादित्याशंक्य त्यदादीनामस्त्यत्र अनुपसर्जनादिति विभाषया अनुपसर्जनानामेव ग्रहणे सि
द्धे तथाभूतानामेव सत्वविधावनुवर्तनान्न कश्चिद्दोष इति समाधत्ते कैयटः संबुद्धौ शाकल्यस्येतावनार्षे ऋषिर्वेदः तदुक्तमृषिणा स्या
दौ तथादर्शनात् संबुद्धिनिमित्त ओकारो अवैदिके इतौ परे प्रगृह्यो वा स्यात् विष्णो इति विष्णविति संबुद्धाविति किं गवित्ययमाह इति वृत्तिका
राः एतन्निष्कर्षश्च पूर्वसूत्रे उक्त एव अनार्षे किं ब्रह्मबन्धवित्यब्रवीत् इतौ विति किं पटो३ उञः उञ इतौ प्रगृह्यसंज्ञा वा स्यात् उ इति विति ऊँ
उञ इत्यनुवर्तते शाकल्यस्य प्रगृह्यमिति च प्रगृह्यस्य उञ इतौ परे ऊँ आदेशो वा स्यात् दीर्घोऽनुनासिकश्च ऊँ इति इहापि शाकल्ययोगः स्यात् उ
अ ऊँ इति तदा आदेशो विकल्पितेन रूपद्वयमेव स्यात् ऊँ इति उ इति अतो योगं विभज्य प्रगृह्यसंज्ञापि विकल्पिता एवमपि ऊँ इति द्वितीयपरसू
त्रे यदि प्रगृह्यग्रहणं शाकल्यग्रहणं चेत्युभयमपि नानुवर्तेत तदा उञः स्थाने नित्यमूँभावविधानात् प्रगृह्यस्यैवाप्रगृह्यस्यादेशः स्यात्

तत्र प्रगृह्यस्यादेशे कृते स्थानिवद्भावेन प्रगृह्यत्वात् ऊँ इतीति रूपं सिद्धं न चानल्विधाविति प्रतिषेधः उञ इति समुदायरूपेणाश्रयणा
त् तथाहि टइ इति सूत्रे टइति समुदायरूपाश्रयणादग्रहीदित्यत्र च अग्रहील् इति दीर्घस्य स्थानिवद्भावमाश्रित्य सिज्लोपः सिध्य
तीति स्थानिवत्सूत्रे वक्ष्यते अप्रगृह्यस्य तु आदेशे अननुनासिको यण् स्यात् तथा च इष्टरूप त्रितयमध्ये ऊँ इत्येकमेव रूपं सिद्धं न स
र्वं रूपमिति सख्याभिः अतिव्याप्तिश्च सानुनासिकवकारयुक्तस्यानिष्टस्यापि प्रसंगात् अथ प्रगृह्यग्रहणमात्रमनुवर्तेत तदा प्रगृह्य
स्य उञो नित्यमादेशः स्यात् ततश्च विति ऊँ इतीति द्वे एव रूपे स्यातां न तु उ इतीति तृतीयं अथ शाकल्यग्रहणमात्रमनुवर्तेत तत उञ्मात्र
स्य आदेशविकल्पनात् ऊँ इति उ इतीति द्वयं प्रगृह्यस्य विति विती इति द्वयमप्रगृह्यस्येति संकलनया रूपचतुष्टयं स्यात् तत्र त्रितयस्येष्टत्वे
पि सानुनासिकवकारयुक्तमनिष्टमापतति तस्माच्छाकल्यग्रहणं प्रगृह्यग्रहणं च द्वयमप्यनुवर्तनीयं । इह विभक्तिविपरिणा
मेन प्रगृह्यस्येति व्याख्यातं आदेशसामानाधिकरण्येन प्रगृह्यं ऊँ इत्येतदादेशो भवतीति व्याख्यानेपि न कश्चिद्दोष इत्यवधे
यं ननु परिनिष्ठितमेव प्रयोगार्हं परिनिष्ठितत्वं च अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वं निहतेतिटं ताहावव्या
प्तिवारणाय अप्रवृत्तेति नैकल्पिके ङगमोद्देश्यतावच्छेदकाक्रान्ते सेद्धस्याराव्याप्तिवारणायोक्तं नित्येति अनाहनपचूल
दृस्यादीनामलोपिकृतेति सिद्धान्तः तथा च उ इति रूपेतद्रूपं न स्यादेव अत्र हि शाकल्यमतेन आदेशेन भाव्यमेव इतरेषां तु
मते प्रगृह्यत्वमेव नास्तीति चेन् अवैदेन परि शाकल्यग्रहणं यथाश्रुतं स्यात् न तु विकल्पमात्रं तात्पर्यं तथा च भाष्ये शाकल्ये

॥सू॰कौ॰॥५
॥९८

स्प

विभाषा यथा स्यादिति । उञः ऊँ इति शाकल्यस्येतीति च तथा च कैयटः शाकल्यश्रुतेरेवफलं वा ग्रहणेन प्रतिपाद्यतीति स्मृतं तदनुसंधा-
नद्वारेण विभाषा संपद्यत इति च यद्वा अस्तु शाकल्यग्रहणं यथाश्रुतं तथापि विभाषात एकारः अनाङ् इत्यनेनैव सिद्धः उञ इति ताव द्वि-
मोऽयमर्थः तथा च शाकल्यभिन्नमतेन प्रगृह्यत इति प्रथमसूत्रार्थः उत्तरसूत्रे प्रगृह्यत्वाभावे इत्येतावतैव शाकल्येनेति पुनः शाक-
ल्यानुवृत्त्या इतरेषाम् अपि मते पाक्षिकः प्रगृह्योऽस्तीत्यनुमीयते तेन उ इति तद्रूपं सिद्धं अथवा उत्तरसूत्रे पुनः शाकल्यानुवृत्तिसाम-
र्थ्याच्छन्दोऽधिकाराभावपक्षे न शाकल्यस्यैव तत्रैव परत्यान्तरं गृह्यते अस्मिंश्च पक्षे प्रगृह्यत्वाभावस्यानुवादसामर्थ्यादेव प्रगृह्यता
विकल्प्यते यथा ढकि लोपस्यानुवादसामर्थ्याद्धुगिति दिक् आदेशाभावमनुनासिकमिति निर्देशादेवत्यनं तथा च बहुचप्राति-
शाख्ये उकारश्चेति करणेन पृक्तोऽपृक्तो द्राघितः शाकल्येनेति रक्तसंज्ञोऽनुनासिक इति च अत एव पदेतनुँ इति पदकाराः पठन्ति स्यनु-
करणे यत्रानुनासिकोऽयं विशेषविधिः प्रवर्तते ईदूतौ च सप्तम्यर्थे शाकल्यस्येताविति निवृत्तं ईदन्तमूदन्तं च शब्दरूपं सप्तम्यर्थे वर्तमानं प्रगृ-
ह्यं स्यात् अध्यस्यां मामकी तनू मामकी तनु इति प्राप्ते सुपां सुलुगिति लुप्तसप्तमीकावेतौ मामकी इति तनू इति पदकाले कार्योदाहरणे
गौध्ये सोमो गौरी अधि श्रित इति संहितायामुदाहरणं ईदूताविति किं प्रियः सूर्ये प्रियो अग्ना भवाति अग्निशब्दात्परस्याः सप्तम्या
डा आदेशः पदकारैः प्रगृह्येषु इति शब्दप्रयोगस्य नियमितत्वेनेहापि पदकाले इति शब्दप्रयोगप्रसंग इति प्रत्युदाहरणमिदं सप्तमीग्रहणं किं ।
धीती मती सुष्टुती धीत्या मत्या सुष्टुत्या इति प्राप्ते तृतीयैकवचनस्य पूर्वसवर्णो ईकारः ततो अकः सवर्णे इति दीर्घ एकादेशः न त्विह सुपो लुक् ।

ह्रस्वश्रवणापत्तेः ॥ अर्थग्रहणं किं ॥

वाप्यामश्वो वाप्यश्वः नद्यामातिर्नद्यातिः संज्ञायामिति सप्तमीसमासः ननु सप्तम्यर्थोपीहास्त्येव तत्कथमर्थग्रहणेन वृत्तेपीष्टसि
द्धिरिति चेत् इत्थं जहत्स्वार्था वृत्तिरिति पक्षे पदेऽवयवे वृत्तौ वर्तिपदार्थानामानर्थक्यादीदंतमिहानर्थकं न तु सप्तम्यर्थं वृत्तीति स्पष्टमे
व अजहत्स्वार्था वृत्तिपक्षेपि उपसर्जनपदं न स्वार्थमात्रे पर्यवस्यति किंतु तत्संसृष्टे प्रधानार्थे अर्थग्रहणसामर्थ्याच्च यावानर्थः
सप्तम्या विधीयते आधेयासंसृष्टः निष्कृष्टाधिकरणरूपः तावन्मात्रस्य ग्रहणमिति वृत्तिप्रविष्टे न भविष्यति यद्यपि वाक्यव
त्समासेपि तु सप्तमी बलेन अधिकरणमात्रबोधः पश्चात्त्वाधेयार्थेन तया संसृष्टबोध इति वक्तुं शक्यते तथापि सिद्धे ते तावत्समर्थः पद
विधिरिति परिभाषानुरोधात्समासस्थले एकार्थीभाव एव सामर्थ्यं न तु व्यपेक्षा अत एव उपसर्जने न विशेषणान्वयो भवति शक्यैकदेश
त्वादिति द्वितीये वक्ष्यते मीमांसकादीनामपि निषादस्थपतिन्यायेन पूर्वपदार्थसंबंधिनि लक्षणाभ्युपगमाद्युक्तं च अर्थग्रहणे न वा
प्यश्वनद्यातिप्रभृतेर्न वृत्तिः आतिर्बलाका शरारिरातिराटिश्च बलाका विसकण्ठिकेत्यमरः आधारस्थत्वेपि स्त्रीलिंगाः बलाका
साहचर्यादिति केचित् वस्तुतस्तु शरार्यादयः स्वरूपपक्षिविशेषवाचका न तु बलाकापर्यायाः । अतो बकोलो साहचर्यमिति चित्करं
स्त्रीत्वं तु अस्ये बलाकोशे स्त्रीकांडे आटिः शरारिर्वरटीत्युक्तेः आतेरपि तत्साहचर्यात् तपरकरणमसंदेहार्थमिति वृत्तिः अत्र वा
र्तिकं ईदूतौ सप्तमीत्येव लुप्तेऽर्थग्रहणाद्भवेत् पूर्वस्य चेत्सवर्णोऽसावाडाम्भावः प्रसज्यते वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि ज्ञापकं स्यात्त
दंतत्वे मा वा पूर्वपदस्य भूत् अस्यार्थः ईदूतौ सप्तमीत्येवालुप्ते नार्थे अर्थग्रहणेन अत्रोत्तरमाह लुप्त इति संज्ञाविधौ प्रत्ययग्रहणे तदंतवि

धेरभावात्सप्तम्या एव संज्ञा स्यात् लुप्तेपि सुपि प्रकृतिभागस्य संज्ञासिद्धये कर्तव्येवार्थग्रहणमित्यर्थः ननु सोमो गौरी व्य
स्यादौ विभक्तिर्न लुप्यते किं तु धीती मतीत्यादाविव पूर्वसवर्णे कृते भकः सवर्णे इति दीर्घैकादेशे तस्यादिवद्भावात्सप्तमी धे
ग्रहणेन ग्रहणाद्रस्येव सप्तमी स्यादित्याशंक्याह पूर्वस्येति आडाम्भावास्तु एकादेशं बाधित्वा परत्वादागमत्वाच्चाडामौ स्याता
वेति मित्यर्थः तस्माल्लुग्ग्रहणे स्थिते अर्थग्रहणं कर्तव्यमेवेति भावः नन्वर्थग्रहणं मास्तु वचनसामर्थ्यात्तु संज्ञाविधावपि तदंवि त
धिर्भविष्यतीत्याशंक्याह वचनादिति यत्रैव दीर्घत्वं तत्रैव वचनात्स्यात् इति न भुक्तं सरसीशयानमिति यथा अत्र हि सरः
शब्दस्य सप्तम्येव च न स्यात् याशिपालीकाराणामुपसंख्यानमिति ईकारादेशे सप्तमी श्रूयते तथा च सोमो गौरी इस्या
दौ न स्यादेवेत्यर्थः एतदेव द्रढयति तत्रापीति तत्रापि सप्तम्या लुगेव न तु ईकारः यदि सरसीशब्दो वर्तते असंदिग्धे संदिग्धव
च नमेतत् शास्त्रात् ति चेत्प्रमाणं स्युरिति यथा अस्ति हि सरसीशब्दः रसिला पथे हिमहंति सरांसि सरस्यः सूच्यंते इति
भगवद्भक्तैः कासारः सरसी सरश्चेत्यमरकोशाच्च तथा च सरसीः परिशीलितुं मयेत्यादिप्रयोगोपि दृश्यते। एवं च स
रसीशब्दोपि लुप्तविभक्तिक एवेति वचनात्तदंतविधिरिति स्थिते ननूक्तरीत्या अस्तु सरसीशब्दः सरःशब्दोपि सांतो निर्विवाद
एव तथा च सांतादेव ईकारादेशोपि अस्तु एवं हि सति संज्ञाविधौ ज्ञापकात्यकस्य तदंतग्रहणस्य पुनराश्रयणं न कर्तव्यं भवती

त्रिचेन्न तथा सति ईकारस्य स्तुतेनानुदात्तस्य तयासरः शब्दस्य च स्वधातोः सुनिव्युः स्यादित्तस्य नित्स्वरेण स्वर इति पदमाद्युदात्तं प्र
सज्येत गौरादिषु पिप्पल्यादयश्चेति पाठात् पिप्पल्याद्यलः पातिनः सरः शब्दात् ङीषान्तोदात्तमिदमिष्यते तथैव वेदे पाठात् एवं तर्हि प्रगृह्य
संज्ञा प्रकरणे प्रत्ययलक्षणं नास्तीति ज्ञापनायेदमर्थग्रहणमस्तु एवं चाईदूदे द्विवचनमिति सूत्रे ईदूदेदंतं द्विवचनांतमिति ईदूदेदंतं यद्द्विवच
नं तन्मिति पक्षश्च समर्थितो भवति तत्र हि कुमार्योरगारं कुमार्यागारं अमुकेमुके समपद्येतां अमुक्त्वास्त्वावस्त्रे इत्यत्रातिव्याप्तिरिति दोषः सच
प्रत्ययलक्षणविरहादेवोद्धृतस्याज्ञापकमिति प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणाभावस्येति शेषः ह्येदं ज्ञापनमुपयुज्यते तदाह तदंतत्वप्र
त्ति तदंतलगर्भे पक्षद्वयेपीत्यर्थः ननु संज्ञाविधौ प्रत्ययग्रहणे तदंतविधेरभावादेव तदंतपक्षस्तत्र न स्थितस्तस्य परितोषादाह मातेति वाप्य
श्वरत्वादेर्मा भूदित्यर्थः अचेरमवधेयं अवितृस्तृतंत्रिभ्य ईरिति सूत्रादीरित्यनुवर्तमाने याप्येः किंदेच वातप्रमीरिति सूत्राभ्यां शब्दत्रयं मुत्रा
दितं यांत्यनेति ययीर्मुक्तिमार्गः पिबतिरसान्याति वा लोकमिति पपीः सूर्यः वातं प्रमिमीते संमुखधावनादिति वातप्रमीः भृंगो मृगाद्भूतिर्वा नमृ
गनाम्ना पशुविशेषः एभ्यः स्त्रियामपि ङेऽसवर्णे दीर्घे ययी पपी वातप्रमी इति रूपं निर्विवादं। तथा च ईदूत्श्रूयमाणस्य ईकारस्य सप्तमीत्वात्तत्रापि
सस्सीयदीप्ससंगतं ईकारस्य श्रूयमाणस्यासंभवात्सामर्थ्यात्तदंतविधिर्भविष्यतीति हि तस्यार्थः तस्मादूकारांशे सामर्थ्यात्तदंतविधोल
ध्येसो मो गौरी इत्यादावपि भविष्यतीत्याशयः तुल्यः ययी आसन्तकुःसादौ तु भाव्यमेव प्रकृतिभावेन नचायं योगश्छांदसः तथा विधा
नामेवोदाहरणं इतेत्यादिरिति वाच्यं मुनित्रयोक्तेः विनाऽस्मादिच्छया छांदसत्वकल्पनेऽतिप्रसंगात् लोके प्रगृह्यत्वं नभवतीत्य
स्मिन्नर्थे प्रमाणानुपलंभाच्च अप्रतिषिद्धमनुमतं भवतीति न्यायेन लोके पिपयी पपी वातप्रमीरित्येषां प्रगृह्यत्वस्यैव न्याय्यत्वाच्च।

दंत

न पक्ष

नि:

265

॥ सू॰ कौ॰ ५
॥११॥

प

अतएवइगुपधज्ञाप्रीकिरःकइतिसूत्रे दृशेश्चेति वार्त्तिकमुपादाय क्सप्रत्ययः स्यादेशाश्च छंदस्येव भाष्ये सदृक्षासस्त्युदाहृतत्वादिति केचिदिति
व्याचख्यौ तन्न दृशेस्तत्यारम्भात् सर्वत्र वर्तमानमते तस्यापरितोषमाविष्कर्तुं रितिदिक् ॥ दाधाघ्वदाप् ॥ दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युः दा
प् दैपौ वर्जयित्वा तत्र दारूपाश्चत्वारः । दाञ् प्रणिददाति दाण् प्रणियच्छति दो प्रणिद्यति देङ् प्रणिदयते धारूपौ द्वौ डुधाञ् प्रणिदधाति
धेट् प्रणिधयति वत्सो मातरं अदाबिति किं दाप् लवने दातं बर्हिः लूनमित्यर्थः घुसंज्ञाभावान्नेहदद्धोरितिन प्रवर्तते दैप् शोधने अवदातं मुखं
इह घुत्वाभावाद च उपसर्गात्त इत्यत न घुप्रदेशा नेर्गदनदेत्यादयः इह दोदेङ्धेटामनुकरणानि व्यवस्थाप्य तत्र प्रवृत्तिवदनुकरणमिष्यतिदे
शादादेच उपदेशे शितीत्यात्वं क्रियते अनैमित्तिकमात्वं शितितु प्रतिषेध इति सिद्धांतात् नचैवं विभक्तेरुत्पत्तिर्न स्यादधातुरिति प्रातिपदि
कसंज्ञानिषेधादिति वाच्यं अधातुरिति हि पर्युदासोयं न तु प्रसज्यप्रतिषेधः अस्ति चेह सादृश्यमधातुत्वं पद्धा पदैर्नैतेभ्यः इत्यादाविवेहापि
कार्ये विशेषपुरस्कारे तोवातिदेशप्रवृत्त्य प्रवृत्ती भविष्यतः ततश्च लुक्तौ दारूपाणां द्वयोश्च धारूपयोरेकशेषं कृत्वा द्वंद्वः कर्तव्यः प्रणिदात्तेत्यादौ
कृतात्वानां दोदेङ्धेटां तु स्थानिवद्भावात्सिद्धं घुत्वं लक्षणप्रतिपदोक्तपरिभाषया निरनुबंधकग्रहणे न सानुबंधकस्येत्यस्याश्च नेह
प्रवृत्तिः सर्वेषां स्वरूपेणवानुकृतत्वात् अतएव दारयति धारयत्योर्नेति प्रसंगः तयोरनुकरणे आत्वासंभवेन इह दृध इत्यनयोरनुपात्तत्वात् ननुरू
तात्वस्य सूत्रे निर्देशात्प्रणिघाति प्रणिधयतीत्यादौ चात्वविरहात्कथं घुत्वमिति चेत् भ्रांतोसि नहि वयं कृतात्वमनुकुर्मः येनोक्तदोषः स्यात् अपि
तु देदोधे इत्येतेषामेवानुक्रियमाणेषु लक्षणवशान्निष्पन्नमात्वमित्युक्तं न च लक्षणेन स्वरूपान्यत्वेपि अनुकरणता हीयते सख्युरसंबुद्धौ वि
त्यत्रापि सखिरूपप्रतीतेः गवित्ययमाहेत्यत्र गोशब्दप्रतीतेश्च रीङस्तु नेह ग्रहणं तदनुकरणे आत्वासंभवात् वार्तिकमते एतेतानां

न

दीङ् दीनामात्वविधानात् भाष्यमते तेन्निमित्ते परत्वात् तद्विधानात् तेन दीङः स्त्वनादावात्वे कृतेपि घुसंज्ञाविरहात् प्रनिदात्तेत्यत्र नेर्गदेति
निखं णत्वं न भवति शेषे विभाषेति वैकल्पिकं तु स्यादेव तथोऽपादास्तास्य स्वरः शिक्षकस्येत्यत्र स्थाघ्वोरिच्चेति इत्वं न भवतीति सूत्रकार
स्य मतं नन्वस्मिन्पक्षे दाप्दैपावनुकृतौ न वा आद्ये अनुकरणपर्युदासोभयसामर्थ्यान्न योर्घुसंज्ञाविकल्पः स्यात् अन्त्ये अदाविति व्य
र्थं स्यात् अननुकृतत्वादेव दाप्दैपोर्घुसंज्ञाप्राप्तिविरहादिति चेत् अदाबित्यस्मिन्नसति तयोरप्यनुकरणं संभाव्येत नहि लक्षणैकचक्षु
षोऽस्मदादीनां दाप्दैपोश्चैवं लक्ष्यं किंचिदनुभूयते यद्बलाद्ग्रहणाग्रहणे व्यवस्थाप्येयातां व्याख्यानतो विशेषप्रतिपत्तिरिति परमवशि
ष्यते किंतु अगतिकगतिरेषा अनभिधानवत् नचतद्बलेन सिद्धस्य प्रत्याख्यानं शोभते वार्तिककारमते तु प्रयोगस्थानामेव दाधारूपाणा
मिदमनुकरणं नचैवं प्रणिघति प्रणिदयते इत्यादौ शिति न स्यात् आत्वाभावात् तथा देङ् रक्षणे अदित धेट् व्यधित प्रणिदाता प्रणि
तत्र धातेत्यादावपि न स्यात् आत्वस्य लाक्षणिकत्वात् लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति न्यायादिति वाच्यं वचनबले
नैवं तत्समाधानात् तथा च कात्यायनवार्तिकं घुसंज्ञायां प्रकृतिग्रहणं शिदर्थमिति भारद्वाजीयास्तु पठंति शिद्विकृतार्थमिति तथाच
दाधाप्रकृतयो घु इति पठितादाश्च प्रकृतयश्चेति द्वंद्वगर्भात्संनिधानाद्दाधामेव प्रकृतय इति व्याख्येयं भाष्यकारास्तु वार्तिकं प्रत्याचख्युः
तथाहि नेर्गदेति सूत्रे तावदवश्यं प्रकृतिग्रहणं कर्तव्यं प्रणिमयते प्रण्यमयते इत्यत्रापि णत्वं यथा स्यात् तदेव पुरस्तादपकृष्य
त्ति घुप्रकृतिमाङिति पठिष्यामः घुश्च प्रकृतिश्च माङ्चेति द्वंद्वः सन्निधानाच्च पूर्वोत्तरयोः प्रकृतिर्गृह्यते नचैवं मीनाति मिनोत्योरपि माप्रकृति
लाद्ग्रहणापत्तिः माङो ङकारानुबंधस्यैव तत्रावश्यपठनीयत्वात् अन्यथा मामानेत्यत्राप्यतिप्रसंगात् तस्माद्घुप्रकृतिमाङिति पाठे

॥मू०को०५
॥१२॥

व्य

ते प्रतिघ्रति प्रणिदयत इत्यादेः सिद्धत्वाच्च ईर्थता वद्घुसंज्ञायां प्रकृतिग्रहणं न कर्तव्यमिति निष्कृतं भारद्वाजीयोक्तरीत्या विस्तरार्थं कृते
ध्यमिति पुनरवशिष्यते तदपि न गामादाग्रहणेष्वविशेष इति परिभाषयैव लाक्षणिकस्यापि दारूपस्य घुसंज्ञासिद्धेः अस्याश्च भा
बायांरेपः पित्संलिंगं तद्धि अदाविति सामान्यग्रहणार्थं क्रियते लाक्षणिकत्वादेव घुसंज्ञायां दैपग्रहणाभावे तु किं निषेधे सामान्य
ग्रहणार्थेन पित्सेन नचैवमपि धेटो घुसंज्ञा न स्यादेवेति वाच्यं तत्र दधातेर्हि रिति सादेशविधानादेव तद्भावाप्रसंगात् नन्वेवमपि गा
मादाग्रहणेष्वविशेष इत्येतेन लक्षणप्रतिपदोक्तपरिभाषाया निरनुबंधकग्रहणे इति परिभाषायाश्च यथा बाधस्तथा अर्थ
वद्ग्रहणपरिभाषाया अपि बाधः स्यात् तथा च प्रतिदापयति प्रणिधापयतीत्यत्राप्यतिप्रसंग इति चेन्न गदादीनां य उपसर्गस्तस्मा
न्निमित्तादुत्तरस्य तानेव गदादीन् प्रत्युपसर्गस्य नेः शितिव्याख्यानात् दापयति धारयत्येवमादौ तु द्याधारूपयोरनर्थकत्वान्न तं प्रति उपसर्गत्वं
यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा इति वक्ष्यमाणत्वात् नचैवं प्रणिदापयति प्रणिधापयतीत्यत्रापि णत्वं न स्यादिति वाच्यं तत्र पु
गागमात्पूर्वं दाधारस्यावस्थायां घुसंज्ञाप्रवृत्तौ पुग्विशिष्टस्यापि घुग्रहणेन ग्रहणात् अनागमकानां सागमका आदेशा इति पक्षे तु स्थानि
वद्भावेन घुसंज्ञासिद्धेः ननु आनन्तर्यमेवैतयो रान्तर्यं संप्रयोगो वा नणश्च दग्धरथवदिति स्थानेऽन्तरतमसूत्रस्य भाष्यरीत्या दारयत्यादेरपि दापय
त्यादिसाम्यमेव निष्पन्नस्यात्तो रपरत्वाभ्युपगमेन रेफयुक्तो र विशेषादिति चेत्सत्यं सिद्धं तु प्रसंगे रपरत्वादिस्मरणेन परसूत्रस्य वार्त्तिकरीत्यास
माधानं कृतं भाष्यरीत्या तु प्रसक्तो दोषः प्राग्युक्तसूत्रकारमतमाश्रित्य उद्धर्तव्यः नहि दधूदस्तनयोरनुकरणे आत्वं लभ्यत इति दिक् रूढंस
नधेयं प्रति [illegible] दापयतीत्यत्रापि उपसर्गयोः प्रकृत्यर्थविशेषणत्वे सत्येव नेर्गदेति नियमात् णत्वं प्रत्यर्थविशेषकत्वे तु घुसंज्ञकं प्रत्येनुप

परि

घो

घो

सर्गलाछेषे विभाषेति विकल्प एव न तु नित्यं णत्वमिति स्यादेतत् उपदिदीषत इत्यत्र सनि मीमेति इस्भावः स्यात् वार्तिककृ
ता घुसंज्ञायां प्रकृतिग्रहणात् सूत्रकारभाष्यकारस्तु नासौ दोषः सूत्रकृता दीङो न नु कृतत्वात् भाष्यमते णत्वे प्रकृतिग्रहणेऽपि
घुसंज्ञायां तद्विरहादिति चेत् सत्यं वार्तिकमतेऽपि नेयं दाप्रवृत्तिः एजन्तानामात्वविधानाभ्युपगमात् न चैवं आदन्तत्वनिबंधनघुत्वप्र
सक्त्याद्यसिद्धिः तत्राकारान्तरलक्षणप्रत्ययविधिरिति वक्तव्ये नैव तत्सिद्धेः भाष्ये तेन दूचन प्रत्याख्यानायुक्तम्‌विषये भाष्यसिद्धा
न्तितत्वमित्यस्याशयेतत् इदं सर्वं शिष्यते भाष्यवार्तिकोभयमतेऽपि उपादानस्य स्वरः शिक्षकस्येत्यत्र स्थाघ्वोरितीत्प्राप्ते तत्र भाष्ये सन्नि
पातपरिभाषया परिहृते उपरीसन्न इति स्थितेऽज्विषये प्रवर्तमानमात्वं सिद्धो किलमुपजीवति यद्यत्र घुसंज्ञा स्यात्तर्हि स्थाघ्वो
रिच्चेति सिचः कित्त्वं स्यात् अतोऽजीकं समुपजीव्य प्रवृत्त आकारः कित्त्वप्रवर्तकां घुसंज्ञां न प्रवर्तयत्येवेति वार्तिककृता
लुदीङः प्रतिषेधः स्थाघ्वोरित्त्वेति वचनमेव कृतं उभयमतेऽपि दीङः स्तुना दावास्ते कृते प्रणिदाते सादो नेर्गदेति णत्वं संभ
वति अत एव वार्तिककृता दीङः प्रतिषेध इत्येव नोक्तं किं तु स्थाघ्वोरित्त्वे इति विषयविशेषो निर्दिष्टः सूत्रमते तु न भा
व्यं णत्वेनेति स्पष्टमेव किंच भाष्यवार्तिकयोर्न केवलं सूत्रकृता सह विरोधः किं तु स्वपरेणापि तथाहि भाष्यमते प्रणिदी
यते प्रणिदीनः इत्यादावपि निंसणत्वं णत्वविधौ प्रकृतिग्रहणात् वार्तिकमते तु वैकल्पिकं एजन्तानामेव प्रकृतित्वा
भ्युपगमेन ईदन्तस्याप्रकृतित्वात् अन्यथा उपदिदीषते इत्यत्र सूभावापत्तेः तदेवं प्रणिदाते सादो सूत्रकृता सह द्वयोर्विरो
धः प्रणिदीनः इत्यादौ तु भाष्यवृत्तासहकृतेतरयोर्विरोधाद्दुष्परिहर इति अत एव कर्तव्य यथोत्तरं मुनीनां प्रामाण्यमिति सि

॥श.कौ.५
॥१३॥

ह्रूंता ह्रुष्योतङीस्या सर्वत्र दीर्घः परेर्नेर्नित्यं णत्वमिति स्थिते सूत्रवार्तिकमतेपि ह्रोषेविभाषेति व्यवस्थितविभाषामाश्रित्य भाष्याविरोधः संपादनीयः एवं वाक्यतयेव सर्वनिर्वाहसंभवे मतभेदकल्पनस्यान्याय्यत्वादिति ननु अदाविति प्रतिषेधे दापूलवन इत्यस्यैव ग्रहणं युक्तं नतु दैपः पकारे श्रूयमाणे आत्वायोगादिति चेन्न अनुबंधा अनेकांता इति पक्षे श्रूयमाणस्यापि पकारस्य काकादिवदनवयवत्वेन धातोरंतत्वानपाये आत्वप्रवृत्तेः एकांता अनुबंधा इति पक्षेपि भवत्येवात्वं नानुबंधकृतमनेकांतत्वमिति सिद्धांतात् अत्र चङदीधां माङो व्यतीहार इति कृतात्वस्य मेङो निर्देशो ज्ञापकः नच माङ् मान इत्यस्यैवायं निर्देशः स्यादिति मिमीत इत्यादेः तस्यापि कदाचिद्व्यतीहारे वृत्तिसंभवादिति वाच्यं अपूर्वकालार्थस्य क्त्वाप्रत्ययस्य माङ् मान इत्यस्मादनभिधानात् अचेत्र भाष्यकारोक्तेरेव प्रमाणत्वादित्याहुः एवं च मेङः इत्येव पठनीये माङो व्यतीहार इति गुरुकरणं नानुबंधकृतमनेकांतत्वमिति ज्ञापनार्थमेव भाष्यकारस्तु नायं दैपू किंतु दिवादिषु रापृष्ठो धनेरस्येव पठिष्यत इत्याहुः नच स्वरभेदः दायतीत्यादेरुभयथाप्याद्युदात्तत्वात् ननु ताच्छीलिके चानशि दायमान इत्यत्र स्वरभेदः मृषनिधातोदात्तत्वं ज्ञापितु यानङ्गांतोदात्तत्वमिति चेन्न उभयथाप्यंतोदात्तत्वानपायात् नच स्पस्वरस्य सति शिष्टत्वेन प्राबल्यमिति वाच्यं अन्यत्र विकरणोप्यंतोदात्तताया निर्णयात् स्थानिवत्सूत्रीयः कैयटग्रंथस्तु रवङ्गी वचानङ्पपि इति पर्युदासात्। आत्ममाने खश्चेत्यत्र भाष्ये कैयट बलेन रवङ्गीवचानङ्पपि ध्याय स्यादपस्तु दिवादिषु वादं न तुल्येन न पठिताः गणकार्यमनित्यमिति ज्ञापयात् इरसूत्रस्थ भाष्यस्वोक्तिभ्यां विरोधात्प्रामादिक इति वक्ष्यते प्रत्ययाद्दाश्वसंस्वरस्यादि सिद्धं यत्तु भाष्ये एकांतत्वपक्षेपि न दोषः इत्युपक्रम्य पकापयात् तु तेन न विश्वसदविश्वसे पश्चिकवनिताः रलोपे कृते भविष्यति दास्वं तु भूतपूर्वमनुबंधमाश्रित्य व्युत्पादनीयमिति सिद्धांतितं तच्चेत्थं प्रत्ययलक्षणे सत्यपि अंतलोपे उपदेशागमं

270

तत्संकथमिति अत्रोच्यते पिकरणसामर्थ्यादुपदेशेऽनंतत्साभावेपि आत्वप्रवृत्तिः वस्तुतस्तु उपदेशग्रहणं भाष्यकारेण मन्यते तथा च तत्र वक्ष्यति उपदेशग्रहणं न करिष्यते यद्युपदेशग्रहणं न क्रियते चेतारस्तोतेत्यत्रापि प्राप्नोति अत्राथाचार्यप्रवृत्तिर्ज्ञापयति न परनिमित्तस्यैत्व आत्वं भवतीति यदयं क्रीङ्जीनां णावेच आत्वं शास्ति नैतदस्ति ज्ञापकं नियमार्थमेतत्स्यात् क्रीङ्जीनां णावेवेति यत्तर्हि मीनातिमिनोतिदीङां ल्यपि चेत्यत्र एज्ग्रहणमनुवर्तयतीति न तु प्रतिपद्यतीत्यत्रापि अदावि दा तिप्रतिषेधः स्यादिति चेन्न यथोद्देशपक्षे तरंगबाह्यावस्थायामेव घुसंज्ञाया निर्वृत्तत्वात् कार्यकालपक्षे तु घुसंज्ञायाणत्वसमानदेशत्वात् पूर्वं प्रतिणत्वघुसंज्ञयोरसिद्धत्वेन प्रागेव पूर्वं ततो घुसंज्ञा न स्यादिति दोषः प्रसज्यते अत एव भाष्ये द्वेधा समाहितं दाधाघ्वपिदिति वक्ष्यामि यद्वा दांतावेतौ धातू सूत्रमपि दांतं चर्त्वेन सर्वत्र पकारो निर्दिष्टः अतो दापयतीत्यत्र नासौ निषेधः तस्या ये पिसाद्दांतत्वाद्धेति आद्यंतवदेकस्मिन् आ सहोऽपि आदाविवांतेऽवकार्याणि स्युः औपगवः यथा तव्यादीनां प्रत्ययाद्युदात्तत्वं प्रवर्तते एव मिहू अगो पि आभ्यां यथा वृक्षाभ्यामित्यादौ सुपि चेति दीर्घत्वं भवति एवमिहापि इङ्गतौ दिवादिः एयं अयोयदिति अत्र तादृतो विधीयमानो यत्प्रत्ययो यथा चेयं जेयमित्यादौ भवति तथेहापि इणस्तु एतिस्तु इति क्यपि इत्यमित्येव रूपं न तु एयमिति एकस्मिन्निति किं समाससनयने भवः सामासंनयनः अत्र हि आकारस्य आदित्वे सति तमेवाश्रित्य समाससन्नयनशब्दस्य वृद्धत्वं स्यात् ततश्च अणं बाधित्वा वृद्धाच्छ इति छः प्रसज्येत ननु वृद्धिर्यस्याचामादिरिति सूत्रे आदिग्रहणस्यापीदमेव व्यावर्त्यं तत्सामर्थ्यादेव समासंनयनशब्दे वृद्धसंज्ञा न भविष्यतीति चेन्न यदि हि वृद्धसंज्ञासूत्रे आदिग्रहणसामर्थ्यादनातिदेशिकस्य मुख्यस्यैवादेर्ग्रहणं तर्हि जानातीति सा

।।शु॰कौ॰५

।।५८।

श्रीत्वली इत्यादिरसहायोपि वृद्धो न स्यात् ततश्च तायां भयं तेयः इत्यादि न सिध्येत् असति हि प्रवृत्त सूत्रस्थैकग्रहणे यत्र आदिव्यपदेशो मु
ख्यो नास्ति असहाये मध्ये अंते च स सर्वोप्यविशेषादति देशस्य विषयः स्यात् यदि तु अतिदेशसामर्थ्यात् शब्दे वृद्धसंज्ञे विशेषणसमासं
यत्नेपि स्यात् वृद्धसंज्ञायामादिग्रहणं तर्हि व्यर्थमेवेति चेत् हंतैवं अतिदेशस्यान् दिग्ग्रहणस्य च सामर्थ्यात् सर्वत्र विकल्पापत्तिः इहैक
ग्रहणे कृते तु अंतमध्ययोर्व्यावृ त्या वृद्धसंज्ञायां आदिग्रहणं सार्थकमिति दिक् यत्तु न्यासकृतोक्तं अतिदेशसूत्रे एकग्रहणाभावे वृद्धसंज्ञा
सूत्रस्यमादिग्रहणं अनातिदेशाव प्रतिपत्त्यर्थं सत् असहायादीनां तादीनामेव वृद्धसंज्ञां वारयेत् ननु सभासभासं नयन स्य संनयन
स्येसेतदंतगतौश्च तुरो अचो येस्य अनातिदेशिकस्यादित्वस्य तत्र सत्तादिति तच्चिंत्यं परस्मिन्सति यस्मात्पूर्वं नास्ति स आदिरिति सि
द्धं तरीसामध्यस्थेपि आदित्वविरहात् इयानेव हि विशेषः असहाये सत्यंत विशेषणविरहाद्विशिष्टाभावः मध्यस्थे तु विशेष्याभावा
द्विशिष्टाभाव इति वार्तिककारस्तु लाघवाय पूर्वत्वमात्रमादिशब्दस्य प्रवृत्तिनिमित्तं अनुत्तरत्वमात्रं चांतशब्दस्य ननु सत्यन्यस्मिन्निय
पि विशेषणं गौरवात् तथा चासहायेपि मुख्यौ येरेवाद्यंतयोः संभव इति मन्वानः सूत्रमेतत्प्रत्याचख्यौ आह च अपूर्वानुत्तरलक्षणत्वादा
द्यंतयोः सिद्धमेकस्मिन्निति भाष्यकारस्तु नैतन्मेने सत्यन्यस्मिन्निति विशेषणप्रक्षेपप्रयुक्तस्य गौरवस्य प्रामाणिकत्वात् लोके ह्ययमा
दिरंतो वेत्युक्ते अवशिष्टमपि किंचिदस्तीति नियमेन प्रतियंति । यदान्निपततोवस्थितिस्तु शास्त्रे साध्या अनुभवमपलप्य लक्ष्येकदेशमात्रे
दि शक्तिकल्पनेतु श्वश्रु रापदानामपिला घवाभार्यात्वमात्रं पितृत्वमात्रं तद्घटक पुत्त्रमात्रं वा शक्यतावच्छेदकं स्यादिति विशिष्ट
विषयकशक्युच्छेदेन सकलशिष्टव्यवहारव्याकोपः स्यादिति नन्वेवमपि व्यपदेशिवद्वचनं कर्तव्यमेव इयाय आरेत्यादौ धात्वव

272

पवत्वं प्राथम्यं एकाच्त्वं चाश्रित्य द्वित्वं यथा स्यात् एकाच इति हि बहुव्रीहिर्विज्ञास्यते न चाङ्गणोर्व्याख्यादेशयोरतैरभ्य वृद्धौ रपरत्वे च कृते आयु आर इत्य
नयोरेकाच्त्वं पश्चादेरिव मुख्यमेवास्तीति वाच्यं द्विर्वचनेचीति रूपातिदेशेन इयर् अनयोरेव द्विरुक्तेः किंच पचेः पचमन्नकारे सदेवान्यपेक्षादिषि
तो यजीयानि स्यादौ सिद्धे हलि लेरीति सिप् तस्य षत्वं व्यपदेशिवद्भावेनैव साध्यं प्रत्ययस्य यः सकारस्तस्य षत्वमिति सिद्धान्तात् तस्मा
द्व्यपदेशिवदेकस्मिन्नित्यवसूत्र्यतां किं प्रवृत्तस्य तेन व्यपदेशो नाम विशिष्टो मुख्यो ऽपदेशो व्यवहारस्तदाश्रित्यादिः सोऽस्यास्तीति व्यपदेशी
ना पत्नी प्रभृतिः तस्मिन्निवासहायेपि कार्यं स्यादित्यर्थः अत्राह भाष्यकारः अवचनाल्लोकविज्ञानात्सिद्धमिति वचनान्तरापेक्षाल्लोकव्यवहारादेव व्यप नि
देशिवद्भावसिद्धेराद्यन्तवदिति व्यपदेशिवदिति चोभयमपि न सूत्रयितव्यमित्यर्थः अस्ति च लोके निरूढोयं व्यवहारः अयमेव मे ज्येष्ठः पुत्रोऽ
यमेव मे मध्यमो यमेव मे कनिष्ठ इति तथा प्रसूतायामसोष्यमाणायां च प्रथमगर्भेण हतेति व्यवहरति तथा पूर्वमनागतो गेहे अनागमिषु ण
आह इदं मे प्रथममागमनमिति ननु सर्वे इमे गौणा व्यवहाराः तत्कथं मुख्ये चरितार्थे शास्त्रं गौणे प्रवर्तेतेति चेन्न निरूढतरतया गौणेऽस्या
प्यस्य मुख्यसमकक्षत्वात् ज्ञापकाश्च यः अयं इट् ईटीति सिचो लोपः शास्ति तत् सा पयति व्यपदेशिवदेकस्मिन्निति नत्वन्यथा सिच इट् लभ्य
ते वस्तुरूपत्वेपि वत्वादित्वविरहात् तथा दीर्घ इणः कितीत्यादीन्यपि ज्ञापकानि न हि व्यपदेशिवद्भावं विना इणो भ्यासो लभ्यते इति दिक्
पत्नू तं कैयटेन अर्थवता व्यपदेशिवद्भावेनाकुरुत्ते इत्यादौ तत्शब्दाकारस्यानर्थकत्वेन तत्र रिसं सिद्ध्ये आदिवद्भावो वचनेनैव साधनीय
इति अत्रेदं वक्तव्यं अर्थवता व्यपदेशिवद्भाव इति तावन्नेयं परिभाषा तस्या विध्यंगत्वात् व्यपदेशिवद्भावस्तु लौकिक इत्यसकृत् तथात्वं
प्रतिभंगसायोगात् किन्तु शास्त्रे व्यपदेशिवद्भावयोजना यः शब्दार्थसमुदायमाश्रित्य तस्यैकदेशः शब्द इति व्युत्पादयितुमर्थव

११ कू. कौ. ५
११५५ न

ताऽपेक्षितेति परं तस्याशयः अत एव षष्ठे निर्मितोऽवसारत्काचद्रस्येतदुत्पादनावसरे भाष्यकैयटयोरनर्थकेनापि व्यपदेशिवद्भावः स्वीकृतः
लोकश्चद्वशास्त्रेऽप्यनर्थकस्य व्यपदेशिवद्भावसंभवात् तस्मादर्थवतेति प्रायोवादमात्रं सूत्रप्रत्याख्यानं तु सम्यगेवेति दिक् तरतमपो
घः एतौ घसंज्ञौ स्तः कुमारितरा कुमारितमा घरूपेति ह्रस्वः नद्यास्तरे नदीतरस्य ह्रस्वत्वं न भवति तमपास्ताह नचेयं प्रत्ययपरस्यैव
तरपोग्रहणात् यद्वा तरबिति रूपं संज्ञाप्रवृत्तावाश्रितं तच्च परिनिष्ठिते प्रयोगे क्वापि नास्तीत्यौपदेशिकं गृह्यते त[.]च्चतरपू प्र
त्ययस्यैवाऽस्ति अपि च प्रतिपदोक्तसमपीदृक्सुलभं तेनावयवद्वारोऽप्युत्पादिते नदीतरे नातिप्रसंगः किंच समानाधिकरणेऽस्त्री
लिंगे ह्रस्वत्वं विधीयते अन्यथा माहिषीवद्रूपं माहिषीरूपमित्यत्रापि स्यात् सुप्सुपेति समासः माहिषी वैयमाकृतिरित्यर्थः सामाना रूपमाकृतिः
धिकरण्ये स्त्रीत्वे च स्वार्थिकत्वादातिशायनिकस्य तु ननु नदीतरे अतो नोक्तदोषः न चातिशायिनि [illegible] रूपप्रकरण एव ला
दीर्घतरतिपितोपदतिया क्रियतां लाघवादिति चेन्न प्रकरणोत्कर्षे तो हि संज्ञाकरणस्याप्योपि तरबस्तीति तस्यापनार्थत्वात् स चानि
दिष्टार्थत्वात् स्वार्थे भवति तेनाल्पाच्तरं लोपश्च बलवत्तरत्वादिति सिद्धं केचित्तु सामान्यापेक्षं ज्ञापकमाश्रित्य ईयसुनोऽपि स्वार्थिक
तामाहुः तेन अहो महीयस्त्वं वसाहसिकामित्यादिप्रयोगाः समर्थिता भवति बहुगणवतुडति संख्या एते संख्यासंज्ञाः स्युः बहुल
लः संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् बहुधा संख्याया विधार्थे धा बहुभिः क्रीतो बहुकः संख्याया अतिशदन्तायाः कन् बहुग्राः गलधा
बहुल्यार्थाच्छस् कारकादित्यनुवर्तमाने संख्यैकवचनाच्च वीप्सायामिति शस् गणशः गणकः गणशः तावत्कृत्वः तावद्धा ता
वह्रकः तावत्कः पैरेतेभ्यः परिमाणे वतुप् आसर्वनाम्नः शेषं प्राग्वत् कतिकृत्वः कतिधा कतिकः कतिशः किमः संख्यापरिमाणे डति चा

.१!

ए

देशः प्राग्वत् स्यादेतत् वैपुल्येऽपि बहुशब्दो वर्तते बह्वन्नमवानिति संघे च गणशब्दः भिक्षुगणं गत इति समवायश्च योगः गणः समूहः
संज्ञा तथा च संघवैपुल्यवाचिनोरप्यनयोः संख्यासंज्ञा स्यादिति चेन्न संख्यापतेन येत्वन्वर्थसंज्ञाविज्ञानात् तस्मात्संख्यावाचिनोरेव बहु व
गणशब्दयोरिह ग्रहणं तच्च नियमार्थं अनियतबहुत्ववाचिनां मध्ये अनयोरेव संख्यासंज्ञा न तु भूर्यादीनामिति तेनाबहुविषययो
र्द्व्येकयो [illegible] नियतबहुत्ववाचिनां त्र्यादीनां च न व्यावृत्तिः ननु नियमार्थत्वे सिद्धे सजातीयापेक्षत्वान्नियमस्य सद्
कृतव्यवस्था सिध्येत् नियमार्थत्वमेव तु दूरूपवादं विध्यर्थतायामेवोचितत्वात् तथाहि अस्ति तावत्कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्यय इति
परिभाषा सा च न्यायमूला सा तासूत्रेण संज्ञिविशेषे नियम्यमानो हि संज्ञाशब्दः कथं तदितरं बोधयेत् एवं स्थिते बहुगणयोरिह ग्रहणाभावे
संख्याप्रदेशेषु ग्रहणमेव न स्यात् अकृत्रिमत्वात् तस्मात्तत्संग्रहणार्थमेव बहुगणग्रहणं न तु भूर्यादिनिवृत्त्यर्थमिति भावः संज्ञिवि
शेषे क्रियमाणः संज्ञानियमो यदि सामान्यापेक्षस्तदा युक्ता अकृत्रिमस्य व्यावृत्तिः विशेषपरत्वे तु सजातीयं कृत्रिमान्तरमेव नियमेन व्यावर्त्य
ते न त्वकृत्रिममपि तदेतदुच्यते उभयगतिरिह शास्त्रे भवतीति कृत्रिमाकृत्रिमयोरुभयोरपि ग्रहणमित्यर्थः अस्ति च संख्याप्रदेशेषूभय
ग्रहणे लिङ्गं संख्याया अतिशदन्तायाः कन्निति सूत्रे शदन्तपर्युदासः नहि कृत्रिमा संख्या कृदन्तास्तीति दिक् तेन पञ्चधा पञ्चकृत्व इत्या
दि सिद्धं भवति यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति तथापि वतुडत्योः केवलयोः संज्ञायां प्रयोजनाभावात् सामर्थ्यात्तदन्तग्रहणं
तद्धितविधौ हि ङ्याप्प्रातिपदिकादित्यधिकृतं न च केवलस्य प्रत्ययस्य प्रातिपदिकत्वमस्तीति बोध्यं एतच्च सूत्रं भाष्ये प्रत्याख्यातं बहुपू
गगणसंघस्य तिथुक् वतोरिथुक् षट्कतिकतिपयचतुरां थुक् इति सूत्रैः डटि परे आगमा विधीयमाना बहुप्रभृतीनां डटो निर्वाहकं स

द्रा·को·५
॥१६५

ख्यात्वं ज्ञापयंतीति किमनेन सूत्रेण ननु पूगगणसंघेत्यादौ विशेषाश्रवणात्संघवैपुल्यवाचिनोरपि बहुगणशब्दयोः संख्याकार्यं
स्यादिति चेन्न अनियतसंख्यावाचिनोरप्येतयोः संख्याकार्यं भवतीत्येतावन्मात्रज्ञापनेन चरितार्थे ते सति सर्वथा संख्यामप्रतिपाद- ता.
यतोऽपि संख्याकार्यकल्पनस्य गौरवपराहतत्वात् भूर्यादीनां तु अनियतसंख्यावाचिनां ग्रहणं न भवति नियतसंख्या[illegible]
[illegible]वाचिनां पंचादीनामेव लोके संख्याशब्देन प्रसिद्धतरत्वात् प्रसिद्धाप्रसिद्धयोः प्रसिद्धग्रहणस्य न्याय्यत्वात् नन्वेवमपि
बहुगणयोरिव पूगसंघादीनामपि धाशस्तु सत्तादिसंख्याकार्यप्रसंगः नच बहुगणयोः सामान्यापेक्षं पूगादीनां तु उद्दिष्टपक्ष-
मेवेति वाच्यं अनुपपत्तेः समानत्वेन एकसूत्रोपात्तत्वेन च वैषम्यबीजाभावात् इति चेन्नैवं लक्ष्यानुरोधेन क्वचित्सामान्यापेक्षं क्वचि-
द्विशेषापेक्षं ज्ञापकमित्याश्रयणात् तदनुरोधेन वैरूप्यस्य सोढव्यत्वादिति दिक् इमां कुसृष्टिमसहमानेनैव सूत्रकृता सूत्रमिदं
प्रतीतमिति तु परमार्थः अत्र वार्तिकानि अध्यर्धग्रहणं च समासकन्विध्यर्थं अर्धेनाधिकमध्यर्धं एकदेशवाचकोऽयमर्धश- हू
ब्दः तस्य अधिशब्देन समासे कृते यौगिकार्थः प्रतीयते ननु संख्येति वार्तिकारंभः अध्यर्धेन अर्पेण क्रीतं अध्यर्धशूर्पं इत्यादिक संख्येयवर
स्यानुवर्तमाने तद्धितार्थेति समासः ततः अर्धपदादन्यतरस्यामिति अत्र ष्ठञ् वा अध्यर्धपूर्वेति लुक् अध्यर्धेन क्रीतं अध्यर्धकं संख्या-
या अतिशदंतायाः कन्निति कन् इह समासविध्यर्थमिति संबंधसामान्ये षष्ठी समासे विधीयमाने समासनिमित्ते वा अन्यस्मि-
न्कार्ये विधीयमान इत्यर्थः तेन द्विगुनिमित्तो लुगपि लभ्यते तथा चाध्यर्धपूर्वेति सूत्रे अध्यर्धग्रहणं न कर्तव्यं भवति तदुक्तं लुकि
चाग्रहणमिति अर्द्धपूर्वपदश्च पूरणप्रत्ययांतः संख्येत्यनुवर्तते पूरणप्रत्ययांतरत्वस्य पूरणप्रत्ययांतोत्तरपदस्येत्यर्थः समा

सकृन्निवृत्त्यर्थमित्येतत् अर्धं पंचमं येषामिति बहुव्रीहिः अर्धपंचमैरर्धाधिकैश्चतुर्भिः शूर्पैः क्रीतं अर्धपंचमशूर्पं पूर्ववदञः ठञो वा लुक् अर्द्धपंचमे
न क्रीतमर्द्धपंचमकं अधिकग्रहणं चालुकि समासोत्तरपदवृद्ध्यर्थं अधिकया षष्ट्या क्रीतः अधिकषाष्टिकः अधिकसाप्ततिकः तद्धितार्थेति समासः
प्राग्वतेष्ठञ् अलुकीति वचनाल्लुकि कृते द्वित्वे संख्यासंज्ञा नास्तीति द्विगुत्वमपि न तेनाध्यर्द्धपूर्वाद्द्विगोरिति लुक् न ततः संख्यायाः संवत्सरसंख्या
स्य चेत्युत्तरपदवृद्धिः नन्वलुकीत्यर्थम् उत्तरपदवृद्ध्यर्थमिति वचनादेव लुगभावस्य आक्षेप्तुं शक्यत्वादिति चेन्न अर्हत्यर्थास्वरेष्वर्थेषु पेप्रत्ययाते
षां लुगप्राप्त्यातन्नैवोत्तरपदवृद्धेः सावकाशत्वात् ष्णांता षट् षांतानांता च संख्या षट्संज्ञा स्यात् षट् तिष्ठन्ति षट् पश्य पंच सप्तेत्यादि संख्ये
ति किं विप्रुषः पामानः ननु शतानि सहस्राणीत्यत्र नुमि कृते नस्य पूर्वमकृतत्वान्नान्तानां तासंख्येति षट्संज्ञा स्यादिति चेत् अस्तु न चैवं षड्भ्यो लु
गिति लुक् स्यादिति वाच्यं सर्वनामस्थानसंनिपाते नकृतस्य नुमस्तद्विघातकत्वात् नन्वेवमपि अष्टानामिति न सिध्यति तथा हि अष्टन् आ
मिति स्थिते परत्वान्नित्यत्वाच्च अष्टन आ विभक्तावित्यात्वे कृते अनान्तत्वात् संज्ञाया असत्त्वात् षट्चतुर्भ्यश्चेति नुट् न प्राप्नोतीति चेन्न यथोद्देशप
पि क्षे आत्वात्प्रागेव षट्संज्ञा अंतरंगत्वात् ततः कृते आत्वे एकदेशविकृतस्यानन्यत्वात् षट्संज्ञकत्वेन नुट् सिद्धः स्यात् कार्यकालपक्षे तु हि उ त्रि
क्तदोषं तदवस्थ एव किंच यथोद्देशपक्षे विधित्वादतिदेशो दुर्लभः अत एव च ब्रूमो इत्यत्रोच्यः परसंज्ञानिमित्तस्य फलमिति कैयट इति चेन्न
अष्टनो दीर्घादिति दीर्घग्रहणेन कृतात्वस्यापि षट्संज्ञा ज्ञापनात् तथा हि स्नः संख्यायाः स्वराद्युदात्तं बाधित्वा घृतादिपाठात् अंतोदात्तोष्ट
न्शब्दः साधितः तस्माद्विभिरष्टाभिरिति रूपद्वयं तन्नात्वाभावे मध्योदात्तत्वं आत्वपक्षे त्वन्तोदात्तत्वमिति सिद्धान्तः तन्न षट्त्रिचतुर्भ्यो

॥मू॰को॰
॥१८॥

हलादिरिति सूत्रेण षण्णां षट्त्रिरित्यादाविव विभक्तेरुदात्तत्वं प्राप्तं बाधित्वा सत्युपेतममिति प्राप्तं षट्चेच्चितुर्भ्योर्यासत्वादि विभक्तिः ह्रस्वेतेपरे उपो न
मुदात्तं भवतीति हि तस्यार्थः तन्वाधनाय अष्टनो दीर्घादित्याश्रयते दीर्घादष्टनः परोऽसर्वनामस्थाने विभक्तिरुदात्ता भवतीति सूत्रार्थः तत्र यद्यात्व
पक्षे षट्संज्ञा न स्यात् तर्हि साववकाशोऽष्टनः स्वरः परत्वादात्वाभावपक्षे सत्युपेतममिति षट्स्वरेण बाधिष्यत इति किं दीर्घग्रहणेन कृतात्व
स्यापि षट्संज्ञायां सत्यां तु षट्स्वरस्याष्टनः स्वरोऽपवादः संपद्यते न चाष्टनः स्वरः क्वासि साववकाश इति वाच्यं तत्रैकादेश उदात्तेनोदात्त इति सूत्रे
त्वे धृगतार्थत्वात् अष्टन्शब्दोऽन्तोदात्त इति समनन्तरमेवोक्तत्वात् तेन दीर्घपक्षवत्तदभावपक्षेऽपि विभक्तेरुदात्तता स्यादिति तद्व्यावृत्त्यर्थं
क्रियमाणं दीर्घग्रहणं सार्थकमेव तस्माद्दीर्घग्रहणेन आत्वपक्षेऽपि षट्संज्ञा ज्ञाप्यत इति स्थितं न चैवं दीर्घग्रहणस्य आत्वविकल्पज्ञापकत्वं
न स्यादिति वाच्यं उभयज्ञापकत्वसंभवात् न ह्येकेन एकमेव ज्ञाप्यत इति नियमः यावता विना अनुपपत्तिस्तावतो ज्ञाप्यत्वात् तच्चैकमनेकं वे
त्यन्यदेतत् प्रकृते च उभयं विना दीर्घग्रहणवैयर्थ्यानुद्धारादिति दिक् यदि तु ष्णान्ताः षकारनकारान्ता अन्ते यस्याः सा ष्णान्तेति प्रकृतसूत्रेणैव आ
कारेऽपि प्रश्लिष्यते तदा द्वाभ्यामित्यत्र षट्चतुर्भ्यो हलादिरिति विभक्तेरुदात्तत्वं स्यात् आद्वाभ्यां ह्रिभ्यामिन्द्र्याहीत्यादावाद्युदात्तमेव तु द्वाभ्या
मिति पदं पठ्यते तस्मादिह आकारप्रश्लेषो न वर्णनीयः किन्तूक्तप्रकारेण वा कृतार्थ इति स्थितं तथा [illegible]तिसप्तम्ये योगविभागं कृत्वा तद्बलेना
पि द्वेधा भाष्ये समाहितं तथाहि षड्भ्यो लुगित्यत्र षड्भ्य इति विभज्यते अष्टाभ्य औशिति सूत्रादष्टाभ्य इत्यनुवर्तते तेन षड्भ्यो यदुक्तं कृताकारादष्ट
नोऽपि तत्स्यादिति सूत्रार्थः न चैवं जश्शसोर्लुगप्यतिप्रसज्येतेति वाच्यं ओदित्त्वविधिवैयर्थ्यापत्तेः अथवा अष्टन आ विभक्तावित्यस्मादनन्तरं रायरतिपा
मं विभज्य हलीत्युभयोर्योगयोः इत्थं व्याख्येयः तेनाष्टानामित्यत्र नुटः पश्चादेवात्वं न तु प्राक् न चैवं जश्शसोरात्वं न स्यादिति वाच्यं लाघवार्थं

मष्टभ्य इति निर्देशे अष्टाभ्य औशिति कृतात्वनिर्देशेन जश्शसोर्विषये आत्वानुमानात् यत्रात्वं तत्रैवौश्त्वं यथा स्यादित्येतदर्थं हि तत्र दीर्घोच्चारणं कृतमि
ति स्यादेतत् हलीति यद्युभयोः शेषस्तर्हि प्रियाष्टन्शब्दे औजसमौट्छष्टा ३.३. सिसा सामसुप्सु वैकल्पिकत्वेष्यमाणमात्वं न सिध्येत् न च तत्रात्वं ने
न ष्यत एवेति वाच्यं इतः प्राचीपक्षाणामतिव्याप्तिप्रसंगात् तेषु घात्वे प्राप्यत एव विभक्तिमात्रे तद्विधानात् न च षड्भ्यो लुक् षट्चतुर्भ्यश्चेति सूत्रा
भ्यां विधीयमानौ लुग्नुटौ यथा गोणतायां न स्तस्तथा आत्वमपि न स्यादेवेति वाच्यं वैषम्यात् लुग्नुटौ विधौ हि षड्भ्य इति बह्व्य इ चतुर्भ्य इति च
बहुवचननिर्देशात्स्वरार्थप्राधान्यमेव तौ प्रवर्तेते आत्वविधौ तु अष्टन इत्येकवचननिर्देशाद्वौ णत्वेऽपि प्रियाष्टाभ्यामित्यादावात्वं प्रवर्तेत
एव पदा … गाधिकारे तस्य तदुत्तरपदस्य चेति वक्ष्यमाणत्वात् न च तत्र जश्शसोरष्टाभ्य औशिति कृतात्वनिर्देशेनानुमीयमानमात्वं केवले प्रा
धान्ये च अष्टौ परमाष्टावित्यत्र यथा भवत्येवं गौणत्वेऽपि भविष्यतीति तन्निर्देशेनानुपपत्तिरिति वाच्यं औश्त्वं हि लुग्नुटाविव गौणत्वेन भवति
अष्टाभ्य इति बहुवचननिर्देशात् अन्यथा हि कृतात्वानुकरणेऽपि एकवचनेनैव निर्दिशेत् अष्टाभ्य औशिति अष्ट इति वा स्पष्टं चैतदिहैव सूत्रे भा
ष्यकैयटयोः तथा च औश्त्वविधौ कृतात्वनिर्देशबलेनानुमीयमानमात्वमपि प्राधान्य एव स्यान्न तु गौणतायामिति तन्निर्देशोऽप्यनुपपत्तिसाम्या
त् तस्माद्धलीत्युभयोः शेषश्चेत्स्यात्तदात्वं प्रियाष्टनः टा ३.३. सि ३. सोसाम्सु तथैवौजसमोट्शसि प्रागुक्तेषु तु पक्षेषु भवेदात्वमपीष्टमपि फलभेदेन
हत्येवं कथं पक्षवि … कल्पनं अत्रोच्यते प्रियाष्टन्शब्दस्य भजादावात्वमनिष्टमेव हलीत्युभयोः शेषस्य भाष्य एव सिद्धान्तितत्वात् तथा सति
औजसोः क्रमेण प्रियाष्टनौ प्रियाष्टान इत्येव रूपं स्यान्न तु प्रियाष्टौ प्रियाष्टा इत्यपीत्याशंक्य यथालक्षणमप्रयुक्ते इत्यपि हि तत्राद्य अत एव य
थालक्षणमिति प्रतीकमुपादाय न भवत्येवात्वमित्यर्थ इति कैयटेन व्याख्यातं एवं स्थिते प्राचीनाः पक्षा अपरितोषग्रस्ता एव व्यवस्थितविभाष

यानोणतापामन्तारिषु आत्वंन भवति सांन्नायेन वा पोस्याः उदाहृत भाष्यकैयटप्रामाण्यात् तस्मात् क्रियाष्टनः सर्वेषु गणान्तरसाधारणं
रूपं हलादौ तु हाहाशब्दसाधारणमपरं रूपं ओः श्नुटोरलुप्राप्तिरेव नास्तीति प्रामाणिकाः पंथाः अत एव सर्वादीनि सर्वनामानीति सूत्रे
हरदत्तेन गोणत्वे औड्न भवतीति स्पष्टमेवाभिहितं अत एव आष्टाभ्य औशिति सूत्रे तदंतग्रहणमनेष्यते परमाष्टौ इत्युक्त्वा क्रियाष्ट
नरस्यत्र आत्वस्याभावादौड्न भवतीति काशिकासंगच्छते अत एव याष्टनभाविभक्ताविति सूत्रे तदंत विधिमत्रेष्यते प्रियाष्टौ प्रियस्य

वा

प्रियाष्टारस्यापि यथा स्यादिति काशिकाग्रंथोपि संगच्छते हलादौ तस्य निर्बाधत्वात् हरदत्तस्तु अष्टाभ्य औशिति सूत्रे प्रियाष्टन रस्य
त्रेति वृत्तिग्रंथमुपादाय यथा पुनर्गौणता तत्त्वामात्वं न भवति तथा तद्विधावेव पश्यत इति प्रातिज्ञाय अष्टन आविभक्ताविति सूत्रेण
कवचन निर्देशात्स्वरूपस्य ग्रहणं नार्थस्य तेनोपसर्जनेप्यष्टनि भवति तत्रापि विकल्पितत्वात् प्रियाष्टा प्रियाष्टानो प्रियाष्ट नरस्येति भ
वति तत्राप्यात्वपक्षे भसंज्ञाविषये आतोल्लोपमिच्छति प्रियाष्टः पश्येत्यादि आत्वाभावपक्षेप्यल्लोपे कृते प्रियाष्णः इति भवतीत्युक्त्वा तेन ग्रंथेन
पूर्वप्रतिज्ञार्थेतो विपरीतं भाष्यवृत्त्यादिविरुद्धं च कथमभिहितवानिति तस्याशयः स एव प्रष्टव्यः अल्लोपे कृते मस्य पि तदृत्तिरिष्येव पू
र्वस्मादपि विधिोऽल्लोपस्य स्थानिवद्भावेन ष्टुत्वायोगात् न च पूर्वत्रासिद्धीयेनस्थानिवदिति निषेधः तस्य दोषः संयोगादिलोपलत्वण
त्वेष्विति सापवादत्वात् न तु रषाभ्यां नो णः इति प्रतिपदोक्तणत्वं गृह्यते न तु ष्टुत्वलभ्यमपि विलंबितप्रतीतिकत्वादिति चेन्न अपदांतस्य मू

विधि

र्धन्य इति सूत्रं संपूर्णं रषाभ्यामिति सूत्रेनुवर्त्य तत्र त्वस्य णग्रहणस्य पदांतस्येति निषेधसूत्रस्य भाष्ये प्रत्याख्याततत्वात् पथो नरमुनीनां प्रामा

7

स्यात् न च मूर्द्धन्यशब्देन टुशब्देन वा निर्दिश्यमाने णकारे वैषम्यमस्ति सूत्रकाररीत्या कथंचित्संभवत्वपि व्याख्यायोत्र भाष्यानुरोधात्स्या
त्पत्वं तथा च शर्पूर्वाः खय इति सूत्रे खर्पूर्वग्रहणं कर्तव्यमिति [illegible] वार्तिके प्रत्याचक्षाणो भगवानाह अभ्यासजश्त्वचर्त्वे सिद्ध
मित्येव एतत्तु न ग्रहणं न कर्तव्यमिति तथा च तुकश्लुत्वेन न्निष्वन्नस्य चकारस्यापि चर्त्वेन सिद्धत्वात् उच्छिषतीति रूपं सिद्ध
मिति तदाशयः केयटेन वर्णितः तदेवं प्रियाष्टुरस्यां छेवरूपमुचितं न चैवं पृष्णा इत्यादावपि णत्वं प्रसज्यते इति वाच्यं तत्राट्
कुप्वाङ्नुम्व्यवायेऽपीति सूत्रेण णत्वप्रवृत्तेरिति दिक् । डति च डत्यन्ता संख्या षट्संज्ञा स्यात् कति संति कस्य द्राक्षीः षट्त्वाज्जश्शसोर्लुक्
संख्येति किं पालेडतिः पर्यायः न चास्य संख्यासंज्ञापि स्यादिति वाच्यं वतुसाहचर्येण तत्र तद्धितस्यैव ग्रहणात् इदं सूत्रं प्रत्या
ख्यातं भाष्ये बहुगणवतु संख्या डति संख्येत्यनुवर्तते ततः ष्णान्ता षट् संख्या डतीत्युभयमनुवर्तते पूर्वसूत्रेऽप्यन्वर्थसंज्ञावि
ज्ञानात् संख्याप्रश्नविषयस्यैव डतेर्ग्रहणं न स्तोमादिकस्येति क्तक्तवतू निष्ठा एतौ निष्ठासंज्ञौ स्तः कृतः कृतवान् ननु विहितयोः
प्रत्यययोरनेन संज्ञा संज्ञया च विधानं वक्ष्यति हि तृतीये निष्ठेति तथा चान्योन्याश्रय इति चेन्न सूत्रशाटकवद्भाविसंज्ञाविज्ञानात्
तौ भूते काले भवतो ययोर्विहितयोर्निष्ठेत्येषा संज्ञा भविष्यतीति स्यादेतत् अनुबंधाः कार्यार्थमुपादीयन्ते न तु श्रवणार्थं ते
षां लोपविधानात् तथा च लुप्तानुबंधस्य परिनिष्ठितस्य पदस्य सारूप्यं तत्र कानुबंधकार्यं भवतु वा नेति तु निश्चेतुमशक्यं न च
काकादिवदुपलक्षणस्यापि व्यावर्तकता भविष्यतीति वाच्यं काकादिनापि हि वेदिकापुण्डरीकादिकं स्थितं किंचित्परिचाप्यते तद्वत्ता

॥शू०कौ०५

॥१९॥

ओदुंनेपि कौके व्यवहारो न संकीर्यते न चेह परिच्छेद्यान्तरमुपलभ्यते क्तप्रत्ययतन्प्रत्यययोः काकादिकल्पो हि ककारनकारौ तदपगमे
संवृत्ततरस्यात्र परिच्छेद्यस्य परस्परव्यावृत्तस्य दुर्वचत्वादिति अत्राहुः कालकारकविशेषादयो ऽर्था एवात्र वैदिकापुण्डरीकादिस्थानाप
न्नास्तद्दर्शनाच्चानुबंधस्मृतौ सत्यां तत्र प्रयुक्तकार्यं साधुतया ज्ञायते तथा लूनः शातितिरिति केनचित्प्रयुक्ते लक्षणान्तरेन कर्मभूतका
लेन बलात्क्तप्रत्ययोऽयमिति निर्णीयते लोतमालभेतेति प्रयुक्ते तु प्रैषवाची लोटशब्दस्तत्प्रत्ययान्तः प्रयुक्त इति निर्णीयते हसि
मृग्रिण्वामिदमिन्दूपूधूर्विभ्यस्तन्नित्युणादिसूत्रात् लोतः स्यान्नु चिन्न्योरिति तु पंचपादीवृत्तौ स्थितं तथाश्रभितघटं देवदत्त
इति प्रयोगे कृत्संज्ञैकसाघवगमाल्लुङ् तस्यायं प्रयोगो न तु निष्ठान्तस्येति निर्णीयते स्यादेतत् अंजिघृसिभ्यः क्त इति क्तप्रत्यये अक्तं
घृतं सितमिति व्युत्पादितं तत्रापि निष्ठासंज्ञा स्यात् ततश्च निष्ठा च द्व्यजनादिति स्वरः स्यात् निष्ठान्तं द्व्यच्कं संज्ञायामाद्युदात्त
स्यात् स चेदादिरकारो नेति सूत्रार्थः न चेष्टापत्तिः घृतं मिमिक्षस्यादावन्तोदात्तस्यैव पठ्यमानत्वादिति अत्राहुः अतः क्तक्तवतू इति सू
त्रे कमित्यनुवृत्तो नैव सिद्धे कृत्संज्ञानुवृत्तो न ज्ञापितमुणादयः क्वचिद्युस्पाति कार्यं न भवतीति अतो नात्र निष्ठासंज्ञेति यद्वा घृतादीनां
चेति फिट्सूत्रेण सिद्धं॥ ॥७॥ इति श्रीशब्दकौस्तुभे प्रथमाध्यायस्य प्रथमे पादे पंचमाह्निकं॥ ग्रं० ७।८७८१७॥ पो श्रीराम॥ ७॥ शु.१२

॥१०९॥

श्री. वे. घोरशास्त्री.

॥श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥श्रीपादश्रीपादवल्लभोमेप्रसन्नोग्रंथलेखने
विघ्नेशं सच्चिदानंदं वंदे हं योखिलं जगत् चरीकर्ति बरीभर्ति संजरीहर्ति लीलया॥१॥ नमस्कुर्मो नृसिंह
द्वंद्वं पाणिन्यादिमुनित्रयं॥श्रीभर्तृहरिमुख्यांश्च सिद्धांतस्थापकान्गुरून्॥२॥नत्वा लक्ष्मीधरं
तातं सुमनोवंदवंदितं॥फणिभाषितभाष्याब्धेः शब्दकौस्तुभमुद्धरे॥३॥प्रेक्षावत्प्रवृत्तये व्याकरण
स्य विषयं भगवान्भाष्यकारः प्रादर्शयत्॥अथ शब्दानुशासनं इति॥अथेत्ययं शब्दः प्रारंभस्य द्योत
को न तु वाचकः॥

[illegible]

॥शब्द०कौ०॥
॥१॥

श्रीगणेशाय नमः ॥ विश्वेशं सच्चिदानंदं वंदेहं योखिलं जगत् । चरीकर्ति बरीभर्ति संजरीहर्ति लीलया ॥१॥ नमस्कुर्मो जगद्वंद्यं पाणिन्यादिमुनित्रयं । श्रीभर्तृहरिमुख्यांश्च सिद्धांतस्थापकान्गुरून् ॥२॥ रत्नलालक्ष्मीधरं तातं सुमनोवृंदवंदितं । फणिभाषितभाष्याब्धेः शब्दकौस्तुभमुद्धरे ॥३॥ पारिभाष्य बहूनर्थान्योर्थः क्लेशेन लभ्यते । तमङ्गोपमनायासाद्दितो गृह्णीत सज्जनाः ॥४॥ समर्प्य लक्ष्मीरमणे भक्त्या श्रीशब्दकौस्तुभं । भट्टोजिभट्टो जनुषः साफल्यं बुभुमीहते ॥५॥ प्रेक्षावत्प्रवृत्तये व्याकरणस्य विषयं भगवान्भाष्यकारः प्रादर्शयत् । अथ शब्दानुशासनं इति । अथशब्द प्रारंभस्य द्योतको न तु वाचकः निपातत्वादुपसर्गवत् । न चैतेपि वाचका एवेति वाच्यं । उपास्यते गुरुरनुभूयते सुखमित्यादौ धातोः सकर्मकक्रियापरत्वं विना कर्मणि लकारायोगेन वाचकत्वे स्थिते उपसर्गाणां द्योतकत्वस्यैवायुक्तत्वात् । नन्वस्तु तर्हि सोपसर्गाणां द्योतकता निपातानां तु वाचकमेवेति चेन्न । साक्षात्क्रियते नमस्क्रियते लंक्रियते उररीक्रियते इत्यादौ कर्मणि लकारेण कर्मी

राम

॥१॥
२५

स्य भर्त्तॄगुर्वादेरभिधानसिद्धयेधात्वर्थप्रतिकर्मत्वस्यवाच्यत्वात्उपसर्गापेक्षयानिपातत्वस्याधिकरत्तित्वेनतद्वच्छे ला
देनैव द्योतकत्ताकल्पना त्व ।सामान्येप्रमाणानोपक्षपातात्।निपातत्वेचाखंडोपाधिरूपंजातिरूपं
शब्दस्वरूपमेववेतिपक्षत्रयेपिप्रादिचादिसाधारणमेव।प्रत्वादिप्रत्येकपर्य[illegible]नंतदितिपक्षेपिप्रादीनां
चादिभ्योवैलक्षण्या निरुक्तेः।केवलानामप्रयोगेणानुपलभ्यत्तापि तुल्यैव।विज्ञयत्तइत्यत्रध्यातोर्विशिष्ट
ज्ञयइवघटश्चेत्यत्रसमुच्चितघटेघटशब्दस्यापिलक्षणायाःसंभवात्।किंचाचादीनांवाचकत्वेसमाना
धिकरणप्रातिपदिकार्थयोरभेदान्वयइतिव्युत्पत्तिर्निपातेतरविषयतयाविनाप्रमाणंसंकोचनीयास्यात्।
च स्याच्चसमुच्चयादिशब्दयोगइवचादियोगेघटादेःषष्ठी।किंच।समुच्चयादिपदेरूपस्थितेयथाविशेषणान्व
यस्तथा चादिभिरूपस्थितेपिस्यात्।द्योतकत्वपक्षेतुपदार्थैकदेशत्वान्नतत्रविशेषणान्वयः।अपिच
शरेरस्त्रैरिवोदीच्यानुद्धरिष्यन्नसानिवेत्यादौउस्यसदृशैःशरैरस्त्रसदृशानुदीच्यानुद्धरिष्यन्नित्यादि

र्थः सचोत्स्वादिशब्दानां तत्सदृशपरत्वेऽइवशब्दस्य तात्पर्यग्राहकत्वे सत्येव लभ्यते अन्यथा प्रत्ययानां प्रकृत्य
र्थान्वितस्वार्थबोधकताप्रिभंगापत्तेरिवशब्दात्तु तृतीया दुर्लभा। असत्त्वार्थकतया कारकविभक्त्यप्रयोगात्। एव
मप्युत्स्वादिभिस्तृतीयाया अनन्वयस्य दुरुद्धारत्वान्नचैवं नञ्समासस्योत्तरपदार्थ प्राधान्यमित्यादिसिद्धां तत्पु
ताभङ्गापत्तेरन्विति वाच्यं पूर्वपद यो प्रतिप्राधान्यमिति तदर्थात्। द्योत्येनैवार्थवत्त्वमिति प्रातिप
दिकत्वसिद्धिः। अत एव येषां द्योत्योऽप्यर्थो नास्ति। तु हि च स्म ह वै पादपूरणे इत्यमरकोशात्। कमीमिद्विति
पादपूरणार्थाः इति निरुक्ताच्च। तदर्थं निपातस्यानर्थकस्येति वार्तिकारम्भ इत्यवधेयं। स्फुटं चेदं कैयटादि
ग्रन्थेषु। अत एवाध्यत्यधिकरणे भट्टैरुक्तं। चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः। क्रियते संशयोत्पत्ते
र्नोपसर्गनिपातयोः। तयोरर्थाभिधाने हि व्यापारो नैव विद्यते। यदर्थद्योतकौ तौ हि वाचकः स विचार्य रुष
ते इति। यत्त्वर्थवत्सूत्रेऽधीते इत्यादौ ध्यातोरनर्थकतोपसर्गविशिष्टस्य वाचकतेति कैश्चिदुक्तं तदभ्युच्चयमा

त्रे। सर्वस्य द्वे इति सूत्रे कैयटादिग्रन्थोऽप्येवमेव। पूर्वोत्तरमीमांसयोस्तत्र तत्र नञः पर्युदासे लक्षणेति ग्रन्था अप्येव
मेवा। उक्तयुक्तेः अस्तु वा मतान्तरं निपाता वाचका इति सर्वथानुप्रादयो द्योतकाः श्चादयस्तु वाचका इत्येवं रूपमर्द्ध
जरतीयं नैयायिकाभ्युपगतमप्रामाणिकमेवेति दिक्। अनुपूर्वकः शासिर्विविच्यालापने दृष्टः तद्यथा। अक्षे
त्र विद्भ्यो ऽत्र विदश्च प्राट् संप्रेति क्षेत्रविदानुशिष्टः। यथा वा। संपूषन्विदुषा नय यो अंजसानुशासति। य एवे
ति ब्रवत्। अत्र हि गुणत्रयोपेतेन गुरुणा स्मान्निरीक्षयेति पूषा प्रार्थ्यते तत्रांजसेति ऋज्वमुक्तं अनुशासतीति
विविच्यालापकत्वं बहुलं छंदसीति शपो न लुक्। इदमित्थमेवेति यो ब्रूयादिति प्रमेयनिष्कर्ष उक्तः। अवदित्य
त्र लेटोऽडाटावित्यट्। तथा चानुशिष्यन्ते विविच्यासाधुभ्यो विभज्य बोध्यन्ते येनेति करणे ल्युट्। ततः शब्दाना
मिति कर्मणि षष्ठी। तदंतेन समासः। न च कर्मणि चेति सूत्रेण समासनिषेधः शंक्यः। तत्र च शब्दस्येति शा
द्वार्थकतया कर्मणीति शब्दवतोभयप्राप्ताविति सूत्रेण या षष्ठी तदंतेन समस्यत इत्यर्थात्। इयं तु कर्तृकर्म

॥म॰ को॰॥
॥३॥

णोरिति विहिता षष्ठी न तूभयप्राप्ताविति। आचार्यस्य कर्तुर्वस्तुतः सत्त्वेपीहानुपादानात्। चित्रं गवां दोहो ऽगो
पेनेत्यत्र हि आश्चर्यप्रतिपाद्यं तच्चाश्रयगत्योर्क्षितो दोग्धा दुर्दोहा गावश्च दोग्ध्या स्तदेव निर्वहन्ति न त्वन्यथा
अतः कर्तृकर्मणोर्विशिष्योपादानादस्त्युभयप्राप्तिः। इह तु शब्दानामिदमनुशासनं न त्वर्थानामिति अर्थ
निवृत्तिपरं वाक्यं। न तु कर्तृविशेषनिवृत्तिपरमिति नास्त्युभयप्राप्तिः। अस्तु वा यथाकथंचिदुभयप्राप्तिः त
थापि न क्षतिः। उभयप्राप्ताविति सूत्रे अविशेषेण विभाषेति पक्षस्यापि वक्ष्यमाणतया नियमाप्रवृत्तिपक्षे
आचार्यस्य शब्दानामनुशासनमिति प्रयोगसंभवात्। शेषलक्षणा षष्ठी वास्तु। तस्माद्वैदिका लौकिकाश्च श
ब्दाः साधव इह विषया इति स्थितं। वेदे भवा वैदिकाः अध्यात्मादित्वाट्ठञ्। एवं लोके भवा लौकिकाः। यद्वा लो
के विदिता लौकिकाः तत्र विदित इति वर्तमाने लोकसर्वलोकाट्ठञ्। प्रातिशाख्येष्विव न वैदिकैकदेशमात्र
मिह विषयः। न वा व्याकरणान्तरेष्विव छान्दसपरित्याग इति सूचयितुमुभयोपादानं। इति विषयनिरूपणं॥

स्यादेतत्। गौरित्यादिः शब्दः कुह विषयः तत्र च गकार ओकारः विसर्गश्च घटकः। व्युत्पाद्यते तु तो प्रत्ययस्तु प्रत्ययवी
दशादिकोऽनन्वेतत् शोरिति बोधभासते नन्वगोरित्यनेन परिनिष्ठितेन सह तो प्रभृतीनां संबन्धविशेषस्तत्प्रतीत्युप
योगिता चास्तीति तद्व्युत्पादनमिति चेन्न। शब्दान्तरत्वात् तस्य संबन्धस्योपयोगस्य च दुर्वचत्वात्। द्रव्यगुणादिपदा
र्थानामिह व्युत्पाद्यत्वापत्तेश्च। अस्ति हि तेषां गोरित्यनेन वाच्यवाचकभावः संबन्धः। अत एव शब्दबोधे गविस
मवायेन गोत्वमिव शक्त्याख्यसंबन्धेन शब्दोऽपि विशेषणतया भासते। चाक्षुषबोधेऽपि व्यक्त्या स्मारितः शब्दो विशेष
णमित्यभ्युपगमः। आह च। न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।१।। ग्रा
ह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा तथैव सर्वशब्दानामेते पृथगवस्थिते इति। यत्संज्ञास्मरणं तत्र न तदप्यन्योहि
तुकोऽपि इत एव हि दृष्टः स संज्ञां स्मारयितुं क्षम इति। युक्तं चैतत्। अगृहीतशक्तिकं प्रति शब्देनार्थस्येवार्थेन शब्दस्या
पि स्मारणे बाधकाभावात्। अत एव गोत्वस्येव गोशब्दस्यापि व्यक्तिविशेषणत्वाविशेषात् संसर्गोऽपि तादात्म्यमे

तथा वार्थान्तरता

प

ण

वास्तु एवं गोगुणादिभिरपि । तदभिन्नाभिन्नस्य तदभेदादित्याशये नाथ गोरित्यत्र कः शब्द इति प्रश्ने द्रव्यगुणक
र्मसामान्येषु सह शब्दस्याभेदो माष्यकृद्भिराशंक्य निराकृतः तत्र निराकरणग्रंथस्यायमाशयः समसत्ताकभेदा
भेदौ विरुद्धौ वा अन्यथा त्वदुक्तरीत्या सत्तागुणत्वाद्यभेदात्सुखदुःखस्वर्गनरकादेरप्यभेदापत्तौ प्रवृत्तिनिवृत्ति
व्यवस्था न स्यात् । न स्याच्च भेदग्रहाद्भ्रमनिवृत्तिः जातिव्यक्त्यादि संबंधस्त्वतिरिक्त एवेति । एवमेव शब्देन स
हास्यैव संबंधो द्रव्यादीनामिति स्थितं । अस्ति च द्रव्यादिव्युत्पादनस्य प्रवृत्त्युपयोगोपि । अस्मिन्नर्थेयं साधुरि
त्यर्थविशेषं पुरस्कृत्यैव साधुत्वस्य वक्तव्यत्वात् । अत एव वाशिनि दरिद्रे च क्रमेणाश्वशब्दः अश्वशब्दश्च साधुर्य्यु
क्रमेण त्वसाधुरिति सिद्धांतः । ननु यथा वैशेषिकादीनामेतच्छास्त्रे मेव प्रकृतिप्रत्ययादिविभागमुपजीव्य पदा
र्थव्युत्पादनाय प्रवृत्तिः प्रकृतिप्रत्यय विचारस्तु क्वाचित्कः प्रासंगिकः तथेहापि लोकसिद्धदर्शनांतरसिद्धं च
पदार्थजातमुपजीव्य शब्दमात्रव्युत्पादनेन विरुध्यते इति चेत् अस्तु तावदेवं तथापि डो प्रभृतिव्युत्पादने निष्फलेद

सिद्ध
राम

290

तिचेत्। अत्रोच्यते। गोस्तिष्ठति देवदत्तः पचतीत्यादयः शब्दाः [illegible] ग्राहिकया तावज्जन्मसहस्रेणापि बोधयितुं बोद्धुं वा
शक्याः आनंत्यात्। अतः प्रकृतिप्रत्ययविभागकल्पनारूपो लघुभूत उपाय आश्रीयते लिपिवत् आरोपितए
व चात्र संबंधः प्रसिद्धो हि स्थूलारुंधतीन्यायः शाखाचंद्रन्यायो लोके। पंचकोशावतरणन्यायश्चोत्तरमीमांसायां
तात्पर्यविषयाबाधाच्च प्रामाण्यं। एवमेव ह्यर्थवादेष्वपि गतिः आलम्बपोऽखेदनप्रभृतीनां बाधेऽपि तात्पर्यविषयी
भूतस्य प्राशस्त्यस्याबाधितत्वात्। उक्तं च हरिणा। उपायाः शिक्षमाणानां बालानामुपलालनाः। असत्ये वर्त्म
नि स्थित्वा ततः सत्यं समीहते।१।उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिता इति च। अत एव केचित्सुप्रत्ययं विद
धति अपरे सिं तथा सुलंबद्धीत्या पाठितमिस्य त्रेत प्रत्ययः भाष्यरीत्या तप्रत्ययः सूत्ररीत्या ताबानि [illegible] ति
चतुष्टयं। तावदर्थवैशेष्यादिति वार्तिककृद्रीत्या तान्तुरिति दिक्। एतेन पचतीत्यादौ आदेशैः स्मार्यमाणा
लडादयो बोधका इति वदंतः परास्ताः। तथा हि वृद्धव्यवहाराच्छक्तिग्रहः इति तावन्निर्विवादं तत्र च प्रयोगस

मवायिनामपितिप्रभृतीनांशक्तिःसिध्यतिनखलुलौकिकानांलडादीनांएवंडुपचषडुकृञइत्यादिप्रकृतयोविवृद्धिवादे
प्रत्ययाश्चनशक्ताःकिंतुअपाक्षीत्पपाचपापच्यतेकरोतिचकारचकीर्षतिइत्यादिप्रयोगसमवायिनःअपाक्षपपा
ननु चइत्यादयएवोच्चार्यमाणेनडुपचषइत्यादीनांस्मरणेतेनार्थबोधइतिचेन्नलाघवाद्व्यवस्थितत्वाच्छ्रूयमाणानामे
कल्पने वार्थकल्पनात्।अलौकिकस्यस्मारणेगौरवात्।अव्यवस्थापत्तेश्च।पचतिदेवदत्तःपचतेदेवदत्तेनपच्यतेतितिपतु
तभ्यांस्मारितस्यलटएवबोधकत्वेएकत्राधाराधेयभावसंसर्गेणदेवदत्तेआख्यातार्थोयत्नोविशेषणमितरत्र
भेदेनसंसर्गेणतदर्थःकर्ताविशेषणमितित्वत्सिद्धांतभंगापत्तेश्च।एतेनकर्त्रधिकरणेआख्यातार्थत्वंकर्तुर्निर
स्यजेजप्यमानाधिकरणेशानजर्थत्वंस्वीकुर्वंतोमीमांसकाअपिप्रत्युक्ताः।यत्तुतेरुक्तंशानजशेकर्तरिरूढिरितिव्या
करणेशक्तियाहकमस्तीतितदप्यापाततः।पदवाक्यशेषोयमनिर्दिष्टार्थेषुण्वुलादिषुप्रतिष्ठतेनतुशत्रादिषुस्था राम
तिवक्ष्यमाणत्वात् न्यथैनतेषांनिराकांक्षत्वात्आकांक्षितविधानेन्यायइति[illegible]तात्।अन्यथाक्रियमाणइतिकर्मणिशानचोदो

र्लभ्यापत्तेश्च। किंच कर्तरि शबित्यत्र कर्तृग्रहणं न देयं लः कर्मणीत्यत्रोक्तत्वात् कथं तिङ्गतौ वैलक्षण्यं अन्यलभ्यत्वादेरभ
यत्रसाम्यात्। नामार्थयोरभेद एव संसर्ग इति हि ग्रानग्रादौ कर्ता वाच्य इत्युक्ते तत्तु पचति कल्पं पचति रूपं देवदत्त इत्याद्यनु
रोधेन तिङः स्वपितृत्वं तस्मात्परशैयानकश्चितिङन्ते तच्छत्रं ता द्वैषम्ये हेतुः अस्मद्रीत्या तु क्रियाप्रधानमाख्यातं सत्त्व
प्रधानानि नामानीति निरुक्तकारोक्तेः प्रत्ययार्थप्राधान्यं तिङः सुख्यज्यते प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वादि
ति सूत्रात्मा अग्रत्त्रान ङ्विधौ भाष्येऽपि स्फुटमेतत्। पाचको व्रजतीति वत्पचति व्रजतीति प्रयोगोप्यत एव नोपपद्यते। भ
पचति भवतीति चोपपद्यते। पचतो रूपं पचेति रूपे इत्यादो रूपबाधन्ते द्विवचनादि च न भवति। तस्मात्तिङ् सुबन्तैस्तु
च विशेषणविशेष्यभावव्यत्यासमात्रमस्तीति वक्ष्यते। यत्तु भट्टैरुक्तं। कर्तर्ययदेकत्वं तत्र तिविति लादिविधेयैकयो
रित्यादेश्चेकया स्यतयाऽऽख्यातान्नकर्तुर्वाच्यता सूत्रादायातीति तदप्यापाततः द्विवचनादिसंख्यात्वादेरनिष्टा
तत्त्वात् द्विधिनाद्येकयोरित्यस्यैकया स्यतानचतत्रकर्तरीत्यस्त्यपद्वित्वादिविशेषं तथा कथं चिद्योऽन्येत। ननुल

प्प प्र ण

॥शा॰कौ॰॥
॥१५

विधितिबादिविध्योरप्येकवाक्यतास्तीति चेत्सत्यं।वाक्यैकवाक्यता सा न तु पदैकवाक्यता।आदेशविधेर्लविधिलभ्य
लकारानुवादेन प्रवृत्तेः लविध्योकर्त्तृग्रहणं स च द्विवचनादिनिर्मुक्तः।अत एवादेशैः स्मार्यमाणाल्लकाराद्बोधका इति
पक्षे एकत्वादिभानाया [illegible] देशा एव शारणीकर्तव्याः एवेण ला दोतिबादिशारकं लिङादि स्मरणं कस्यामिति महदेव
गौरवं।न च परंपरसंबंधेन णलेव बोधकः वृत्तिशून्यत्वात्।अत एवापभ्रंशानां साधुस्मारकत्वाभ्युपगमस्तत्रापीति
दिक्।तस्मात्सर्वत्रासिद्धमित्यादौ यथाशार्यारोपेणैव व्याख्यानं सर्वसंमतं।तथा शास्त्रीयप्रक्रियायां सर्वत्रावस्तु
तस्तु।वाचकता स्फोटैकनिष्ठा।तत्र चाष्टौ पक्षाः।वर्णस्फोटः।१।पदस्फोटः।२वाक्यस्फोटः।३अखंडपदस्फो
टः।४।तादृग्वाक्यस्फोटः।इत्थं पंच व्यक्तिस्फोटाः वर्णपदवाक्यभेदेन त्रिविधो जातिस्फोटः।तथा हि।किंचि इति
द्वर्णव्यत्यासादिना शक्ततावच्छेदकानुपूर्वीभंगस्य प्रतिपदमौत्सर्गिकत्वात्तत्र च केचित्क्वचित्प्रथमशक्तिग्र न राम
हाखेन कस्य स्मारणमित्यत्र विनिगमनाविरहात् वृषभो वृषभो वृषद् इत्यादौ इव करकार कुरचर्क इत्यादीनां प्रयो

२८
धर्म

294

गसमवायिनां सर्वेषां तत्तदानुपू[illegible]र्व्यवच्छिन्नानां वाचकत्वेति वर्णस्फोटपक्षः। केरूप्रभृत्तयो वाचका न वेति चेद्धविप्रतिप

राम

त्तिशरीरे रामेण। रामाय। हरये। हरेः हरीनित्यादौ परिनिष्ठिते रूपे क्रियाने श्लोद्ध्यादिवाचकः क्रियान्वकर्मत्वादेरस्य
स्यविनिगंतुमशक्यतया राममित्यादिपरिनिष्ठितं पदमेव वाचकं कर्मत्वादिविशिष्टस्येति पदस्फोटपक्षः। दधीदंहरे
वविघटो वेत्यादावपि विनिगमनाविरहतोल्याद्वाक्यमेव विशिष्टार्थे शक्यमिति वाक्यस्फोटपक्षः एकं पदमिति वेदकेप

स्य

दं वाक्यं चैकं बाधितप्रतीते वर्णातिरिक्तमेव पदं वाक्यं वा अखण्डं वर्णव्यंग्यं। एकत्वप्रतीतिरौपाधिकीति चेत्सटेपित्तथात्वा
पत्तेः। कः पदार्थो सावितिचेत्। भावः। भावविशेषेषु क्वान्तर्भवतीति चेत्तत्वपरिभाषितेषु द्रव्यादिषु मांतर्भूत। न ह्येता
वता प्रमाणसिद्धं प्रत्याख्यातुं शक्यते। अनियतपदार्थवादे गौरवमिति चेत्। व्यक्तीयत्तातु तथापि नास्त्येव। उपाधीय
तात्तु सर्वैः स्वपचाभावत्वाभावत्वादिना नित्यत्वानित्यत्वादिना वा विभजनात्। भावविभाजको पाधयस्तु घटविभा
जकोपाधिवदेवानावश्यकाः। अस्मिंश्च पक्षद्वये वर्णा अप्यनावश्यकाः। नन्वनुभवसिद्धास्त इति चेत्। व्यंजकध्व
निविशेषोपहितः स्फोट [illegible] एवककारादात्मनाव्यवह्रियत इत्यभ्युपगमात्। भाट्टमते तारोमं दोगकार इति

वत्। अद्वैतसिद्धान्ते विषयसंबन्धव्यतिरेके चित्स्वरूपेण यद्यगेचरूपसुखे चैचित्र्य वच्चा। अत एव वाचस्पतिमिश्रास्तत्त्वबिन्दौ वस्तुतः
ककारादतिरिक्त्यमूर्तेर्गकारस्याभावादिति स्फोटवादिमतमुपन्यस्य न। यथा वा अखण्डेष्वपि मकारादिवर्णेष्ववर्णा
भा न्तरसमावेशेनाकारैकदेशावभासः तथात्रपक्षे वर्णांशेऽसोपि भविष्यति। उक्तं च बोपदेवेन। शब्दस्वरवशात्केवलं ज्ञाते तौ
भा वमीक्ष्यतां। औपाधिकोऽभेदस्तु वर्णानां तारमन्द्रवत्। इति। भर्तृहरिरप्याह। पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च। वाक्या
त्पदानामत्यन्तं प्रविवेको न कश्चनेति। तस्मादखण्डं वाक्यं पदं चेति पंचापि व्यक्तिस्फोटावान्तरभेदाः। जातिस्फोटा वा
ऽस्मिन्स्तु घोतरत्वादि दत्वादिकं शक्यतावच्छेदकतया आद्यपक्षत्रयेपि यथायथं वाच्यं। अन्यथा सरो रसः इत्या
द्यर्थविशेषप्रतीत्यनापत्तेः। तच्चोपाधिरूपो उपाधिश्च परंपरासंबद्धा जातिरेव। सा च सर्वाधिष्ठानब्रह्मस्वरूपा
त्मिका। तथा च शक्यतावच्छेदकांशे न्यायसाम्येनाव्यत्यधिकरणत्वात् ब्रह्मतत्त्वं तत्तदुपहितं वाच्यं वाचकं च। अवि
द्या वा आविद्यको धर्मविशेषो वा जातिरिति पक्षे तु सैव वाचिकास्थितास्तु। अष्टावप्येते स्फोटाः सिद्धान्तग्रन्थेषु तत्र
त्रोपनिबद्धाः। तथा हि स्फोटनिवन्ते सूत्रे सेर्वं सर्वपदादेशा इति भाष्यग्रन्थः। पद्यते नेनेति। अर्थवदिति पदं न तु सुप्ति

ऽ. तमेवा तथा त्रेरु रित्यत्रेते स्तु रित्यर्थ इति टीका। अथ श्रवर्णस्फोटेनुकूलः। तथा च स्वान्यार्थाभिधानसमर्थस्यैवादेशत्वेति
स्थानेंतरमपरिभाषयेत्तस्य स्थमित्यादिषु निर्वाहात्तदर्थं यथासंख्यसूत्रे नारब्धमिति भाष्यमपि पदस्फोटवाक्यस्फो
टौ तु रहे वप्रघट्टके येनो आरित्तेनेति भाष्यप्रतीकमुपादाय कैयटेन भाष्यार्थतया वर्णितौ। वर्णस्य व्यतिरिक्तस्य पदस्य वाक्य
स्य वेति वदताता थोरखंडताप्युक्ता। नित्येषु शब्देषु कूटस्थैर विचालिभिर्वर्णैर्भवितव्यमिति तत्रतत्र भाष्ये सखंडतोक्ता। मा
या नि श्वलयंत्रेषु कैतवान्तराशिषु। अयोघनेष्टौल शृंगे सीरांगे कूटमस्त्रियामित्यमरः। पस्य रूपायामेव प्रघट्टकांतरे
किंपुनरितिभाष्यमुपादाय केचिद्वर्णस्फोटं अपरे पदस्फोटं वाक्यस्फोटं चाहुरिति वदता कैयटेन अइउणिति व्यक्तिस्फोट जा
तिस्फोटयोर्बलाबलं चिंतयता अक्षरं न क्षरं विद्यादिति भाष्य [illegible] ख्या ख्यावसरे व्यवहारनित्यत्वात्तु वर्णपदवाक्य
स्फोटानां नित्यत्वं तु जातिस्फोटस्येति प्रतिपादयता अनुपदमेव हि ब्रह्मतत्त्वमेव हि शुद्धरूपतया प्रतिभातीत्यर्थ इति
व्याचक्षाणेन सर्वे पक्षाः सूचिता एवायं तु अवधेयैव जातिरिति पक्षस्तदभिप्रायेण जातिस्फोटस्यापि नित्यत्वेति अक्ष
रं न क्षरं विद्यादित्यस्य कैयटीये पाठांतरं आर्यं नोटकिताविति सूत्रे च भाष्ये एव वर्णस्फोटपदस्फोटावुक्तौ। अतस्त्वमेव

॥ भू॰ कौ॰ ॥
११८ ॥

प्रकृतिप्रत्ययविभागं तदर्थं चाश्रित्य रेखागवयन्यायेन सत्यस्य पदस्फोटस्य व्युत्पादनमभिप्रेतमिति तत्त्वं केयटः ॥ अर्थवद
ध्यातुः स्वरूपं ग्राह्कस्यात परस्तत्कालस्येत्यादिसूत्रेष्वपि स्पष्टमिदं भाष्यकैयटादिषु इत्यलं बहुना ॥ जातेश्च ब्रह्मात्मकत्वमुक्तं ह
रिणा ॥ संबन्धिभेदात्सत्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥ तां च प्रातिपदिकार्थं च धात्व
र्थं च प्रचक्षते । सा नित्या सा महानात्मा तामाहुस्त्वतलादयः इति ॥ जातेः स्फोटत्वं च प्रघट्टकांतरे स्पष्टमाह ॥ अनेकव्यक्त्यभिव्यं
ग्या जातिः स्फोट इति स्मृता । कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिता इति ॥ यद्यपि दृष्टोपक्षा उक्तास्तथापि वाक्यस्फो
टपक्षे तात्पर्यं ग्रंथकृतां तत्रापि जातिस्फोट इत्यवधेयं ॥ पूर्वपूर्ववर्णैर्व्यक्ते नैवोत्तरोत्तरोपन्यासात् तथा च प्रथमं युक्तत्वे व्यवहारधी
न तया संपूर्णस्य वाक्यस्य विशिष्टे प्राथमिकज्ञानेऽग्रह इति नि वीदं ॥ सत्त्वावापोद्धाराभ्यां अवयवानां ज्ञप्तिरिति न्यायो
ष्टं मे न लक्ष्यते इति दर्शनांतराणां पंथाः ॥ एकादेशादिस्थलेऽपि निगमनाविरहेण केश्चित्पररूपस्थले पूर्वलोपाभ्युपगमेन च
व्याकरणानां कल्पने सत्यवयवज्ञाने दुरूपपादं तया प्राथमिकज्ञानेऽग्रहः एवमसारूपमिति सिद्धांतिकः पंथाः ॥ उक्तं च हरि
णा ॥ तत्र यन्मुख्यमेकेषां तत्रैतेषां विपर्यय इति ॥ ब्राह्मणार्थो यथा नास्ति कश्चिद्ब्राह्मणकंबले । देवदत्तादयो वाक्ये तथैव

म

उत्तरीया

३०

298

स्तु वनर्थका इति वा । एवं च स्थिते निपाता [illegible] द्योतका विकरणाश्चानर्थका इत्यादि विचारोऽपि प्रक्रियादशायामेव । आह च ।
अपोद्धारानां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनं । धातूपसर्गयोः शास्त्रे धातुरेव तु तादृश इति । तादृशोऽखण्ड इत्यर्थः । एवं
च नामार्थयोरभेद एव संसर्गः प्रत्ययार्थः प्रधानमित्यादि व्युत्पत्तयोऽपि प्रक्रियाश्रया एव । उक्तं च । किं गर्भजन्ये किं गर्भकी
दृक्सातीति नो मतो । विचारः फलितः सर्वः प्रकृतिप्रत्ययाश्रय इति । आरोपितस्यापि पारमार्थिकत्वान्न विर[illegible]लिपि
स्थूलारुन्धतीशाखाचन्द्रादीनां लौकिकदृष्टान्तानामर्थवादवाक्यपञ्चकोशावतरणादीनां तन्त्रान्तरसिद्धानां पूर्वत्रासिद्धानां
चैतच्छास्त्रप्रसिद्धानां प्रागेव दर्शितत्वात् । तदेवं पक्षभेदेनाविद्यैव ब्रह्मैव वा स्फुटत्यर्थो यस्मादिति व्युत्पत्त्या स्फोट इति स्थि
तं । आह च । शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते । समारम्भस्तु भावानामनादि ब्रह्म शाश्वतमिति । तदेवं वराटिकान्वे
षणाय प्रवृत्तश्चिन्तामणिं लब्धवानिति विशिष्टरामायणोक्ताभाणकन्यायेन शब्दविचाराय प्रवृत्तः स प्रसंगाद्द्वैतमौ
पनिषदं ब्रह्मण्यपि व्युत्पाद्यतामित्यभिप्रायेण भगवान्भर्तृहरिर्विवर्तवादादिकमपि प्रसंगाद्व्युत्पादयत् । तत्तु तन्त्रान्त
रे स्फुटं प्रवृत्तेनातीवोपयुक्तं चेति नेह प्रपंच्यते । इति स्फोटस्वरूपव्युत्पादनं । स्यादेतत् । चैलिखन्व स्फुटित इत्यादिव्यवहारा

उपाय दी

इति

॥श॰कौ॰
॥१॥

तत्रैव
प्रत्यादिविभागे
पि

ह्लिपावेव शुद्धत्वभ्रमवर्तीयोश्च कर्तृत्वाभिमानजुषां बालानां पुस्तकमप्युपयुज्यते यथा तथैव भेदग्रहवतामपीति वस्तुस्थितिः। एवमिहापि पारमार्थिककर्तृत्वाभिमानवतामपि उपयुज्यत एव शास्त्रं। तत्किमर्थं कल्पनात्वयुत्पादनक्लेशः। अत एव भाष्यकारोपि शब्दो नित्यो नित्यो वेति विकल्प्योभयथापि व्याकरणारंभस्य निष्प्रत्यूहत्वाद्यथास्थिति व्युदासिष्यत इति चेत्सत्यं व्युत्पत्त्यर्थं वस्तुस्थितिः कथिता। पक्षभेदेषु। गौणमुख्येषु व्युत्पादितेषु तत्र तत्र विरुद्धत्वाभासमानानामपि सिद्धांतग्रंथानां व्यवस्थापयितुं शक्यंते। स्वार्थक्रियादीनां पंचानां क्रमेण भानं इत्यादि वक्ष्यमाणमपि कल्पनयैवोपपादयितुं शक्यंते इति दिक्। ननु स्तु साधुशब्दो विषयः अस्तु च कल्पनया न व्युत्पादनोपपत्तिः। तथापि व्याकरणाध्ययनस्यानुष्ठापकं किमिति चेत् नित्याध्ययनविधिरिति गृहाण। श्रूयते हि। ब्राह्मणेन निष्कारणो धर्मः षडंगो वेदोध्येयो ज्ञेय इति निष्कारणो दृष्टकारणनिरपेक्षो नित्य इति यावत्। कार्यत्वेनानुष्ठीयते नेनेति कारणं फलं। ब्राह्मणेन षडंगो वेदोध्येयो ज्ञेयश्चेत्यन्वयः तथा च सांगवेदाध्ययनं तदर्थज्ञानरूपोयं धर्मो नित्यसंध्योपासनादिवदित्यर्थः। श्रुतिरेषेति हरदत्तादयः स्मृतिरिति भट्टाचार्याः।। तत्र यदि स्मृतिरेवेति प्रामाणिकं तर्हि आगमः खल्वपीति भाष्ये प्यागममूलकत्वादागमः स्मृतिरिति व्याख्येयं। अंग

प

राम

१
३०

300.

खेन्चांगत्वेन संस्तवात्। उक्तं च शिक्षायां। मुखं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते। निरुक्तं श्रोत्रमुद्दिष्टं छंदसां विचितिः प
दे। शिक्षा घ्राणं तु वेदस्य [illegible] हस्तौ कल्पान्प्र[illegible]चक्षते इति। उपकारस्तथाप्यंगत्वे। व्याकरणं हि अर्थवि
शेषमाश्रित्य स्वरविशेषान्विदधत्पदार्थनिर्णये उपयुज्यते। ज्योतिषमपि स्वाध्यायोपयोगिनमनुष्ठानोपयोगिनं च
कालविशेषं प्रतिपादयति। निरुक्तं तु व्याकरणस्यैव परिशिष्टप्रायं। बाहुलकादिसाध्यानां लोपागमविकारादीनां प्रा
यशस्तत्र संग्रहात्। छंदसां विचितिरपि गायत्र्यादिलक्षणद्वारा गायत्र्याय जतीसादिविध्यर्थनिर्णये उपयुज्यते। शि
क्षापि वर्णोच्चारणप्रकारं दर्शयति। कल्पसूत्राण्यपि प्रकरणांतरपठितस्यान्यायलभ्यस्य शाखांतराधीनस्य चांग
जातस्योपसंहारेण प्रयोगं दर्शयंति। तस्मात् षडप्यंगानि तेष्वपि व्या[illegible]करणं प्रधानं। पदपदार्थावगमस्य व्याकरणा
धीनत्वात्। वाक्यार्थज्ञानस्य तदधीनत्वात्। अत एव शिक्षायां तस्य मुखत्वेन निरूपणं कृतं। मन्वादिस्मृतिष्वपि अं
गाध्ययनविधयः प्रसिद्धा एव। तथा चाध्ययनविधिर्व्याकरणाध्ययनस्यानुष्ठापक इति स्थितं। तथा च संध्योपा
सनादेरभावे प्रत्यवायोऽनुष्ठाने च पापक्षय इति यथाभ्युपेयते तथा व्याकरणाध्ययनस्यापि अननुष्ठाने अ[illegible]नुष्ठाने च बो
द्व्यां रक्षाप्रभृतीनि [illegible] फलांतराण्यपि संति। तथा च भाष्यंकानि पुनरस्य प्रयोजनानि रक्षोहागमलघ्वसंदेहाः

विशेष

य नु

॥सि॰कौ॰

॥१०॥

प्रयोजनमिति। अत्र प्रयुज्यते प्रवर्त्यते तेनेनेति करणल्युट्। ततः प्रयोजयतीति कर्तृव्युत्पत्त्या बाहुलकात्कर्तरि ल्युट्। तोपि। उभयथापि
प्रवर्तकविधिपरः पुल्लिङ्गः। प्रयोजनशब्द एकः फलपरः क्लीबोपरः। उभयोर्नपुंसकमनपुंसकेनेति नपुंसके एकशेषे एकव
द्भावस्यैवैकल्पिकतया प्रश्ने बहुवचनमुत्तरे एकवचनं च बोध्यं। तत्रागमः प्रवर्तकः रक्षोहलाघवासंदेहास्तु फलानी
तिविवेकः। तत्र प्रवर्तक आगमो व्याख्यातकः व्याख्यायते। तत्र रक्षायै वेदसंरक्षणं। तथाहि भाषायामदृष्टलोपागमव
र्णविकारा छंदसि दृश्यंते ते केवलप्रयोगशरणैः प्रामादिकाः संभाव्येरन्। वैयाकरणस्तु लक्षणदर्शीति देवहू[illegible]पांस्थ
पयति। तत्र लोपोदाहरणं त्मना देवेषु। मित्रद्रुः। [illegible]त्मना आत्मने इत्यर्थः। मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः। आगमो य

विवेद

था। देवासः ब्राह्मणासः। आज्जसेरसुगित्यसुगागमः। लोपागमो यथा देवा अदुह्र। अदुहत इत्यर्थः। दुहे लङो झस्यादा
देशो दुहते लोपस्त आत्मनेपदेषु इति तलोपः। बहुलं छंदसीति रुडागमः। एतेन नाध्रिषं दुहो। विश्वाइतेध्येन यो दुहरद
त्यादि लङंतमपि व्याख्यातं। वर्णविकारो यथा। गृभ्णामि ते सौभगत्वाय। हृग्रहोर्भश्छंदसि हस्येति वक्तव्यमिति भकारः। ता राम
प्रत्ययोपिच्छांदसोस्ति। यथा उद्ग्राभं च निग्राभं चेति उदि ग्रह इति सूत्रे उद्ग्राभ निग्राभौ [illegible] छंदसि। स्तु थमन

1

१०

३०

302

युक्ताः

निपातयोरितिवचनादुन्निपूर्वाद्ग्रहेर्घञ् । तत्रोत्सर्गात्सूत्रेण लोकेपि सिद्धो घञ् । निपूर्वात्तु वार्त्तिकोक्तेश्छन्दस्येवा सन्नि
वेशविशेषे पात्रविशेषास्रुच इत्युक्तेरुपभृतो ... रेवग्रहणे उद्ग्राभं चेति ऋग्मुप ... च्छति । निग्राभं चेति स्रुगुपभृतं नि
यच्छतीति वचनात् । भकारादेशः प्राग्वत् । कुत्रोपि प्रयोजनं न तथा हि । यत्राङ्गजातं पूर्णमुपदिष्टं सा प्रकृतिः यथा दर्शपूर्ण
मासौ यत्र नोपदिष्टा सा विकृतिः यथा सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति विहितो यागः तत्र वैकृतस्य विधे
र्विषयभूतायां भावनायां करणीभूते यागे उपकाराकाङ्क्षायां तन्मुखेन प्राकृतमङ्गजातं प्राप्यते वैदिके करणे तादृशा
नामेवाङ्गानामपेक्षितत्वात् । तेषामेव प्रकृतौ क्लृप्तसामर्थ्यात् । तद्विशेषस्यैकदेवतात्वादिना ज्ञापकत्वात्तस्मात्प्र
वृत्तिवद्विकृतिः कर्तव्येति पूर्वमीमांसायां स्थितं । तत्र यस्याङ्गस्य प्रकृतौ य उपकारः क्लृप्तस्तस्य विकृतावसंभवे नि
वृत्तिः यथा प्रकृतावबघातस्य वैतुष्यमुपकारस्तया क्लृप्तं तस्य कृष्णलेष्वसंभवात् । अवघातस्य निवृत्तिः मंत्रा अ
प्यंगं । तेषां चानुष्ठेयार्थप्रकाशनं कार्यं तत्र प्रकृतौ यस्य मंत्रस्य यदभिधेयं तच्चेद्विकृतौ साकल्येन नास्ति तदा त
स्य मंत्रस्य निवृत्तिः यथा अवरक्षो दिवः सपत्नं वध्यासमित्यवघातमंत्रस्य कृष्णलेष्वप्यस्यैकदेशस्याभिधा

॥म॰-कौ॰
॥११॥

अग्नयेत्वा जुष्टंनिर्वपामीत्यस्यमंत्रस्यावयवभूतंदेवताभिधायिपदमोषध्यद्व्यक
नेनास्तितत्रतावन्मात्रंनिवर्ततेयथा अग्निशब्दे चलुप्तद्वारकेतयानिवर्त्तमानेएकारोपिनिवर्तते। अका
त्वेनैकदेवताकत्वेनचाग्नेयविकारभूतेसोर्थेनिवर्तते। ततश्चतुर्थ्यंतंसूर्यायेत्याद्युदात्तं अग्नयेर
रंतेतरप्रकृतिसन्निधानेनैवएकारस्यसंप्रदानेयाच्य अकारांतुयशब्दस्य यथा देवीरापः शुद्धास्थेत्यस्य सु[struck]तु
त्यस्यमध्योदात्तस्यस्थानेकुत्वं। सोयंप्रकृत्यूहः। यथालिंगस्यक्वचिदूहः। यथा माभेर्मासंविक्था इति पुरोडाशे
विनियुक्तो मंत्रः तस्याज्येऽहुहः। देयाज्यशुद्धमसीति। प्रत्ययमात्रस्य क्वचिदूहः। यथा लिंगस्तु मासंग्विध्वमित्यूहः
चदानमंत्रः तस्य धानासूहः। माभैष्ट मा संविक्तिध्वमित्यादिरिति हस्तादयः। यालिकास्तु ... स्यैवैतद्धारणात्। लाघ
मारुः। युक्तं चैतत्। प्रस्तावनिर्दकृतयाविजिपृथक्भाव स्य प्रयोगो न तु ओ वि ... वेदुष्यं च साध्वसाधु विवेकः स व
वमपि प्रयोजनं तथाहि। अध्यापनं ब्राह्मणस्य वृत्तिः तन्निर्वाहस्तु वेदस्याध्ययनेन। लक्षणद्वारा तद्बोधने लाघवमन्यथा गोर
नप्रतिपदपाठाद्दिना संभवति शब्दानामानंत्यात्। तस्मादुत्सर्गापवादलक्षणद्वारा ... श्रूयते तत्र संदेहः कर्मधारयोयं बहुव्रीहिर्वेति
वे। असंदेहोपि प्रयोजनं। तथाहि। स्थूलपृषतीमनड्वाहीमालभेतेति

तात
राम
११
२७

तत्र कर्मधारयपक्षे पृषतीशब्देन मत्वर्थलक्षणया पृषत्वती ...ति बिंदुमती गौरेवाभिधीयते स्थूलापि सैव। बिंदूनां स्थौल्य
तानवे वा यथा तथास्तु बहुव्रीहौ स्थौल्यं पृषत्स्वन्वेति। गौस्तु स्थूला दृश्यते वेत्यनादरः। तत्र लकारसकारेउदात्तत्वे दृष्टापूर्वप
दप्रकृतिस्वरेण बहुव्रीहिं वैयाकरणो निश्चिनोति। ततश्च निश्चयेन प्रतिबंधात्संज्ञयानुत्पादः स एवासंदेहः। अर्थाभावे
व्ययीभावादसंदेहमिति स्यादिति चेन्न। पर्यायेणाव्ययीभावतत्पुरुषसंज्ञाद्वयमपि भवतीति द्वितीये वक्ष्यमाणत्वात्।
अत एवोभयथापि मुनिप्रयोगः। अद्भुतायामसंहितमिति। अथासंहितयेति वा। एवं चमिंद्रपीतस्योपहूतस्योपहूतो
भक्षयामीत्यादा वपि स्वरेणैव बहुव्रीहिनिर्णये इंद्रपीताधिकरणं वैयाकरणान्प्रति सार्थकं स्यात्। चिंतान्यायेन वा
नेयमिति दिक्। तद्देवे रक्षोहलाघवासंदेहाख्यानि च स्वारिफलानि व्याख्यातानि। आगमस्तु प्रवर्तक इत्युक्तं। भाष्ये
तु संदर्भशुद्ध्यर्थं फलचतुष्टयस्य प्राक्पश्चाद्वा प्रवर्तके च वक्तव्ये मध्ये तदुक्त्या फलसंदेहे न नित्यानामपि फलपर्यव
सानमस्तीति सूचितं। फलं तु पापक्षयः। प्रसीयानुप्रतिबोधधर्मेण पापमपनुदति विहितस्याननुष्ठानान्निंदितस्य च
च सेवनात्। अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छतीत्यादिवचनानीह साधकानीति दिक्। इमानि च भूयस्त्यादि
भाष्येण प्रवर्तकवचनांतराणि उदाहृत्य व्याख्यातानि। तेसुरा हेलयो हेलय इति कुर्वंतः पराबभूवुः। तस्माद्ब्राह्मणो

ञा

॥ शा॰ कौ॰
॥१२॥

न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्द इति ब्राह्मणं। अत्र न म्लेच्छितवा इत्यस्य विवरणं नापभाषितवा इति। उभय
कृत्यार्थे चापि तवैकेन्केन्यत्वन इति तवैप्रत्ययः स्यात् नामनेकार्थत्वान्निंदावचनान्म्लेच्छधातोः कर्मणि घञन्तेनापशब्दसामाना
धिकरण्यं न विरुध्यते। अत्र न म्लेच्छितव्यमिति निषेधस्य तेसुरा इत्यादिरर्थवादः न चेह रात्रिसत्रन्यायेनार्थवादादिवं
फलमस्तीति वाच्यं द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यादिति न्यायेनापापश्लोकश्रवणवत् शास्त्रस्य मात्र
परत्वात्। प्रकरणात्वेन ह्यर्थं निषेध इति यर्वाणस्तर्वाणो नामेत्यादावुत्तरग्रन्थे भाष्यकारैरेव स्फुटीकरिष्यते। अत एवे
हापि परामृतामाम्नेत्यध्येयं व्याकरणमिति नोपसंहृतं। किंतु म्लेच्छा मा भूमेत्येवाम्लेच्छा निघाः। शास्त्रे विपरीतानुष्ठा
नादिति भावः। अत्र हेहे प्रयोगे हैहयोरिति प्लुते प्लुतप्रयुक्ति प्रवृत्तिभावे च वक्तव्ये तदकरणं म्लेच्छनमित्येके। ननु सर्वः
प्लुतः साहसमनिच्छता विभाषा कर्तव्य इति वक्ष्यमाणत्वान्नैष दोष इति चेत्सत्यं। अत एवापरितोषाद्वाक्यद्विर्वचनं
म्लेच्छनमित्यपरैर्व्याख्यातं। सर्वस्य द्वे इत्यत्र पदग्रहणस्य चोदितत्वादिति तेषामभावः। ननु नेदं शास्त्रीयं द्विर्वचनं किंतु
तात्पर्यद्योतनार्थमैच्छिकः पुनः प्रसंगः अनावृत्तिः शब्दादनावृत्तिः शब्दादिति चेत्। तर्ह्याम्रेडितस्वरानुपपत्तिः। य
दित्युतत्राम्रेडितस्वरं निर्मुक्त एव पाठस्तर्हि रिशब्दस्यैकस्य लत्वमपशब्द इति बोध्यं इदं च भाष्यादिषु प्रसिद्धं श्रुतिपा

वि

गुरु
ले
भाषणकी

बोधित
वदिति स्म

॥१२॥
३३

306

रमनुसरत्त्वयाख्यातं। अयं पाठः क्वचिच्छाखायामन्वेषणीयः माध्यंदिनीशतपथब्राह्मणे हेलवो हेलव इति पठितत्वात्तस्मा
द्ब्राह्मणो न म्लेच्छेदिति पठितेन तत्र यकारस्थाने [illegible] वकारे पठ्यते इति स्पष्टमेव। तथा शिक्षासु पठ्यते मंत्रो हीनः
स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधात्। स्वरेण
स्वरतः। हीयमानपापयोगाच्चेति तसिः। यदर्थप्रतिपादनाय प्रयुक्तस्ततोऽर्थांतरं स्वरदोषात्प्रतिपादयन्। अत ए
व तमर्थं नाहेत्यर्थः। वागेव वज्रः हिंसकत्वात् यजमानं हिनस्तीति यथाध्वर्युकृताद्धोमाद्यजमानेध्वमेसन्तिः
एवं यजमानकृतादपशब्दप्रयोगाद्यजमानात्ययवाय इत्यर्थः। यथेत्युदाहरणे इंद्रशत्रुः इंद्रशत्रुशब्दः पुरा किल विश्व
रूपाख्यस्त्वष्टुः पुत्र इंद्रेण हतस्तस्मिन्कुपितस्त्वष्टा इंद्रस्य हंतारं वृत्राख्यपुत्रांतरमुत्सि...त्पादयिषुराभिचारिकं या
गं कृतवान्। तत्रेंद्रस्य शातयिता शत्रुः [illegible] हिंसक इति यावत्। तथाभूतः सन्वर्द्धस्वेति प्रतिपादयितुमिंद्रशत्रुर्वर्द्धस्वे
ति प्रयुक्ते। ण्यंतात्छदेसेणादिकः क्रुन् प्रत्यादिगणे निपातनाद्ध्रस्वत्वं। इंद्रशत्रुत्वस्य विधेयत्वान्न संबोधनविभ
क्तिः। अस्या अनुवाद्यविषयत्वात्। अत एव राजन्युध्यस्व राजा भवेत्यनयोर्व्यवस्थयैव प्रयोगः राजत्वस्यासि
द्धत्वे [illegible] संबोधनविभक्तिर्न तु विधेयत्वेऽपि इत्येवं चेंद्रशत्रुशब्दे तत्पुरुषसमासप्रयुक्तेऽन्तोदात्ते वक्तव्ये प्रमादादाद्युदा

शत्रु

च

अध्वर्यु

वै

इति

॥शा॰कौ॰॥
॥१३॥

तः किलोक्तः। तथा च पूर्वपदप्र[illegible]स्यार्थेन बहुव्रीहिर्यो लब्धः इदेर्हि धातोरौणादिके ऋज्रेन्द्रेत्यादिना रन्प्रत्यये कृते इन्द्रशब्द
आद्युदात्तो व्युत्पादितः। तेनेन्द्र एवास्य हिंसकः संपन्न इति श्रुतिरितिहासपुराणादिषु प्रसिद्धं तदिहोदाहरणं तयोक्तं। स्यादेतत्। अथ
इन्द्र कर्मणि [illegible] ऐकश्रुत्येऽह भवितव्यं। सा च तत्पुरुषबहुव्रीह्योः स्वरविधिप्रवृत्तेति। अत्राहुः जपादिपर्युदासेन मन्त्रेष्वेवैकश्रुतिर्विधी
यते स्वेच्छया प्रयुज्यमानश्च मन्त्रो न भवति। [illegible] तदुक्तं भेदलक्षणे जैमिनिना। अनाम्नातेष्वमन्त्रत्वं इति। आपस्तंब आह। अनाम्ना
ता अमन्त्रा [illegible] यथा प्रवरोहनामधेयग्रहणानीति। अत एवं मन्त्रो हीन इति पाठस्य शिक्षायां प्रसिद्धत्वे [illegible] दृश्यमानस्यामन्त्रत्वे
न यथेन्द्रशत्रुरिति वाक्यशेषो संगतः स्यात्। अतो मन्त्रशब्द इह शब्दमात्रपरस्तथा शायेन भाष्ये दुष्टः शब्द इति पठितं। नन्वनुस्वा
हेन्द्रशत्रुर्वर्द्धस्वेति वेदे पठ्यत एवेति चेत्सत्यं। दृहितं स्वपं मन्त्रभूतं अनुकार्यं तदनुकरणस्य पाठेऽप्यर्थपरस्यानुकार्यस्य लौकि
किकत्वानपायात्। न [illegible] इन्द्रशत्रुशब्दस्य लौकिकत्वे कथं स्वरप्रयुक्त[illegible]यो गुणदोषयोः प्रसक्तिः स्वरस्य वेद
मात्रपरत्वा[illegible]दिति चेन्न स्वरविधौ छंदोधिकाराभावात्। एतावानेव हि भेदः यच्छंदसि त्रैस्वर्यं एकश्रुतिश्च
व्यवस्थयाश्रीयते लोके त्वैच्छिको विकल्पः। अत एवैकश्रुत्या स्वरपाठस्त्रैस्वर्येण वेति पक्षद्वयमपि तत्र तत्रोपन्यस्तं इ
ति वक्ष्यामः। नन्वेवमुच्चैस्तरां वेति सूत्राद्विकल्पानुवृत्त्यैव सिद्धौ विभाषा छंदसीत्यत्र विभाषाग्रहणं व्यर्थः स्यात्। प्रस

राम

॥१३॥
३३

308

असुद्द

ऽप्रतिषेधे तु नायं दोषः। यत्र कर्मणीत्यस्यानिवृत्तये पुनर्विभाषाग्रहणात्। न च पर्युदासपक्षेप्येवमेवेति वाच्यं। नित्यविकल्पवि
ध्योर्विषयभेदस्यावश्यकतया आरंभसामर्थ्यादेव तन्निवृत्तिसिद्धेः प्रसज्यप्रतिषेधेनारंभसामर्थ्यात् तु हादिष्वमंत्रेषु चरित्वा
र्थस्य पूर्वविध्येरुत्तरेण छंदोमात्रविषयकेणाबाध्यसंभवात्। न ह्यूहादीनां छंदस्त्वमस्ति। मंत्रब्राह्मणेतरत्वात्। तस्मादसम
र्थसमासमाश्रित्य प्रसज्यप्रतिषेध [illegible] एवाग्रत्यास्वीकर्तुमुचित एवेति चेत् न। पर्युदासपक्षेपि मंत्रे नित्यं ब्राह्मणे वेति
ति विषयविभागसंभवे यत्र कर्मणि निवृत्तये विभाषाग्रहणसंभवात्। उक्तापरितोषादेव केचिदूहापादिषु प्रसज्यप्रतिषेध
माश्रित्येहाप्येकश्रुतेः प्राप्तोत्तदकरणं बहुश्री हि स्वरकरणं च स्वरतोपराध्यादित्यस्यार्थमाहुः। श्रूयते चायदधीतमविज्ञा
तं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्। निगदेन पाठमात्रेण। शुष्कैधः इंधनं। तेन ध्रुबेन एधः
वा शब्देनाकारांतेन पुल्लिंगे नेनिर्वाह्यं। न ज्वलति न प्रकाशते। निष्फलं भवतीति अर्थः। निरुक्ते तु। अथापि ज्ञानप्रशंसा भवत्य
ज्ञाननिंदा च। त्पुप ऋम्य स्थाणुरयं भारहारः किलाभूत् अधीत्य वेदं न विजानाति योर्थं। योर्थज्ञ इत्सकलं भद्रमश्नुते ना
कमेति ज्ञानविधूतपाप्मेति मंत्रमुदाहृत्य यद्गृहीतमविज्ञातमिति पठ्यते तत्रापि गृहीतं शब्दतः अविज्ञातं त्वर्थतः प्र
कृतिप्रत्ययविभागेन चेत्यादि शेषं प्राग्वत्। अन्यत्रापि श्रूयते। एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधु

रिति। दुष्यति चापशब्दैः

म्भवतीति। एतच्चैकः पूर्वपरयोरिति सूत्रे भाष्ये व्यक्तं। एतन्मूलकमेव कात्यायनप्रणीतेषु श्राद्धकल्पेषु श्लोकेषु स्मर्यते। यस्तु प्र
युंक्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैरिति सूत्राद्ये व्याकरणः कर्ता
सामर्थ्याद्बोध्यः। तथा अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः। कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्। अयम
हमित्यस्यानुकरणं चानिति परमिति निगतिसंज्ञा। ततो गतिसमासेऽप्यस्य वामीयमिसादावि वानुकरणत्वादेव विभक्तेर्लु
क्। याज्ञिकाः पठन्ति। प्रयाजाः सविभक्तिकाः कार्या इति। यद्यपि प्रकृतौ प्रयाजेषु मन्त्राः सविभक्तिका एव पठ्यन्ते तथापि य
द्याधानान्तरं उदरव्यथा वान्या घटिका संवत्सरमध्ये तस्य महती विपत्स्यात्। तदा नैमित्तिकी पुनराधाने ष्टिर्विधा
यते तत्रेदमाम्नातं प्रयाजाः सविभक्तिकाः कार्या इति तत्र केवलविभक्तेः प्रयोगानर्हत्वात्प्रकृतिराक्षिप्यते। सा चाग्निशब्द
रूपा। न तु याकाचित्। निरुक्ते दैवतकाण्डे। अथ किंदेवताः प्रयाजानुयाजा इति प्रश्नमवतार्य मंत्रवर्णादानु आग्नेया दाह
स्थितिरिति उपसंहारात्। तस्मादादितश्चतुर्षु प्रयाजेषु चतुर्षु स्त्रो विभक्तयोऽग्निशब्दप्रकृतिकाः पठ्यन्ते। इत्यादि
श्रौतग्रन्थेषु द्रष्टव्यं। तथान्यत्रापि। यो वा इमां पदशः स्वरशोऽक्षरशो वाचं विदधाति स आर्त्विजीनः इति। पदप
दमिति संख्यैकवचनाच्च वीप्सायामिति शस्। स्वरश उदात्तादिः अक्षरं व्यञ्जनसहितोऽचः आर्त्विजमर्हतीति आर्त्विजी

नोयजमानः ऋत्विक्त्वमर्हतीति आर्त्विजीनो याजकः। यज्ञर्त्विग्भ्यां घखञाविति सूत्रेण। यज्ञर्त्विग्भ्यां तत्कर्मार्हतीति चोपसंख्या
नेरिति वार्त्तिकेन च खञ्। यजमानो याजने च विदुष एवाधिकार इति भावः। ऋग्वेदेपि बहवो मन्त्रवर्णाः। चत्वारि शृंगाः। चत्वारि वा
क्॰ उतत्वः पश्यन्। सक्तुमिव सादयः। तितउ परिपवनं भवतीति भाष्ये। चालनीति तितउः पुमानिति त्वमरस्य प्रमाद इत्येके। वस्तुतस्तु
भाष्यानुरोधादमरग्रन्थे पुंस्त्वायोगमात्रं व्यवच्छेद्यं। न त्वन्ययोगोपि। तथा च पुंनपुंसकयोर्वर्गस्याद्यास्तु हिंगु तितउ इति त्रिकांडशे
षः। अत एव तितउमाचष्टे तिताययतीत्यभियुक्तग्रन्था अपि अपि संगच्छन्ते इति दिक्। याज्ञिकाः पठन्ति। आहिताग्निरपशुरिद्धप्रयु
सारस्वती न्त्यप्रायश्चित्तीयामिष्टिं निर्वपेदिति। तथा दर्शपूर्णमासस्योत्तरकालं जातेस्य पुत्रे नाम विदध्याद्घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरुषानू
ति कमनरिप्रतिष्ठितं। तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम [illegible] कृतं कुर्यान्न तद्धितमिति। नामकरणेधिकारिणः
पितुर्ये त्रयः पुरुषास्ताननुकायन्ति अभिव्यज्यन्ते इति त्रिपुरुषानूकं। अन्येषामपि दृश्यते इति दीर्घः। त्रिपुरुषमित्यत्र पात्रादित्वात्स्त्री
त्वाभावः मूलविभुजादित्वात्कः। यत्तु उपपदाविवक्षया आतश्चोपसर्गे इति के रूपम्। ततः षष्ठीतत्पुरुष इति। तन्न कर्मण्यणिति
सूत्रे कारादनुपपदात्कर्मोपदो विप्रतिषेधेनेति वार्त्तिकस्य नदीसूत्रे व्याख्याविति मूलविभुजादित्वात्क इति भाष्यस्य तेन चानुगुण
अत एव गोगाधरादिरूढ्यानां संज्ञारूढत्वमिति प्राञ्चः। वस्तुतस्तु प्रथमं कर्माविवक्षायामनूकपदं व्युत्पाद्य पश्चात्कर्मसंबन्धेप
दोषः। वार्त्तिकादिकं तु प्रथममेव कर्मविवक्षामभिप्रेत्य। अन्यथा सूत्तपूर्व्यादिषु का गतिः। अत एव यक्ष्यं च क्षुद्दुपहेतुमिति भाष्य
स्त्री व्याख्यायां बहिरंगत्वप्रतीत्या अंतरंगः पदसंस्कारो न विहन्यते इति कैयटोपि वक्ष्यति। विवक्षा च लोकप्रसिध्यनुसारिणी न तु स्वा

॥मू॰को॰
॥१५॥

[illegible]हिदू
यतेत्तिविपराभ्यांजेरित्वा द्वावपिपूर्वधातुः साध्यनेन शुध्यतेइतिपक्षसुपष्टम्यविजयतीत्यादिनापादनीयमिति [illegible] हिदू
यतेत्तिविपराभ्यांजेरित्वा दावपिपूर्वधातुः साध्वनेन शुष्यतेइतिपक्षसुपष्टभ्यविजयतीत्यादिनापादनीयमिति। अस्यार्थः। देवरुण
तथाऋग्वेदेपिपठ्यते। सुदेवोअसिवरुणयस्यतेसप्तसिंधवः अनुक्षरंतिकाकुदं सूर्म्यंसुषिरामिवेति। अस्यार्थः। हेवरुण
तथाऋग्वेदेपिपठ्यते। सुदेवोअसिवरुणयस्यतेसप्तसिंधवः। अनुक्षरंतिकाकुदंावंदिदू क्षेपणार्थः। धातूनामनेकार्थत्वा
सत्यदेवोसि। यस्यतेकाकुदंताल्वु। काकुर्जिह्वासा उ यत्तेउत्क्षिप्यतेस्मिन्निति काकुदं। वदिदू क्षेपणार्थः। धातूनामनेकार्थत्वा
त्। ततोघञर्थेकविधानमितिग्वधिकरणेकः संप्रसारणं। षष्ठीतत्पुरुषेहूके ध्वादित्वात्सररूपानुदप्रेरणेइत्यस्मादधिकरणेकः
पृषोदरादित्वा[illegible]नुशब्दस्यलोपइत्यन्ये। निरुक्तस्वरसोप्येवं। सप्तसिंधवः वेसप्तसिंध्वोविभक्तयोअनुक्षरंति
तालुप्राप्यप्रकाशंतेइतिअर्थः। अत्रदृष्टांतः यथासच्छिद्रांलोहमयींप्रतिमांप्रविश्याग्निः प्रकाशते। तथेति। अग्निर्हित
त्रसमक्षेमस्मीढ्लप्रतिमांदहत्करोति। तथाविभक्तयोपिशरीरंपापमपाकुर्वंतीत्यर्थः। सूर्मीस्थूर्णा यः प्रतिमेत्य
मरः। स्मर्यतेचा। सूर्मीज्वलंतीमालिंगेन्नरत्सवेगुरुतल्पगः इति। अभिपूर्वइत्यत्रवाच्छंदसीत्यनुवृत्तेर्यणादेशः। सुषिरा
मित्यत्रार्षआयत्वं। अभेदोपचारोवेत्याहुः। वस्तुतस्तुउपसिमुष्कमध्योरइतिमत्वर्थीयोरप्रत्ययः। रंध्रंश्वभ्रंवपाशुउ
षिरिसमरः। सरंध्रेसुषिरंत्रिषुइतिच। सुषुष्ठुस्यतिइतिसुषिरमितिक्षीरस्वामी। गर्तोगर्तान्वितेवाच्यलिंगं सुषिरंत्रि
ष्विति। श्वतः। इतिप्रयोजनप्रपंचः। इत्थं विषयप्रयोजनयोरुक्तयोः संबंधाधिकारिणावुक्तावे प्रायावेवे
तिमृथइ नोक्तौ। इत्येनप्रयोजनेपृष्टेततोन्यएवेथंप्र त्यवतिष्ठते। ननुयथाअध्यापिसा चार्येणोक्तेप्रयोजनमिष्ट

१

३८

३१२

मदस्तैव वेदमधीयते तदङ्गभूतं व्याकरणमप्यध्येष्यते तद्व्यर्थं प्रयोजनवर्णनक्लेशेनेति। अत्रेदमुक्तं। प्रायेणेदानींतनाना
मल्पायुष्यत्वाद्विघ्नबहुलत्वाच्च प्रधानभूतो वेदस्तावदध्येतव्यः तदध्ययनकाले च बाल्यात्प्रयोजनादिकं प्रष्टुमसमर्थाः शि
ष्या गुरुणोपदिश्यमानं वेदं गृह्णन्तीति युक्तं। ततो गृहीते वेदे प्रौढिमापन्ना विवाहार्थं त्वरमाणा व्याकरणाध्ययनाय
प्रवृत्ता अपि न सहसा प्रवर्तन्ते। वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः अनर्थकं व्याकरणमिति च प्रत्यवति
ष्ठन्ते। तान्प्रति युक्तमेव प्रयोजनादिवर्णनं। पूर्वकल्पेषु व्याकरणशिक्षादीनि लक्षणानि प्रथमं पठित्वा तत्तल्लक्षणानुसं
धानपूर्वकं लक्ष्यभूतं वेदं गृह्णन्तः स्थिताः तदा परं बाल्यावस्थायां व्याकरणस्य पाठात्प्रयोजनप्रश्नमदि हेत
प्रतिपादनमपि न कर्तव्यमेवेति। यद्यपि श्रावण्यां प्रोष्ठपद्यां वाप्युपाकृत्य यथाविधि। युक्तश्छन्दांस्यधीयीत मा
सान्विप्रोऽर्धपञ्चमान्। ततः परं तु छन्दांसि शुक्लेषु नियतः पठेत्। इति मनुवचनस्य तदूर्ध्वमनध्यायेष्वङ्गानि अधी
यीतेत्यादिस्मृत्यन्तराणां च पर्यालोचनया वेदवेदाङ्गा [illegible] ध्ययनसमकालता लक्ष्यते तथापि ऋषिवचनत्वा
विशेषाद्भाष्यकारोक्तेः मौनयादेश्च व्रीहियववद्विकल्प एवेति तत्त्वं। नन्वेवं अनुबन्धचतुष्टयस्य सुस्थत्वात्साधुश
ब्दव्युत्पादनं कर्तव्यमिति स्थितं। ननु किमिदं साधुत्वं साध्व यतिबोधयतीति युक्तत्वा बोधकत्वं तदिति चेन्न गाव्या

वेदाङ्गानि रहस्यं च कृष्णपक्षेषु संपठेत्

॥ शू॰ कौ॰
॥१९६॥

घोतने

दार्थपितत्वसत्वात्। शक्यत्वं तदिति चेन्नापचतीत्यादेरीश्वरस्याना साधुतापत्तेः तेषामनर्थकत्वात्। उपचारूलडिसा
दीनां साधुतापत्तेश्च। लाक्षणिकेष्वव्याप्तेश्च। तेषामपि लक्ष्यैर्थं शक्तेः शक्तता यास्तु अश्वास्वादिषु तिप्रसक्तेः। द्योति
मत्वं तदिति चेन्न। द्योतकेषु निपातेष्वव्याप्तेः औपसंदानिकी शक्तिरस्त्वेवेति चेन्न। नाप्रोत्तर जित्वयोत्तरत्वयोरविशेषे
षेण विनिगमना विरहात् छन्दत्तापत्तौ व्यासज्यवृत्तिशक्तौ विश्रान्तेः। तत्तश्चाद्वृद्धिर्वचनाद्यव्यवस्थापत्तिः। नन्वजातिवि
शेषएव साधुतेति वा न्याय्यत्वादिना संकरापतेरिति अत्राहुः। अनपभ्रष्टत्वानादित्वे द्वाभ्युदययोग्यता। यात्रिया द्वेअ
नाद्यावाजातिः कापीह साधुतेति। अस्यार्थः। शक्तिवैकल्यादिप्रयुक्तमन्यथोच्चारणमपभ्रष्टता। तद्विरहोनपभ्रष्टता
सैव साधुता। सा चार्थ विशेषान्तरभावेस्त्येव। तथाहि। यमर्थं शक्त्या लक्षणया वा बोधयितुं द्योतयितुं वायादृश
द्वोनादिः प्रयुक्तस्तस्मिन्नर्थे दोषादन्यथात्वे प्राप्तः सो साधुः अन्यथा तु साधुरित्यर्थः। ये पिगान्यादिषु वप्रथमं प्रयुक्त
त्वाः संतस्तान्प्रयुञ्जते तेषामप्यन्यथोच्चारणमस्त्येव। तत्र च दोषप्रयोज्यत्वात् स्वेवा म्लेच्छप्रयोक्तुर्भमाद्यन्यतमत्वात्। यद्वा
अनादित्वा साधुता अनादिरिति श्लोके तु भावप्रधानो निर्देशः आदेरभावो नादित्वमिति वा। असंदेहादिवत्तयुरूपः॥ राम

॥१९६॥
२८

314

श्रीशी पि

अभ्युदययोग्यता वा साधुता । रत्नतत्त्ववच्छास्त्रपरिशीलनजन्यालिभिर्गम्यो जातिविशेषो वेति । यत्तु जातिसंकर[illegible]
स्युक्तो । तन्न । गुणगतजातौ तत्स्या[illegible]दोषत्वात् । तथाहि । यस्य देवदत्तादेर्नोष्ठ्याः एव वर्णाः श्रुतास्तस्य कुड्याद्यव्यवहि
तस्योष्ठ्यवर्णेषु श्रुतेषु यदनुमानं जायते तदोष्ठ्यानोष्ठ्यसाधारणतदनुमापकजातिसंगीकारे ससंभवघटते । न तु तत्त्वाप
नानाजातिस्वीकारे । ओष्ठ्यवर्णत्वस्य साधारणजातेः प्रागगृहीतत्वेनानुमितिसामग्रीवैकल्यात् । वस्तुतस्तु उपा
धिसंकरवदेव जातिसंकरो [illegible] सर्वत्रास्तु । दूषकतां निरुक्तेर्विनिगमकाभावेन भूतत्वमूर्तयोरिव शरीरत्व[illegible]योरपि पृथ्वीत्व
योर्द्वयोरपि जातित्वभंगापतेश्च । तस्माच्चतुर्विधमपि साधुत्वं निर्दोषं । व्याकरणैकगम्यं च । एवमसाधुतापि चतुर्द्धा । अप
भ्रष्टता । सादिता । प्रत्यवाययोग्यता । तदवच्छेदकजातिविशेषो वेति । २ इषुभादिसंज्ञासु यद्यपि पुण्यपापजनकत्वरूपे सा
धुत्वासाधुत्वे न स्तस्तथाप्यनपभ्रष्टत्वरूपं साधुत्वमस्त्येव । तदेवानुशासनप्रवृत्तावुपयोगि [illegible]भस्येत्यादिसौत्रनिर्देशा
त्त्वं कस्मान्न भवति । रत्नादिभाष्याच्चेत्याहुः । एवं चानादित्वं अभ्युदययोग्यत्वं वानपभ्रष्टत्वमात्रेण सिध्यति । किंतु पौ
रुषेयसंकेतविरहविशिष्टेनैव वक्ष्येयं । तदेतदुक्तं । या स्वेताः स्वेच्छया संज्ञाः क्रियन्ते इषुभादयः । कथं नु ता सां साधु
त्वे नैयताः साधयो मताः अनपभ्रंशता रूपत्वेनाप्यासामपरागृहीताः । स्त्रचेष्टा यथा लोके तथा संकेतिताः स्मा: । ततश्च

ना

नासांप्रयोगेभ्युदयः प्रत्यवायोपि वा भवेत् । लाघवेनार्थबोधार्थं प्रयुज्यंते तु केवलं । भिन्नात स्वयं निर्गलितोर्थः यास्येनाः स्व
ध्वणासंज्ञाः क्रियंत इति पक्षे अनिदंप्रथमाः शब्दाः साधवः परिकीर्तिताः तएव शक्तिवैकल्यप्रमादालसतादिभिः । अन्यथो
च्चारिताः पुंभिरपशब्दा इतीरिताः इति वा साध्वसाधुलक्षणे आश्रीयमाणे टिघुभादीनां साध्वसाधुबहिर्भावस्य
ष्ट एवा तेषामप्यनादित्वेति पक्षे चतुर्विधापि प्रागुक्ता साधुतास्त्येव । उक्तं च । व्यवहाराय नियमः संज्ञायाः संज्ञिनि
क्वचित् । नित्य एव तु संबन्धो डित्थादिषु गवादिवत् । रथ्यादीनां च शब्दस्येस्मिन् न्यायस्य वच्छेदलक्षणः । अकृत्रिमोभि
संबन्धो विशेषणविशेष्यवत् । इति पक्षद्वयेपि अनुशासनविषयता निर्विवादेति । नामकरणे त्वयं विशेषः । उक्तं
कुर्यान्न तद्धितं इति गृह्यसूत्रात् विरोधिनामेव साधुता । तद्विरोधिनां तु देशभाषानुसारेण क्रियमाणानां शब्दवि
मंचीत्यादिनामधेयानाम साधुतैवा । तरेतरलुः सूत्रे वार्त्तिकव्याख्यावसरे स्फुटीकरिष्यते । इति साधुत्वनिर्वे
च्चनं । व्युत्पादनेन वा प्रवृत्तिप्रत्यया दिकल्पनया । उत्सर्गापवादलक्षणैरेव । न च साध्वसाध्वोर्वा अन्यतरस्य
या प्रतिपदपाठेन । शब्दानामानंत्येन तदसंभवादित्युक्तं । स्यादेतत् । लक्षणप्रणयनमपि किं जातिपक्षमाश्रि
त्य उत व्यक्तिपक्षं । आद्ये सरूपसूत्रे विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति न सिध्येत् । तथाहि । जातौ पदार्थे

द्वयोर्विध्योः परस्परपरिहारेण तत्तदज्ञात्याक्रांतव्यक्तिविशेषे चरितार्थयोः क्वचिदेकत्र प्रसंगे परस्परप्रतिबंधादप्रतिप
त्तिरेव स्यात्। सत्प्रतिपक्षवत्। तथा च वक्ष्यति। अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति। तत्र च विप्रतिषेधे विध्यर्थं
परं तावद्भवतीति तस्मिंश्चाध्याये यदपूर्वस्य निमित्तमस्ति तर्हि भवत्येव तत्। यथा भिंधकीत्यत्र भिनद्हि इति स्थिते
परत्वाद्द्विर्भावे कृते पुनः प्रसंगविज्ञानादकोऽभवति। तदेवं जातिपक्षे पुनः प्रसंगविज्ञानं यद्यपि भवति। तथापि
सकृद्गताविति न सिध्यति। तथा च जुहुतात्त्वमित्यत्र जुहुहि इति स्थिते द्विर्भावे कृते बाधित्वा परत्वान्ता
तङि कृते स्य निवृत्त्याभावेन स्यादेव धिः। व्यक्तिपक्षे तु सकलविध्युद्देशे कस्य शास्त्रस्य व्यन्तयत्तरेचारिता
र्थत्वासंभवाद्धिकत्वप्रसंगे नियमार्थं सूत्रं। परमेवम्भवति न तु पूर्वमिति। तथा चैतत्सूत्रबलेन तत्र पूर्वलक्षणस्य
व्यत्ययं तरमात्रविषयकत्वं कल्प्यत इति। एतद्विषयकलक्षणाभाव एव पर्यवस्यति। तथा जुहुतात्त्वमित्यादेः सिद्ध
वपि भिंधकीत्यादि व्यक्तिपक्षेन सिध्यति। तस्माद्दुराक्ष्यमन्यतरपक्षाश्रयेण लक्षणप्रणयनमिति चेत्सत्यं। अ
तएव लक्ष्यानुरोधात्पक्षद्वयमप्याश्रीयते क्वचित्क्वचित्पदार्थ इति तत्र जातिवादिनामयं भावः। लाघवाज्जाति
र्वीप्सा। व्यक्तीनामानंत्येत्तासां वाच्यत्वे गौरवं बाहदोहाय चयस्तु लक्षितायां व्यक्तावितिं व्यक्तिवादिनस्त्वाहुः॥
न

सूत्रे

॥अ० कौ॥
॥१८॥

अनुपपत्तिं विनापि व्यक्तिप्रतीतेरनुभवसिद्धतया व्यक्तिरेव वाच्या। त्वप्रत्ययादिकं विना जातेः प्राधान्येनाप्रतीतेश्चाथाह यद्य
योप्येवं समंजसः यत्तु तैर्व्यक्तीनामानंत्यमिति तैनैव द्वाधकं शक्यतावच्छेदिका या जातेरेव स्यात्। न त्वेवमपि जातेरेव वाच्य
त्वमायातमिति चेन्न। अकार्यत्वेपि कार्यतावच्छेदकत्ववच्छक्यत्वेपि शक्यतावच्छेदकत्वसंभवात्। अत एव लक्ष्यतावच्छेदके
लक्षणानेति नैयायिकाभ्युपगमः तस्माज्जातिरूपं लक्षणं व्यक्तिमात्रं तु वाच्यं इति। यत्तु सरूपसूत्रे भाष्ये वक्ष्यति। नह्या
कृतिपदार्थकस्य द्रव्यं न पदार्थः इत्यादि। तत्तु जातिव्यक्त्योरन्यतरेण विशिष्टस्यापरस्य वाच्यत्वे सैव रूपं मतांतरं। तथा
चाकृत्यधिकरणे भट्टैरुक्तं। नियोगेन विकल्पेन द्वैवा सह समुच्चिते। संबंधः समुदायो वा विशिष्टा वैकयेतरेति॥
अत्र व्यक्तिरेव जातिरेव वाच्ये। तीर्हत्यमतद्वयं नियोगेनेत्यनेनोपनिबद्धं। चतुर्थचरणेन तु सरूपसूत्रोक्तं मतद्वयमुपनि
बद्धमिति विवेकः। यद्यपि जातिव्यक्तिपक्षयोरन्यतरस्य न्यायेन बाध्य आवश्यकस्तथापि हृष्यास्य संलापपरिभाषादि
वल्लक्ष्यसिध्युपायतयोभयाश्रयणे किमपि बाधकं नास्तीत्यवधेयं। वस्तुतस्तु भट्टोक्ताष्टपक्षीमध्ये विकल्पेनेति तृती
यः पक्षोत्र प्रक्रियादशायां स्थितः। विकल्पश्चालक्ष्यानुरोधाद्व्यवस्थितः। त्यमदेतत्। समुच्चयपक्षं चतुर्थमाश्रि

॥१८॥
३२

स्यापि क्वचित्कस्यचि भविष्यता अपरस्य त्वविवक्षेति गुरुरीत्या प्रक्रियानिर्वाहः सुकर इति दिक्॥ यद्येवं व्यक्तिरेवेति तत्त्वा
र्थ इत्यभिहितं स्यात्तर्हि जात्याख्यायामिति सूत्रं नारभेत। यदि च जातिरेवेति। तर्हि सरूपसूत्रं नारभेतेति भाष्यानु
पस्मिन्नेव पक्षे तत्रापि लक्षणया जातिपरत्वे रहाम्राः सन्तीति प्रयोगं साधयितुं जात्याख्यायामिति सूत्रम
स्तु। तथा जातिपक्षेपि नानार्थानुरोधात्सरूपसूत्रमस्तु। वक्ष्यति हि वार्तिककृत् व्यर्थेषु च मुक्तसंज्ञायमिति। स लं
लक्ष्यद्वयानुरोधादेव पक्षद्वयाश्रयणे कारणं। अत एवोदाहृतसूत्रयोर्भाष्ये तत्प्रत्याख्यास्यमानत्वेप्यदोषः॥ इदानीं
वार्तिककारः शास्त्रस्य नियमविधिरूपतया सार्थक्यमाह। सिद्धे [illegible] शब्दार्थसंबन्धे लोकतोर्थप्रयुक्ते शब्दप्र
योगे शास्त्रेण नियमो यथा लौकिकवैदिकेषु। लोकादेव हि प्रथमव्युत्पत्तिः अव्युत्पन्नं प्रति व्याकरणादीनामप्रवृत्तेः अ
र्थवद्धातुरित्यादिर्हि व्याकरणं शक्तिग्राहोपजीवकं। तथा च समर्थसूत्रेपि वार्तिकं। अर्थानादेशनादिति। अन्ये क
मन्यपदार्थ इत्यादिकं हि लोकसिद्धमर्थमनूद्य साधुत्वान्वाख्यानपरं। ततश्च लोकादेवावगते शब्दार्थयोः संबन्धे च सि
द्धेर्थबोधनाय शब्दप्रयोगेपि प्रसक्ते गवादय एव प्रयोक्तव्या न तु गाव्यादय इति नियमार्थं शास्त्रं नियमफलं तु धर्मः

॥ रू॰ को॰
॥१९॥

तत्र स्मार्ते दृष्टांतः प्राङ्मुखोऽन्नानि भुंजीतेत्यादि लौकिके दृष्टांतो व्रीहीनवहंतीत्यादिश्च वैदिके दृष्टांतो ज्ञेयः धर्मनियम इति
षष्ठीतत्पुरुषः अश्वघासादिवत्। ननु चतुर्थीतत्पुरुषः प्रकृतिविकृतिभावविरहात्। ननु यदि प्रयुक्तानामिदमन्वाख्यानं त
र्हि [illegible] किमर्थमप्रयुक्ता अपि तुषतेरूषक्रूपे चेत्यादयो व्युत्पाद्यंत इति चेत्। आर्षज्ञानं विना प्रयुक्तताया दुरवधारणात्
महान् हि प्रयोगस्य विषयः तथा च भाष्यं सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः सांगाः सरहस्या बहुधा भिन्ना एक
शतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदः वाकोवाक्यमितिहासः पुराणं
वैद्यकमित्येतावान् प्रयोगस्य विषय इति। बह्वृचानामिदं बाह्वृच्यं। छंदोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्य इति ञ्यप्रत्य
यः। चरणाद्धर्माम्नाययोरित्युक्तत्वात्। आम्नायो अथर्वणा प्रोक्तो वेदोऽथर्वा उपचारात् प्रयोग इत्येके। वसंतादि
ष्वथर्वन् आथर्वण इत्युभयोः पाठसामर्थ्यात् प्रोक्तप्रत्ययस्य लुगिति तत्त्वं। अत एव भाष्ये वक्ष्यति। तेन प्रोक्तमिति प्रत्य
स्य ऋषिभ्यो लुग्वक्तव्यः वासिष्ठोऽनुवाकः ततो वक्तव्यमथर्वणो वेति। तमधीते आथर्वणिकः वसंतादित्वाट्ठक्। दां
डिनायनेति सूत्रे निपातनाट्टिलोपाभावः आथर्वणिकस्याम्नाय आथर्वणः आथर्वणिकस्येकलोपश्चेति आथर्व

हि

न

320

णिकारणत्वस्य नियोगेन कल्पोपस्थापकत्वमनुसरामः एतावंतं प्रयोगविषयं पर्यालोचयितुमशक्तैरस्मदादिभिर्लक्षणानुग
तानां प्रयोगोऽस्तीत्यनुमेयं॥ अस्ति च त्वयोदाहृतानां वेदेपि प्रयोगः सत्रास्य रेवतीरेव दूषा। यन्मे नेराश्रु संवत्सरं च क्रा। यत्रान
श्वक्रान्तरसंततनूनां। इति। ननु लक्षणेनानादृतासिद्धिस्तर्हि विंचयादीनामपि स्यादिति चेन्न। न हि वचिरंतिपरः प्रयुज्यते
इत्यभियुक्तानाम विगीतव्यवहारेण सामान्यशास्त्रस्य संकोचात्। अभ्युपगतो हि वि[illegible] विषयिण्यापत्तित्तस्य कर्मान
कारस्य साग्निहोत्रादिश्रुतीनां संकोचः विशेषविषयेण शिष्टाचारेण सामान्यस्मृतेः संकोचश्चात्र तदुक्तं। आनर्थक्यप्रति
हृतानां विपरीतं बलाबलमिति॥ यत्र त्वप्रयोगः संदिग्धः शास्त्रानुगमश्च तत्र निष्प्रत्यूहमनुमानं। तदुक्तं। यथालक्षणमप्र
युक्ते इति। अप्रयुक्ते अनिश्चितप्रयोगे इत्यर्थः। निश्चिताप्रयोगे तु लक्षणं न प्रवर्तत एवेति निष्कर्षः। न चैवं ब्राह्मणोऽव
णादिति निरूढप्रयोगरूपेण विशेषविषयकाचारेण ब्रुवोवचिरित्यादीनां संकोचापत्तिः। त्रिशंक्वाद्ययाज्यया
ज्ञेनापि स्मृतिसंकोचापत्तेस्तुल्यत्वात्। न त्र धर्मबुद्ध्यानुष्ठानं नास्तीति चेदिहापि साधुत्वबुद्ध्या प्रयोगो नास्ती
ति तुल्यं। यदार्णस्तवार्णा इतिवदभियुक्तानामप्यसाधुप्रयोगस्य कृतो बहिरुपपत्तेश्च। अत एवेतिहासपुराणादिष
पशुद्धाः सं तीति हरदत्तः। न ह्यसंस्त्रासूत्रे भाष्येपि स्फुटमेतत्। केचित्त्वार्षग्रंथेष्वपि छंदसि विहितस्य व्यत्ययस्य

श्लेषण

च्चि

।।शू॰कौ॰
।।२०।।

प्रयत्यासाधुतांसमर्थयंते।नचगौणमुख्यन्यायेनमुख्यछंदस्येवतत्प्रवृत्तिः।स्वरितप्रतिज्ञयातद्बाधात्।वक्ष्यतिहि स्वरि
तेनाधिकारइतिसूत्रे।विशेषायाधिकेकार्यमिति।गौणमुख्यन्यायोहिस्वरितत्वप्रतिज्ञास्थलेनप्रवर्ततेइत्यर्थः।उपपा
दयिष्यतेचेदं।अतएवार्षत्वात्साधुतेतितत्रतत्रोद्घोषः संगच्छतइतिदिक्।यद्यप्यप्राप्तांशपरिपूर्णरूपफलकोनियमविधिः
इतरव्यावृत्तिफलकस्तुनित्यप्राप्तिविषयकः परिसंख्याविधिरितिपूर्वोत्तरमीमांसयोर्व्यवहारस्तथापीहशास्त्रेपरि
संख्यापिनियमशब्देनव्यवह्रियते।तेनपंचपंचनखाभक्ष्याइत्यस्यनियमोदाहरणतयोपन्यासोनविरुद्धः।नचासोमी
मांसकरीत्यापिनियमोभवत्वितिवाच्यं।पंचातिरिक्तभक्षणेप्रायश्चित्तविध्येरसंगतत्वापत्तेः।पंचानामभक्षणेप्रायश्चि
त्तापत्तौगृहेपिनिवसन्विप्रोमुनिर्मांसविवर्जनात्इत्यादिस्मृतिव्याकोपाच्च।अतएवत्रिदोषापिपरिसंख्येत्युच्यतेत्राश्रि
तेतिदिक्।अत्रेदमवधेयं।नियमातिक्रमेकृते ऽपूर्वपरंनभवति।दृष्टस्त्वर्थावबोधोभवत्येव।अयहनादिक्रमेचेतुष्यव
त्।दिगंतराभिमुखभोजनेरलिवच्च।नचापभ्रंशानामवाचकतयाकथमर्थबोधकतेतिवाच्यं।शक्तिभ्रमवतांबाध्य का
भावात्।विशेषदर्शिनस्तुद्विविधाः तत्तद्वाचकसंस्कृतविशेषज्ञानवंतस्तद्विकलाश्च।तत्राद्यानांसाधुस्मारण राम
द्वारार्थबोधः द्वितीयानांतुबोध्यार्थसंबद्धपदार्थांतरवाचकस्यस्मृतोसत्यांततोलक्षणयाबोधः सर्वनामस्मृते

३०

322

वा। तदर्थज्ञापकत्वेन रूपेण साधुस्मृतेर्वा। अर्थाध्याहारपक्षाश्रयणात् इति यथायथं बोध्यं। अपरे त्वाहुः। अपभ्रंशा अपि वा
चका एव। तथाहि। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छा शक्तिरिति मते [illegible] भगवदिच्छाया
शक्तिभ्रम सन्मात्रविषयकत्वात् अपभ्रंशेऽस्तु बोधजननेऽदर्शनात् तेनाभ्युपगमाद्दुर्वारा शक्तिः। पदार्थान्तरं तदिति मते कल्प्यके साध प्य
साध्वोस्तुल्यमेव। अ साधुस्मारणद्वारा साधुर्बोधक इति वैपरीत्यस्याप्यापत्तेश्च। स्वीकृतेऽपि परेण तिबादिस्मारिता
नां लादीनामसाधूनामपि बोधकत्वे। ननु साधूनामल्पत्वात्तत्रैव लाघवाच्छक्तिः कल्प्यत इति चेन्न वयमपूर्वीं
यथा विकल्पयामः किंतु घटजननसामर्थ्यमेव दण्डादेः शक्तिः तथा घटबोधजननसामर्थ्यमेव घटादिपदानां शक्तिः
सा च कारणतापरपर्याया शक्तिभ्रमाद्बोधवदतात्वयाभ्युपेतैव। शक्तिग्रहस्य भ्रमत्वपरं त्वदुत्पत्तौ विषयाबाधा प्य
दिति भ्रमः। नन्वेवं गौणमुख्यविभागोच्छेदः सर्वस्य सर्वस्य वाचकत्व इति पर्यवसानादिति चेन्न। तत्पक्षेपीश्वरेच्छाया गौ
णादावतिप्रसंगस्य तुल्यत्वात्। सुहृद्भावेन पृच्छामीति निचेत्। प्रचुरतरप्रयोगतद्वि रहाभ्यां गौणमुख्यविभाग
इति गृहाण। ननु जनकत्वेनागृहीतादपि तर्हि कारणात्कार्योदयः स्यादिति। पदार्थस्मृतिरापाद्यते वाक्यार्थबोधो
वा। नाद्यः संबंधग्रहणं विना तदयोगात्। नान्त्यः द्वाराभावात्। पदार्थस्मरणं हि द्वारं एवं च महदेव लाघवं सा

॥ श०कौ०
॥२१॥

शब्द

ध्युस्मरणकल्पनाक्लेशोऽपि न भवतीति। साधुत्वं जातिविशेषात्मकमित्युक्तमेव। समानायामर्थावगतौ शब्देनापशब्देनेति भाष्यमे
प्यत्र पक्षपातीति दिक्। अपशब्दानां वाचकावाचकत्वविचारः प्रयोगमुपादाय। नो वार्तिककारः प्रयोगाद्धर्मो न तु ज्ञानमात्रादि
ति सूचयति। युक्तं चैतत्। एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्त इत्यत्र ज्ञानप्रयोगयोरुपादानस्याविशेषेऽपि प्रतिपदाधिकरण
न्यायेन यदेकस्मादपूर्वं तदेतरत्तदर्थमिति प्रयोगात्फलं ज्ञानं तु तदंगमित्यभ्युपगमात्। प्रयोगस्य फलं प्रति संनिहितत्वाज्ज्ञा
ज्ञानस्य तु व्यवहितत्वात्। ज्ञानस्य प्रयोगांगतायां दृष्टार्थलाभाच्च। उक्तं च भट्टैः। सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्य
ते। परांगं चात्मविज्ञानादन्यत्रेत्यवधार्यताम्। इति। अत एव तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेत्यादिष्व
पि ज्ञानपूर्वकानुष्ठानात्फलमित्येव सिद्धान्तः। तदुक्तं वार्तिककृता। तत्तुल्यं वेदशब्देनेति। वेदः शब्दो विधायको यस्यार्थ
स्याश्वमेधादेस्तेनेदं तुल्यमित्यर्थः। तेन वैदिकशब्दानामपि पक्षकोटिप्रविष्टतया दृष्टान्तासंगतिरिति नाशंकनीयम्।
तेऽसुरा इति पूर्वोदाहृतश्रुतिरपि अपशब्दप्रयोगात्प्रत्यवायं बोधयन्ती साधुप्रयोगाद्धर्मं गमयति। वाजसनेयिनां
ब्राह्मणे तस्मादेषा व्यावृत्ता वागुद्यत इति श्रुतिरप्येवं। भाष्ये तु अभ्युपेत्यवादेन साधुज्ञानात्फलमित्यपि पक्षः सम
र्थितः। न चैवमपशब्दज्ञानादधर्मोऽपि स्यादिति वाच्यं। यावद्वचनं वाचनिकमित्यभ्युपगमात्। न म्लेच्छितवा इत्या

दिनाऽसाधुप्रयोगस्यैव निषेधाज्ज्ञानं च व्याकरणाध्ययनेऽपि परिनिष्ठितपचत्वादिबोधार्थं डुपचषित्यादीनां प्रयोगोपा
वश्यक इति वाच्यं। तदीयज्ञानमात्रेण निर्वाहात्। अत एवालौकिकप्रक्रियावाक्यं गुरुमात्रस्य गोचर इति नित्यसमा
सेष्वस्वपदविग्रहाभ्युपगमः। अथापि व्युत्पादनार्थं तत्प्रयोग आवश्यक इत्याग्रहस्तथापि न क्षतिः। अनपभ्रष्ट
त्वेन तेषां प्रत्यवायाजनकत्वात्। नह्येते शक्तिवैकल्यादिप्रयुक्ताः। येन गाव्यादिसाम्यं भजेरन्। अथ सादित्वेनासाधु
त्वाग्रहस्तथापि न क्षतिः शब्दस्वरूपपरत्वात्। अनुकरणानां सर्वत्रासाधुत्वाभ्युपगमात्। न हि हेलयो हेलय इति श्रुति
प्रयोगोऽपि प्रत्यवायजनकः शब्दस्वरूपमात्रपरा एते भिन्ना एव साधवश्चेति तुल्यम्। अत एव स्वाहेन्द्रशत्रुर्वर्धस्वेत्याद्यु
दात्तस्य पाठेऽपि तत्प्रत्याख्यस्यार्थपरस्याहितस्यानाम्नानात् मंत्रत्वाज्ज्ञोपादिपर्युदासेन विधीयमाना एकश्रुतिर्न प्र
सक्तेति प्रागुक्तं। अत एव साधुत्वासाधुत्वयोरेकस्मिन् सद्भावो भावश्चेति विरुद्धस्य दुरुपपादतयाऽर्थभेदाच्छब्दभेद
इति दर्शने प्रवृत्ते। न च प्रवृत्तिवदनुकरणमित्यतिदेशेनापशब्दानुकरणस्यासाधुता शङ्क्या। असाधूनां शास्त्रीयप्रवृ
त्त्यभावात्। असाधुत्वस्य शास्त्रीयकार्यत्वाभावाच्च। न ह्यशास्त्रीयमप्यतिदिश्यते इति ऋलृक्सूत्रभाष्ये स्फु
टमेतत्। डुपचषूप्रभृतिप्रयोगादपशब्दत्वानाद्वा प्रत्यवायो नास्तीति प्रागुक्तरीत्या स्थितेऽप्यभ्युपेत्यापि प्रत्यवायभा

।।शू.कौ.
।।२६।।

ष्येकूपखानकन्यायउदाहृतः यथाहि कूपं खननकर्दमेन लिप्यत एव तथापि ततो लब्धेन जलेन तं मलं दूरीकरोति फलांतरं
चलभते। तथेहापि परिनिष्ठितत्तानास्त्वर्वोसन्नप्रत्यवायनिरासं फलांतरं च लभंत इति सोऽयं कूपखानकन्यायः। कर्म
ण्यणि प्राप्ते वा सरूपन्यायेन ण्वुल्तृचौ नित्यसमासाभावात् कूपस्य खानक इति स्वपदविग्रहः। न च शिल्पिनि ष्वुना सरू
पेण ण्वुलो बाधः स्यादिति वाच्यं। इह खननकर्तृत्वमात्रस्य विवक्षा त्वाच्छिल्पित्वस्याविवक्षितत्वात्। तस्मात्सर्वथापि
गाव्यादिप्रयोगे प्रत्यवाय इति स्थितं। तत्र ेदं भाष्ये सिद्धांतितं। याल्लेकर्मण्येव न म्लेच्छितवा इत्यस्य नु प्रकरणे पाठा
त्क्रतुशाद्धाद्धहि स्वपशाद्धप्रयुंजानो न दुष्यति। एवं हि श्रूयते यर्वाणस्तर्वाण इति नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः

दि पराभूताः। प्रत्यक्षधर्माणो योगजधर्मबलेन साक्षात्कृतधर्माः अत्रायं श्रुतेराशयः योगिनोऽप्येते विरत्यतिश
याल्लौकिकेष्वर्थेष्वाग्रहविरहाद्यथा तथास्माकं भवत्विति विवक्षयैव यद्वानस्तद्वान इति वक्तव्ये यर्वाणस्तर्वाण इत्यूचुः
यज्ञे कर्मणि पुनः साधुनैव प्रयुक्तवंतः तेन यर्वाणस्तर्वाण इत्येवं रूपमेव संज्ञां मुनयो लेभिरे इति मद्दाश्चाहुः। स्त्युपा
यमांसभक्षादिषु पुरुषार्थमपि श्रितः प्रतिषेधः क्रतोरंगमिष्टः प्रकरणाश्रयादिति। अपरे त्वाहुः क्रतावेव हि प्रयो
गेऽपि पुरुषः प्रत्यवैतीति। तेषामयमाशयः नानृतं वदेदित्यारभ्याधीतः पुरुषार्थोऽपि निषेधस्तावदस्तीति निर्विवा
दं। तत्र निषेध्यमनृतं द्विधा शाद्धानृतमर्थानृतं चाशुद्धस्यार्थस्य वा विपरीतप्रतिपत्तिहेतुभूतं उच्चारणमनृतवदनं ५

इति

एवंयथार्थानृतंवदतःप्रत्यवायस्तथाशब्दानृतामपितुल्यंक्रतुमध्येपुनरपभाषणेपुरुषःप्रत्यवैतिक्रतुरपिविगुणः
त्तिवचनद्वयबलात्सिध्यतीतिदिक्।यथाचप्रयोगेसाधूनांनियमस्तथासाधुत्वज्ञानेपिव्याकरणस्यनियमस्तत्त्वबधेये वे
दि व्याकृतावागुच्यतइतिप्रागुक्तश्रुतेः।व्याकृताव्याकरणसंस्कृतेतितदर्थः।व्याकरणशब्दोयोगरूढ्यालक्ष्यलक्षणसमुदा
यपरःसूत्रपरोवेतिपक्षद्वयमपिभाष्ये स्थितं।तत्राद्यपक्षेसूत्रमात्रमधीयानेव्याकरणशब्दप्रयोगोभाक्तः।स
मुदायवाचकाहिशब्दाःक्वचिदवयवेपिप्रयुज्यन्ते।यथापूर्वपंचालाउत्तरपंचालाइति।द्वितीयपक्षेतुव्याकरणस्यसूत्रमि
तिशहोःक्विरइतिवन्नेयः।अष्टाध्याय्याएकदेशःसूत्रमित्यवयवावयविभावेषष्ठीतियास्तुअस्यवचनस्यायंवृक्षइति
वत्।नचैवमपिसूत्रमात्राच्छब्दप्रतिपत्तेर्नियमानुपपत्तिःपदच्छेदविग्रहादिभिःसूत्रार्थस्यैवाभिव्यंजनात्।अतएवखलुसू यो[illegible]
त्रमु च्यमानमप्युपेक्षते।अतएवयत्रैवतुसूत्रस्यतात्पर्यलेशोप्यस्ति।तदेवगृह्यते।तदुक्तं।सूत्रेष्वेवहितत्सर्वंयद्व
त्तौयच्चवार्तिके इतिअतएवबहुलग्रहणादिकंसार्थकंइतिदिक्।नन्वेवंकिंवर्णोपदेशेन।नचतद्बलेनकस्यचिच्छब्दस्य
साधुत्वमवगम्यते।नचकलध्मातादिदोषरहितवर्णस्वरूपप्रतिपत्तिरेवतत्फलमितिवाच्यं।लोकतएवाविप्लुतव
र्णप्रतीतेरावश्यकत्वात्।अन्यथाप्लुतादिपाठस्यापीहकर्तव्यतापत्तेः।तदुक्तं।इष्टबुध्यर्थश्चेदुदात्तानुदात्तस्व
रितानुनासिकदीर्घप्लुतानामप्युपदेशइति।एकश्रुत्यापाठादुदात्तस्वरत्रयस्यापिकर्तव्यता।पाठइत्युक्तं।त्रैस्वर्ये
दि

तां

णपाठे ह्यन्यतमस्योच्चारणादेवसिद्धौ द्वयोरेव कर्तव्यत्वापात्। अत एव लोके त्रस्यर्यमेकश्रुत्या सह विकल्प्यत इति ज्ञाप्य
ते। एतच्च विभाषा छंदसीत्यत्र स्फुटीकरिष्यामः। ननु निर्देशस्य जातिपरत्वात्प्लुतादिसंग्रहः सेत्स्यतीति चेन्न। संवृतकलप्रभ
तीनामपि संग्रहापत्तेः तदुक्तं आचत्सुपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेध इति। तत्र ह्रस्वस्यावर्णस्य संवृतत्वगु
णत्वेपि तदितरेषामन्येषां संवृतत्वे दोषः आदिशब्दात्कलः स च स्योचितस्थानभ्रष्टः तथाध्मातसभूयिष्ठतया ह्रस्वोपि
दीर्घ इव लक्ष्यमाणोध्मा .तः। एवं दोषोपि ह्रस्वेपि कालसंकोचनेनोच्यमानो दुष्टः। एवं करणादिभ्रंशादपि बहवो दो
षाः शिक्षाप्रातिशाख्यादिषु प्रसिद्धाः तत्तद्दोषशिष्टानामर्थवत्त्वादिज्ञाप्या[illegible] तत्वाज्जातिपर निर्देशपक्षे तेषामति वि
व्याप्तिरिति स्थितं तेन चगर्गादिविदादिपाठस्य तत्रैणोभयार्थतया वर्णशुद्धिलाभः [struck through] अपठिते
षु [illegible] प्रातिपदिकेषु तथाप्यगतेः स्यादेतत्। सर्वा अच्यत्रयोः ल्यत्रयश्च शास्त्रान्ते शुद्धाः पठिष्यन्ते अ अ इति व
त्। न चैवं गौरवं तद्बलेन सर्वेषामनुबन्ध्यानां प्रत्याख्यानात्। इत्संज्ञालोपयोरपि सागात्। तथाहि। शीङ् ध्यातोऽङ्
कारं परिसक्ष्यामः ईकारं चकलं पठिष्यामः। ङित आत्मनेपदमित्यस्य कलादात्मनेपदमिति पठिष्यामः कलश्च प्र रम
श्लिष्यादशायामेवा यथाऽकारः प्रयोगे तु शुद्ध एव। प्रत्यापत्तेः शास्त्रान्ते करणं च शास्त्रीयसकलकार्यप्रत्यासिद्धत्वा

लाभायाएवंचप्रक्रियायांदोषस्यकालादेशाश्रयणेपिपरिनिष्ठितेपिरूपेणकश्चिद्दोषःयथायथान्यासपक्षेप्यकारस्यविव
तताप्रक्रियामात्रविषया।नतुप्रयोगमात्रसमवायिनीतद्वदिहपक्षेकालाद्योपीतिनकश्चिद्दोषः।धर्मिकल्पनाइति
न्यायश्चेहबोध्यः।ऽकारादयोहिधर्मिणएवत्वयापाठ्याःमयातूभयपठिनीयस्याकारस्यफलमात्रेकल्प्यमिति।नन्व
स्मिन्पक्षेस्वरितत्वजित्तइत्यत्रकेथंकार्यमितिचेत्तूध्मातात्कत्रेभिप्रायेइति।एवमाद्यंतौटकितौइतिकलध्मातावितिाइ
डाध्यागमाश्चनिरनुबंध्याःकलाःपाठ्याःआनुगादयोध्माताःडुरूमिलस्यस्थानेइतिद्विदोषपाध्यां।आदिरंत्येनेत्यत्रा
प्यादिकलोसहेत्युक्तेअइउइत्यादयःसंज्ञाःकरिष्यंते।कलेनेतितृतीयानिर्देशोसतित्वप्राध्यान्यात्सिद्धं।तदुयचरम
वर्णस्यसंज्ञानस्यात्।ऋलोपरत्वादावणइत्यपनीयअऔरितिकरिष्यते।स्वरसंधिस्तुसंदेहायनकरिष्यतेतस्मादनुबं
ध्यादिकार्यंकलादिभिरेवसिध्यतीतिचेत्ससिसिध्यत्येवमपाणिनीयंत्तुभवितीतिचेत्।अत्रोच्यते।इष्टसिध्यर्थोवि
र्णोपदेशः।एवंचाकलुपदेशादेवोदात्तादिसिद्धिमंगीकृत्यकलादिष्वितिप्रसंगइत्यंपरिहार्यः।आगमाश्चविकाराश्च
प्रत्ययाःसहधातुभिः।उच्चार्यंतेततस्तेषुनेमेप्राप्ताःकलादयइति।यत्तुग्रहणप्रातिपदिकेषुप्राप्ताएवेति।तन्न।त्वया
पिप्रतिपदपाठस्याश्रयणीयत्वात्।अन्यथाङ्गाङ्गाइत्यत्रपषडत्वपिस्यात्।[illegible]मंचकेमंजकइतिपलाशेपला
षइति।स्यादेतत्।स्वरवर्णानुपूर्वीनिर्णयायदिप्रतिपदपाठस्तर्हिकलादिनिवृत्तिरपितत्तएवास्तुऋणादिस्त्वा

११श.कौ.
॥२५॥

त्पृषोदरादित्वात् । साधुत्वाभ्यनुज्ञानं विशेषावधारणं तु नियमादिनेति चेत् कलादिनियतिरपि शिक्षादिनैवास्तु । सत्यं आनु
षंगिकी कलादिनियतिर्वर्णोपदेशस्य मुख्यफलं तु प्रत्याहारसिद्धिः प्रत्याहारशब्दस्तु णादिसंज्ञापरः प्रत्याह्रियन्ते वर्णा यस्मिन्निति
तिव्युत्पत्तेः । न च ग्रहणकशास्त्रेण निष्पादितास्वकारा संज्ञास्त्विति प्रसक्तिः योगरूढ्यभ्युपगमात् । तस्मादादिरन्त्येनेत्येत
त्सूत्रसिद्धाः संज्ञाः प्रत्याहारशब्दवाच्यास्तन्निष्पत्तये वर्णोपदेश इति स्थितम् । इति श्रीशब्दकौस्तुभे प्रथमाध्यायस्य प्रथ
मे पादे प्रथममाह्निकं १०॥ अइउण् । संज्ञासूत्रमिदं आदिरन्त्येन सहेतेत्यनेनैकवाक्यत्वात् । अइउणित्येषामादिरकारोऽ
न्त्येन णकारादिना सहोच्चार्यमाण आद्यन्ताभ्यामाक्षिप्तानां मध्यगानां स्वस्य च संज्ञेति वाक्यार्थः । अत्राकारादीनां स्वरू
बा पेणानुकार्येण सतोऽप्यर्थवत्त्वस्याविवक्षितत्वात्प्रातिपदिकत्वं नेति गवित्ययमाहेत्यादाविव विभक्तेरनुत्पत्तिः । सुपां सु
लुगिति लुग्वा । छान्दसत्वात्सूत्राणीति भाष्यकारेष्टाच्छन्दोगेषु व्याकरणसूत्रेष्वपि छान्दसकार्यमिति दर्शनात् सूत्रस्याख्यावि
ति सूत्रे छन्दःप्रदेशेषु गौणमुख्यन्यायो न प्रवर्तत इति वक्ष्यमाणत्वाच्च । स्यादेतत् । स्वरसंधिर्नेह भाव्यः । तत्र अइउ इत्यत्र
पे विभक्तेरत्वयत्वयलोपेषु कृतेषु स्यादाविव लोपासिद्ध्या संधिर्नेति समाधानेऽपि इकारस्य इकोऽसवर्णे इति ऋकारस्य अ
णकृ इति प्रकृतिभावसंभवेऽपि एदैतोरयायौ दुर्वारौ । यत्तु वर्णोपदेशकाले अजादिसंज्ञानामनिष्पादात्संधिर्नेति [illegible]
[illegible] । तन्न । तस्य वर्णोपदेशोद्देश्यसंज्ञायां प्रत्याहारे च निष्पन्ने प्रवर्तमानानां यणादीनां सुध्युपास्य इत्यादौ तत्र स्थ राम

रूपा इयोर्द्वयस्तावच्छेदकं ऋतेत वर्णोपदेशादावपि प्रवृत्तेरावश्यकत्वात्। अन्यथा तुल्यास्यप्रयत्नमित्यादौ सवर्णदीर्घो न स्यात्। त
दार्थवत्सूत्रान्तर्गतानां प्रातिपदिकत्वे प्रत्ययः परश्चेत्यादौ सुप्रत्ययो ङ्याप्प्रातिपदिकात् द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवच
नमित्यादौ तत्तद्विभक्तिः ससजुषो रुः इत्यत्र रुः खरवसानयोरित्यत्र विसर्गश्च न स्यात्। इति सर्वोपप्लवः स्यात्। स्वाध्यायो
ध्येतव्य इत्यस्य नेह नानेति श्रुतेश्च स्वस्मिन्नपि यथा प्रवृत्तिस्तथा दीर्घादीनामपीति चेत्तुल्यं यणादावपि। न चैवं ग्रहणक
शास्त्रमप्यणो प्रगृह्यस्येत्यादौ तटस्थ इव स्वस्मिन्नपि प्रवर्तेत। ततश्च दीर्घादीनामनण्त्वेन सवर्णग्राहकत्वं नास्तीति सिद्धं
तोऽपि विभज्येतेति चेन्न। वैषम्यात्। पदार्थसंसर्गो हि वाक्यार्थः तद्बोधश्च पदार्थोत्तरभावी। तथा चाण्शब्देन ये उपस्थि
तास्तेषां सवर्णग्राहकत्वं सूत्रार्थः अण्शब्दश्चादिरन्त्येनेति सूत्रेणाक्षरसमाम्नायपठितेषु संकेतितः इति तानेवात्रोपस्था
पयति। तथा चाष्टादशानामप्यकारः संज्ञेति पर्यवसन्ने सूत्रान्तरेष्वस्य च्वावित्यादिष्वकारोऽष्टादशानामुपस्थापक इत्यु
चितं न तु ग्रहणकशास्त्रेऽपि। एतद्वाक्यार्थबोधात् प्रागष्टादशस्वग्रहणशक्तित्वात्। न हि सिचि वृद्धिरित्यादावादैचामुप
स्थापको वृद्धिशब्दो वृद्धिरादैजिति संज्ञासूत्रेष्वपि तानुपस्थापयति। किन्तु स्वरूपमेवासंज्ञासूत्रे च सामानाधिकरण्या
दादैचो [illegible] वृद्धिशब्दवाच्यत्वावधारणे सूत्रान्तरेषु संज्ञिनामुपस्थितिर्निर्बाधेति दिक्। तस्मादइउणित्यादौ स्व
रसंधिः प्राप्नोत्येवेति चेत् सत्यां संहितायां विरहान्न यणादयः अनित्या हि वाक्ये संहिता। उक्तं चा संहितैकपदे नित्या नि

स्याध्यात्तूपसर्गयोः । निसासमासे वा क्यत्तु सा विवक्षामपेक्षते इति । समासस्य पृथक्करणं गोबलीवर्दन्यायेन । एकपद इत्यनेनैव न तु सं
ग्रहसिद्धेः इयं च प्राचां परिभाषा एकदेशानुमतिद्वारा संहिताधिकारेणैव ज्ञापिता । असंहितायां यणादिनिवृत्त्यर्थो हि संहिताधि
कारः । अत एव हे रोहिणि त्वमसि कृष्णीलवती पुष्प्या एनेनिवारयति पतिं सखि दुर्विनीतं । जालान्तरेण मम वासगृहं प्रविश्य श्रोणि
तटं स्पृशति किं कुलधर्म एषः इत्यत्र पूर्व्या एनमित्यस्य ना साधुता । अत एवालंकारिकैश्च्युतसंस्कृतित्वापेक्षया पृथगेव विसंधि
तानामदोषान्तरगणितता तच्चेहास्ती त्यन्यदेतत् । नन्वेवमप्यसंहितायां कालव्यवायादयणादेरप्राप्तौ किं संहिताधिकारेणेति चे
न्न । संहिताधिकारबहिर्भूतानां कालव्यवायेपि प्रवृत्तिं ज्ञापयितुं तदारम्भात् । तेनाग्नाविष्णू इत्यग्नाविँत्यादावग्रहेपि आनङा घू३र
दयः । अग्निमीळ इत्यत्र पदविभागेपि निघातः । तेनोरासंतामित्यादौ नसादयश्च सिध्यन्ति । नन्वेवं पुरः हितमित्यवग्रहे हितशब्दस्य
स्वरितत्वं बह्वृचैः पठ्यमानमसंगतं स्यात् । तयोर्य्वावचि संहिताधिकार आकृतास्त्र समाप्तेरिति सिद्धान्तात् । स्वरितविधेश्च
तदन्तर्भूतत्वात् । अत एव तैत्तिरीया अवग्रहे हितशब्दमनुदात्तं पठन्ति । अत एव बह्वृचा अग्निमीळ इत्यस्य पदविभागपाठे नि
घातमेव कुर्वन्ति । ननु स्वरितमपीति चेत् सत्यं प्रातिशाख्यविशेषविधानात् स्वरितसिद्धिः । उक्तं हि । यथा संधीयमानानां मनेकी
भवतां स्वरः । उपदिष्टस्तथा विद्यादक्षराणामवग्रहे इति । तदेवम् इ उणित्यादौ संहिताविरहान्न यणादयः इति स्थितं । केचित्तु एम
च्चादिपाठान्निपातसंज्ञा निपात एकाजिति प्रगृह्यत्वं ततः प्रकृतिभावः । यद्यप्यनिपातानामपीह ग्रहणमिष्टं दध्यश्वो दाक्षिः

स्वरसंधिः

पुाक्षिपत्यादित्सि येद्दु तथापि न सर्वा व्यक्तयः साक्षान्निर्देष्टव्याः। आनन्त्यात्। किन्तु याकाचिद्व्यक्तिर्निर्दिश्यमाना स्वसदृशीरितरा अपि
संगृह्णातीत्यपि वक्ष्यते। तत्र किं निपातव्यक्तिरेव निर्दिश्यतामुत तदितरेति संशये भाष्यकोऽरिरेवयुक्ता। संहिताविरहेण निर्दि
श्यमानरूपस्य स्फुटप्रतीतिसिद्धिरित्याह। अकारप्रत्ययस्तु न भवति। बहुलग्रहणात्। संहितेगारख्यायां ण्वुल् बहुलमित्यत्रापि
संख्यातः। अन्ये त्विकृतिलोपो ध्यानुनिर्देशो इत्यतो निर्देशा[illegible] कारप्रश्लेषविधावनुवर्तते निर्देशश्च प्रतिपादने तेन प्रयोगविरो
षनिष्टानां वर्णानां प्रतिपादने प्रत्ययः। इत्यानुपूर्वी संपादनेता सर्या। ननु कथिपुत्र इत्यादौ दृष्टानामकाराणां प्रतिपादनेष
अतः कारप्रत्ययाभाव इत्याह। अनुकार्यानुकरणयोरभेदविवक्षापक्षे त्वर्थवत्त्वस्याविवक्षितत्वाद्वर्णवाचित्वाभावात्कारप्रश्ल
याभावे [illegible] अत्रेदमवधेयं। अकारः संवृतः। विवृतकरणाः स्वरास्तेभ्य एओ विवृततरौ ताभ्यामैऔ ताभ्यामाकारः [illegible] संवृतो
कार इति शिक्षा व्याख्याता। विवृतादयः शब्दाः शुक्लादिवद्धर्मे धर्मिणि च प्रयुज्यन्ते तेन विवृतं करणं प्रयत्नो येषां ते तथाभूताः स्वरार
कारादय इत्यर्थः। यत्तुक्तं दोगविशेषेरिवर्णोवर्णऋकाराणां संवृतता ताभिच्छद्भिरुक्तं प्लुतः संवृततान्यत्रापि भवसाम्नारूतित्तत्तुतदी
यशाखामात्रपरं न तु सार्वत्रिकं। यथा सात्यमुग्रिराणायणीया नामेयस्य अर्धमेकारमर्धमोकारं चाधीयते सुतेमिसाद
येकमात्र एकार ओकारश्च न त्वन्येषां तद्वदिकारादौ यथा तथा वास्तु अकारस्य संवृतत्वं तु निर्विवादमेव। तथाप्यसौ प्रक्रियाद
शायामाकारेण दीर्घेण प्लुतेन च सावर्ण्यसिद्धये विवृततरोऽस्मिन्सूत्रे निर्दिश्यते विवृततरत्वप्रयोगदशायां मा भूदित्येतदर्थं शास्त्रा

॥सू॰ श्लो॰ २
॥२८॥

ते अ अ इति सूत्रं वृत्तं। तेन हि विवृततरमनूद्य संवृतो विधीयते तान चानुवाद्यसमर्पकेणाकारेणादीर्घप्लुतयोरपि संग्रहः स्यादिति वाच्यम्। अ
दित्तपरनिर्देशस्यैकदेशेषेण ह्रस्वषट्कनिर्देशस्य वासिद्धं तपिष्यमाणत्वात्। वक्ष्यति हि तत्र वार्त्तिककारः सिद्धं तु तपरनिर्देशात्। एकदे
पनिर्देशाद्वा ह्रस्वस्यानुनासिकभिन्नानां भगवतः पाणिनेः सिद्धमिति। कृतार्थत्वाच्च विधीयमानः संवृतः शास्त्रीये कार्ये सर्वत्रासिद्ध एवेति
न क्वापि प्रक्रियादशायां कार्यप्रतिबन्धः शास्त्रान्ते क्रियमाणप्रत्यापत्तिवचनमेव ज्ञापकमिह विवृततर उपदिष्ट इत्यस्यार्थ[illegible]स्य। य नर
त्तत्र वार्त्तिकं अकारस्य विवृतोपदेश आकारग्रहणार्थ इति तत्र विवृतशब्दो विवृततरपरः उदाहृतश्लिष्टानुरोधात्। ननु इकुकृतरेपि दृ
क्ये भवत्येव यथा तथेहापि विवृततरस्याप्याकारस्य विवृतत्वानपायात् सावर्ण्यं यथाश्रुतेऽपि सेत्स्यतीति चेन्न सवर्णसंज्ञायां तुल्यप्र
यत्नत्वस्य विवृतत्वाद्यवान्तरधर्मपुरस्कारेणैव वक्तव्यत्वात्। अन्यथा ओदौतोरपि सावर्ण्यापत्तौ गां गा इत्यत्रैव नावे नावः ग्लावं
नर ग्लावइत्यत्रौतोऽम्शसोरित्यात्वं प्रवर्त्तेत इदूदेदिति एकारान्तस्य विधीयमाना प्रगृह्यसंज्ञा करवावहै इत्यादावपि प्रवर्त्तेत। एङः पदान्तादि
तीति पररूपं कस्मै अदात् इत्यत्र विच्छेदोऽस्तीत्यादावपि स्यात्। किं चैवं ऋकारादीनामीषद्विवृतत्वादेकारादीनां च विवृतत्वात् सावर्ण्यप्रस
केनोच्चारणायितिस्सूत्रं नारम्भणीयं स्यादिति भाष्यसिद्धान्तो व्याकुप्येत। न च ओ ङि दित्सूत्रे द्वयेऽकारस्य चकाररूपानुबन्धद्वयकरणं वेक हि सा
णं। अन्यथा ह्यन्यतरेणैव चरितार्थत्वात्। किं बहुना ऐ औ च्। अपि न निर्दिश्येत। आकारादीनामेव सावर्ण्येन सिद्धेरिति दिक्। तस्माद
त्रस्थभाष्यवार्त्तिकयोर्विवृतशब्दो विवृततरलक्षणया सेयं तत्त्वा। यद्वा विवृतत्वप्रतिज्ञासामर्थ्याद्विवृततरेण सह सावर्ण्यं से
रस्येति त्यवधेयम्। एवं च भाष्यादिग्रन्थो यथाश्रुत एवास्तु। एतच्च हरदत्तग्रन्थस्याप्यनुसन्धेयम्। उदाहृतश्लिष्टोपष्टम्भेन च व्याख्यातेन

334

त
त्ति

परमार्थस्तु अकारो विवृत एवेति भाष्यवार्तिकस्वरसः सिद्धः न तु विवृततर इति तथा च पाणिनीयशिक्षा। स्वराणामूष्मणां चैव
विवृतं करणं स्मृतं। तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव चेति प्राकृते तु मतान्तरं न तु पाणिनीयं। अत एव एओङ् सूत्रे भाष्यकैय
टाभ्यां अकारस्य विवृतत्वाद्विवृततराभ्यां संध्यक्षरभागाभ्यां न सावर्ण्यमित्युक्तं। एवं च वृत्तिग्रंथस्यापि यथाश्रुतस्य सौष्ठवं न्या
सहरदत्ताभ्यां वृत्तेर्भेदः कृतः व्याख्यानमनादेयं। अथवा नाज्झलाविति पठतः सूत्रकृतो मते विवृततरस्यापि विवृतत्वमात्रेण साव
र्ण्यमस्तु। चत्वार आभ्यन्तराः प्रयत्नाः सवर्णसंज्ञायामाश्रीयन्ते इति वृत्तिस्वरसात्। न चैवमेङैचोरिति प्रसंगः वर्णसमाम्नाये
पृथगुपदेशसामर्थ्यादनुबंधद्वयसामर्थ्याद्वा तन्न सावर्ण्यप्रवृत्तिरिति दिक्। ननु दण्डाढकमित्यादौ दीर्घेण सह दीर्घ एकादेशः
सावर्ण्यफलमस्तु। प्लुते न सावर्ण्ये किं फलमिति चेन्न। हे अग्निदत्तेति गुरोरनृत इति प्लुते कृते तेन सह पूर्वस्य दीर्घ एकादेशः सावर्ण्य
स्य फलमिति गृहाण। न च दीर्घे कर्तव्ये प्लुतस्यासिद्धत्वं शंक्यं। प्लुतप्रगृह्या अचीति ज्ञापकेन प्लुतः सिद्धः स्वरसंधिष्विति वक्तव्यत्वा
त्। स्यादेतत्। आक्षरसमाम्नायिकस्याकारस्य वृत्तेऽपि विवृतत्वे धातुप्रातिपदिकप्रत्ययनिपातस्थस्य संवृतस्याच्त्वेन स्यात्। अ
आक्षरसमाम्नायिकेन भिन्नप्रयत्नानाममीषामग्रहणात्। ततश्च अज्झलामचामिति दीर्घो लोपपरिभाषया तस्यैव स्यान्न त्वकार
स्य अचश्चेति परिभाषाया बाधादनुपस्थितेः। तथा दधदित्यत्र प्रातिपदिकस्यान्त उदात्तो भवतीत्येतन्न स्यात्। नाप्यकारस्य अप्रत्यया
कारस्यानुदात्तादेशो न स्यात्। अवनमतीत्यत्र निपाता आद्युदात्ता उपसर्गाश्चाभिवर्जमित्याद्युदात्तत्वं न स्यात्। किं चास्य च्वौ
विस्पाद्यकारस्य संवृतत्वेनानण्त्वाद् ग्राह्यकत्वे शुक्लीभवतीत्यादावेवेत्वं स्यान्न तु मालीभवतीत्यादौ। न चाक्षरसमाम्नायिकस्य
विवृतत्वप्रतिज्ञासामर्थ्यात् संदर्शनेषु प्याख्यादिषु पित कार्यप्रवृत्तिरिति वाच्यं खट्वाढकमित्यादौ दीर्घसंपादनेन विवृतत्वप्रति
त्

335

॥ शको ॥
॥२७॥

त्रायाः साफल्ये सति सामर्थ्यविरहात्। तथा हि। अकः सवर्णे इत्यत्रादिरन्त्येनेति वचनादनयोरेवाकारककारयोरनुकरणमिति नि
र्णीतं तेन प्रत्याहारग्रहणेन विवृताकारेण सावर्ण्याद्दीर्घप्लुतयोर्ग्रहणे खट्वाढकमित्यादि सिध्यति असति तु विवृतत्वस्य चावित्यादि
ष्विव प्रत्याहारेष्वपि संवृतस्य रूपस्यैव कार्ये स्यान्न तु दीर्घप्लुतयोरिति फलभेदस्य स्पष्टतयाव्यक्तविवृतत्वप्रतिज्ञायाः सामर्थ्यं
अथोच्यते। प्रत्याहाराक्षरसमाम्नायिकस्यैव विवृतत्वं साध्यतैरिति न भ्रमः। किं तु सामान्यापेक्षो ज्ञापकोऽयं। ऐऔच्सूत्रे यावानकारः स
सर्वोपि प्रक्रियादशायां विवृतो बोद्धव्य इति। एवमपि प्रत्युच्चारणं वर्णानां भेदेनास्य चावित्यादावुभौ रिति स्थानेष्वेन सवर्णग्राह
कत्वान्न स्यात्। किं त्वकः सवर्णे इत्यादौ प्रत्याहार एव सवर्णग्राहकत्वं स्यात्। एवमिकारादयोपीकोयणचीत्यादावेव ग्राहकाः स्युर्न त्वे
रनेकाचो यस्येति चेत्यादौ। नन्वेक एवाकारस्तस्य स्थानत्वमारोप्यते न चैवमुदात्तानुदात्तत्वादिविरुद्धधर्मानुपपत्तिः नेयाव्य
ञ्जकध्वनिधर्मत्वात्। अनुबन्धव्यवस्थापि लोकवदुपपद्यते। लोके हि मुण्डो भव जटिलो भवेत्यादिक्रमेणैकस्यानेकधर्मोपदे
रूपितत्वे देशभेदेन धर्मो व्यवतिष्ठते। तथेहापि क्रमेणाणित्यत्रैव णित्वं चरेष्टइत्यत्रैव टित्वं। नापाष्टगित्यत्रैव टित्वं किं त्वा
असां प्रतिषेध इत्यादौ नैकमपि अनुबन्धकार्यमिति व्यवस्था। अत एव प्राग्दीव्यतोऽण् शिवादिभ्योऽण् इत्यादौ पुनः पुनर्णित्करण
णं सार्थकं। कथं तर्हि घटेन तरतीति घटिकः तरतीत्यधिकारे नौद्व्यचष्ठन्। कथं च घनस्य निमित्तं संयोगोत्पातौ वा घन्यः तस्य
निमित्तं संयोगोत्पातावित्यधिकारे गोद्व्यचोः संख्यापरिमाणाश्वादेर्यदिति चेत्। न। आवृत्तिरूपता घव्यपदेशाद्द्विष्यति
न च बाहुक इत्यादौ द्व्यच्त्वं चरितार्थं। व्यजाणेन कार्यासंभव इति वाच्यं। अश्वादिप्रतिषेधेन हि गौणस्यापि मुख्यसमकक्षता
मात्रापन्नात्। अत एव किरिणेत्यादौ सावकाशत्व इति विभक्तेरदन्तत्वं न भवति। आवृत्तिरूपतेन घव्यपदेशेन स्वाश्र

पस्यैकान्यपदेशस्य निवर्तितत्वात्॥ नहि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते तस्मादुक्तरीत्या बाधकाभावाल्लाघवरूपसाधकसत्त्वाच्चा
कारव्यक्तिरेकैवेति सर्वं सुस्थमिति चेन्न। उदात्तत्वादिविरुद्धधर्माध्यासेन व्यक्तेरैक्यस्य बाधात्। ध्वनिधर्मा एवैते इत्युक्तमिति
चेन्न। ह्रस्वत्वगत्वादिकमपि तथैवास्त्विति सकारेकारादीनामप्यैक्यप्रसंगः स्यादेतद्दुष्यते। अखंडं पदं वाक्यं वा वाचकमिति किं
बहूनामास्थेयं वर्णो व्यंग्यः व्यंजकत्वाभिमतैर्ध्वनिभिरेव सर्वत्र निर्वाहात्। उक्तं च हरिणा। अनेकव्यक्त्यभिव्यंग्या जातिः स्फोट
इति स्मृता। कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिता इति। तस्माद्यदि ध्वनिभिरेव निर्वाहस्तर्हि जातिस्फोट एवानोचेत्सु
खयोरिवोदात्तानुदात्तादीनामपि भेद एवेति न्यायतः परिनिष्ठिते सति। एवं ध्वनिगताभेदादुदात्तस्वरितादिकान्॥ वर्णा अनुप
तेनस्युरर्थावगतिहेतव इति मीमांसकमतमर्धजरतीयत्वादुपेक्ष्यमिति स्थितं। एवं चानेनावर्णोऽणिति नैयायिकाभ्युपगतरीत्या यद्य
यं जातिपरो निर्देशस्तर्हि स्वव्यापकत्वादवर्णेनैवास्त्विति किं ग्रहणकशास्त्रेण। तदुक्तं सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रह
णादिति। तत्परस्त्वं तु जातिनिर्देशे प्रयुक्तस्यैवातिप्रसंगस्य भंगाय। पदादीनामद्यादौ त्वेकमात्रव्यक्तिरपि जातिविशेषण
तया विवक्ष्यते विधेयविशेषणत्वात्। पश्यैकत्ववत्। अस्य व्याविसादो त्वनुवाद्यविशेषणत्वान्न व्यक्तिर्विवक्षिता ग्रहैकत्ववत्॥ प
किंत्वण्ग्रहणं कुर्वतः सूत्रकृतो नायं पक्षोऽभिप्रेतः। एका वर्णव्यक्तिरिति पक्षस्तु दूषित एव। अभेदे तु गावर्णव्यावृत्तय इति पक्षे त्विद
ऊणित्यादि जातिपरो निर्देशस्तर्हि पुनरण्ग्रहणं व्यर्थं व्यक्तिनिर्देशे तूक्तरीत्या अस्य व्याविसादो सवर्णग्रहणानुपपत्तिरिति

महत्संकटं । तस्मादिह सूत्रकारस्याननुयायोऽदुर्वचइति चेत् उच्यते । त्रिष्वपि पक्षेष्वपि अस्य सूत्रस्योपपत्तिः । तथाहि सएवायमिति प्र
त्यभिज्ञाबलाद् अकारोऽयमेवेति पक्षे धर्मेऽयव स्थाया स्तत्र्यैवोपपाद् नायथा केण कार्यं न भवति । यथा चाप्रत्ययादिविधिस्थले नदीर्घा
दिप्रवृत्तिः तथा स्वरूपाविति विधिरपि माली भवती त्यादौ न प्रवर्तेतेति प्रत्यर्णं ग्रहणं क्रियते । तत्र सा वर्णाधीनमिति ह्रस्वस्यापि
चतत्संप्रतिज्ञायते । तत्साक्षरसमाम्नायिकस्यैवेति चेत्सुनरपि न व्यवतिष्ठते ति सार्वत्रिकी प्रतिज्ञा । एवमप्यस्य व्याप्तित्यादावन
णत्वादेव ग्रहणकत्वेन स्यादिति चेद्धि इत्तत्वह्रस्वत्वादेर विशेषेण तस्याप्यणत्वात् नहि मुडित्वजटिलत्वादिवद् भेदेनानुपात्ताः
स्वरूपमात्रानुवादेन विहिता अपि गुणा मोदीर्घश्च तुर्वर्ण्ह्रस्वादयो व्यवतिष्ठन्ते । उदात्तानुदात्तस्वरितानुनासिकत्वादिगुणास्तु स्व
शब्देनानुपात्ता न भेदकाइति वक्ष्यते । अनेनैव व्यक्तयइति पक्षे अष्टादशावर्णव्यक्तयइति पक्षे च यद्यपि ह्रस्वदीर्घप्लु
तसाधारण्येका जातिः यं शब्दितन्यूनतावच्छेदिका तत्तन्न्यूनध्वनियम्यतावच्छेदिका वास्त्येव । तथापि तद्व्याप्या ह्रस्वमात्रवृत्ति
रपि जातिरस्ति । तथा चाइउणिति सूत्रे व्याप्यजातिपरो निर्देशः तेनतज्जातीयएकत्र वृत्तं विवृतत्वं सर्वेष्वपि सिध्यति ।
अतएव सर्वेऽपि ह्रस्वा अणो भवं त्येवेत्यस्य व्याप्तित्यादौ न कश्चिद्दोषः अथ नामित्यादावपि सेषेव गतिः अन्यथा वा तुसूत्रा
मिति स्थिते सिचः पूर्वपरयोस्तकारयोर्मध्ये न्यतरस्यैव ग्रहणं ह्रस्वात्तत्सयोः अक्षरसमाम्नाये उभयोरपाठात् तत
श्च गल्लोऽस्मदीति न प्रवर्तेत सूत्रस्यावकाशस्तु अभिदाह इत्यादि स्यात् । एवं च दीर्घा नामनण्त्वेन सवर्णग्रहणत्वं नास्तीत्य

पि सिद्धांतः संगच्छते। अथ व्यापकजातिपरमेव निर्देशं स्वीकृत्याणग्रहणं त्यज्यतामिति चेन्न। एवमप्युपसर्गादृति इत्यादौ लृवर्णग्र
हणाय ग्रहणकशास्त्रस्यावश्यकत्वात्। न च ऋलृवर्णयोरिति सावर्ण्यविधिसामर्थ्यात् ऋतः। अकः सवर्ण इत्यादौ चारितार्थ्या
त्। किंच अस्य च्व्यादित्यादौ व्यापकजातिनिर्देशः त्यदादीनामइत्यादौ तु व्याप्यजातिनिर्देश इत्यस्य नियामकाभावे संकरोपि स्या
त्। न चानुवाद्यविशेषणं विधेयविशेषणं च ग्रहैकत्वपश्वेकत्ववद्विवक्षितमविवक्षितं चेति मीमांसकमर्यादैवाकरणैः स्वी
कर्तुं शक्या। उपेयिवाननाश्वाननूचानश्चेति सूत्रे उपेत्यविवक्षितं न अश्नातेस्तु विवक्षितमिति स्वीकारात्। आर्द्धधातुकस्ये
ड्वलादेरित्यादावनुवाद्यविशेषणस्यापि बहुशो विवक्षणाच्च। तस्माद्व्याख्यानतो विशेषप्रतिपत्तिरिति परिभाषैव सि
द्धान्ते शरणं। व्याख्यानं तु लक्ष्यानुरोधीति यद्यप्यगत्या तत्र तत्राश्रीयते तथापि नैतद्बलेन ग्रहणकशास्त्रप्रत्याख्यानं चे
मत्कारमावहति। ग्रहणकशास्त्रबलेन तु नैव प्रत्ययो विधीयमानः सवर्णग्राहक इति स्फुटतरं प्रतीयते। उल्लंघिता चे
यं मीमांसकमर्यादा धर्मशास्त्रेपि बहुशः। अर्थासंनप्रबोध्ययेदित्यादौ। एकः पूर्वपरयोरिति सूत्रे एकग्रहणमपीहलिं
ग। आद्गुण इत्यादौ एकस्य पश्वेकत्ववद्विवक्षासंभवात्। किं तेनेति दिक्। अथ यथार्थवत्त्वस्याविवक्षायामपीह आरितो
कारादिः स्वसदृशीः षष्ठ्यन्तीः सादृश्याख्यसंबन्धेनोपस्थापयति। न चैवमपि रस्यानुपस्थितानां शास्त्रबोधे न वयो
ग्यतानुपपत्तिः। अर्थाध्याहारस्यादेबाधकाभावात्। अतिप्रसंगस्तु तासर्ये ग्राहकबलेनैव। अन्यथा तवापि लक्षणाध्याहार
दरतिप्रसंगस्य तदवस्थत्वात्। स्पृहेरीप्सित इत्यत्र शासनबलात्पुष्पेभ्य इत्यादौ पदाध्याहारः क्रुध इति चेन्न। अल्पत्वलोपे

॥श॰ कौ॰
॥२९॥

मेणि स्थानिनः ऌअनुशासनादर्थाध्याहारस्यापि स्थले विशेषेक्लृप्तत्वात्। अन्यथा गविलयमाहेत्याद्यावगतेश्चेति वक्ष्यते॥ ॐ॰
ऋऌकौ। ननु विधिविषयेषु ऋकारो ग्रहणकशास्त्रबलेन ऋकारादीन्गृह्णाति यथा ग्रहणाति तथा ऌवर्णानपि द्वादश गृह्णीयात्तत
श्चिपृथक्लृकारोपदेशेन। न च भिन्नस्थानतया सावर्ण्यविरहाद्ग्रहणमिति वाच्यं। ऋऌकारयोः सावर्ण्यं विधेयमिति वार्त्ति
केवलेन वाचनिकस्य सावर्ण्यस्यावश्यवक्तव्यत्वात्। अन्यथेहोपदिष्टेपि ऌकारे प्लाकारीयती मादावुपसर्गादृति धातौ वा सुप्या
पिशलेरित्यस्याप्रवृत्तिप्रसंगात्। न नु क्लृपि स्थे स्थले ऌकारस्येदमनुकरणं तस्य च स्वरकार्येष्वसिद्धत्वादृकारएवायमि [illegible] सु
पसर्गादृतीत्याशेसेत्स्यतीति चेन्न। क्लृपो रो लः इत्यस्यासिद्धत्वेपि तदनुकरणस्यासिद्धत्वविरहात्। स्यादेतत्। प्रकृतिवद
नुकरणमिति अतिदेशादयमप्यसिद्ध एव। स चातिदेशो वश्यमाश्रयणीयः। द्विःपचंत्वित्याहेतितेतिरीयवाक्ये यद्यप्युदा
त्तं पठ्यते तथापि भाष्योदाहृतशाखांतरीयेपचंत्वित्यस्य तिङः तिङ इति निघातो यथा स्यात्। न ह्येतत्तिङं तेतिङं तत्पदा
त्परं। स्याद्युत्सुतिस्विहविवक्षाभेदेन। वैकल्पिकोप्ययमर्थवत्सूत्रे वक्ष्यते। अग्नीद्रस्याहेत्यादौ प्रगृह्यत्वमप्यतिदेशा
देव। अतिदेशज्ञापकेन तु यत्तदेतेभ्यः परिमाणे इति सौत्रो निर्देशः। न ह्यत्रातिदेशं विना त्यदाद्यत्वं लभ्यते। अभिव्यक्तप
दार्थाय इत्यन्यायेन लोकसिद्धार्थतायामेव तत्प्रवृत्तेः। तथा च प्रयुंजते यत्तदोर्नित्यसंबंध इति। नन्वनेनैवातिदेशो ना
त्यस्यावश्यकत्वेयोदाहृतप्रयोगोनुपपन्न एवेति चेन्न। उदाहृतज्ञापकसूत्रे एव त्यदादीनि सर्वैर्नित्यमित्येकशेषस्या
करणेनैतत्तदोः सुलोपः [illegible] त्यादिनिर्देशेश्चातिदेशस्यानित्यत्वज्ञापकात्। अथवा प्राक्शृङ्गारस्कालदिवौजे

राम

इति सूत्रे पोयोनियन्मतुपु इति वार्त्तिकेन चेयं परिभाषा अनस्या अनित्यता चेत्युभयं ज्ञाप्यते। तथाहि। कारीयामप्सुमन्ता वान्यभागो
इति श्रुतेः। अप्सुमेसोमः अप्स्वग्ने सधिष्टवेति हि तत्र मन्त्रौ। तत्राप्सुशब्दादनुकरणभूतान्मतुपि अस्यवामीय इत्यादाविवानु
करणस्य विभक्तिलोपाभावादेवाप्राप्तौ वलुग्विधानं सुकःपरिभाषां ज्ञापयति मतुबुसत्तेश्च प्रथमांततां विना दुर्लभत्वात्प्राति
पदिकत्वाप्राप्तावस्य की सा च प्रसक्तायां तत्त्वे सति दुर्लभेति प्रातिपदिकसंज्ञायां कर्तव्यायामतिदेशप्रवृत्तिविरहाभ्यनुज्ञानाद
नित्यतापि सिद्धा। एतेन युष्मदस्मल्लक्षयगोत्वरयोरित्यादिप्रयोगा व्याख्याताः। प्रकृतमनुसरामः। ऌकारानुकरणस्या
तिदेशो नासिद्धत्वात्प्राग्ऌकारीयतीत्यादावुपसर्गादृतीत्यस्य प्रवृत्तिसिद्धेः। किं सावर्ण्येनेति चेन्न तथा सति रेफपरत्वसिद्धा
वपि लपरत्वासिद्ध्या प्रवृत्तेर्नित्यत्वे नातिदेशाप्रवृत्तेस्त्वयापि वाच्यत्वात्। ननु रेफपरत्वे सिद्धे तिदेशाद्रेफस्य ऌकारो भविष्य
तीति वाच्यं। एवमपि गम्लृसकृद्भ्यादिस्थस्य ऌकारस्यानुकरणे त्वदुक्तातिदेशादेरुक्तिसंभवाभावात्। तस्मात्सवर्णत्वासा
वर्ण्यस्यैव ऌकारोपदेशो व्यर्थ एवेति चेत्। अत्रोच्यते न तावद्वार्त्तिके दृष्टा सूत्रकृतः प्रवृत्तिः आरभ्येयं वार्त्तिके ऋकारऌ
कारयोः सावर्ण्यानित्यतां ज्ञापयितुं कर्तव्य एव ऌकारोपदेशः। तेन कृसक्लृप्तस्वेत्यत्र गुरोरनृत इति प्लुतः सिध्यति। अन्यथा
अनन्तर इति निषेधः स्यात्। ऋकारेण ऌकारग्रहणात्। क्लृप्यमाणः चक्लृप्यमाण इत्यादौ ऋवर्णान्तस्योपसं
ख्याने कृणत्वस्याप्रवृत्तिस्तु क्षुभ्नादित्वेनापि सुवचा। अन्यथा प्रक्लृप्यमाना दोषः स च इति णत्वस्य दुर्वचत्वात्। इदं त्व
वध्येयो वार्त्तिकमते सवर्णग्रहणमात्रवृत्तिग्रहणादिति सिद्धान्तादकारऌकारसाधारणजातिविरहेणाकृतिग्र

॥शु॰कौ॰
॥३०॥

हणासंभवाच्चप्राक्कारिष्यतीत्यादौ कार्यानिर्वाहस्तदवस्थः। सावर्ण्यविधिस्तु वर्णदीर्घयोॠऌकारयोरित्यत्रैको सवर्णइत्यस्य प्रवृत्ति स्तु हो
प्रतिबंधे चरितार्थः । नच ऋत्यकइत्यस्य प्राप्तिः ग्रहणकशास्त्राभावादेव । एवं च दीर्घसंपाद्यचरितार्थऌकारपाठः सावर्ण्या
नित्यत्वमपि कथं ज्ञापयेदिति । तस्मादण्ग्रहणप्रत्याख्यानस्य तत्स्थाने ऋकारग्रहणं कर्तव्यमप्रत्ययग्रहणं च न कर्तव्यमित्या
शयः कल्प्यः । यद्यप्येवं गम्लृप्रभृतीनां लृदित्त्वानाग्लोपीत्यङ्कार्यं प्राप्नोति पृथगनुबंधकरणं तु लृदित्त्वप्रयुक्तस्यानङादेशस्य ऋ
दित्त्वप्रयुक्तस्याचरितार्थत्वादसंकरं ज्ञापयितुमसमर्थं तथा सावर्ण्यानित्यत्वे वेदमपि समाधेयं । यद्वा स्वरसंधिप्रकरणे ऋवर्ण पि
स्य ऋवद्भाव एव वक्तव्यः सावर्ण्यं च नोपसंख्येयं । प्लुतस्तु प्रकरणान्तरस्थ इति न तत्रातिदेशप्रवृत्तिः । उरण्रपर इति परभावात्तु कार्य
कालतया स्वरसंधिप्रकरणस्थत्वे तु उरित्यनेन लृग्रहणोपपत्तिः । अस्मिन्नपि पक्षे ऌकारोपदेशः कर्तव्य एव । क्लृप्तशिख इत्य
त्र प्लुतो यथा स्यात् । क्लृप्त इति च द्वित्वं प्रक्लृप्त इत्यत्र स्वरितः । अत्र ह्युक्तं भाष्ये [illegible] णयथोक्तमेणितः । तेन गतिरनन्तर इति पूर्वपदप्रकृ
तिस्वरः । कर्मणि च । क्तस्य दत्तेत्युद्विधानात्ततः शेषनिघाते कृते उदात्तादनुदात्तस्य स्वरितः । न चात्र कृपो रो ल इत्यस्यासिद्धत्व
शंकापि । पूर्वत्वात्पूर्वं प्रति परम[illegible]सिद्धं न तु परं प्रति पूर्वं । एवं च गम्लृप्रभृतीनां ऌकारस्य संज्ञापनायासेन सिध्यति । अन्यथा पु
यणादेशेने षादिद्युताद्ऌदितः इति ऌकारपरतन्त्रे कृते न चैवं संज्ञानुवादेन च कथंचित्साधनीया स्यात् एवमिदितो नुम् इत्यनुवादानां ऋत्स
कइत्यनुवादानां च साम्याद्धकारादयोऽपि न निर्दिश्येरन् । यथाश्रुतस्त्रशरीरसाहाय्यात्तु क्रमः ऋकारस्तूच्चारयितुं प्रवृत्ता कुमारी करु
णापाटवाद्यदा ऌकारमुच्चारयति तदनुकरणस्याप्यन्वार्थसिद्धिः फलं । अनुकारणानामनुकार्येणार्थवत्तासर्वेत्र साधु
ताम्यनुज्ञानात् । नन्वेवं ऌवर्णस्य दीर्घा न संतीति व्याहन्यते अनुकरणस्य तत्रापि सुलभत्वादिति चेन्न न्यायप्राप्तस्यापि वचने

नैनबाधात्त॥ इदं च न्याय्यभावात्कल्पनं संज्ञादिष्विति वार्त्तिकाल्लभ्यते। तथाहि। ऌकारोपदेशो यदृच्छाशक्तिजानुक
रणप्लुताद्यर्थ इति पूर्ववार्त्तिकेन ऌकारोपदेशस्य प्रयोजनत्रयमुक्तं॥ दध्यृतकाय देहीति यदृच्छाशब्दः। कुमारी ऌतक
इत्याहेति अशक्तिजानुकरणं। [illegible] प्लुतद्विर्वचनस्वरितार्थाः प्लुताद्यः॥ एतदर्थ ऌकारोपदेश इति हि तस्यार्थः॥
तत्र प्रथमप्रयोजननिराकरणायेदं वार्त्तिकं। न्याय्यभावादिति। अस्यार्थः॥ ऋतिस्लावदत्ते शीयङिति निर्दिष्टः सोऽथोधा
तुस्तस्मादौणादिकः क्वुन्॥ तत्र हि एवं सूत्रितं। क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापीति शिल्पिन्यभिधेये संज्ञायां च सो
पपदान्निरुपपदाच्च धातोः क्वुन् स्यादिति अर्थः॥ रजकस्तक्षकस्त्वादि शिल्पिनि। चरकः भषकः कटकं कनकमित्यादि
संज्ञायामुदाहरणं। तथा च ऋतकशब्दः शास्त्रानुगतत्वान्न्याय्यः तद्भावात्स एव संज्ञा। तथा च ऋतकं कुर्यान्न तु ऌतकं
तत्र शास्त्रानुगत्तिरप्यनुकूलिता भवति। एवं च वदता शास्त्रानुगते शब्दाभावे विपर्ययः ऌ चीमं ची स्यादित्यादिना मक्रियतेन
दसीत्येवेति स्फुटीकृतं। आदिशब्दोऽनुकरणेष्वपि शिष्टानुरोधं दर्शयता ऌवर्णस्य दीर्घो न सन्तीति शास्त्रमर्यादा सुलु

ति द स न

॥शु॰कौ॰
॥३१॥

ध्यक्रियमाणस्य दीर्घलृकारानुकरणस्याप्यसाधुतादर्शितता॥ तस्मात् गृधुभादिभ्यः कृत्वीमंत्र्यादीनामिव गावीगोण्या
द्यनुकरणेभ्यो दीर्घलृवर्णस्यापि न्याय्यतो न किंचिद्दुष्टलक्षणं। किंतु वाचनिकमिति स्थितं। मंत्रकृतास्त्वैर्दीर्घलृवर्णो
यद्यपि स्वीकृतस्तथापि प्रातिकूल्यन्यायेनान्यत्रासौ नोपयुज्यत एवेत्यवधेयं॥ एवं च साधूनामपि शिष्टैरनंगीकृ
तानां न्याय्यसाम्यादसाधुतोक्ता। तथा चाहुः। नहि वचिरंतिपरः प्रयुज्यत इति। एवं च न्याय्यभावादिति वार्त्तिके पूर्ववार्त्ति
कोक्तप्रयोजनत्रयमध्ये प्रथमप्रयोजनं निरस्तं। लृतक आसाधुरेवा इदं च त्रयी शिष्टानां प्रवृत्तिर्न संजिघृक्षा इ
द्वाहतिपक्षेणोक्तं। पक्षांतरेऽपि परिहारा भवंतीति भाष्यकारः। एतदूध्वपर्यालोचनया तु चतुष्टयीति पक्षे लृ
तकादयोऽपि ऋधुभादिवत्साध्वसाधुरहिताः साध्व एव वा न तु ऋधुभादिविलक्षणा इति लभ्यते। अन्यथा प
क्षांतरेऽपीति न ब्रूयादिति। न च गृहास्पर्द्धि विरोधः। तावतापि वृत्तं कुर्यान्न तद्वृत्तमिति गृह्यमुल्लंघ्य कृतस्याप्युपगवा
देरिव शिष्टसाधुताभ्युगमे बाधकाभावात्। पूरुषस्तु साधून् अपि प्रयुंजानो ब्राह्मणादिनिंदकवद्धर्मशास्त्रोल्लंघनात्

नुकरणस्या

नुमानकान्यास

344

८

त्यस्येवेति। स्यन्पदेत्तत्तः। यत्तु द्वितीयप्रयोजननिराकरणार्थं वार्त्तिकं। अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु इति तस्यार्थः
शिष्टस्य साधोरनुकरणं साध्वेव अशिष्टं स्यतेःप्रतिषिद्धस्य साध्वसाधुबहिर्भूतं ष्ठ्युभादि तस्यानुकरणमपि तादृगे
व। अर्थादसाधोरनुकरणमप्यसाध्वेव। इदं तु भाष्ये दूषितमेव। हेलयो हेलय इत्यादीनां शिष्टपरिगृहीतानामसाधु
तायां बीजाभावात्। नह्यपशब्दवाचकत्वमात्रेण तथात्वं। अपशब्द इत्यस्याप्यसाधुतापत्तेः। न च प्रकृतिवदनुकरण
मित्यनेनासाधुता निर्दिष्टाः। अशास्त्रीयस्यातिदेशायोगात् इति दिक्। तस्माद्वार्त्तिककृता दूषितमपि द्विती
यप्रयोजनं भाष्यरीत्या स्थितं। यद् पित्ततीयप्रयोजननिराकरणपरं वार्त्तिकं। एकदेशविकृतस्यानन्यत्वात्प्लुता
द्यर्थ इति। तस्यायमर्थः। लृदिवित्यादेर्नावनामेषु प्रतिविधानमिति वक्ष्यमाणत्वात् ऌकारे एकदेशस्य रेफस्य लत्वे
कृते एकदेशविकृतन्यायेनाच्त्वसिद्धिरिति। न चैवमनत्त इति प्रतिषेधापत्तिः अरवत इति न्यासात्। न ह्येकदे
शविकृतन्यायेन रेफवत्ताप्यायाति। लोकेऽपि हि छिन्नपुच्छस्य पुच्छवत्त्वेन व्यवहारो नास्त्येव। न चैवं होतृ ऌकारे [illegible] मयुक्तं

मू·कौ·२
॥३२॥

दीर्घस्याप्यरवनइतिप्लुतनिषेधापत्तिः। ह्रस्वस्यरवनोवेतिन्यासात्। किंत्वेवंसतिएकस्यलृकारस्यप्रत्याख्यानायस्त्र
त्रभंगाश्रयणेविपरीतमेवगौरवमितितद्दत्तदाह भाष्यकारः सेयंमहतोवंशस्तंबाल्लट्वानुकृष्यतेइतितु त्रापक्षिवि
शेषः फललिविशेषोवेतिलटलोलयइतिधातोरच्प्रत्ययस्तु पिल्लटिकणिरवटिविक्षिम्यः क्लिदयोणादिकः कनूलट्वाकंर
डभेदस्यास्फलेवद्वेरवंगातेरइतिविश्वः ननुक्रपोरोलइतिसत्रेअमत्वस्यात्पूर्वमस्तु एवंचलत्वस्यासिद्धत्वा
देवप्लुत्यादयः सेत्स्यंतीतिचेन्न नचानंतरइतिप्रतिषेधापत्तिः। प्राचामितियोगविभागेनव्यवस्थितविभाषाश्र
यणेनतदप्रवृत्तेः अगतिगत्याश्रयणंतुसर्वेषांसममितिचेन्न एवं लोपइत्यस्याप्युत्कर्षः स्यात्। तत्रश्चलत्व हि सति
स्यासिद्धतयानिजेगिल्यतइत्यत्रहलिचेतिदीर्घः स्यात्। ननुवक्तृचप्रतिज्ञाख्येऋकारलृकारएवयथर्षेषुमाजिरो
ष्मश्रवणे मृ लीयांइतिकेऋलृवर्णयोः स्थानसाम्येनेत्याग्रहणकज्ञापकत्वेनैवनिर्वाहेलृकारोपदेशोमास्त्वितिचेन्न उ त
कारीत्याकेलृवर्णयोः सावर्ण्यापसंख्यानंपरंप्रत्याख्यायतां। लृकारोपदेशस्तुकरीत्याकुसरीखपुत्तसिद्धये।

उपाणोहतृषस्तअः ४क्द४प अ। नत्रशिसामूलीयः पष्ठउपा
वि· त्रि· ३· अ·

ए
ओकार

सावर्ण्यानित्यत्तां ज्ञापयितुं कर्त्तव्येत्युक्तिर्दिक् । एओङ् । ऐऔच् । यद्यपि छंदोगानां मध्ये सात्यमुग्रिराणायनीया
अर्द्धमेकारमर्द्धमोकारं चाधीयते । सुजाते एश्वसूनृते अध्वर्यो ओ अद्रिभिः सुतं इति । अंतःपादस्थस्य व्यपरस्याकारस्य
तदीयप्रातिशाख्ये अर्द्धमेकारमर्द्धमोकारं च विदधति । तथापि प्रातिशाख्यसमाख्याबलात्तेषां सर्ववेदशाखासाधा
रणेऽस्मिन्शास्त्रे तस्य न ग्रहणं । ज्ञापकाच्चायदिह्यकारादिभिरष्टादशानामिवैङ्भिरप्येकमात्राणां ग्रहणं स्व
मतं स्यात्तर्हि लाघवार्थमेकमात्रावेवैङ्नुपदिशेत् । अकारादिवत् । नैवमेदैङ् गुणइत्यत्र तपरत्वान्मात्रिकयो
रेव गुणसंज्ञा स्यादिति वाच्यं । तत्रैओ इति स्वरूपेणैव दीर्घयोर्निर्देशोऽनणत्वेन सवर्ण
ग्रहणोपपत्तेः । एवमप्यर्द्धमात्रालाघवात् । तत्र हि वर्णोपदेशे दीर्घयोर्मात्राचतुष्टयं गुणसंज्ञायामेङिति सा
र्द्धद्वयं संकलनया सार्द्धाः षण्मात्राः समस्तवर्णोपदेशे मात्राद्वयं गुणसंज्ञायां च तस्मादिति मिलिताः षडेवमा
त्राः । तस्माद्विमात्रनिर्देशसामर्थ्यादप्येकमात्रयोरनभिमतत्वं निर्णीयते । नन्वेवमैच् इत्यत्र स्वादेशः इत्य

व
तु

र्थः स्यात्। तद्धि स्थानेंतरतमपरिभाषया प्राप्नुवतोरेदैकारयोरैकारस्यो निवृत्त्यर्थं क्रियते इति चेन्न विकल्पिकप्रसिम
तोकारस्य व्यावृत्तये तदारंभात्। एवं हि पूर्वो भागो कारस्य सदृशः उत्तरस्तु इवर्णो वर्णसदृशः तत्रोभयांतरतमस्य रे
स्वस्याभावात्पर्यायेणाकारः स्यात् इकारो रेकारो च स्यातां तस्मान्मा भूदाप्यवर्णो भूदिति सूत्रारंभः। वस्तुतस्तु प्र
त्याख्यास्यते सूत्रे तथा च तत्र वार्तिककारो वक्ष्यति। सिद्धमेङः सस्थानत्वात्। ऐचोश्चोत्तरभूयस्त्वादिति। अ
स्यार्थः एङ्‌पररूपविप्रतिषेध्येन एङ्‌ उत्तरस्तं तरतमौ ऐऔ वर्णो वेत्ति सिद्धं। यद्वा। एकारः शुद्धतालव्यः ओकारस्तु
शुद्धोष्ठ्य इति मते सिद्धमित्यर्थः। तथा च बह्वृचानां प्रातिशाख्यं तालव्यावेकारचवर्गौ विकोरे कारेयकारः
शुद्धोष्ठ्य इति च। पूर्वोक्तेभ्यः शेषो वर्णो रामिरोष्ठ्यमुपपादयितव्यः उवर्णः पवर्गः ओऔ
गकारः शोष्मोष्ठोपपाद्य इति च। पूर्वोक्तेभ्यः ...ः इदं च प्रातिशाख्यवृत्तिकृतां व्याख्यानं। तद्भाष्ये तु शेष ओष्ठ्यो
उपध्मानीयश्च ओष्ठ्यौ [illegible] ः इदं च प्रातिशाख्यवृत्तिकृतां व्याख्यानं। तद्भाष्ये तु शेष ओष्ठ्यो
पवाद इति पाठः। तत्रापवादे स्यात्तरसूत्रे वक्ष्यमाणान्विहाये त्यर्थः। न्यायसिद्धस्यैव बाध्यबाधकभाव

भागं

इति सूत्रार्थ

वे

राम

स्यस्फुटीकरणार्थं चेदं। तदेवं शुद्धपरविप्रतिषेधान्मतभेदेन स्थानसाम्याद्वा सिद्धमिति समाधानद्वयमेदूः स्फुटीकृ
तं। एतच्च यद्यपि रेदृच्यपि तुल्यं॥ तथापि समाधानांतरमप्यस्तीत्याह। ऐचोश्चेति। चकारो भिन्नक्रमः हेतोरनंतरं
बोध्यः। अर्द्धमात्रावर्णस्याध्यर्द्धमात्रात्स्वर्णौ वर्णयोरि ति पक्षे मल्लुयामादिवद्भूयसा व्यपदेशाद्दप्यैकारौका
रौ भविष्यत इत्यर्थः समविभागपक्षोप्यस्तीत्यष्टमे वक्ष्यते। तत्र तु पूर्वोक्तसमाधानमेव शरणं॥ तत्रापि शुद्धपर
विप्रतिषेधपरं प्रथमव्याख्यानं यद्यपि विवरणे स्थितं। तथापि तदभ्युपगमेऽप्र ○ तिर्वैभयोस्तुल्यबलत्वादिति ति
विप्रतिषेधपरं वार्तिकं भाष्यं च विरुध्येते। नहि गोस्त्रियोरिति सूत्रेण गोशब्दे विधीयमानो ह्रस्वोन्यत्र चरिता
र्थः येनाप्रतिपत्तिः स्यात्। ननु प्रतिलक्ष्यं लक्षणभेदे विकल्पे प्राप्ते [illegible] परमेवेति नियमोस्त्विति चेन्न। ए
वं हि सति अचः परस्मिन्निति सूत्रेणनियः परयणादेशः परश्चासौ व्यवस्थया। युगपत्संभवो नास्ति बहिरंगे
णासिध्यति। इत्यादिभाष्यसंदर्भो विरुध्येत। तद्धलेनहि लक्षणवाक्ययोः पूर्वपरीभाव एव विप्रतिषेध स्तू

॥शू.कौ.
॥२५॥

ऋकारस्य विषयोऽन्यस्तु अंतरंगंबलवदित्यस्येति लभ्यते इदं च तत्रैव स्फुटीकरिष्यामः द्वितीयव्याख्यानमप्यृॢकार
दिवत्प्रातिशाख्योक्तस्यप्रायेणानादरादुर्बलं अथ छंदोगाभिमतस्यापि चतुर्मात्रस्य तपरकरणव्याख्यातो
केस्तद्धदिहाभ्युपगमस्तर्हि ऋलृक्सूत्रोक्तरीत्या ऋकारलृकारयोः सवर्णविधिशेषं प्रत्याख्यातुं युक्तं। तिकं
अथ शिक्षांतरानुरोधेन वार्त्तिकारंभस्तर्हि एचइगिति सूत्रारंभोपि तथैवास्त्विति चेन्न तस्मादेचइगिति
सूत्रबलेनोदूकारादूर्ध्वं (?) रोन लभ्यंत इति स्थितं ननु प्रातिशाख्योक्तावपि ताविह गृह्येते चेत्तदा किमनिष्टमा
पाद्यते येन तयोरग्रहणाय यत्नतः प्रतिपादयसीति चेन्न एचोऽह्रस्वविधावंतरतमत्वेन तयोरेव प्रसंगात् एच
इगिति सूत्रं तु प्रत्याख्यानमेव एतदर्थमेव सूत्रारंभे तु गौरवमेव दोषः स्यादेतत् एत ओतङ् इत्यादि क्रमेण
तपरान्निर्देक्ष्यामः तथा च ऊकालोज्झ्रस्वदीर्घप्लुतः इति सूत्रे अच् ऊवूदूदूत्त इति तपरकरणसामर्थ्यात् तत्कालग्रहणार्थं रम
न एकार ओकारो वा ह्रस्वसंज्ञां लभेते तेन ह्रस्वविधेयोऽप्यसौ न भवेत् एवं त्रिमात्राणामप्यनवाप्तेः॥

B50

तत्रश्च गोत्रा तत इत्यत्रानचि चेत्यचः परस्य विधीयमानं द्वित्वं तकारस्य न स्यात्। प्लुतो ई॥ तिकायन इद इन्द्रोपगवे ति:। प्लु
तं स्यात्॥ प्लुतसंज्ञा वि[illegible]रा प्लुतविधिर्न प्रवर्तेत। नेचो मध्यादान इत्यादिविधिसामर्थ्यात्तत्सिद्धिः
उवर्णवि ध्यानेन चरितार्थत्वापत्तेरिति दिक्। तदेतदाह वार्तिककारः। संध्यक्षरेषु तपरोपदेशश्चेत् तपरोच्चारणं॥
प्लुताद्विषु विधिः प्लुतसंज्ञा च। अनपर एच इग्घ्रस्वादेशे एकारादेरूर्ध्वग्रहणमिति। अस्यार्थः श्लिष्यमाणवर्णद्वये
ग्रहणायत्वात् संधीयमानमक्षरं इत्यन्वर्था पूर्वाचार्यसिद्धा एचां संज्ञा। तपर उपदिश्यते तेनेनेति करणच्युतस्याप्र
योजनमुच्यते तथा चैचां तपरोच्चारणे फलमस्तीति चेन्न हि तपरोच्चारणं तावत्कर्तव्यं। प्लुतसंज्ञा त्वप्याद्विधिर्द्वि
त्वङ्‌सुडादिर्न सिध्यति। तत्र प्लुस्थैते यङ्मुडादिस्तस्मात्परस्य द्वित्वमिति स्वच्छयितुमैदौद्वाद्धः प्लुते तदुत्तरवर्णे
च इष्टं कार्यं न सिध्यतीत्यर्थः। अभ्युपेत्यवादोयं। वस्तुतस्तु अनच्त्वात्प्लुतसंज्ञैव न सिध्यति। तस्माद्दुष्टस्तपरनि
र्देश इति वार्तिककत्रैयेणोक्तं। यथान्यासपाठे त्वाह। अनपर इति सूत्रं कर्तव्यं स्यादइ्कारादिनिवृत्तये इत्यर्थः॥

सदृ

।।सू॰कौ॰।।
।।३५।।

वस्तुतस्तु आभ्यामपि सूत्रं कर्त्तव्यमुभाभ्यामपि न कर्त्तव्यमिति समनंतरमेवोपपादितं। तस्मान्नायं दोषउद्भावनार्हः
पक्षद्वयसाधारण्यात्। स्यादेतत्। तपरत्वाभावपक्षे गंगोदकं रमेशः इत्यादौ त्रिमात्र चतुर्मात्राणां स्थाने त्रिमा
त्र चतुर्मात्रादेशाः स्युरंतरतम्यात्। न चाकः सवर्णे दीर्घ इति योगविभज्यैकः पूर्वपरयोरित्यधिकारे योगविहि
तः सदीर्घो भवतीति व्याख्यानान्न त्रिमात्राद्यादेश इति वाच्यं। एवं तु विद्धपचंतीत्यत्र दोषप्रसंगात्। नन्वेवं मीत्येव सूत्र
मस्तु प्रथमयोरिति सूत्रात्पूर्वसवर्णोनुवर्त्तते एकः पूर्वपरयोरिति च। एवं सिद्धे पूर्वग्रहणं यथाजातीयकः पूर्वः स
एव यथा स्यात् दीर्घो माभूदिति तेन पचंतुमिति तावत्सिद्धं। संप्रसारणाच्चेत्यत्रापि स एव पूर्वग्रहणानुवर्त्ततो हलइति
सूत्रारंभसामर्थ्याद्धा संप्रसारणाच्चेत्यनेन दीर्घो न विधीयते तेन विद्धमित्यपि सिद्धं। अतो गुण इत्यत्रापि पररूपेव
त्। अत एव यूनि लुगिति अत्रोदाह्रियते। तिकस्यापत्यं तिकादिभ्यः फिञ्। तैकायनि[illegible]तस्यापत्यं युवा फेश्छ च। तै
कायनीयः। तस्य छात्राः। युवप्रत्ययस्य लुकि कृते वृद्धाच्छः। तैकायनीया इति। न हि परिगणने सति तैकायनेः फे
श्छः संभवति न वा तल्लोपः। अत एव यूनि लुगिति सूत्रे स्थित्वा परिगणनमर्वाचीनमिति हरदत्तादयोप्याहुः।
अपि च। फिञि सति आम्रगुप्तायनेरपत्यं युवा प्राग्दीव्यतोण्। तस्य ण्यक्षत्रियार्षञितो लुकि आम्रगुप्तायनीरि
त्येवं रूपं पितरि पुत्रे चेष्यते। फिनि तु सति तन्न स्यात्। ञितः परत्वाभावात्। न चाब्राह्मणगोत्राद्युवप्रत्ययस्योपसं
ख्यानमिति तत्सिद्धिः। ब्राह्मणगोत्रे तदप्रवृत्तेः। किं च। न ह्यावित्तग्रहणपक्षे मालादीनां चेत्यनारंभणीयं स्यात्
प्रस्थेऽवृद्धमकर्क्यादीनामित्यनेनैव पूर्वपदाद्युदात्तस्य सिद्धेः। अपि च वृद्धिरादैत् तत्रावृसात्याश्मयणगोरसं

॥ग्रन्थो० २

॥५९॥

तिचापरंगो

मजेवृद्धिरित्यादिविधिप्रदेशेषु इतरेतराश्रयपरिहाराय सूत्रन्यासः एवं च वृद्धिसंज्ञा विज्ञेया स्यादिति वाच्यम्। उत्तरपदवृद्धौ सर्वं च इति अत्रोच्यते। ओदेचामत्र स्थवृद्धिसंज्ञा। न चैवं सर्वभासादावुक्तदोषः स्यादिति वाच्यम्। उत्तरपदवृद्धौ स वं चेत्यत्र हि उत्तरपदग्रहणं स्वर्यते स्वरितेन चाधिकारो विज्ञायते। तेनोत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता सैव गृह्यते। सर्वपाचालः सुसर्वार्द्धोज्जनपदस्येति वृद्धिः। इदं च तद्भावितग्रहणेष्वप्यवश्यवक्तव्यमेव अन्यथा स

यथा

वृद्धिशब्देन

यैः कारक इत्यादावतिप्रसक्तेः एवं तावद्धार्यप्यदोषः तत्रावृत्याद्याश्रयणेनैवं विहिताया वृद्धेर्यन्निमित्तं तत्रैवपुं निमित्तमि वद्भावप्रतिषेधात्। वृद्धिशब्देन च विध्योच्यस्य वृद्धिः प्रतीयते इत्याशयेनेमौ कं भाष्योयत्के स्नायावृद्धेर्निमित्तमि ति। न च वैयाकरणभार्येत्यत्र सौवश्वभार्येतिप्रसंगः फलोपहितस्यैव निमित्तत्वेन विवक्षितत्वात्। ऐचोप्रति

राम

फलोपधानमस्तीति चेन्न। तयोर्वृद्धिशब्देनाविधानात्। केचित्तु यावद्वृद्धिजननयोग्यत्वे सति किंचित्फलोप हितत्वं [illegible] शब्देनोच्यते वैयाकरणे तु ऐचोप्रतितद्भितान निमित्तं। निषेधसन्नियोगशिष्टत्वामन्त्रिणात्ति

निमित्त

गभ[illegible]

प्रसंगात्। तेन वैयाकरणभार्येनातिप्रसंगः परिषदोण्यः पारिषद्या भार्या इत्यादौ त्वाकारस्यात्रोपहितत्वेपि स्वरूप
योग्यता सकलवृद्धिप्रत्ययस्तीत्याहुः। तस्मादावृत्तो गौरवापत्तेः शालीयादेरसिद्धत्तेः मालादीनां चेति लिंगाद्या
लिन्यायात्। तथैव चाभावि संज्ञात्वविज्ञाने गौरवाच्चेह निश्चितं। आदेच्मात्रस्याविशेषाद्वृद्धिसंज्ञा विधीयते।
अनर्थकं साध्व[illegible]नुशासनं प्रयोगनियमार्थं आदेशार्थं आगमार्थं विशेषणविशेष्यभावार्थं चेदं सूत्रमि
तिषद्क्षीतु भाष्य एव निराकृतत्वादसंभवदुक्तिकत्वाच्चेनेह तन्यते। संज्ञासंज्ञिभावे सत्यपि कासंज्ञा कः संज्ञीस
त्रतासर्वग्राहकास्तु बहवो न्यायाः। तथाहि। यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणं तच्छब्द एवकारश्चेत्या
द्युपादेयलक्षणमित्यभियुक्तोक्तेरत्रैवानुभवाच्च प्राथम्यं तावत्संज्ञित्वे लिंगं तत् आदेङ्गुण इत्यादौ स्पष्टमेवा वृ
द्धिसंज्ञासूत्रे तु मंगलार्थं वृद्धिशब्दस्यादौ प्रयोगेपि वक्ष्यमाणे न्यायांतरेणादैचां संज्ञित्वे निर्णीते सत्यादेच्
वृद्धिरित्याकारकपदानुपूर्वीज्ञानानंतरमेव वाक्यार्थबोधाभ्युपगमात् तज्जनकीभूतानुपूर्वीज्ञाने आदैचामेव प्रा

॥शं॰को॰
॥६०॥

थम्यान्न व्यभिचारः। पदानुपूर्वीज्ञानमेवत्वासत्तिज्ञानमुच्यते। इदं च शाब्दबोधे हेतुरिति ये नेष्यते तेषामासन्नानास
न्नकथोच्छेदः स्यात्। पदसमूहालंबने सकलपदानां पदार्थस्मरणे च सकलपदार्थानां विषयत्वाविशेषात्। आ
वृत्तिश्च संज्ञात्वे लिंगं। व्यवहारार्थमेव संज्ञाकरणात्। भेदाभेदाभ्यामपि संज्ञिसंज्ञात्वं क्वचिन्निर्णीयते। बहूनां हि त
एकासंज्ञोचिता लाघवात्। न त्वेकस्य बह्व्यः संज्ञाः गौरवात्। न्यूनाधिकव्यक्तिकास्तु बह्व्यः संज्ञा इष्यंत एव। तेन न
त्रसुक्तकार्यवैलक्षण्यात्। कृत्त्वस्य प्रत्ययसंज्ञावत्। तद्धितत्वस्य प्रत्ययसंज्ञा च चालघ्वक्षरत्वमपि टिघुभा
दौ संज्ञालिंगं यथायथं बोध्यं। इह तु आवृत्याभेदेन च वृद्धिशब्दः संज्ञेति स्थितं तत्त्वलेन श्रुतानुपूर्वीभंगादोषश्चा
प्राथम्यमपि योजनीयं। यद्वा स्वेच्छया संज्ञाः क्रियंत इति पक्षं विहाय व्यवहाराय नियमरतिपक्षे योज्यं। आ
द्येपि कार्यकालपक्षाश्रयणेन वा समाधेयमित्तिदिक्। एतेनार्द्धधातुकं शेषः कृदत्तिङ् अपृक्त एकाल्प्रत्ययः स्वं एम
रूपं शब्दस्याणुदित्तपरः आदिरंत्येन येन विधिस्तदंतस्य यादावपि व्यभिचार उक्तः। तत्रापि विपरीतानुपू

402

वो चीकल्पना। कल्पकस्य च प्रागेव कृतत्वात्। पक्षान्तरेऽपि समाधानाच्च। अत एव स्थानिवत्सूत्रे वर्णे किमर्थमित्याशङ्क्य स्था करणं
नीआदेशस्य संज्ञा माविज्ञायीति भाष्यमप्युपपन्नं। यत्तु पृथगेकालिति परिभाषा न तु संज्ञेत्युक्तं तद्भाष्येपि सुवचं
संज्ञायोगा। अपृक्ते हल्ग्रहणं स्वादिलोपे हल्लोपार्थमिति वार्तिकस्य तद्भाष्यस्य च प्रतिकूलं चात्। तस्मादुक्तैव गतिः समीचीनेति
दिक्। ननु मृजेर्वृद्धिरित्यादावन्योन्याश्रयः संज्ञया हि विधिर्विहितानां च संज्ञेति। न च मालादौ संज्ञाप्रवृत्तिसंभ
सं वे सतीह भाविसंज्ञाविज्ञानं भवतीति तस्माद्वृद्धिशब्द एवादेशः स्यात्। अन्यत्र वृद्धिसंज्ञाप्रवृत्तावपि मालाशब्दान्त
र्गतस्याकारस्य भत उत्कृष्येह विधातुमशक्यत्वादिति भवानुः। मार्ष्टि इत्यादौ सिद्धस्यैवाकारस्य मृज्युपदेशा
दसाधुत्वे प्रसक्ते साधुत्वं मृजेर्वृद्धिरित्यादिना बोध्यते। न त्वपूर्व आकारो भाव्यते येना[illegible]न्योन्याश्रयः स्यात्।
: उक्तं च वार्तिककृता। सतो वृद्ध्यादिषु निमित्तभावात्तदाश्रये इतरेतराश्रयत्वादप्रसिद्धिः सिद्धं तु नित्यशब्दत्वादिति
अथ लक्षणैकचक्षुष्कः कश्चिद्व्याकरणबलेनैव मार्ष्टीत्यादिप्रयोगेषु व्युत्पत्स्यते तत्र तथापि न क्षतिः। शाला माला दा

॥शु॰को॰
॥६१॥

वाकारे श्रुते आत्वसामान्यलक्षणाप्रत्यासत्त्या मार्ष्टीत्यादिप्रयोगसमवायिनां सर्वेषामाकाराणां रद्धिरुद्धवाच्यता
प्रहात्॥ सामान्यलक्षणानभ्युपगमपक्षे वात्वजातौ ग्रहात्॥ तत्यनुभवपदार्थस्मरणवाक्यार्थबोधानां समान
प्रकारत्वेनैवेति प्रसंगभंगाद्वा॥ अन्यथा गेहे घटोस्तीति वाक्याद्प्यपूर्वव्यक्तिर्न गृह्येतेति दिक्॥ अत एव वचनवेति वि
भाषेति सूत्रे भाष्यकारो वक्ष्यति॥ साधुत्वस्य विधेयत्वे विभाषाश्वेरित्यादिना तस्यैव विकल्पापत्तिः॥ तस्मात्वप्र
सारणाद्येव विकल्प्यत इति॥ एषेवलङादिविध्योगतिः नचैवं साध्वनुशासनत्वभंगः॥ साधुत्वविशिष्टस्यैव लक्ष
णया विधानमिति कृत्स्नं जर्तेसत्रे विवकारादिभिरुक्तत्वात्॥ केवलविधानेपि यदिह परिनिष्ठितं तत्साधु इति श्रु
तार्थापत्तिकल्प्यवाक्यात्साधुत्वसिद्धेश्चार्हश्च प्रत्येकं वाक्यपरिसमाप्तिः मालादीनां चेत्यादिलिंगात्॥ श्राल
णा भोज्यन्तामित्यादौ तथा दर्शनाच्च॥ यद्यपि गर्गाः शतं दंड्यन्तामित्यादौ समुदायेपि वाक्यपरिसमाप्तिर्दृ
श्यते॥ गुणकर्मभूतानामपादानस्थानापन्नानां गर्गाणामनुरोधेन सिद्धकर्मत्तया प्रधानभूतस्य शतस्य

(margin notes: वा॰कृ॰ ; इति॰रण ; सर्वत्र ; राम)

405

वृत्त्ययोगात्। तथापीह शास्त्रे यत्नं विना समुदाये शास्त्रं न समाप्यते। अत एवोभे अभ्यस्तं सहेति सहग्रहणं
वार्त्तिककृद्वक्ष्यति। भाष्यकारस्तूभेग्रहणमेव एतदर्थमिति वक्ष्यति। अन्यथा एकाचो द्वे इत्यनुवृत्त्या सिद्धे कि
मुभेग्रहणेन। संयोगसंज्ञायां समाससंज्ञायां च महासंज्ञाकरणमेवान्वर्थत्वविज्ञानार्थमिति यत्नः। अत एव
सह सुपेति सहग्रहणं योगविभागेन तिङन्तादिसमासविध्यानार्थमिति स्थापयिष्यते। इहत्तपकरणमैजर्थ
तमेओङ् मी दूदेदित्तिव दुच्चारणार्थमसंदेहार्थं चेति प्रपंचितं [illegible] ऐ औ जिति सूत्रयोः यद्विहोक्तं वार्त्तिककृता। आ
कारस्य तपरकरणं सवर्णार्थमिति। ननु गुणाभेदकास्तपरसूत्रं चानणि विध्यर्थमित्यभिप्रेत्य भाष्ये त्वभे आवश्यकत्वा
तस्वरि दका गुणा इति स्थितं। गुणा उदात्तानुदात्तानुनासिकाः। नांतरीयकत्वया उच्चार्यमाणा अपि यत्नं विना न
विवक्ष्यंत इत्यर्थः। अनुदात्तः आद्युदात्तः इत्यादावुदात्तग्रहणं चेह ज्ञापकं। अन्यथा उदात्तमेवोच्चारयेत्। हि
लाघवात्। ननु यद्यभेदका गुणास्तर्हि यद्वक्ष्यति भाष्यकारः हल्यादेर्नु स्यस्थानेवद्भावादनुदात्तत्वादिट् वधे

प्रतिषेधेप्राप्तेतद्बाधनायचध्वोदेश्चोदात्तनिपातनंकरिष्यतेतातथाचैकाचउपदेशइतिसूत्रेएकाज्ग्रहणंनकर्तव्यमितितत्तदेतद्विरूप्येते। अविवक्षाप्रसंगात्‌अथोच्येत। तत्रापिस्थानेन्तरपरिभाषयादेशस्यपरः स्वरः प्राप्तस्तस्मिन्नुच्चारयितव्येउदात्तोच्चारणंयत्नेनविवक्षार्थं [illegible] विज्ञायतेइति। एवमपियद्वक्ष्यति भाष्यकारः षष्ठ्या चतसर्याद्युदात्तनिपातनंकरिष्यतेसनिपातनस्वरः चतुरः शसीत्येतस्यबाधकोभविष्यतीति। तद्विरूप्येत। चतुंश्च द्वौ ख्युसत्तिपक्षेन्त्रः संख्यायाइतिफिट्सूत्रेणाद्युदात्तः चतेरुरन्निति युसत्तेपिनित्स्वरेणाद्युदात्तएवान्तरस्थानिकस्यचतसृशब्दस्यापिस्थानिस्वरेणाद्युदात्तोच्चारणोपपत्तौचतुरः शसीत्येतद्बाधकत्वायोगात्। अपिच। अस्थ्यादीनामप्याद्युदात्तत्वादत्तादेशस्यानङोपिस्थान्यनुरूपेऽनुदात्तएवोच्चारणीयेउदात्तोच्चारणंविवक्षार्थंभविष्यतीत्युदात्तग्रहणंनिष्फलमेवाप्रयुक्तंक्रियमाणंयत्नाधिक्येप्यविवक्षांज्ञापयेत्‌। यदप्येकश्रुत्यासूत्रपाठास्थितेरुदात्तोच्चारणंविवक्षार्थमितितदपिचिंत्यं। [illegible]

स्व

पक्षे

त राम

एवं सत्यप्यनङोऽप्युदात्तोच्चारणेनैव सिद्धावुदात्तग्रहणवैयर्थ्यापत्तेः उक्तज्ञापकासंभवाच्च । तथा हि । किं ज्ञाप्यं ।
स्वशब्देनानुपात्तो गुणो न विवक्ष्यत इति आहोस्विद् संज्ञितयत्नविशेषेण विवक्ष्यत इति । आद्ये निपातनस्वरो न
विवक्ष्येत । अन्त्ये त्वनूदात्तोच्चारण एव विवक्षितयत्नविशेषस्थितेः कथं ज्ञापकोऽयं नाम सूत्रशेषः स्यात् । तस्माद्गु
णानामभेदकत्वप्रतिपादकमत्रत्यं भाष्यमुत्तरग्रन्थविरुद्धमेवेति चेत् । उच्यते । विभाषा छन्दसीति वैकल्पिकमेके
श्रुत्यमंगीकृत्य पक्षान्तरेऽपि परिहारा भवन्तीति न्यायेन तत्र तत्राद्युदात्तनिपातनं करिष्यत इत्युक्तं । इह तु त्रैस्वर्ये
ण सूत्राणां पाठमंगीकृत्य स्वरूपेणोपात्तस्य गुणस्य नान्तरीयकत्वेनाविवक्षितत्वसंभवादुदात्तग्रहणं ज्ञापक
मित्युक्तमतो न विरोधः । यद्वा अणुदित्सवर्णस्येत्यत्राण्ग्रहणेनैव सिद्धे गुणभिन्नानां यवलानां संग्रहाय क्रि
यमाणमण्ग्रहणं गुणानामभेदकतामपि ज्ञापयति । भेदकाभेदकपक्षयोश्च जातिव्यक्तिपक्षयोरिव लक्ष्यानुरो
धाद्व्यवस्थेत्युक्तं हल्सूत्रे । तेन भेदकत्वपक्षाश्रयेणाद्युदात्तनिपातनं करिष्यत इत्यादि भाष्यं बोध्यं ॥ अ

॥श०कौ०
॥६३॥

तएव चेदमस्य स्यदाद्यत्वे अष्टन आ विभक्तावित्यादौ चानुनासिको न प्रवर्तेत। नन्वेवमण्ग्रहणं हलोयमामिति लोपेऽन्यत
तरस्यांग्रहणानुवृत्तिज्ञापनार्थमित्युक्तमितिचेन्न। उभयज्ञापकत्वेप्यविरोधात्। नत्वेकेनैकमेव ज्ञाप्यमिति
नियमः यावतानुपपत्तिस्तस्य ज्ञाप्यत्वात्। अतएव आत्वविकल्पः कृतात्वस्य षट्संज्ञा चेत्युभयमष्टनो दीर्घा
दिति दीर्घग्रहणेन ज्ञापयिष्यते। अतएव संहितायामित्यधिकारेण संहिताया अनित्यत्वं कालव्यवायेप्यानङा
दिप्रवृत्तिश्चेत्युभयं ज्ञाप्यत इति दिक्। एवं चाकारस्य तपरकरणं सवर्णार्थमितीहत्यं वार्त्तिकमपि भेदकत्वपक्षेण
साध्वेव। भाष्ये तु पक्षान्तराभिप्रायेणैजर्थत्वमुक्तं तदपि यथोद्देशपक्षे बोध्यम्। आदैचां संज्ञाविधावनुवाद्यत्वे
न सवर्णग्राहकत्वप्रसक्तेः। कार्यकालपक्षे तु विधिवाक्येनैव वृद्धिसंज्ञाविशिष्टानामादैचां भाव्यमानतया सवर्ण
ग्रहणं न प्राप्नोत्येव। यथा ज्योतिष्टोमराजसूयादिशब्दानां यागविधावेव सामानाधिकरण्यान्नामधेयत्वा
वगतिर्न तु वाक्यान्तरेण तथास्मिन्पक्षे वष्याक्षीनामपि। वृद्धिरादैजिति सूत्रं त्विको गुणवृद्धी इति वत्सदोपस्थापकं

नन्तु

उपस्थापस्य संज्ञित्तया परं संज्ञा सूत्रत्वं व्यवहारः। आद्यपक्षे तु यन्न दुःखेन संभिन्नमित्यादौ स्वर्गशब्दार्थावगम
वदिहैव वृध्यादिशब्दार्थावगम इत्ति विशेषः तदयं निर्गलित्तः सूत्रार्थः। कृतानामकृतानां चादैचां प्रत्येकं वृद्धिसं
ज्ञा स्यात्। आश्वलायनः ऐत्तिकायनः अश्वलैत्तिकशब्दाभ्यां नडादित्वात्फक् किति आदिवृद्धिः उपगोरपत्यं औपगवः। न
अदेङ् गुणः। अदेङां गुणसंज्ञा स्यात्। तपरकरणं इह सर्वार्थं तेन तरतीत्यत्र अकार एव न तु कदाचिदाकारः
नच प्रमाणत आन्तर्येण नियमसिद्धिः रपरत्वे कृते एकस्याध्यर्द्धमात्रत्वादपरस्यार्द्धतृतीयमात्रत्वात्। पचंति
चेता। स्तोता। इको गुणवृद्धी। यत्र ब्रूयाद्गुणो भवति वृद्धिर्भवतीति तत्र इक इति षष्ठ्यंतं उपस्थितं बोध्यं चेता। स्तोता। अ
हार्षीदित्यादि। इक इत्युक्तेर्नेह। याता। वाता। ग्लायति। उंभिता। तथा च वार्त्तिकं। इग्ग्रहणमात्संध्यक्षरव्यंजननि
वृत्यर्थमिति नैतानि संति प्रयोजनानि। तापके नानिकां निवृत्तिसिद्धेः। तथा हि। अकारस्य पचतीत्यादौ शपं प्रति पना
श्रित्य यथाक्रमं पुगंते ति सार्वधातुकार्धधातुकयोरिति च सूत्रेण सत्यपि गुणे रूपे विशेषो नास्ति। अचिकीर्षीदिया

दोलकारलोपेन वृद्धिर्बाध्यते। ण्यल्लोपावितिपूर्वविप्रतिषेधस्य वक्ष्यमाणत्वात्। सूत्रारंभपक्षे ह्येषेवन्चिकीर्षकइत्यादो ग
तिः। अचोञ्णितीत्यत्र निर्दिष्टस्थानिकत्वेनेकपरिभाषाया अप्रवृत्तेः। अपासीदित्यादो तु सिचि वृद्धो सत्यामपि नक्ष
तिः। वस्तुतस्तु सासगिडभ्यां परत्वाद्बाध्यते। येनना प्राप्तिन्यायेनापवादत्वाद्बाध्यतेत्ति तु निष्कर्षः। नचयाता वात्तेत्यत्रा
दावातो गुणप्रसंगः गापोष्टगिति टकः कित्वेनाकारस्य गुणो न भवतीति ज्ञापितत्वात्। तद्धि कित्वं सामगइत्यादावल्लो
पार्थं क्रियते। यदित्वाकारस्य गुणः स्यात्तर्हि द्वयोरकारयोः पररूपेण सामगइत्यादि रूपसिद्धौ किं कित्वेन। नचेह
चिकीर्षकइत्यादावि वपरत्वादंगत्वाच्चाअतो लोप एवोदाहर्तुमुचितो न तु पररूपमितिवाच्यं। यतायत्तापिल्लापकत्वे
बाध्यकाभावात्। वस्तुतस्तु नेह लोपेन भाव्यं। तत्रह्यनुदात्तोपदेशेत्यतोनुवृत्तेनोपदेशग्रहणेनार्द्धधातुकस्य विशे
षणादार्द्धधातुकोपदेशेयदकारांतं तस्य लोपो विधीयते। अन्यथा गतो गतवानित्यादो अतिप्रसंगात्। नचा
सिद्धवत्सूत्रेण निर्वाहः तस्य भाष्यकृता प्रत्याख्यास्यमानत्वात्। किंच भयपयगतो भाभ्यां क्विपि अतूपत्तइति

रूपं माघवादिभिरुदाहृतं तत्तदपि यथाश्रुतेन सिद्ध्यति तस्मादुपदेशानुवृत्तिरेव शरणं। कथंचित्तुत्तः कृण्वत्तरसादाव
तो लोप इति चेत्। संनियोगशिष्टतया उप्रस योपदेशवेलायामेव। अकारस्यापि शुब्व्यारोहादिति केचित्। अन्ये तु
धिन्विकृण्व्योरच्चेति सोऽत्र क्रमानुरोधात् प्रथममकारादेशः तदनन्तरं च शुद्धाकृष्ट उ प्रत्यय इति नोक्तदोष इत्याहुः। न
न्वेवं सामगायेत्यादावेकादेशस्य पूर्वान्तत्वेन ग्रहणादातो धातोरिति आलोपः स्यादिति चेत्। अत्र कैयटः अकारमा
श्रित्य कृतो यशाब्दः सन्निपातपरिभाषया लोपं न प्रवर्त्तयति। दीर्घत्वं तु कष्टायेति निपातनाद्भवतीति एओङ् सू
त्रे स्थित्वा समाहितवान्। तस्यायमाशयः। यादेशो हि ह्रस्वत्वविशिष्टत्वेन प्रयोजकः। तद्विघातकत्वात्यनुवृत्तेः। त
त्र यद्यपि दीर्घेण ह्रस्वत्वांशो निवर्तितस्तथाप्यत्वमात्रमादेशेऽप्यनुवर्तते। तदपि चेल्लोपेन निवर्त्येत तर्हि परिभाषा
विरोध्या दीर्घांशे परं परिभाषा बाध्यते। नन्वेवं शान्तेरपि तद्बाधोऽस्त्विति वाच्यं। तदबाधेऽप्युपपत्तेः। प्रकृतसूत्रे ए
ओङ् सूत्रे च स्थित्वा। गोपाष्टकः किंत्वस्यानन्यार्थतां वदन् भाष्यकार एवात्र प्रमाणं। एतेन शुभंया शब्दस्य नपुंसकत्

स्ववेऽ॰यीदेशे दीर्घे च आतो धातोरित्यालोपे च श्रुभंम्य इत्यादि माधवोदाहृतं भाष्यविरोधाच्चिंत्यम्। अत एव नपुंसके श्रीपं
ज्ञानवदिति ग्रंथः श्रीपायेति रूपपरतया यथाश्रुतमेव समंजसं भङ्क्त्वा माधवानुरोधेन प्रायेण ज्ञानवदिति व्याच
क्षाणा अपि प्रत्युक्ताः॥ तथा ग्लायतीत्यादौ संध्यक्षराणामप्युपदेशसामर्थ्याद्गुणो न भविष्यति। इतरथा ह्येकारस्येव
उपदिशेत्। मात्रालाघवविरहेऽपि प्रक्रियालाघवात्। न चैवमात्वादेशोऽपि न स्यादिति वाच्यम्। अयं विधिप्रत्युपदेशो न
र्थकः स विधिर्बाध्यते। यस्य तु विधेर्निमित्तमेव नासौ बाध्यत इति न्यायात्। गुणं प्रति ह्येकारोपदेशोऽनर्थकः। ग्लै
अपि ह्रस्वस्य सुपठत्वात्। आत्वादेशस्य तु निमित्तमेव। न च ग्लाय इत्येव पठ्यतामिति वाच्यम्। तथा सति हि त्वया ग्लायतेरिति रू
पं न स्यात्। यकारद्वयश्रवणप्रसंगात्। जग्लौ विसाय सिध्यापतेश्च। यद्वेकारां तत्वाभावादिट्प्रसंगे ग्लातेत्यादि न
स्यादिति। तन्न। अनुदात्तोपदेशेषु पाठसुपठत्वात्। न चैवं ग्लासिष्टामिसाद्यसिद्धिः। अनादंतत्वेन सगिटोरसं राम
भवादिति वाच्यं। लोपो व्योरितिय लोपे कृते सगिटोः सुलभत्वात्। सन्निपातपरिभाषा त्वनित्येति कृतित्यु ग्रहणेन ज्ञा

पयिष्यते। तेन वत्वसंनिपातेन कृतो यत्वलोपो वत्वसंनिपातविघातकमपीटं प्रवर्तयिष्यत्येव। अनित्यत्वाश्रयणेनैव हि दृश
क्षिः गोद इत्यादावदात्तो लोपः अन्यथा इत्तुक्प्रत्ययोः प्रतीतयोरुपजीव्यत्वाल्लोपो न स्यात्। अस्तु वा संनिपातपरिभा
षाश्रयणाद्ग्लासिष्टां इत्यादि न स्यात्। तु इत्ययान्तो [illegible] पदेशो दोषान्तरं। सर्वथापि संध्यक्षराणामुपदेशसामर्थ्या
द्गुणो न। आयादयस्तु भवन्त्येवेति सिद्धं स्यादेतत्। आदेच इत्यात्वमपि तर्हि बाध्येत न ह्युपदेश आत्वस्य निमित्तं ग्लेः त्ता
त्युपदेशोपितस्य सुकरत्वात्। शितिगुणे ना शित्वात्वेन च एचोपहारे प्राप्ते एज्उपदेशसामर्थ्येन गुणात्वयोर्मध्ये कृत
रद्वाध्यं कतरन्नेत्यत्र विनिगमनाविरहेणोभयबाधे श्रोयात्। नन्वेवमात्वविधेः क्वावकाश इति वाच्यं। ध्येट्पाने
शोतनूकरणे इत्यादेरवकाशस्य स्पष्टत्वात्। नन्वेवमादेङ् इत्येव ब्रूयात्। तथा च एज्ग्रहणं निरवकाशमिति चेन्न
उत्तरार्थत्वात्। मीनातिमिनोतीत्यत्र ह्येच इत्यनुवृत्त्या आकारान्तानामेजन्ताः प्रकृतयः एजन्तानामपीकारान्ता इति
घुसंज्ञासूत्रे वार्तिककारः स्फुटीकरिष्यति। अत्राहुः। अन्यतरबाधेनैव संभवे उभयबाधकल्पनं तावदन्याय्यं ५

तत्र यद्यगुणेऽपि विशेषो नावधार्यते। तर्हि विनिगमनाविरहात्स्यादेवोभयबाधः। अस्ति चेह विनिगमकं। नध्याख्येति सूत्रे
ध्यायतेः कृतात्वस्य निर्देशेन आत्वाबाधज्ञापनात्। किंच एजन्तग्रहणसामर्थ्यादप्यात्वं भवति। यत्तूक्तं उत्तरार्थं तदिति तन्न। ग्ला
मीनातीति सूत्रेण हि न एचः स्थाने आत्वं विधीयते किंतु एज्निमित्तप्रत्यये विवक्षिते उपदेशावस्थायामेवाल्मात्रस्यात्वं
विधीयते अन्यथा दायं इत्यादौ भावे घञं बाधित्वा एरच् स्यात्। ईषद्दरदानः स्वदवदान इत्यादौ तो युच्च न स्यात्। अवदाय इ
त्यत्र श्याद्व्यधेति णो न स्यात्। स्पष्टीकरिष्यते चेदं षष्ठे एव भाष्यकृता। एवं च एज्निमित्तप्रत्यये इत्यप्युच्यमाने पिदापय
तीत्यादि सिध्यत्येव। णिचो गुणं प्रत्यपि स्वरूपयोग्यत्वात्। वृध्या गुणबाधेपि योग्यतानपायात्। न चेह फलोपधानं
विवक्षितं। आत्वस्य एज्विषये प्रागेव प्रवृत्तेरभ्युपगमात्। अन्यथा घञ्युच्चण्प्रत्यया न स्युरिति समनंतरमेवोक्तं॥
तस्मादात्वं भवत्येव। गुणस्तु ऐकारोपदेशसामर्थ्याद्बाध्यते इति स्थितं। यंजनानां गुणः स्यादिति परमत्र विशिष्यते। तत्र
श्वेहितेत्यत्र हकारस्य कंठ्यत्वादकारः स्यात्। उभितेत्यत्र भकारस्यौष्ठ्यत्वादोकारः स्यात्। ततश्चोऽनचितेति स्यात्॥
येत।

राम

कारस्य इ ईकारस्य यणि कृते ऽर्ट्टासहाद्गुणः। न च वलोपः आर्ह्ट धातु को पदेशे यदकारो ऽन्तं तस्य लोप इति व्याख्यातत्वात्। उभे अथानुस्वा
रपरसवर्णयोर्गुणे कृते ऽयैऽसिद्धत्वादिति नैष दोषः। समस्याजनेड इत्यत्र डप्रत्ययस्य डित्करणं ज्ञापकं न यं जनस्य गुणो
स्य मात्रिके भवतीति। यदि हि स्यात् नकारस्याद्धमात्रिकेऽकारे गुणे कृते त्रयाणामकाराणामन्तो गुण इति पररूपे च सिद्धं रूपं। उपस ऽप्युपसरः
र्जो मंदुरज इत्ति त्विं टिलोपार्थं न डित्करणेन। स्त्रीगवीषु पुंगवानां गर्भाधानाय प्रथममुपसरः। प्रजने सर्त्तेरिति अप्र
त्ययोपवेज्ञोपवादः। प्रजनः स्यादुपसर इति संकीर्णवर्गेऽमरः। प्रजायतेऽस्मिन् प्रजननः। पशूनां गर्भग्रहणकाल इति क्षीर
स्वामी। उपसरे जातः उपसरजः मंदुरायां जातो मंदुरजः। ड्याप्पोः संज्ञाछन्दसोर्बहुलमिति ह्रस्वः। वाजिशालातु मंदु
रेत्यमरः। न च डकारश्रवणार्थं स्यादिति वाच्यं। प्रावृट्शरत्कालदिवां जे इति कृत टिलोपदर्शनाल्लिंगात्। ननु नेदं लिंगं
जेः क्रये इत्यस्य कप्रत्ययान्तस्य जेरिति निर्देशोपपत्तेः। कथं तर्हि कर्मण्युपपदे विहितः आतः कः प्रावृषिज इत्यादौ स्यादि
ति चेत्। द्विपः पादप इत्यादिसिद्धये सुपि स्थ इत्यत्र सुपीति योगविभागाभ्युपगमात्। सत्यं। डकारस्य श्रवणार्थत्वे र
संज्ञायां स्त्रे बाध्येत। न च प्रयोजनाभावः। टिलोपार्थत्वात्। न च गुणेनान्यथासिद्धिः। तदभावस्यापि ज्ञाप्यत्वात्

॥शं०को०॥

॥६७॥

निषादस्थपत्यधिकरणन्यायेन फरुमुखगौरवस्यादोषत्वात्। उकारश्रवणार्थत्वोसिद्धं तु नित्यत्वाद्धस्वात्किमर्थं गुणस्त्र्म्यभ्युपगमे

मितिचेन्निवर्तकत्वासिद्धमिति वृद्धिसूत्रस्थवार्तिकविरोधाच्चानन्वसतिडित्वेरूपं न सिध्यति। नकारस्यस्थाने गुण

स्यापि सानुनासिकस्य प्रसंगात्। न च निरनुनासिकेन प्रत्याहारेण सहपररूपाच्छुद्धो भविष्यतीतिचेन्न। पररूपविधा

नेपि गुणानामभेदकत्तयापर्यायेण सानुनासिकप्रसक्तेर्दुर्वारत्वादिति मेवं। एङि पररूपे तीयत्ता सिद्धेरूपग्रहणादधिका

यत्वाद्गुणविवक्षोपपत्तेः। तस्यह्येतदेवफलं। याद्दृशं रूपं निरनुनासिकत्वादिधृतंतादृगेव यथास्यादिति तस्मादज्ञा

नेऽवचनं ज्ञापकं न व्यंजनस्य गुणो भवतीति। एवं चेग्ग्रहणमात्संध्यक्षरव्यंजननिवृत्त्यर्थमिति वार्तिकमसंगतमिति

प्राप्ते भगवान्भाष्यकार ~~[illegible]~~ इष्टं सिद्धांतमाह। उक्तरीत्या ज्ञापकेनेवात्संध्यक्षराणां निरासेपि व्यंजननिवृत्त्यर्थं

सूत्रे कर्तव्यमेवेति यत्तूक्तं डवचनं ज्ञापकमिति ~~[illegible]~~ नागमेरप्ययं डो वक्तव्यः गमेश्च गुणे कृते आंतर्यत ओकारः स्यात्

तथा च नगः अगः अभ्युद्गः समुद्गः इत्यादि न स्यात्। ततश्च तत्र चरितार्थत्वं कथं व्यंजनस्य गुणाभावं ज्ञापयेत्

नो ननु जनेऽड्डत्येष ड प्रत्ययो गमेर्न विधीयते। किंतु गमश्च अंता त्यंता ध्वदूरपारेति प्रकरणपठितेनान्यत्रापि

दृश्यं।

भाष्यं

राम

दृश्यत इति वार्त्तिकेन ड प्रत्ययांतरमेव। तथा च कथं भाष्यकृतोक्तं। गमेरप्ययं ड इति सत्यं। सप्तम्यां जनेर्ड इति प्रकरणे तावदन्येष्वपि दृश्यत
इति सूत्रेण डो विधीयत इति तावन्निर्विवादं। तत्र चान्येष्वप्युपपदेषु जनेर्डो दृश्यत इत्यक्षरार्थः। तेनाजो द्विजो तुज इत्यादि सिद्धं। एवमपि
धात्वंतराड्डुविधायकाभावे परितः खाता परिखा इत्यादि न सिध्येदित्याशंक्य वार्त्तिककृतोक्तं अन्येभ्योऽपि दृश्यत इति। अयं च सौत्र दृश्यपि
ग्रहणसूचित एवार्थो वार्त्तिकेन विवृतो न त्वपूर्वः संगृहीतः। तथा च तत्र वृत्तिकार आह। अपिशब्दः सर्वोपाधिव्यभिचारार्थः। तेन धात्वं
तरादपि भवति। परितः खाता परिखेति दृशिग्रहणात्प्रकारांतरे कालांतरे चेत्यादि तत्रैव स्पष्टं। एवं स्थिते सौत्रेणैवानेन परिखेत्यादेर
वनगो गग इत्यादेरपि सिद्धौ अत्यंतोपेक्षितकरणेऽन्येभ्योऽपि दृश्यत इति वार्त्तिकं न कर्तव्यमेव। क्रियमाणं वा एतत्सूत्रसिद्धार्थविवरणपरतया
नेयमित्याशयेन [illegible] भगवतोक्तं गमेरप्ययं डो वक्तव्य इति। नन्वेवमपि डित्वं [illegible] व्यर्थमेव। विचैव सिद्धेः [illegible] गमेर्डो इति डो प्रत्ययविधानेन
मकारस्य गुण ओकारो न भवतीति ज्ञापितत्वात्। तस्माड्डप्रत्ययस्य डित्वं पूर्वोक्तरीत्या ज्ञापकमेव। किं च डो प्रत्ययविधानमेव न व्यंजन
गुण इति ज्ञापयति। अन्यथा विचैव सिद्धे किं तेनेति चेन्न। विचि हि सति गुणः क्रियमाणः सानुनासिक ओकारः स्यादिति निरनुनासिक

॥ शाको॰ ॥
॥६८॥

सिद्धये डाप्रत्ययविधानादिति दिक्। अत्र वदंति। तनोतेर्डउः सन्वच्चेति डित्करणान्न व्यंजनस्य गुणो भविष्यति। यत्तु ङ्गास्त्वातिदेशोयं का
यीति देशोयं वा। आद्ये गुणेन विषतीत्यत्रेव द्विर्वचनेचीति स्थानिवद्भावेन तंतं अ उ इति स्थिते सन्यत इति इकारः सानुनासिकः स्यात्ते
द्वितीये लभ्यासकार्यं दुर्लभमिति तन्न। आद्ये गुणानां भेदकत्वादिमो इमे इतिवदुपपत्तिः। द्वितीये तु बभुंजे हुरित्यादावंतर्थ्यास कारीयद्वि
त्वे अभ्याससंज्ञास्वीकारात्। अत एव लिटि धातोरिति सूत्रे धातुग्रहणँ तावत्सान्यासिकमिति भाष्यं। आदेच उपदेश इति सूत्रे धातुग्र

तिष्टतु

हणानुवृत्तेरापात्ततो भाष्यप्रदर्शितद्वेपिष्यङ् विधिभाष्ये नुवृत्तेरेव सिद्धं। तत्तया भाष्याशयस्यार्थमेव वर्णनीयत्वादिति दिक्। किंच य
था स्थानेंतरतमपरिभाषास्वीकृतावनुनासिकपरसवर्णविधौ स्थानप्रयत्नाभ्यामंतरतमे एतन्मुरारिस्वङ्करोषीत्यादिकविषयं लब्धा
चरितार्थश्च तु सुखः कुंडरथेनेत्यादौ न प्रवर्तत इति हयवरट् इति सूत्रे सिद्धांतितं। तथेहापि सार्वधातुकेनुस्वीरुणस्तिचिरथ्यादयो नेता अ
बिभयुः अनेषीदित्यादौ चरितार्थाः उभिता अनेनिजुरमेत्सादित्यादिषु न भविष्यति। नचैवं नेता अनेषीदित्यादौ। वेवस्थानगुणप्रमा
णे स्त्रिभिरांतर्यलाभाच्चेत्ता अचैषीदित्यादौ प्रमाणत आंतर्यविरहेण गुणवृद्धी न स्यातामिति वाच्यं सत्वसदः क्रमरजिति क्रमरचः

418

किं करणेन प्रमाणत आंतर्य स्याविवक्षात्वापनात्। नचैवमपिइईहितांइइतित्यत्रकंठत्वात्व्ययोर्विवृततयोर्हकारइउकारयोःस्तादइउ एवेव अदे
तोस्यातामितिवाच्यं। नाभ्यसत्वविति सूत्रमत्याख्यानावसरे उष्मणामीष द्विवृततायाः सिद्धांतयिष्यमाणत्वात्। नचैवंविवृतकरणा
ःस्वरास्तेभ्यएओ विवृततरौ विल्यादिशिक्षानुरोधाच्चेतानेतयादावपिगुणाप्रवृत्तिः स्याद्विवृतविवृततरवैलक्षण्यस्यसत्वादितिवाच्यं
तथासतिविधेर्निर्विषयतापत्तेः। जयः करणमित्यादिनिर्देशेः श्रुसन्यमरत्र्यभृतीनांकित्वेनर्वर्ईकारादिषुगुणप्रवृत्त्यनुमानाच्च। ओत्स्ये
ध्यक्षरव्यंजनेषु गुणाप्रवृत्तिरेवोचिता। तथाचनिर्देशाः। यातिवातिद्रातिश्रुष्णाम्यातिध्यायतेः संप्रसारणंर्चेत्यादि। अथकोः किलेना
पिगुणवृद्धिविध्यावंतरतमपरिभाषानुपस्थितिरेवलाप्यतामितिवाच्यं। सत्यामपीक्परिभाषायामीकारस्याकारादिनिरत्तयेअंतरतम
परिभाषाया आवश्यकत्वादिति। तस्मादेवं डेंडित्वादनोतर्यान्निर्देशाच्च निराकृतंवं जनं भाष्यएवेच आकारश्च निराकृतः। तस्माद्
थेमिदंसूत्रमथयचुत्तरार्थता। विभज्ययोगं किमितिपरिभाषात्वमुच्यते। अत्रोच्यते। क्ङितिचेतिसूत्रेचकारस्यइतिशब्दपर्यायतामा
श्रित्यइकइतियगुणवृद्धीतयोर्निषेधइतितावद्वक्ष्यते। अन्यथालैंगवायनइत्यत्रगुणोपिनिषिध्येत ओपगवादिषुतत्स्यावकाशः।

नइतिचिन्नो
तिरेस्थिपुचे

ओ

419

॥शु॰कौ॰
॥६९॥

तथापीरो हि समित्यत्रादिवृद्धिश्च न स्यात्। एवं स्थिते यदीयं [illegible] परिभाषा प्रत्याख्यायेत तदा कथंचित् नैर्गुणवृद्धिविधायिकामेव स्था
नित्वपर्यवसाने पि इक इति पदानुच्चारणेन ग्लक्षणत्वविरहान्निषेधो न प्रवर्तेत। तथा च वृत्तः वृत्तवान् कुरुतः छिन्नाभिन्नवान् इत्यादि
न सिध्येत्। निषेधसूत्रं निर्विषयं स्यात्। परिभाषापरित्यागपक्षेपि इग्लक्षणयोर्गुणवृद्ध्योरप्रसिद्धत्वात्। तदेतत् स्फुटीकृतं भाष्ये
उत्तरार्थ[illegible]मेवतर्हि सिजर्थं वृद्धिग्रहणमिति। तस्यायमाशयः। यद्यपि सिचि वृद्धिरिति विधौ वक्ष्यमाणरीत्या परिशेषादिकामेव स्था
नित्वं लभ्यते तथापीग्लक्षणं विना निषेधो न प्रवर्तेत तस्मादुत्तरार्थं निषेधप्रवृत्त्यर्थं वृद्धिग्रहणमिति। एवं च वदता न्यायसाम्याद्गुणग्रह
णस्यापि एतदेव प्रयोजनं [illegible]सूचितं। कथं पुनर्गुणवृद्धिविधौ सर्वत्र परिभाषाव्यतिरेकेणेकां स्थानित्वपर्यवसानेन सिद्धार्थता
वक्तव्या इति चेच्छृणु। सार्वधातुकार्धधातुकयोः जुसि चेति गुणो तावत् लोप्यपरिभाषयोगांतस्य लिप्रातो प्राग् उक्तज्ञापकादिभिरलसं
ध्यक्षरव्यंजनेभ्यो व्यावर्तितो विक्षेववि[illegible]ः। मिदि पुगंतलघूपधादिषु तु स्थानी निर्दिष्ट एव। तथा हि। मिदेर्गुण इत्यत्र मि
दइ मिदिस्तस्य मिदेरित्यर्थः। पुकि अंतः पुगंतः लघ्वी उपधा लघूपधा पुगंतश्च लघूपधा च समाहारद्वंद्वात् षष्ठी। न चैवं यापयती।

त॰न
द्वता
त्वं
राम

त्यादेशे अतिप्रसंगः। सन्निपातपरिभाषयाऽदंतलक्षणपुको गुणाप्रवर्तकत्वात्। ऋच्छत्यृतामित्यत्रापि द्वयोर्ऋतो दीर्घस्यचेति त्रया
णां प्रश्लिष्टनिर्देशः। तद्यथा। आ च ऋत् तश्च ऋतः छे ऋते आ ऋच्छत्या स च ऋत् तश्च तेषामिति षष्ठीतत्पुरुषद्वंद्वो भयगर्भो द्वंद्वः ऋ
च्छत्याच आच ऋत् तश्चेति त्रिपदद्वंद्वो वा। तेन ऋच्छत्यृकारस्य स्थानित्वं लभ्यते। वस्तुतस्तु चतुर्णामिह प्रश्लेषो बोध्यः तेनारिवान्सर्व
ऋणान्पारुषीदित्यादावर्तेः क्सो गुणः सिद्धः। पुनर्विधानसामर्थ्यात्। अन्यथा क्सोः कित्करणसामर्थ्यान्नित्तीर्वानित्यत्रेव गुणो नि
षिध्येत। एतच्च वृसुश्चेति सूत्रे स्फुटीकरिष्यामः। तथा ऋदृशोऽङीत्यत्रापि उरङ्गुण इति योगो विभज्यते ततो दृशः। उरित्यनु
वर्तते। स्थूलदूरेति सूत्रेपि योगविभागः कर्तव्यः स्थूलदूरयुवह्रस्वानां यणो क्षिप्रक्षुद्रयोः पूर्वस्य च गुण इति योगांतरं। तत्र स्थवीयानित्या
दौ ओर्गुणेन सिद्धे। आभीयासिद्धत्वस्य असोर्ल्लोप ... तपरकरणेनानित्यताज्ञापनात्। भाष्यकृता प्रत्याख्याय यया आदिर्यणादित ना
तः परमिति समासः। तथा च क्षिप्रक्षुद्रयोर्यणआदिपकारदकारौ ततः परस्य रक्षाद्वस्य लोपः। ताभ्यामेव पूर्वस्य एकारस्यौकारस्य च गुण
इत्यर्थः तदिष्टं गुणाः सर्वे इकि विश्रांताः। मृजेर्वृद्धिरित्यत्राचइत्युपकृष्यते मृजेर्वृद्धिरचः। ततो ञ्णिति। अचइत्येव। नचैवममार्ड् इत्यत्राटोपि
दिपरमित्येको योगः॥

॥शं०कौ०॥
॥७०॥

मे

वृद्धिः स्यादित्तिवाच्यं। लोदेषु कृतेषु डित्तिपक्षे परत्वाद्वृद्धौ सत्यामट्। तत्र कृते पुनर्वृद्धिर्न भवति। सकृत्प्रवृत्तावरितार्थत्वात्। यद्वा त्वसिद्ध
वत्सूत्रप्रत्याख्यानाय लुङि त्ति द्विलकारक निर्देशमाश्रित्योपदेशे आर्द्धधातुके ल्यनयोरन्यतरदनुवर्त्यवालावस्थायामेवाट् क्रियते
एरनेकाचः इति विभज्यैणाय णित्यनुवर्त्यानेकाचश्चेत्तर्हीणएवेति नियममाश्रित्याध्येयात्तामित्यादौ यण्वार्यतेत्तदा लावस्थायां यच्च
पि वृद्धिर्न भवति लकाराणां ङित्त्वेन स्पष्टः स्यादा विवत्तन्निषेधात्। ततश्चांतरंगत्वाद्गुणमए वत्तथाप्यप्याभावेत्यसेदशस्येति परिभा
षामाश्रित्याटो वृद्धिर्निवर्त्तनीया। परिभाषाप्रत्याख्यानपक्षे ■त्वंगाक्षिप्तेन प्रत्ययेनाङ्गं विशिष्यते। येन नाव्यवधानन्यायाच्च सिद्धं समीहि
त्ति। सिचि वृद्धावपि विधेयायां नास्ती परिभाषाया उपयोगः। व्यावर्त्याभावात्। न चाचिकीर्षीत्यादौ यकारेव्यावर्त्यः ण्यल्लोपावि
यङ्गुणगुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषिद्धमिति वचनादल्लोपेनैव सिद्धत्वात्। अन्यथा चिकीर्षिक इति न स्यात्। चिकीर्षायकरति
प्रसज्येत। आकारस्य तु नास्ति विशेषः सगिग्यात्वा घश्चेत्युक्ते। एजंतमपि न संभवति। आत्वविधानात्। उदवोढामित्यादौ

लो तु ऽपस्या सिद्धत्वात्। ऐनोग्लोऽशुद्धानामाचारक्विबंतानां सत्यामसत्यां वा वृद्धौ न कश्चिद्विशेषः। गोरगाद्धाक्विम्पगवीदित्यत्र

राम।

422

सतिध्या

पिनवृद्धिः। ऋत इद्धातोरित्यतोनुवृत्तेन धातुग्रहणेन सिजाक्षिप्तस्य धातोर्विशेषणे [illegible] तुरेवयो धातुर्भ्रिति व्याख्यानादिति के
प्यटादयः। नन्वेवं कवेः अकवाणीत्। विधौ अविधायीत्। पितुः अपित्तारित्। अंतरंगमपि गुणं सिचि वृद्धिर्बाधत इति वदन्माध
वो विरुध्येत। सत्यां यद्य विरोधः संपादनीय इत्याग्रहस्तर्ह्यर्थं वर्णयतां। धातोरिति वक्रो तत्राप्यनुवर्तते तत्र च वाक्यभेदेन संबंधा
नं नियमार्थं संपद्यते। ओदंतस्य धातोश्चेद्वृद्धिस्तर्हि धातोरेव धातोर्न तु नाम धातोरिति। यद्वा नेटीति योगं विभज्य मङ्कुपत्यासंबंधा
नुवृत्या वा गोत्तरस्यानुवर्त्य ओकारांतस्य वृद्धिर्निषिध्येत। अथवा बहुलं छंदसीत्यतो बहुलमित्यनुवर्त्य सिचि वृद्धिर्नाम धातोर्विगंतस्य भव
त्ति न त्वोदंतस्येति कथंचित्समाधेयं। व्यंजनेषु लंतरंगपरिभाषाबलेनैवानुसिकपरसवर्णयोरिवातिप्रसंग एव उद्धृत एव। अभ्युपेत्य ब्रूमः
ना प्राप्तायां सिचि वृद्धावारभ्यमाणा [illegible] हलंतलक्षणा वृद्धिर्बाधिका भविष्यति। नेटीति निषेधस्तु हलंतस्य यावती वृद्धिः प्राप्ता
सिचि वृद्धिरिति वा हलंतस्येति वा तस्याः सर्वस्याः न तु सूत्रविशेषप्रापितत्वे आग्रहः। तेन कोषीत् मोषीदित्यादौ वृद्धिविधापि वृद्धि
निषिध्यत [illegible] त्ति सर्वं सुस्थं। तस्मान्निषेधसिध्यर्थमिग्लक्षणतां संपादयितुं सूत्रमिति स्थितं। स्योदंतत्। वृतः कृतवानच्छिन्नः
च्छिन्नत्वा नित्यादौ निषेधसिद्ध्ये गुणग्रहणमस्तु। वृद्धिग्रहणं तु व्यर्थं। न च मृष्टो मृष्टवानित्यादौ निषेधसिद्धिस्तत्फलं। योगविभा
गेन सिद्धत्वात्। तथाहि मृजेर्वृद्धिरित्यस्यानंतरं सनादौ क्ङितीत्येवं वचनमवश्यं कर्तव्यं। मृजंति मार्जंतीत्यादिसिध्यर्थं। एवं
स्थिते अजादौ क्ङितीति योगो विभज्यते। नियमार्थश्चेदं। क्ङिति चेद्भवति अजादावेवेति। तेन मृष्टो मृष्टवानित्यादिसिद्धांत
ततो नादावपि चिन्त्यं। लोनेयत्तदर्थं चेति द्वितीयो योगः। तस्माद्वृद्धिग्रहणस्य फलं दुरुपपादमिति अत्राहुः। णुस्तुतो। धूविधून्

नेतु कथं चिस्ता
त्तिपदिक

ना

426

॥श॰कौ॰
११७१॥

नेइतिकुटादीपठ्यते॥ताभ्यांलुङि अनुवीदधुवीदितीष्यते॥तत्रसिचिवृद्धिः क्ङितीतिनिषेधायेग्लक्षणतांसंपादयितुमिग्ग्रहणमि
तिनन्विहांतर्भूतसिज्मात्रापेक्षत्वादंतरंगे गुणेकृते हलंतत्वान्नेटीतिनिषेधः सिद्धइतिचेन्नासिच्यंतरंगनास्तीतिसिद्धांतादु
वङः प्रागेववृद्धिप्रसंगात्॥स्यादेतत्॥अंतरंगबलीयइतितावदचः परस्मिन्नितिसूत्रेस्थापयिष्यते॥तदविशेषात्सिच्यप्यस्तु
नचैवमहेषीदचेषीदित्यादौगुणस्यात्॥इतिवाच्यं॥तस्यैववृद्धिसंभवेनेष्टापत्तेः॥नहीदानीं वृद्धिविधाविग्ग्रहणमस्ति॥येनैकारस्य
नलभ्येत॥नचैवमस्तोषीदित्यादावंतरंगत्वाद्गुणेकृते ओतोनेतिव्याख्यानपक्षेवृद्ध्यभावोबहुलग्रहणादनिंगत्वान्नेतिपक्षेचैषा
दित्यादावपिनदोषएवेतिवाच्यं॥ओतोधातोरेवधातोर्नेतुनामधातो॥रितितृतीयपक्षाश्रयणेनसर्वसमाधानात्॥अकार्षीदित्या
दौहलंतलक्षणावृद्धिरस्तु॥अतारीदित्यादावंतरंगत्वाद्गुणेकृते हलंतलक्षणायांवृद्धौनेटीतिनिषिद्धायांततोतोहलादेरितिप्रा
प्तविकल्पंबाधित्वातोल्रांतस्येतिनित्यावृद्धिः॥अलावीदित्यादावप्यंतरंगत्वाद्गुणावादेशयोः कृतयोरतोल्रांतस्येत्यत्रलोपो
व्योरितिलोपेनवकारस्यापिव्याख्यानान्नित्यावृद्धिर्भविष्यति॥माभवानवीदमवीदित्यत्रापितर्हिनित्यावृद्धिः स्यादितिचेन्न॥णिश्विग्र
हणमपनीयतत्स्थानेऽविमव्योः प्रक्षेपेणवृद्धिप्रतिषेधात्॥नह्यस्मिन्पक्षेणिश्विग्रहणमुपयुज्यते॥औनयीदश्वयीदित्यादावंतरंग
गुणायादेशयोः कृतयोः यांतानांनेत्येवनिषेधसिद्धेः॥नन्वेवमवेरिवमवेऽरपिनित्योनिषेधएवस्यादिष्यतेतुविकल्पः॥नैषदोषः अ
तोल्रांतस्येत्यत्रवकारप्रश्लेषेणनित्यायावृद्धिःप्राप्तासैवहाविमव्योर्निषिध्यते॥नत्वतोहलादेरित्येषापि॥मध्येपवादाः पूर्वान्विधीन्

वृद्धि

धा

राम

७१

बाधंतेनोत्तरानितिन्यायात्।नचैवं जागर्तेरपित्तथाप्रसंगः।तत्रबाध्यसामान्यचिंतामाश्रित्यस्वविषयेयद्यत्प्राप्तंतत्सर्वंबाध्यमितिस्वी
कारात्।यद्वा॰पवादेनिषिद्धेउत्सर्गोनप्रवर्त्तत इतिजागर्त्तावाश्रयणीयाम्नवर्त्ततोतुंप्रवर्त्तत इतिबाध्यविशेषेसामान्यचिंतयोर्बाध्य
केनिषिद्धेबाध्यस्यप्रवृत्त्यप्रसंगाश्चलक्ष्यानुरोधेनवक्ष्यमाणत्वात्।नचैवमगवीदित्यादावपिनित्यावृद्धिःस्याद्दकारप्रश्लेषादितिवाच्यं
सिचिवृद्धिरिवास्योपिधात्वग्रहणेनवारणात्।तस्मात्सिच्यंतरंगाश्रयणेनैवानुवीदधुवीदित्यादेःसिद्धौ कृत्तिचेधस्यानपेक्षणात्वृद्धि
ग्रहणं अर्थमितिचे[illegible]दनोच्यते।गुणवृत्तिगेतिकर्मकेबोजसुविकारान्नभाषत इतिमस्यग्नायांभाष्यकारैरभ्युपगतस्यगुणवधातोर
पिवृद्धिप्रसंगः।तस्यापिप्रतिषेधेणिश्विभ्यांवाकथंनिमानं।गौरवप्रसंगात्।किंचनव्यसनित्यासिच्यंतरंगोनास्तीतिभ्रमः।किंतु
न्यायबलाज्ज्ञापकबलात्फलानुरोधाच्च।तथाहियेननाप्राप्तिन्यायेनांतरंगावृध्याबाध्यते।सत्यपिसंभवेबाधनंभवतीत्यभ्युपग
मात्।अन्यथातक्रेणदधिनबाध्येत।श्नमकजादिभिश्चगुणप्रत्ययकप्रत्ययादयोनबाध्येरन्।देशभेदेनोभयसंभवात्।नचमध्येपवा
दन्यायेनोवङ्‌वङ्वृध्याबाध्यतेनतुगुणोपीतिवाच्यं।बाध्यस्यभेदविवक्षायांहीत्तदेवंस्यात्।बाध्यसामान्यचिंतायांतुस्वविषयप्राप्तं
स्वानपवादभूतंसर्वंबाध्यते।यथाचिरस्तत्तद्यत्नेननगुणदीर्घत्वानि।अन्यथोमिध्येपवादन्यायेनरेफोदीर्घत्वेएवबाधेतनतुगु
णं।तस्यपरत्वात्।बाध्यस्यक्वचिद्भेदेनचिंताक्वचित्तुसामान्यरूपेणत्युभयमितिलक्ष्यानुरोधात्तत्रतत्राश्रीयते।णिश्विग्रहणंच
हलिंग।अन्यथांतरंगत्वाद्गुणायादेशयोःकृतयोर्नानानेतिनिषधादयोनयीदश्वयी।दित्यादेःसिद्धौकिंणिश्विग्रहणेन।ज्ञाप

अ

तिप्रतिषे

तत्रापि

कांतरमप्युक्तं भाष्ये। यच्च करोत्यकारग्रहणं लघोरिति कृतेऽपीति। अस्यायमाशयः। अतो हलादेरिति सूत्रेऽङ्ग्रहणस्यानन्तावत्संध्यक्षरा
दिकं व्यावर्त्यं लघुग्रहणेनैव तद्व्युदासात्। इदुदन्तः परमवग्मिष्यते। अचेषीत् अकोषीत्। अनर्तीत्। इति त्वेप्यन्तरंग[illegible]णगुणेनापहृता
श्चेत्तर्हि व्यर्थमङ्ग्रहणं स्यात्। न चाकुटीदपुटीदित्यादावुकारव्युदासाय तदिति वाच्यं। तत्राप्यन्तरंगेण गुणेन वृद्धिबाधे सति गुणे ङि·
वान्निषिद्धेऽपि वृद्धेरप्रवृत्तेः। न हि देवदत्तस्य हन्तरि हते देवदत्तस्य पुनरुन्मज्जनं भवतीति न्यायात्। अत एव नान्तःपादमिति सूत्रेपा
ठपूर्वरूपनिषेधस्तत्राप्याद्यो न प्रवर्तते। सुजाते अश्वसूनृते इत्यादिषु स्वीकृतं भाष्ये। नैवमपवादाभावे पुनरुत्सर्गस्य स्थिति
रिति निर्विषयं स्यात्। वृक्षावित्यादौ नादिचीति पूर्वसवर्णे निषिद्धे वृद्धिश्च न प्रवर्तते इति वाच्यं। भिद्योद्ध्यो नदे इत्यादिलिंगेनाप
वादे निषिद्धे उत्सर्गो न प्रवर्तते इत्यस्या सार्वत्रिकत्वाभ्युपगमात्। तदेतत्तत्र तत्रोच्यते नोत्सहन्ते [illegible] प्रतिषिद्धा सती बाधितुमिति
तथा च पक्षभेदाश्रयेणातो हलादेरित्यङ्ग्रहणमपि ज्ञापकमिति स्थितं। फलमप्यस्या यदि सिच्यन्तरंगं स्यात्तर्हि चिनीप्रभृतिभ्यो
यङ्लुगन्तेभ्यश्चिरिणोति जिरिणोतिभ्यां च लुङि· सिचि च अचेचायीदनेनायीदचिरायीदजिरायीदिति [illegible] न स्यात्। गुणाया
देङ्ग्योः कृतयोर्यीतानां नेति प्रतिषेधप्रसंगात्। यदि तु बाध्यविशेषचिंतायामप्यपवादन्यायमाश्रित्य उवङ्‌वबाध्यते न तु गुण इत्या
श्रीयते तदाप्येतन्न सिध्येदेव। तस्मात्सिचि सर्वमन्तरंगं नास्त्येवेति सिद्धान्तं साधयितुं बाध्यसामान्यचिंतैवाश्रयणीया। एतत्
दर्थमेव हि भाष्ये ज्ञापकोपन्यासः कृतः। अन्यथा न्यायेनैव सिद्धत्वादंतरंगस्यापि बाध्ये किं ज्ञापकवर्णनेन। एवं स्थिते न्यनुवीत् न्यधुवीदि

वपीक्षपरिभाषेयमस्थितिवद्वृद्ध्यादिकामेव ओत्वमास्तमतंवस्यात् । गुणवृद्धिशब्दयोरनुवृत्तौ पुनर्गुणवृद्धिग्रहणसामर्थ्याच्छब्दव्यापारो ४

स्पत्रक्ङिति चेति निषेधगणवाश्रयणीयस्तथा चेग्लक्षणत्वसिद्धये वृद्धिग्रहणमपीह कर्तव्यमेवेति स्थितं । एवं च सति

असंभवादपि वृद्ध्या सिच्यन्तरंगं संबाध्यते । यदि हि स्यात्तर्हि सिचीगंतमंगं न लभ्यतेवेत्यवधेयं । तथा चेग्लक्षणत्वस्य

२ निषेधप्रवृत्त्यर्थमावश्यकत्वे स्थिते तत्र तत्रालंघ्यक्षं व्यंजनादिव्यावृत्तिरपीक्परिभाषयैव सिध्यतीति ज्ञापकत्वेना

दिकूगोपि नाश्रयणीयः ।। नचैवं द्योः पंथाः इमं रस्मा सार्ण्याश्रीयते । गुणवृद्धि ये गुणवृद्धी न तु शब्दांतरेण विहिते अनुवृत्ताभ्यां

विशेषणाद्धा । नन्व चश्चेति सूत्रे ह्रस्वादिग्रहणानुवृत्त्या संज्ञया विधाने परोपस्थितिरिस्थास्यति तत्सामर्थ्याद्धि ओत्व

न थिमथ्यृभुक्षामाच्यदादीनाम् इत्यत्र रूपरोपस्थानं भविष्यति । यदि हि स्यात्तत्र्यवश्चेत्यत्र संज्ञाविधाने इति यलाश्रयणेव

र्थस्यादिति चेन्न । द्विवओख्त्यादिषु गुणवृद्धिसंज्ञकेषु परिभाषानिवर्तनेन चरितार्थत्वात् । अत एव आविभक्ताविस्यादावितिकोऽसंभवे

नतत्रचरितार्थत्वाद्धा । तस्माद्द्योः पंथाः इमं मिस्यादिसिद्धये ह्रापि संज्ञाविधाने नियमं संपादयितुं पुनर्वृद्धिग्रहणमिति प्राचः । ननु

पंथा इत्यत्रानुदाहरणं इतो द्वितिसिद्धेः आद्धिधिसामर्थ्याद्देवे रूपरानुपस्थितिरिति चेन्न । कुभुस्त्रि अकारोकार पोरर्थे आदिसंभवात्

नचेत् : सोऽस्मानत्र्यविवक्षणा घेननात्यवधानाश्रयणात् चने वृमिति वाच्यं तथापि संबुद्धौ तपा सामर्थ्योपक्षयात् न चैवमि

तआदिस्यवरूपात् इति वाच्यं कुभुक्षाणामिंद्रमित्यस्यासिध्यापत्तेः आद्धेधौ ह्रि वाप्यपूर्वस्पे ति तत्सिद्धिरिति दिक् यत्तु भाष्ये

ति या ध्वि र्थ

सद्दमसित्याद्युदाहृतं तंत्र सरूपमं त्रमत्यदिति ब्राह्मणवा वैयेकदेशानुकरणमात्रं उदाहरणं तु दमसित्येव न तु स इत्यपि तच्छब्दे दकौ संभ
वेनेदकरति नियमस्याप्रवृत्तेरित्याहुः वस्तुतस्तु सद्त्यत्युदाहरणं साधयेत्वं त्यदादीनामदन्तिद्वि विधिवाक्यतत्र चैकदेशस्योपस्थितौ द्वीदेमोदेवा
लं स्यात् न तन्येषां गणेन निर्देशस्तु संतोपसर्जनत्वाभावस्यार्थमुत्तरार्थं स्यात् तदोः सः सावित्तिसत्ता त्यदादीनामेवतत् [illegible] विधीयते अत्रेदमवधेयं आ
रुवापाराश्रयणानुरोधेनापि गुणवृद्धिग्रहणं मास्तु इकस्तो इस्येतावतेन सिद्धेः वस्तुतस्तु तावपि त्यव्यर्थं इक इत्येव सूच्यतां से पूर्णं पूर्वसूत्रमनवस्यां वृद्धिरि
तिआदैचोऽत्र विधीयते गुणः इति च भेदे तत्र इक इत्युपतिष्ठत इति व्याख्यानात् व्याख्यानेन लिंगं तु इतो दितीदूहणं अन्यथा तत्रापि उकः परो परिस्थितो इकरो
तदेतद्विग्ग्रहणं किमर्थमिति भाष्ये इग्ग्रहणमात्संप्रसारणे स्यादिवार्तिके न च सूचितं अन्यहित
त्यायेन नाव्यवधानन्यायाहकारो कारव्यावृत्तौ च सत्यां किं तेनेति तदेतद्विग्ग्रहणमिसुक्तं मितिभाष्यायामप्राप्यवर्णनं तत्र पूर्वसूत्रानुवृत्त्येव सिद्धेवु
उक्किमर्थमि[illegible] त्याद्येव ब्रूयात् यनूत्तरार्थं गुणवृद्धिग्रहणं कर्तव्यमेत्याशये नेग्ग्रहणमिसुक्तं उग्ग्रहणस्यापुत्तरार्थतयात तरशेपि
तरार्थत्वस्यापि दुरूपपादत्वात् समुदायापेक्षयामंडूकप्लुतेः संबंधानुवृत्तेयोलपापिवाच्यत्वात् इग्ग्रहणस्याप्युत्तरार्थतया तरशेपि
शंकानुस्थानात्रा इक इति योगः किमर्थं विभज्यत इति प्रश्नबीजमिति चेत् तर्हि गुणवृध्योरुपितस्याविशिष्टत्वात् सूत्रं किमर्थमि [illegible] एवाशयः सा
स्येत ब्रूयात् इति दिक् यत्तु प्रधानावयवद्वारा समुदायाक्षेपोऽयमिति तदपि नातीव शब्दस्वरसात् गुणं तस्मात् [illegible] ग्रहणपदस्यानुवृ
धुः नचैव गुणवृद्ध्यधिकारे पुनर्गुणवृद्धिग्रहणसामर्थ्यादि तिउत्तरार्थं ग्रासं [illegible] तिः लक्ष्यपथाश्रुताभिप्रायकत्वात् ग्रहणपदस्यानुवृ
तिपरत्वग्रासं पूर्णे सूत्रद्वयानुवृत्तिसामर्थ्यपरत्वादिति दिक् एवं च इति योगविभागाच पूर्वपक्षसिद्धांताभ्यां समर्थ्यते इतीदृ पर्यंव
सितोर्थः तत्रभ्यानेन [illegible] योगविभागेन सकलेष्टसिद्धौ मृजेर्वृद्धिरचः उरडिगुणात् स्यादिबाकृत योगविभागाश्रयणेनान्यथासि

प्या

ढ्डिवर्णेन नादर्तव्यमिति स्थितं रचेच परिभाषा अल्लोंत्यपरिभाषायाः शेषीवा शेषिभूता वा तयासह समुच्चिता वा नैकिं द्विकीवातदपिवादो
वा पूर्वविप्रतिषेधात्सद्बाधिका वा पदोपस्थापिका वेति सप्त पक्षाः संभाव्यंते यद्यपि तथापि धानां पक्षाणां दुष्टत्वात्सप्तमं तत्र सिद्धांतितः
तथाहि सार्वधातुकार्धधातुकयो रित्यत्र स्वस्व निमित्तवशात्परिभाषाद्वयसंनिहितं तत्राङ्गस्येति षष्ठीयदि पूर्वमेवाल्पमलंनीता अंगास्य
स्य गुणार इति पश्चादिकोंऽसो विशेष्यते तदा इकपरिभाषा शेषभूता यदि तु पूर्वमिको अंगस्य विशेषणं तदंतविधिः इगंतस्यांगस्येति त
तः स च भवन्नल्लोंत्यस्येति द्वितीयपक्षः तदिदं पक्षद्वयमपि षष्ठीतत्पुरुषवद्बहुव्रीहिं चाश्रित्य तच्छेषपक्ष इति भाष्ये व्यवहृतं इह पक्षद्वयेपि मिदे
गुणइत्यादौ दोषः यो हि मिदेरत्यः नासाविकश्चेक् नासावत्यः तथा चा वक्ष्यं परिभाषा पात्यत्त्वा यासत्यां विनिगमका विरहात् भयसा
गेसर्वादेशो गुणः स्यात् तदुक्तं वार्तिककृता वृद्धिगुणावल्लोंत्यस्येति चेन्मिदिमृजिपुगंतलघूपधर्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं सर्वादेशप्र
संगश्चानिगंतस्येति चकारोहेत्वर्थः ततश्च सर्वादेशप्रसंगो हि तिफलितं अथ मिदेरमिंदिः तस्यामिदेरित्यादिपूर्वोक्तरीत्या कथंचि
त्सर्वेत्रइकइत्यस्यानित्वं लभ्येत तथापि भिन्नमित्यादाविनिग्लक्षणो निषेधो न स्यात् अथ क्ङोः किसाल्लापकादनिग्लक्षणोपि नि
षेधः तर्हि लैगवायनःपौरोहित्यमित्यादावतिप्रसंगः अथ लक्ष्यानुरोधाल्लघूपधगुणमात्रविषयकं ज्ञापकं तर्हि परोपस्थिते पक्ष
एव लक्ष्यसिद्धये समाश्रीयतां एवं हि ज्ञापकाश्रयणं क्लेशोपि न भवति किं तेनापि परोपस्थितिरेवलाघात् एवं हि ज्ञापकमूलकं वाक्यांत
रं न कल्प्यमिति लाघवं प्रस्तुतं हि तृतीयःपक्षः मिदेरंत्यस्य रकश्चद्वयोरपि गुण इति मिवं स्थाने योगात एवसंबंधरूपस्यार्थद्वयस्यापुगपद
उत्पादयितं तथा षष्ठ्या दुर्लभत्वात् स्थाने योगं च विनाऽलोंत्यपूर्वला भास्था स्थानषष्ठी हि तदुपस्थितो लिंगमिति वक्ष्यते इकइत्यनेन सहाव

म

दो

वि

रू॰ को॰
७५

तथा हि। आतिहि [illegible] तथा दौ औरिपघा दीनां विकल्पः यद्यपि विकल्पे अ[illegible] दोषाः तथापि वाक्यद्वयस्य समबलत्वात्
अन्यतरेणेतरबाधायोगात् अगत्या स्वीक्रियंते ते च दोषाः औपघादाने औघंदोस्वीकृतप्रामाण्यत्यागः अस्वीकृत
स्वप्रामाण्यस्य ग्रहः यथा [illegible] दोस्वीकृतप्रामाण्यत्यागः एवमेवच वोपादाने पिवस्तुगत्या दोषाश्चत्वार एव

इति

प
यवषष्ठी विनान्वयायोगात् आवृत्त्यादेः प्रमाणाभावाच्च एतेन मिदंरंतस्य वाइकोवेति चतुर्थपक्षोपि प्रत्युक्तः विकल्पस्याष्टदोषग्रस्तत्वाच्च
अस्तु तर्हि तदपवादं पंचमः पक्षः तथा गुणविधावंगस्येति न स्थानषष्ठी किंतु इगपेक्षया अवयवषष्ठी ततश्च लिंगाभावाद् स्तोऽस्य परिभा
षाया अनुपस्थितिः अयमेवच बाधपदार्थः यदीकपरिभाषा न भवेत्तर्हि स्थानषष्ठी स्यात् तन्मूलकालोऽस्य परिभाषोपस्थितिश्च स्यात् तस्यां लि
कपरिभाषायां तदुभयं नेत्येतावतैव तदपवादत्वव्यवहारः नहि वस्तुतो वचनेन प्रापितस्य बाधः संभवति इगन्त्राप्रामाण्यप्रसंगात् अतएव
ताभ्यां संकोचो बाध इत्याहुः एतेन द्वंद्वादौ दएकशेषइत्यपि व्याख्यातं नहि अनुमन्नापां विभक्तौ द्वंद्वस्य प्रसंगः किंतु यद्येकशेषो न
भवेत्तर्हि प्रत्येकं विभक्तिं द्वंद्वः स्यात् सति त्वेकशेषेण तन्नैवेति तत्वं अस्मिंश्च पक्षे नुसिगुणे अनुद्वृत्ति यत्रेवाने [illegible] निनुः पर्यवेविपुरिसा
दावपि स्यात् सार्वधातुकार्द्धधातुकयोरिति गुणः भवतीत्यादाविवरेत्ति तेत्यत्रापि स्यात् तथाच वार्तिकं इक्षात्रस्येति चेत् नुसिसार्वधा
तुकार्धधातुक ह्रस्वाद्यो गुणेषु अनंत्यप्रतिषेधः इति अवनूस्वादीति ह्रस्वस्य गुणः जसि च नेतोडि सर्वनामस्थानयोः घेर्ङितीति गुणचतुष्टयं
गृह्यते तत्र अग्ने अग्नयः कर्तरि अग्नये वाग्भ्व्यस्त्रयथा ओर्गुणांतं गुणपंचकं भवति एवंहि अग्निचितः अग्निचितः संति सूत्रति अग्निचि
ते सोभुत इत्यत्रापि स्यादिति वार्तिकार्थः यद्यपीहानिर्दिष्टस्थानिकत्वात्परिभाषा दुर्लभा अग्निचिच्छब्दस्य घिसंज्ञाभावाच्च घेर्ङितीत्येतन्नप्राप्नो
ति तथापि वार्तिकस्योक्तिसंभवमित्थं वर्तयंति ह्रस्वस्य गुणो जसि चेति सूत्रपोरस्त्यवद्वृत्ते ने ग्विशेष्यते दीर्घव्यावृत्तिश्च फलं अथ अनियमे
नियमकारिणीपरिभाषा कथमिहोपतिष्ठतां नहि ह्रस्वस्य स्थानित्वे तिप्रसंगोस्ति अकारस्य त्यकार एव गुणो भविष्यतीति ब्रूयात् त
त्रेदं वक्तव्यं ह्रस्वांतस्यांगस्य इको गुण इति सूत्रार्थः स्यात् ततश्च हे इंद्रहे उपगो इत्यादावनंत्यस्यापि स्यात् अग्निचिदित्यादिकं तु विशेषणव्यवच्छे

निघ॰ इत्यत्रैकि॰ परिभाषाप्रकरणम् ७१

बघंशा बघंशनैत्रिका वित्रिकोय [illegible]

430

चि शे प म भ र श्शास्त्रं

मि

दंस्यात् तथा चन्द्रस्वस्येक इत्यनयोर्न परस्परं विशेषणविशेष्यभावः किंत्वनयोरेकमंगस्यैव विशेष्यमिति यद्यन्द्रस्वस्येत्येतदंगस्य विशेषणं मा भूदिति अंगस्येत्य
स्य स्थाने षष्ठीत्वं बाधितुं अनन्त्यस्यापि गुणं संपादयितुं स्थानेऽन्त्यपरिभाषोपतिष्ठेत एवं च तत्र ओरित्यत्रापि अनन्त्यस्य गुणविधानार्थं परिभाषास्यादेव घिसंज्ञत्वात्
वर्णयोरेव ननु तदन्तस्येति पक्षं गृहीत्वा घेर्ङितीत्यस्याग्निचिते इत्यादावतिप्रसंगो दोषः न ह्यस्मिन्पक्षे हेतु ओरित्येताभ्यां घेः किंचिद्विशेषणमस्तीति च
रिक्तं न चास्मिन्पक्षे पुगन्तेति सूत्रस्य नियमार्थत्वापत्तिः स्यादिति न दोष इति चेन्न यदि हि सार्वधातुकार्द्धधातुकयोर्लघूपधस्यैवेति नियमस्तर्हि तृणत्तु यो
गुणदोषस्तदवस्थः यदि तु लघूपधस्य सार्वधातुकार्धधातुकयोरेवेति नियमस्तथापि हिनोतीत्यादौ दोषस्तदवस्थ एव यथा वृत्ता हि विधौ नियमस्तर्हि अनेनिजुरित्यत्र दो
षः न ह्येतन्नियमद्वयेनापि वारयितुं शक्यं लघूपधत्वात्सार्वधातुकपरत्वाच्च हे बुद्धे बुद्धयः पिच्च वेहितः पिच्च व्युत्पन्नवा[illegible]रिम्पोपयत् बुद्धये बुद्धयः इत्यादावनुप
धाभूतेष्वतिप्रसंगस्तदवस्थ एवेति तावद्वार्तिके रूपं वस्तुतस्तु अंगाक्षिप्तेन प्रत्ययेन दोर्विशेषणात् सकलदोषनिरासे सति तदपवादपक्षोऽपि समर्थयि
तुं शक्यत एव अंगमेव प्रत्ययेन विशेष्यमिति गृहीत्वापरं भाष्यवार्तिकग्रन्थप्रवृत्तिरित्यवधेयं अस्तु तर्हि पूर्वप्रतिषेध इति क्रोष्ट्रीय समतः षष्ठ्यन्त इति चेन्न इकः परिभा
षाया निरवकाशत्वात् न हि परस्परविरहेणावकाशलाभे असति विप्रतिषेधः तस्माद्यदि तस्यापि संभवे बाधनं भवतीत्याश्रीयते तर्हि येन नाप्राप्तिन्यायादपवा
दत्वमेव यदि तु असंभवे बाध्यबोधकभावः अस्ति च तु संभवो यद्भयं स्यादित्याश्रीयते तर्हि तच्छेषादिषु न्यूनतमपर्यवसानं ननु क्रोष्ट्रीयमतस्यावकाश इति स्थि
तं तस्मात्सर्वोपस्थानमिति सप्तमः पक्षः सम्मतः तथाहि इक इति षष्ठ्यन्तानुकरणं न तु संज्ञिपरं स्वरूपमितिवचनात् न धातुलोप इति निषेधः षष्ठ्यन्त
स्य संज्ञात्वात् तदयमर्थः यत्र ब्रूयाद्गुणो भवति वृद्धिर्भवतीति तत्र इक इति षष्ठ्यन्तमुपतिष्ठत इति तस्य च पदैकवाक्यतया न्वयोऽतः इगः अन्त्योऽत्यपरिभाषा
तु विधिवाक्ये सर्वान्तरवाक्यार्थबुध्यात एकवाक्यतया संबध्यत इति तदन्वयो बहिरंगः ततश्च तु सिचेत्यादौ इको गुणस्येति [illegible] संभवति सामानाधि
करण्ये वैयधिकरण्यस्यान्याय्यत्वादिकाभंगे विशिषिते स्थानषष्ठीति न विरुद्धेति भवत्येवालोऽन्त्यपरिभाषोपस्थितिः मिदेर्गुण इत्यादौ तु सामाना

चू

अयमाणे ननु स्वोर्दिना ७ ते

धिकरणत्वं न यस्या संभवान्निर्देशिकतिवैयधिकरण्येनान्वये सति स्थानषष्ठी न वि[illegible]रहादलोऽन्त्यपरिभाषा नोपतिष्ठते। नच मिदेरंगस्येत्यनयो
रवयवषष्ठीत्वेपीकरोतिस्थानषष्ठी भस्येवेति वाच्यं नहि शास्त्रेऽलोन्त्यपरिभाषोपस्थिता नूपयुज्यते अल्समुदायात्मकः स्थानिनः परमु
तापायां षष्ठ्यास्तदुपस्थापकत्वात् एकवाक्यत्वात् तथा चालोन्त्यपरिभाषा एकपरिभाषानंतरोपस्थितिका ननु तथापि युगपदुपतिष्ठेते ये ना
विशेषादुभयोर्निवृत्तिः स्यादिति सकलेष्टसिद्धिः तच्चैवं तदपवादपक्षयोरविरुद्धत्वान्मृदुतुंगरका मिलुक्तमेव। तदिह सप्तपक्षीमध्ये पक्षत्र
यं दृष्टमेव पक्षचतुष्टयं साधितिस्थितं नन्वेतत्सूत्रमंगस्येत्यादिवदधिकारार्थमेवाकिन्न स्यादिति चेन्न तवरक्तोगुणवृद्धी नेति न्यासं
पुम्येव पठेत् सर्वस्य द्वे पूर्वत्रासिद्धमित्यादिवत् नह्युत्तरसूत्रोपस्थितिकृताविशेषोऽस्ति किंचित्संयुज्य किंचित्तु विभज्य पठितुमुचितं वेदस्य
हेतुभावात् प्रत्ययः परश्चेत्यादौ नुपारार्थ्ये विशेषेप्यसंयुत्य निर्देशो विधेयभदान्न विरुध्यते नापीदं विधिसूत्रं पुनर्गुणवृद्धिग्रह
णसामर्थ्यात् तत्प्रसारख्या न पक्षेपि विशिष्टानुवृत्तिसामर्थ्यादिति दिक्॥ [illegible]॥ इति श्रीशब्दकौस्तुभे प्रथमाध्यायस्य प्रथमे पादे तृती
यमाह्निकम्॥ श्री[illegible]कृष्णार्पणं॥७॥

॥श्री॥ इग्यणः संप्रसारणं ॥ यणः स्थाने इग्भवतीत्येवंरूपो वाक्यार्थः यणस्थानिक इकारस्योवर्णस्य चोभयमपि संप्रसारणसंज्ञं स्यात् ॥ तत्र ष्य
ङः संप्रसारणमित्यादिषु विधिप्रदेशेषु वाक्यार्थस्य ग्रहणं संप्रसारणाच्चेत्यनुवादप्रदेशेषु वर्णस्येति विवेकः ॥ पूर्वसूत्रादितिग्रहणानुवृत्तेर्वा
क्यार्थस्य संज्ञित्वं लभ्यते ॥ तत्प्रख्यात्वाने तु वाक्यमेव संज्ञि ॥ न च तदेव विधेयं स्यादिति वाच्यं ॥ वाहऊठ् संप्रसारणमिति सामान्याधिकरण्य
बलेन तदुपस्थापितार्थस्यैव विधेयत्व [illegible] निर्णयात् ॥ नन्वेवमपि ष्यङः संप्रसारणं इत्यादौ दोषस्तादवस्थ्यं ॥ सामान्यापेक्षज्ञापकाश्रयणा
त् ॥ ननु तथापि वाक्यतदर्थयोरन्यतरस्य संज्ञित्वमस्तु वर्णस्य तु कथमिति चेत् ॥ तेनाचूत्येकदेशाणामन्यतमाश्रयेणार्थद्वयाभ्युपगमा
दित्यवेहि ॥ अत्र च विधेयानुवाद्यसमर्पकविभक्त्या सत्रे निर्देश एव लिंगं ॥ आहत्य विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसंज्ञात्वस्येति
उभयोः संज्ञेति पक्षे तत्पुरुषः ॥ भर्तृहरिस्त्वाह संप्रसारणसंज्ञायां लिंगाभ्यां वर्णवाक्ययोः ॥ प्रविभागस्तथा सूत्रे एकस्मिन्नेव जायते ॥
तथा द्विवचने चीति ते नोपाद्यादिलक्षणः ॥ एकशेषेण निर्देशो भाष्य एव समर्थितस्तत्ति ॥ तत्र च शब्दतन्त्रमर्थतन्त्रं वेति मतभेदेन व्यवस्था बोध्या
अर्थभेदे शब्दभेद आद्यः पक्षः शब्दैक्ये द्वितीयः ॥ आद्येऽपि व्यंजकध्वनिमात्रभेदे पूर्वस्यैव आवृत्तिरेवेत्यादि बोध्यं ॥ एवं च तन्त्रत्वमेकरूपेण भवेत्तु सोपकार
तः ॥ उपकारान्यथात्वे तु भवेदावृत्तिलक्षणमिति मीमांसकमर्यादानुरोधो वैयाकरणैर्नैकर्तव्यः ॥ तत्स्याभाष्यादिसंकेत वैयाकरणग्रन्थविरुद्धत्वात् ॥ मूलयुक्तिरू
न्यत्तया दुरूपपादत्वाच्चे [illegible] तिदिक् ॥ यद्वा वाक्यार्थ एव संज्ञी अनुवादे तु तन्निर्दिष्टो वर्णो लक्ष्यते ॥ संप्रसारणाच्चेति संप्रसारणमिति ॥ अथवाव
र्ण एव संज्ञा विधिप्रदेशेषु सूत्रशाटकवद्भाविसंज्ञाश्रयणीयेति ॥ सर्वेऽप्येते पक्षा भाष्ये स्थिताः ॥ स्यादेतत् ॥ अदुहितराभित्यत्र लकारस्य यणः स्थाने उत्त
मपुरुषैकवचनमिट् ॥ तस्य च संप्रसारणसंज्ञायां सत्यां हलः इति दीर्घः स्यात् ॥ तरपंमप्रतिलङः तस्यां गत्वादिति ॥ अत्रोहुः ॥ संख्यातानुदेशाद्यकारस्थानि
कस्येव इकारस्य संज्ञा ॥ न तु लकारस्थानिकस्येति ॥ अनेदमवधेयं ॥ वाक्यार्थः संज्ञीति पक्षे न स्योद्देश्यविधेयसंसर्ग [illegible] रूपतया तत्र यथासंख्यपरि
भाषोपस्थितौ यणः स्थाने इक्स्यात् यथासंख्यं स्यादित्येवान्तरवाक्यार्थः सोऽयं संप्रसारणसंज्ञः स्यादिति महावाक्यार्थः ॥ मध्यांयाततरवाक्यार्थग्रहीता

सू॰ कौ॰ ७॥

॥१॥

ख

यात्ति वा त्ति द्राति इत्यादावतिप्रसंगः । तस्य संज्ञासंबंधमात्रफलकत्वात् ॥ अन्यथा ष्यङः संप्रसारणमित्यादेर्वैयर्थ्यापत्तेः । अतो नोक्तदोषः । अद्दु
हीत्यादेस्तज्ज्ञत्वाभावाच्च । उभयसंज्ञापक्षेपि उपस्थितत्वाद्यथासंख्यप्रवृत्त एव वर्णः संज्ञीति । अतो दुहितरमित्यत्र नातिप्रसंगः । इदं कर्मकर्तरि
रूपमिति हरदत्तः । उपलक्षणमिदं केवले कर्तर्यपि संभवात् । वर्ण एव संज्ञीति पक्षे यथासंख्यं दुर्लभं । अनुवादे परिभाषाणामनुपस्थानस्यापवा
दित्वात् ॥ न चैवं स्थानेयोगत्वमस्मिन्पक्षे न लभ्यतेति वाच्यं । षष्ठीस्थानेयोगेत्यत्रानुवर्तयेत सूत्रस्य व्याख्येयत्वात् । उक्तं हि इको गुण इति सूत्रे सि
द्धं तु षष्ठ्यधिकारे वचनात् । इति । इहैव वासिकावल्लौकिकेन न्यायेन स्थानग्रहणापकर्षोस्तु । यथासंख्यं दुर्लभमित्युक्तं । कथं तर्हि दुहितरमित्यत्र नाति
प्रसंग इति चेत् न्यावृत्त्याद्याश्रयणेन संप्रसारणस्येत्यत्र तद्भावितग्रहणात् । अङ्गकार्यकालपक्षे यणः स्थाने संप्रसारणमिक् भवेत् इति घा कृया
र्थोद्देशुवा देतेव नास्ति तत्र च परिभाषोपस्थितेरसत्त्वात् यथासंख्यप्रवृत्त एव संज्ञी । स एव संप्रसारणस्येत्यादावुपतिष्ठते । अथवा स्थानक्रमेण
संबंधो लौकिकन्यायसिद्धत्वादनुवादेपि सुलभः । यथासंख्यसूत्रं परं न प्रवर्ततामिति दिक् । शुभ्यामित्यत्र हल इति दीर्घो न । दिव उदित्तपरक
रणात् । अत एव द्युभ्यामित्यत्र संप्रसारणस्येति दीर्घो न । न चैवं भाव्यमानो उकारादेशः सवर्णान्न गृह्णातीति नियमार्थं ज्ञापकतया कथं
मस्योपन्यास इति वाच्यं । तस्य वाक्यार्थः संज्ञीति पक्षेणैकत्वात् । संप्रसारणस्येत्यत्र तद्भावितपक्षाश्रयणाद्वा । पक्षान्तरे तु ऊठ उदि
ति ज्ञापके बोध्यं । न चैवं अक्षद्युव इत्यादावूठः संप्रसारणसंज्ञायां संप्रसारणाच्चेति पूर्वरूपं स्यात् इति चेन्न । संप्रसारणपूर्वत्वे स
मानांगग्रहणस्य वार्तिककृता दत्तत्वात् । प्रसारणपक्षेपि वाण्यर्द्धंगमित्युवङ् भविष्यति । वाक्यार्थः संज्ञीत्यादिपक्षान्तरे
तु पूर्वरूपप्राप्तिरेव नास्ति । हूतो जीन इत्यादेस्तु हल इति सूत्रारंभसामर्थ्यात् संप्रसारणनिर्वृत्तस्यादेशस्य दीर्घप्रवृत्तिः । वर्णः संज्ञा

१

पक्षे तु अल्लि योऽस्थानिवद्भावासंभवेन हलः इति सूत्रारंभसामर्थ्येन संप्रसारणस्यादेशे कार्यप्रवृत्तेर्वा च्यत्वा[illegible]दिति दिक्॥ आद्यंतौ टकितौ। टि द्वि
तीयस्यो कितस्तु चरमात् आद्यंतावयवौ स्तः। भविता। आपप्यति। पुरस्तादपवादन्यायेन स्थाने योगत्वस्यायमपवादः। प्रत्ययः परश्चेत्यनेन तु परत्वाद्वा
च्यते। तेन चरेष्टः। गापोष्टक्। श्रीद्विभ्याम्ल्योर्ठक् इत्यादयः पर[illegible] एवं भवति। परे एपरिभाषाप्रकरणेन साहचर्यात् परिभाषेयं। भाष्ये तु संज्ञापक्षोपि स्वी
पितः। तथाहि। टकितौ विति कर्मधारयः। ट् इत्संज्ञकौ टकारककारौ आद्यंतयोः संज्ञे स्तः। तथा च टङिति बहुव्रीहिः। ट् इट् आदिर्यस्येति विग्रहः।
तथा च स्थानेंतरतमपरिभाषया तत्र्यस्य इत्यादेशे सिद्धमिष्टं। एवं यापयतीत्यत्र यातेर्यादेशः। पुक् अंते यस्येति व्याख्यानात्। न चैवं
आद्यंतौ टकावित्येवास्तु इति वाच्यं। आ[illegible]लुआट चौ स्येवक इत्यादावपि टकारककारयोरादंतसंज्ञाप्रसंगात्। इत्संज्ञकत्वेन देशावि
शेषो लक्ष्यते। तेन संज्ञिकस्यादेशः। तत्रावस्थितौ टकौ संज्ञे स्तः। न च आट चष्टकार इकादेशस्य ककारश्चेति न तथेति नोक्तदोषः। नन्वस्मि
न्पक्षे लुङ् लङ् लृङ् क्ष्वुडुदात्त इत्यादिनोऽभूत्वादेशः स्यात् तस्य चोदात्तः स्यादि संतोदात्तः प्रसज्येत। नैष दोषः। अः टूडुदात्तश्च यस्येति त्रिपद
बहुव्रीह्याश्रयणात्। विशेषणस्याप्युदात्तस्य सोम्नः पा[illegible]निपातः। तेनोदात्तागमादिरादेशः इति सिद्धं। न चैव माङ्जादीनामित्यत्र दोषतादव
स्थं। अनुवर्त्तेनोदात्तेन सहश्रूयमाणस्य बहुव्रीह्यसंभवादिति वाच्यं। आङजादीनामिति सूत्रस्य प्रत्याख्यास्यमानत्वात्। वक्ष्यति हि। अजा
दीनामटा सिद्धमित्यादि॥ मिदचोंत्यात्परः। सन्निविष्टानां अचां मध्ये अंत्यो योऽच् तस्मात्परो मित्स्यात्। स च पूर्वांतः। स्थाने योगत्वस्य पर
श्चेति परत्वस्य चापवादः। वनानि। पयांसि। रुणद्धि। ननु पूर्वयोगवदयमपि पुरस्तादप[illegible]वादन्यायेन स्थाने योगत्वमात्रस्याप
वादोस्तु न तु प्रत्ययः परश्चेति अस्यापीति चेन्न। बाध्यसामान्यचिंतामाश्रित्य स्वविषये प्राप्तं सर्वं बाध्यते इत्यभ्युपगमात्। अन्यथा भ्र
मो मित्करणात्। व्यर्थं स्यात्। न च श्रवणार्थ एव भ्रमो मकार इति वाच्यं। तण्ह इति निर्देशात्। अच इति जात्यभिप्राये एकवचनं। निद्धं

भ्रमत्वस्या

रलोपश्री॥ नच अंत्यादिश्यनेन सामानाधिकरण्यादवहृत्येवपंचम्येवास्तु इतिवाच्यं॥ क्रोष्टुवादीनामित्यादेशोऽलस्याचोसंभवेनैतत्परिभाषयोपा
अप्रवृत्तोऽअलोन्त्यपरिभाषाप्रसंगात्। तत्र तथाच मित्करणे वैयर्थ्यापत्तिः। पूर्वसूत्रे आद्यंतावितिसमासनिर्देशोनपीह अंतग्रहणमात्रमनुवर्त्यते। ए
कदेशमूलयस्त्वरितप्रतिज्ञायलनात्। तेनमित्सूत्रतिः। यदितु अभक्तः स्यात्। तदा ताताविंडानामित्यादेशो ऽद्रंदस्यवहुत्वमितिह्रीलीपेसतेनलोपेनस्यात्
मात्तिपदिकांतत्वाभावात्। तथापहल्लिहड्लस्त्रवहाभ्लेलिहइतिस्वक्तिअरुर्द्धपदंतस्येतिमुम्मिमोनुस्वारेनस्यात्। अपदांतत्वात्। यदितु आदिग्रहण
मनुवर्त्यपरादिः क्रियेततर्हि वारिणेहस्यादौ घोर्ङितीतिगुणः स्यात्। वंहल्लिहड्लस्त्वानुस्वारेन स्यात्। अतिसूथितः सत्वायेषांतानि भजतिस्रवीनिनाश्रत
एषकुलानिदलस्त्रसखुसंबुद्धावितिणित्सप्रयुक्तावृद्धिः स्यात्। साहिगोणत्वेपीष्यते। अस्थ्यादानडुत्। एतच्चइहस्वभेयेनविध्यादितिसूत्रेचभाष्ये

पक्ष

ऋद्ये यरओः स्फुटं। तस्मात्सूत्रीतपृवस्थितः। अत्रचवार्तिकं। अंत्यात्सूर्वोमस्जेरनुषंगः संयोगादिलोपार्थः। मग्नः मग्नवान्। भ्रोष्टितमस्जेतिनिष्ठान
त्वं। तस्यासिद्धत्वात्कुत्वं। मस्जिनशोर्झलीतिनुम्। सचयद्यंतादचः परः स्यात्तदा अनिदितामित्यनुषंगलोपोनस्यात्। उपधाभूतस्यनकारस्यानुषंग
इतिमाचीसंज्ञा। अथ स्कोरितिसलोपेकृतेनकारोनुपधामितिचेन्न। नलोपंप्रतिस्कोरितिसलोपस्या[illegible]सिद्धत्वात्। बहूनांसमवायेक्रमसु दायस्ये
वसंयोगसंज्ञेतिपदेशसलोपस्याप्राप्तेश्च। तथा ममंक्ता मंक्तुमित्यादावप्रयोजनंबोध्यं। भर्जिमर्च्योश्च। अंत्यात्सूर्वोभिदित्यनुवर्तते। अस्मा
दोलादिकेअचिवर्तेतुमागमः। भरूजा। मर्चेवर्णक्षार्थेचोरादिकः। अस्मादोलादिकअचंदर्रितिप्रत्ययः। ईमागमः निपातनात्सिद्धः। भरूजा
शुद्धोहं[illegible]अन्यादिषुपठ्यते। मरीचेनाद्योहिदालादिषु। उणादिषुमृके[illegible]र्भ्यार्थे। चित्तिरिदंचिप्रत्ययंकृत्वा मरीचिरूद्धोन्युसादिना। तदुपायांतरं
बोध्यं॥ एवंहृग्प्रत्यादेशो। आदिश्यमानेषुरूत्वेषुमध्ये एवंइगेवस्यात्। हेगूढमतिक्रांतेकुलंअतिहिकुलं॥ चित्रगुः अतिरिः। अति
नु। यदनयवक्तव्यंतदेओङ्सूत्रेएवोक्तं॥ षष्ठीस्थानेयोगा। अनेकसंबंधपरतया संभाव्यमाना षष्ठी स्थानमयुक्तसंबंधपरेतिबोध्यं॥

उपधालात्

अस्तेर्भूः ॥ अस्तेः समीपोनन्तरो वेति संशये तत्स्थाने उच्चारणीय इत्यर्थः ॥ स्थानं च प्रसंगः ॥ दर्भाणां स्थाने शरैः प्रस्तरितव्य
मितिवत् ॥ तथा चेगुच्चारणे प्रसक्ते यणुच्चारणीय इत्याद्यर्थपर्यवसाने सामीप्याद्यः संबंधा अर्थाद्व्यावृत्ताः ॥ योगः संबं
धः ॥ स बहुविधोस्यस्या इति योगा ॥ अर्श आदित्वान्मत्वर्थीयोच् ॥ स च भिन्नः ॥ अन्यथा विशेषणवैयर्थ्यापत्तेः ॥ तेनानेकसंब

वा न्धपरतया संभाव्यमाने त्वर्थो लभ्यते ॥ अयोगेति च्छेदः ॥ अनिश्चितयोगविशेषसि[illegible]र्थः ॥ योगे त्वयोगेति वा किं ॥ कुदुप
धाया गोहः ऊ ॥ सहदड्हलोरित्यादौ ऊसः गोहरूत्वमा भूत् ॥ सति तत्रापि स्थानेयोगत्वे गोहिरूसोः स्थाने धातुमा
त्रस्योपधायाश्च स्थाने तु दितीयस्यात्तामिति दिक् ॥ यद्वा स्थानेयोगोस्या इति बहुव्रीहिः ॥ अत एव निपातनात्सप्तम्या अलु
क् ॥ यद्वा स्थानेन योगोस्याः सा इति विग्रहः ॥ निपातनोदेत्वं ॥ न चानयोः पक्षयोः गोहः ऊ सहदस्यादावतिप्रसंगः ॥ परिभाषाणां
अनियमे नियंतुं प्रवृत्तेः ॥ युक्तं चैतत् ॥ आकांक्षापूर्वकत्वात्संबंधस्य इह चोपधासंनिधाने नावयवषष्ठीत्वे निर्णीते आकांक्षावि
च्छेदात् ॥ लोकेपि हि पंथानं पृष्टं प्रति अमुष्मिन्नवकाशे दक्षिणो गृहीतव्यः ॥ अमुष्मिन्नुत्तरः इत्यादावुपदिष्टत्वस्ति यत्र मार्गे द्वेधा
संशयः ॥ तत्रैवैतदुपतिष्ठते ॥ न तु संदिग्धे तिर्यक्पथेपीति दिक् ॥ भाष्यकारास्त्वाहुः ॥ अस्तेर्भूरित्यादौ अनेकसंबंधप्रसंगेपि ल
क्ष्यानुरोधादंतरंगत्वात् स्थानिवदादेशाद् इति ज्ञापकाच्च स्थानेयोगेत्वं व्याख्यास्यते ॥ तस्मान्नायमेतस्य सूत्रस्यार्थः ॥ किंतु प
ष्ठ्यंतमुच्चार्यमाणमेव स्थानेन युज्यते न तु प्रतीयमानमिति सूत्रार्थः ॥ तदेतदुच्यते ॥ निर्दिश्यमानस्यादेशा भवंति इति ॥ तेन पा

दः पदिस्यस्यायमर्थः। पाड्हांतं यदंगं तदवयवस्य पाड्हस्वस्य सर्वस्य पदादेर्नुड् इति। अलोन्त्यस्यादेः परस्येति योगे तु आरंभसामर्थ्याद्
स्वबाधको। अनेकाल्शित्सर्वस्येत्यनेन तु सहाविरोधादस्य समुच्चयेन प्रवृत्तिरिति। एवं स्थिते तंत्राद्याश्रयणेन प्राप्तुक्तोपि सूत्रार्थः सुव
चः। फलं तु स्फुटप्रतिपत्तिरिति दिक्। स्थानेन्तरतमः। प्राप्यमाणानां मध्ये सदृशतम आदेशः स्यात्। सादृश्यं चतुर्द्धा। स्थानतोर्थतो गुणतः
प्रमाणतश्चेति। स्थानतो यथा। सुध्युपास्यः। मध्वरिः। धात्रंशः। लाकृतिः। यत्तु यथासंख्यसूत्रेणैवेहान्यथासिद्धिरित्युक्तं भाष्यादौ तत्
समुच्चयमात्रे। अर्थतः साम्यविवक्षायां यथासंख्यालाभात्। इको हि षट् षष्टिः यणस्तु सप्तैवेति वैषम्यात्। अथ कथमाद्या यण आद्या च
प्रथमं चतुर्णामुपस्थितेः। सर्वसाम्यमिति चेत्तर्हि सुध्युपास्ये दीर्घस्य कथं यणादेशः। इकारेण ग्रहणादिति चेत्तर्हि तृतीयेन ऋकारेण
चतुर्थेन लृकारेण परस्य ह्रस्वस्य ग्रहणाल्लाकृतौ रेफप्रसंगः। धात्रंशे च लकारप्रसंगः। यवौ च सानुनासिकौ निरनुनासिकौ न व्यवति
ष्ठेयातामिति दिक्। दैत्यारिः। श्रीशः। इत्याद्यपीहोदाहरणं। अर्थतो यथा। वातंडययुवतिः। वतंडशब्दाद्वेति अपत्ये यञ्। तस्य लुक् स्त्रि
यामिति लुक्। शार्ङ्गरवादिङीन्। वतंडी चासौ युवतिश्चेति विग्रहे पोटायुवतीत्यादिना समासः। पुंवत्कर्मधारयेत्यतिदिष्टस्य मा
नः पुंशब्दो वतंडापत्यं वा स्त्रियो वतंडीशब्दस्य तदपत्यवाची वातंडयशब्दो भवति। गुणतो यथा। पाकः। त्यागः। चजोः कु घिण्ण्यतोरिति च
कारस्याल्पप्राणस्याघोषस्य तादृश एव ककारः। जकारस्य घोषस्याल्पप्राणस्य नादवतः तादृश एव गकारः। प्रमाणतो यथा। अ
मुं। अमू। अमुना। अदसोसेरित्यनेन ह्रस्वस्य ह्रस्वः दीर्घस्य दीर्घः उकारः [illegible] पुनः स्थानग्रहणादन्योपि वाक्यार्थः

इह स्थाने इत्यनुवर्तमाने

इत्तंड।

३

सेमतः।तालव्वादिरूपेस्थानेयोंतरतमस्तस्मयुक्तांतर्यवानितियावत्संप्राप्यमाणानांमध्येस्यादिति[illegible]तदुक्तं।यत्रानेकविधमांत
र्यंतत्र स्थानतआंतर्यंबलीयः इति।तेनचेत्तास्तोत्तेस्यत्रप्रमाणतआंतर्यवानप्यकारोनभवति।वाक्यभेदेचतमपग्रहणमेबलिंगं।ए
कस्मिन्नेववाक्यार्थेसंमतेहिस्थानेंतरइतिएवब्रूयात्।।सिद्धांतेतुवाग्घरिरित्यादौसोष्मणःसोष्माणइतिद्वितीयाःप्रसक्ताः।।
नादवतोनादवंतइतितृतीयाःप्रसक्ताः।तमपूग्रहणात्तुचतुर्थाभवंति।तेहिसोष्मणोनादवंतश्च।उष्माउष्मत्वंचवर्णधर्मस्तत्सहि
ताःसोष्माणः।तथाचबह्वृचानांप्रातिशाख्यं।वर्गेवर्गेप्रथमावपोषोयुग्मोसोष्माणोअनुनासिकोंत्यइति।शादयऊष्माणःस
स्थानेनद्वितीयाहकारेणचतुर्थाइति शिक्षा।इत्रीणिवाक्यानि।ऊष्मशब्दश्चधर्मवचनः।शषसहाऊष्माणइतिप्रथमवाक्यार्थः।स
स्थानेनेति।इत्थंभूतलक्षणेतृतीया।हशषसाःक्रमेणखघछठथानांहिद्वितीयानांसस्थानाः।यथाशादयऊष्माणस्तथैवखादयो ६
पीत्यर्थः।फकारस्यतुयद्यपिउष्मानास्तितथापितस्यविशिष्योष्मत्वंबोध्यं।हकारेणचतुर्थाइति।यथाहकारऊष्माएवंतेपीत्यर्थः
नन्वेवमिष्टंउसमित्यादौआंतर्यादर्धमात्रस्ययणःस्थानेअर्धमात्रइकस्यात्।दध्यत्रसुध्युपास्यइत्यादौतुमात्रिकद्विमात्रिकयोः
रिकोस्तथाविधएव य ण स्यादितिचेन्न।अर्धमात्रिकस्यैकोमात्रिकद्विमात्रिक व्यंजनस्यच लोकेवेदयोरप्रसि[illegible]द्धत्वात्
योस्तिसंभविष्यति।इहभाष्येससम्प्रत्तपाठोप्युपन्यस्यभाष्येदूषितः।तथाहि।अंतरतमउरण्रपरइतिसंहितयातावत्सूत्रे
उरपाठीत्।पदकारास्तुव्याख्यातारः।तत्रससम्प्रत्त मपिकार्यमर्थेहेतुःषष्ठीतिचानुवर्तितेअंतरतमेस्थानिनिषष्ठीउपसंहर्तव्ये

तिसूत्रार्थः। एवं चाकः सवर्णे दीर्घ इत्यत्र विधेयस्य दीर्घस्यांतरतमे स्थानिन्यक इति षष्ठ्या उपसंहारे [illegible]रासिद्धमिष्टं। तथा वांतो यि
प्रत्यये च इत्यत्रानुवर्तितायाः षष्ठ्या वांतादेशस्यांतरतमयोरेदैतोरूपसंहारात्सिद्धमिष्टं। अन्यथैकमात्रस्य वांतादेशः। अत्रेदं दूषणं। इको
यणचीति यणः ह्रस्वानामेव स्यान्न तु दीर्घाणां अर्द्धमात्रिकस्य हि मात्रिकः संनिकृष्ट इति षष्ठ्या उपसंहारात्। तथा इको गुणवृद्धी अ
चो ञ्णिति पुगंतलघूपधस्य गुणवृध्योरंतरतमेष्वेव ह्रस्वस्त्रुचोपसंहारात्। नेता लविता नायको लावक इत्यत्रैव स्यात्। चेता स्तोता चायकः स्तावक इ
त्यादौ न स्यादित्यादि कू॥ तदेवं सत्सम्यंतपक्षस्य दुष्टत्वात्प्रथमांतपक्ष एव युक्त इति स्थितं। स्यादेतत्। एवं सत्येकमात्रस्य वांतादेशः स्यादि
ति चेत्। अत्राहुः। पूर्वसूत्रे तावद्यथासंख्यप्रवृत्तमंतरतमपरिभाषा वा। अर्थाधिकारश्चेहाश्रीयते। यादृशो वांतादेशः पूर्वं दृष्ट ओकार
स्थानिको अव् औकारस्थानिकश्चाव् तादृशो यि प्रत्यये भवतीति। यद्वा वांत इति न करिष्यते। नन्वेवं चेयं जेयमित्यादावतिप्रसंगः क्ष
य्यजय्याविति योगं विभज्य कंठ्यतालव्यस्य चेद्भवति क्षिज्योरेवेति नियमपरतया व्याख्यानात्। क्षिज्योः शक्यार्थ एवेति द्वितीयः
सूत्रार्थः। तेनाल्पार्थे तयोरपि नेति बोध्यं। नन्वेवं शृॄल्वादिगणपठितेन नृनरयोर्वृद्धिश्चेति सूत्रे एनरशब्दस्य नारीति रूपं न सि
ध्येत्। तथा हि नरशब्दस्य ङीन्सं[illegible]नियोगेन विधीयमाना वृद्धिरलोऽन्त्यस्येत्यंत्यस्य स्यात्तथा च यस्येति च [illegible]ति लोपेन तस्या निवृत्तौ वृ
द्धिवचनं व्यर्थं स्यात्। न च नरशब्दाद्यर्थे तद्धितेति वाच्यं। एवं सति तु वृद्धिश्चेत्येव ब्रूयात्। न च नरशब्देपि परत्वाद्यस्येति लोपे कृते वृद्धिर्भवति
नानर्थिके ति वाच्यं। प्रत्ययसंनियोगशिष्टत्वेन वृद्धेरंतरंगत्वात्। ननु वचनसामर्थ्याद्यस्यालोपो बाध्यतामाहोस्विदंतरंगपरिभा

रामः

440

अंगस्येति गुणः कालादयः तेषां प्रधानकालादिभिर्विरोधे तादर्थ्यादंगानामुक्तकालत्वा
ध्येनकालांतरेऽप्यनुष्ठानं यथा सोमकाले
पूर्वसोमस्यापि ...

णं बाधित्वा परत्वाद्यस्येति लोपे प्रवृत्ते वृद्धिर्भवतीति संज्ञायेप रिभाषा बाध्य एव न्याय्यः तदुक्तं अंगगुणविरोधे च तादर्थ्यात् इति । किं
च बाहुर्त्रि इति अत्र लोपित्वेनानुमानिक्याः परिभाषाया बाधेनोपपत्तौ साक्षाच्छ्रुतस्य यस्येति लोपस्य बाधोऽनुचितः । तथा च लोपे कृते वृ
द्धिरिति सिद्धं नारीति रूपमिति दिक् ॥ सिद्धं किं तु ससम्यंतपक्षे छेदपक्ष एवेति न हि प्रकृतिर्नांतरतम निर्वृत्तिरिति तृतीयांतरतमे स्थाने
निषक्तादुपसंहारादकारस्य वृद्धिर्भवति । प्रथमांतपक्षे छेदपक्षे तोदि शतोन्तरतम निर्वृत्तिरिति अलोन्त्यस्येति वचनाद्वकारस्य तत्
स्मात् सिद्धं तेन नरशब्दस्य नारीति रूपं दुःसाधमिति पूर्वः पक्षः । अत्राहुः । नरशब्दपाठप्रत्याख्यानमेव भाष्यकृतोऽभिप्रेतं । ससम्यंतपाठनि
राकरणभाष्येण तथैवानुमानात् । न चैवं नरशब्दाज्जातिलक्षणे ङीषपि सति नरीति रूपं स्यादिति वाच्यं इष्टापत्तेः । तथा च प्रयुज्य
ते । किंनरीणां नरीणां इति । यद्वा । नरशब्दस्य नियतपुल्लिंगत्वमेवास्तु तथा चव्याप्तिप्रसंगः । उक्तप्रयोगस्तु पुंयोगलक्षणे ङीषि भवि
ष्यति । यथान्यासेऽपि तत्स्यदुर्वारत्वात् । अथ वा नृनरयोः इत्यत्र अत इति वर्त्तते । जातेरस्त्रीविषयादयोपधादिति सूत्रात् तच्चानुवृत्तिसामर्थ्यात् स
प्तम्या विपरिणतं । नरशब्देन सह सामानाधिकरण्येन संबध्यमानत्वं नृशब्देन संभवात् । तस्मात् सिद्धं नारीति । अत्रेदं वक्तव्यं । प्रत्याख्या
यतां नाम नरस्य शब्दः । ननरयोरिति पठतः सूत्रकृतो मते तत्कथमुक्तिसंभवः । न च नरीत्येवेष्टमिति वाच्यं । वृद्धिविधायकसूत्रेम
ध्ये नरशब्दपाठस्य वैफल्यापत्तेः । अतः रस्यानुवृत्त्या समर्थनमपि क्लिष्टं । एकदेशानुवृत्ति विभक्तिविपरिणामाद्याश्रयणात् । किं च
ननरयोरिति गणपाठप्रयत्नेन तथा व्याख्यातं । गौरादिष्वात् इति न प्रकृतं । तथा च शार्ङ्गरवाद्यञो ङीन् इत्यादि शब्देन गणसूत्रमपि ह

स्यमागमय्यत्रातद्दस्यान्वयोद्भस्यः। सवर्ण्णिसवरइतिस्पष्टमेव। तस्मादिदं सूत्रमाधेयं। ननु ऋतिरं ऌतिंलु साकारे [illegible] तु करणं तस्य भः न्यरः
नु[illegible]स्वनरस्य चेतिद्विद्वः। चाद्रणेपाठदर्शनाय द्वौ स्थानेंतरमहस्त्र अंते त्रेणद्वेधाछिदः सूत्रवृत्तः सम्मतः। भाष्योक्तरीत्या श्लोकिकन्यायाश्र
यणेन सूत्रप्रत्याख्यानपक्षेपिहि प्रवृत्तित आदेशांतश्चेत्तिभयथापं तरस्मनिर्दे जिरस्येवा सूत्रेहतोपांचनिकीसा। भाष्यकृतोस्तुवाचनि
कीसा। न्यायसिद्धेत्यन्यदेतत्। तथाचवांतोयिन्नरयोरित्यादिसर्वं सुस्थं। अत एव चतुर्थस्थानितोंतरतमनिर्दे तिमाश्रित्य माशीति रू
पं साध्ययन्नरदत्तोपिन विरुध्यते। इको यणचीत्यादावतिप्रसंगः परमव क्षिप्यते। साच त्वादिभ्यः पाणिनीनां हस्वदृत्यादिच्छापकेनवाच
निकया वा न्यायमूलिका या वा स्थानितोंतरतमनिर्द्दिष्टतेरनित्यतामाश्रित्य परिहर्तव्य इति दिक्। सूत्रप्रत्याख्याने प्रकारान्तरमुच्यते। स
भायामसत्वां मिसुते हिं पंडिताः पंडितैः सह समास्तते श्रेष्ठैः श्रेष्ठैः कवयः कविभिः नतु संकरेण। किं बहुना। गर्वास्तं संप्रत्तिगोर्धावति
अश्वोश्वानामिति व्यवस्था निर्यत्स्वपि दृश्यते तस्मात्प्रथमवाक्यार्थस्य लोकत एव सिद्धेः आभाश्रीतद् थं सूत्रमारंभणीयं। स्थान
तआंतर्यं लीयद्यत्यपि लोकत एव सिद्धं। तथाहि भयः सहचरितयोरश्वयोर्गवोर्वा सजातीयांतरसंवलनेपि सत्यपिरूपेप
तुत्वादिति गुणस दृशानपि हित्वा स्थानसाम्यपुरस्कारेणैव परस्परसंश्लेषात्क्रियते। तदेवं लोकसिद्धेर्थे किं वचनेनेति॥ [illegible]
उरण्परः। ऋवर्णस्य स्थाने योण् स प्रसंगावस्थायामेव प्रत्याहारपरः स्यात्। ऋकारेण सावर्ण्यात्त्रिंशत्तु पस्थाने सति स्था
नेंतरमपरिभाषया दृश्रुतिमतः रपरो लश्रुतेस्तु लपर इति वक्तव्यं। कृष्णर्द्धिः। तवल्कारः। ऋस्थानीयो णि ति यंथस्तु यथासं

वि

उश्चऋकृचऋलृलोरिति विग्रहे वा

ऽस्य भ्रमापादको ऽसंगतश्च। ऋलृवर्णयोः साम्येनाभिमतानिर्वाहात्। न हि सूत्रे ऋलृद्वयमस्ति। अर्थतस्तु न तत्साम्यं। अथा त्रेनयथासंख्य मभिमतं तर्हि किं वृत्तिद्वयमध्ये द्वयोरेवविशिष्योल्लेखनेन। आ च आ च ररलौ ऋलृ। ऋलॄः स्थानमिति विग्रहे [illegible] द्वंद्वस्य दुर्लभत्वाच्च सहि विरूपा णामपि समानार्थानामित्येकशेषेण बाध्यते। चित्रगुराद्वस्य चित्रगवीपरत्ता यामिव साधुत्वनिर्वाहार्थं लक्षणामाश्रित्य लक्षितलक्षणा या ऋ [illegible] व्याख्यार्थपर्यवसानमिति कथंचिन्निर्वाहस्तु तद्वत् अश्रद्धालुभिरास्थेय इति दिक्। अत्र पक्षचतुष्टयं संभाव्यते। उः स्थाने रपरोऽणुत्प द्यमान एव रपरत्वं विधीयते इति प्रथमः पक्षः। उः स्थाने अणाम् [illegible] प्रसंगे अणेवेति नियमः। स च रपर एवेति वाक्यभेदे न रपरत्वं विधीयते इति द्वितीयः पक्षः। उः स्थाने योऽणि त्यनूद्यत स्य रपरत्वं विधीयत इति तृतीयः। प्रसंगावस्थायामेव रपरत्वं विधी यत इति चतुर्थः। अथ तत्राद्यपक्षे नाप्राप्तेषु दत्तेषु विधीयमानो णत्वेषां बाधः स्यात्। तैरनवकाशत्व विषयस्यालाभात्। एवं हित दीर्घ्यतिः वचन षष्ठीनिर्दिष्टस्य भवन्नादेशो ऽन्तरतमः स्यात्। ऋवर्णस्य त्वणूरपरः स्यादिति। ततश्चोदात्ता [illegible] नुदात्तस्वरितानुनासिकेषु दोषः। तथाहि। इति रिस्वत्रजिन्नित्यादिर्नित्यमिति प्राप्तम् ऋकारं बाधित्वाऽण्रपरः स्यात्। तथा च प्रवृत्तं प्रहृतंमित्यत्र गतिरनन्तर इति पूर्वपदप्रकृति स्वरे कृते शेषनिघातेन [illegible] अनुदात्तादनुदात्तस्येति स्वरितेन च बाध्येत। तथा नॄँः पाहि इत्यत्र नॄन्पे इति ज्ञापकेन पूर्वसवर्णदीर्घसंभवेऽप्यनु नासिकं बाधित्वाऽण्रपरः स्यात्। किं च कर्ताकारकः इत्यत्र गुणवृद्धी बाधित्वाण् भवन्नकार एवेति नियमाभावात् कदाचिदिका रउकारश्च स्यात्। अपि चाये मी प्रतिपदोक्ता इत्यौलृदयः [illegible] अन्तरङ्गत्वात् ठ दोष पूर्वस्येति तेषु रपरत्वं न स्यात्। द्वितीये तु गुण

वृध्योर्न दोषः। अनणोः प्रसक्तयो रणेवेति नियमेन [illegible] त्यादि सिद्धेः। ननु ऌस्य स्थानि मिसवी [illegible] वृद्धिरन्तरतमाकारकद् त्यादौ दीर्घे तु सर्वापि प्रमाणतोन्तरतमेस्य विशेषादुभयत्रापि सकलवृद्धिप्रसंगे नियमोस्तु। गुणस्तु कर्तेत्यादौ मात्रिकएव प्राप्तः। तरित्तेत्यादौ द्विमात्रस्य तु द्विमात्रएङ् एव प्राप्तः। तथा चाणनणोः प्रसंगाभावेन नियमानामप्रवृत्तौ दीर्घेषु ऐऽवस्यात्। ऋस्वेषु त्वकारो भवन्नपि रपरो न स्यात्। योऽपि प्रथमवाक्ये नाणेवेति नियम्यते। तस्यैव हि द्वितीयेन रपरत्वं विधीयते। तथा च गुणे दोषो स्वेवेति चेन्नो। न अओः कुर्विण्यतोऽपि रित्यत्र सावकाशत्वात्। स्थानेन्तरतमपरिभाषायावृद्धिविधौ चरितार्थतया प्युरण्रपर इत्यनया गुणप्रसंगे रपरत्वेन बाध्यत्वात्। तस्माद्द्वितीयपक्षे गुणवृध्योर्न कश्चिद्दोषः। उदात्तादिषु दोषः स्यादेव। तथा प्रतिपदोक्तिष्विवादिष्वपि। तत्तीयेतूदात्तादिषु न दोषः। तत्तद्विधिभिरन्तरतमपरिभाषासंस्कृतैर्भिर्वर्णस्यैव विधानात्। किरतीत्यादावपि न दोषः। गुणवृध्योस्तु स्यादेव दोषः। तथा हि। ओंतर्यतो मात्रिकस्य मात्रिके गुणे कृते रपरत्वे च कर्तेत्यादि यद्यपि सिध्यति तथापि तरितेत्यादावेङेव स्यात्। तथा अविशेषाद्वृद्धित्रये प्रवृत्ते आकारस्याण्त्वाद्रपरत्वे कृते कारकस्तारक इत्यादि यद्यपि सिध्यति तथापि कायकस्ताव इत्याद्यनिष्टमप्यापद्येत। यत्तु पूर्वम् न भाष्यकारेरिमं पक्षमाश्रित्य समाहितमनान्तर्यमेवैतयो रान्तर्यमिति। यच्चैतत्र वार्त्तिककारेरुक्तं। संप्रयोगो वा नष्टाश्वदग्धरथवदिति तदुभयमपि पाक्षिकं बोध्यं। तथा हि। अत्र जात्यवच्छिन्नस्यकोन्तरतम इति परीक्ष्यते। अत्र जात्यवच्छिन्नस्य केत्यितितदानुरूप्यं संबध्यिराहित्येनेवधर्मेणेतयोरान्तर्यं। नष्टान्तर्यं च तु ईदृतिमुनित्रयोक्तिरस्ति। प्रस्तुतसोप्मणः सोष्माणइति
प्रति

भाष्या ह्रस्तेश्चानियम एव लभ्यते। एवं नष्टाश्वदग्धरथन्यायोपि ज्ञापकच्छेदे नुपरीक्षायामेव। व्यक्तिपुरस्कारेण परीक्षायां तु दुष्टोयं पक्षः।
तथा चा ■ सूत्रे वार्तिकं। यउः स्थानेण् स रपर इति चेद्गुणवृद्ध्योरवर्णापत्तिरिति। किं चास्मिन्पक्षे रेफपरत्वं लपरत्वं इति व्यव
स्थापि दुरुपपादा स्यात्। स्वतंत्रः कर्तेति निर्देशात्। न विनिमयो ग्रोयङि अचि विभाषेत्यारंभात्र न विकल्प इति समर्थने पि प्रतिपत्ति
गौरवं स्यादेव। रेफस्य पूर्वान्ततां साधयितुमाद्यंतौ टकिताविति सूत्रात् समासे केवलाभूतमंतग्रहणमनुवर्त्यते तस्य रपर इत्यन्यपदार्थ
विशेषणीभूतेन रेणान्वयश्चवाच्य इति महान् क्लेशः। चतुर्थपक्षे तु नैतदुपपद्यते इति वक्ष्यामः। तस्माच्चतुर्थपक्ष एव निर्दोषत्वादा
श्रितः। सूत्रे चैवमुपपादनीयः। स्थाने इति पदद्वयमिहानुवर्तते तत्रैकमुः स्थाने यो णित्त्वादेपि स्थाने संबंधलाभाय द्वितीयं तु प्रसंगा
वस्थायामेवं रपरो भवतीति कालविधानार्थं। स्थानेंतरतमसूत्रे स्थाने ह्रस्वतालव्यादिपरत्वेपि ह्रस्वाधिकारात्मायणादि हप्रसंग
■ परत्वं बोध्यं। एवं च गुणवृद्ध्योः प्राप्त्यवस्थायामेवाणो रपराः संपन्ना इति प्रमाणतो वेदेशे चोबाध्यत्वात्स्थानेंतरत
रतमो णु ■ भवतीति न कश्चिद्दोषः। एवमुदात्तादिविशेषेंतरतमत्वादकारो भवति न भर्तृद्वकुरिति बोध्यं। न चैवं कर्तृत्वादावने
कालत्वात्सवर्णदेशप्रसंगः। आनुपूर्व्येण सिद्धत्वात्। तथाहि। अस्थानित्वमुपजीव्य प्रवृत्तं रपरत्वं सवर्णदेशत्वं नापादयति। उ
पजीव्यविरोधात्। तथा च पूर्वसूत्रे वार्तिकं। सवर्णदेशप्रसंगस्त्वनेकाल्त्वात् न वानेकाल्त्वस्य तदाश्रयत्वादवर्णादेशस्या वि
घातादिति। अण्ग्रहणं किं। खेड्. रिङन्दीनां रपरत्वं माभूत्। मातृीयति क्रियते। तथा मकिलोपोपि रपरः स्यात्। एवं च सूत्रे

तम

प्रति

तरतमा

।।श०कौ०
।।७।।

य्यर्थापत्तेः सामर्थ्याद्लोपविधिं बाधित्वा सवर्णदीर्घः स्यात्। तथाहो तापोतारोऽद्यत्रानङोऽपि परपरत्वे संयोगांतलोपश्च कृते त
स्यासिद्धत्वान्न लोपापत्तेरिति दिक्। अथ योऽशङादिषु अण् सरपरः कृतो नेति चेन्न। अनादेशत्वात्। ओदेशत्वं हि समुदाये विश्रां
ता। नन्वेवं वृद्धवृद्धिरित्यादौ रपरत्वं न स्यात्। पूर्वपरसमुदायस्य स्थानित्वादिति वाच्यं। पूर्वपरयोरिति निर्देशेन सहितयोरवय
वयोरेव स्थानित्वाभ्युपगमात्। अत एव द्वयोः स्थानिनोर्भिन्नत्वादिषु नत्ववत्तद्भावादेशौ मा भूतामिति तत्रैकग्रहणं कृतं। तस्माद
कारस्यापि स्थानित्वमस्त्येव। तदुक्तं। यो ह्युभयोः स्थाने भवति लभतेऽसावन्यतरव्यपदेशमिति। तस्मादेकादेशोऽपि रपरत्वं भवती
ति स्थितं। स्यादेतत्। उन्नशेत्या ऋत उदित्युकारादेशः स्यात्। तथा च विभक्तिसकारस्य रुत्वे कृते पूर्वस्य रो रीति लोपे कृते ढ्रलोपेति
दीर्घेण मातुः पितुरिति प्राप्नोतीति चेत्। मैवं। रुत्वस्यासिद्धत्वेन रात्सस्येति सलोपे रेफस्य विसर्गेण रूपसिद्धेः। नन्वेवं मातुः कार्य
भि त्र षत्वं स्यात्। इदुदुपधस्येति सूत्रात्। न चाणं प्रत्ययविसर्जनीयस्यैवेति वाच्यं। अकारस्य प्रत्ययावयवत्वे प्रत्ययतया तदा
देशस्य सत्तरामतथात्वादिति चेत्। उच्यते। ऋत उदित्येकादेशस्य परादिग्रहणेन ग्रहणादस्ति तावत्सांतस्य प्रत्ययसंज्ञा सकारे
लुप्ते तु अवशिष्टस्यैव प्रत्ययसंज्ञा। एकदेशविकृतस्यानन्यत्वमित्यस्योपसंख्यानात्। स्थानिवदादेश इति अनादेशग्रहणा
द्वा। अत एव यङो यकारे लुप्ते अकारस्य प्रत्ययसंज्ञेत्युक्तं। तथा चाप्रत्ययस्येति षत्वनिषेधः सिद्धः। नन्वेवं प्रत्ययावयवस्था
निकत्वेऽपि प्रत्ययस्थानिकत्वाभावात्सत्वं स्यादेवेति वाच्यं। अप्रत्ययस्येति अनुवादे परिभाषानुपस्थानेनेन स्थानेयोग[illegible]स्य

५

446

पक्षे
ती

दुर्लभत्वात्। अवयवावयविभावस्य षष्ठ्यर्थत्वसंभवात्। न च प्रत्ययस्येति पर्युदासः। तथा च पूर्वोक्तत्वेनैकादन्नाप्रहासत्वं स्यादेव॥
किं च प्रसज्यप्रतिषेधेऽपि संभवति सामानाधिकरण्येऽवैयधिकरण्यस्यान्याय्यत्वात् प्रत्ययो यो विसर्गस्तस्य षत्वं स्यादिति वा।
स्यार्थः तथा चाधि ःकुरोऽस्यादेः स्थानिवद्भावेन विसर्गस्य प्रत्ययत्वान्माभूत्सत्वं मा तु ःकार्यमित्यादेः तु स्यादेवेति चेत् इहेदं तत्त्व॥
कस्कादिषु भ्रातुष्पुत्रग्रहणस्य प्रयोगे ज्ञापकः। एकादेशशास्त्रेण निर्दिष्टत्वात् परस्य षत्वं नेति। यद्वा प्रसज्यप्रतिषेधवैयधिकरण्यान्वया
वेवक्ताप्येते। यत्तु भाष्ये लुप्यते च प्रत्ययोरात्सस्येति। यच्च कैयट ईत्तं तद्व्याख्यातं। उक्ते वृत्ते श्लिष्टः सकारः स एव प्रत्ययसंज्ञः स च लु
प्यत इति तदुभयं चिंत्यं॥ इह तु प्रसंगे रपरत्वादिति पक्षे यद्वृप्यरपरादिति रूपेण विधानादभक्तत्वादिदं केवनास्ति तथापि प्रसंगो वेत्ति
पूर्वसूत्रोक्तरीत्या तृतीयपक्षमाश्रित्य भाष्ये पक्षत्रयं चिंतितान्त्राभक्तत्वपक्षे परादित्वपक्षे च वग्रेह्यादेः उरदत्वे रपरत्वेन च ईत्ते हला
दिः श्लोषेण रेफो न निवर्तेत। अभ्यासावयवस्यानादेर्हल एव तेन निवर्तनात्। तस्माद्दत्तग्रहणमनुवर्त्य पूर्वोक्तत्वपक्ष एव स्थापि
तं इति संक्षेपः॥ अलोऽन्त्यस्य॥ स्या न षष्ठीनिर्दिष्टस्य यदुच्यते तदंत्यस्याल ः स्थाने बोध्यं। त्यदादीनामः। यः सः। स्थानषष्ठीति किं
आर्द्धधातुकस्येड्वलादेः च कारात्पूर्वो माभूत्। इदं च षष्ठी स्थानेयोगेति सूत्रस्यानुवृत्तेर्लभ्यते। अल इति किं। पदस्येत्यधिकृत्य वि
धीयमानं वसुस्रंसुध्वंस्वनडुहां द इति दत्वं परमानडुद्भ्यामित्यादावंत्यस्य पदस्य माभूत्। एतेनाल इति जसंतमाश्रित्य अलो मकारादेशा
अंत्यस्य स्युरिति व्याचक्षाणाः परास्ताः। [illegible] अंत्यस्य पदस्यापि प्रसंगात्। किं चैवं लाघवार्थमलंत्यस्येत्येव सूत्र्येत। अपि च

॥मु॰कौ॰
॥८॥

अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च पादश्च। तस्य संख्यादेशिति लोपोऽ। किं लोपश्च सर्वादेशः स्यात्। ततश्च विरजीकरोतीत्यादिन सिध्ये
त्। यत्तलइति ज संतमितिपक्षे अनेकाल्शित्सर्वस्येति अनेकाल्ग्रहणं कर्तव्यमिति लाघवोपवर्णनं। तदपि न। षष्ठीपक्षेपि ङिच्चेत्यत्र
ङिदेवाने कालंत्यस्यस्यान्नत्वङिदपीति नियमाश्रयणे नानेकाल्ग्रहणप्रत्याख्यानसंभवात्। वस्तुतस्तु पक्षद्वयेपि अनेकाल्ग्रह
णं कर्तव्यमेव। अन्यथा तोभिसऐसित्यादिपंचमीनिर्देशेऽनेकाल्प्यादेशः पूर्णादेः स्यात्। सत्यनेकाल्ग्रहणे परत्वात्सर्वादेशः प्र
अत एव तस्मात्परस्यादेशिति नास्ति। तथाहि। अलोंऽत्यस्येत्यस्य द्वावपवादौ। आदेः परस्य। अनेकाल्शित्सर्वस्येति। तत्र प्रथम
स्यावकाशः। ईदासः। बहोर्लोपइति। आसीनः। भूयान्। द्वितीयस्यावकाशः। अस्तेर्भूरित्यादि। अतोभिसऐसित्यादेः सर्वादेश
त्वे सिद्धे रामैरित्यादिन चादेः परस्येत्यत्र अलइतिजसंतमनुवर्त्य रामैरिति साधनीयमिति वाच्यं। तथा सति भूयान् भूयेत्याद्यसिध्या
पत्तेः। तदेवं कार्यस्यांत्यस्यत्वनुपसंहारो व्याख्यातः। ङिच्चेत्यत्र संदर्भानुरोधात्। यद्वा षष्ठ्या एवायमनुपसंहारः। आस्था
नेयोगा षष्ठीसा त्यस्याल इति एतदेव कार्यं स्यात्... अत्र पक्षे ङिच्चेत्यस्यायमर्थः। यत्र ङिदादेशो विधीयते तत्र या षष्ठी सांत्यस्यालइति ए
वमग्रेपि ङिच्च। ङिदनेकालप्यंत्यस्य स्यात्। दश्चादश्च अनन्यार्थङित्वेषु नङादिषु चरितार्थमिति तातङः परेणानेकाल्शित्त्वेन
नसबाध्यते। नहूत्सर्गापवादयोर्युक्तो विप्रतिषेध इति चेत्सत्यं। सर्वादेशोपि तातङि गुणवृद्धिप्रतिषेधरूपप्रयोजनं संभाव्य
ते। तावता किं वृद्धिलब्धेन प्रवृत्तोयमपवादोप्यस्मिन्विषये उत्सर्गेण समकक्षतापन्न इति युक्तो विप्रतिषेधः। यद्वा एकदेशिन्यस्य

नेत्तरंति ह्रो स्तादितिवत्क्ङिः त्करणं गुणवृद्धिप्रत्तिषेधार्थमेवेत्तिप्रत्तिषेधोपपत्तिः। अस्तु वा विनापि विप्रत्तिषेधं सर्वादेशः प्रदर्शितस्य
गुणवृद्धिप्रत्तिषेधार्थत्वस्य सर्वादेशत्वामंत्तरेणानुपपत्तेः। आदेः परस्य।। परस्य यद्विधीयते तदादेर्लो बोध्यं। ईदासः। अत्र तस्मादि
त्युत्तरस्येत्ति उपत्तिष्ठते। तेनादेशिकारः। आसीनः। अनेकाल्शित्सर्वस्य।। अनेकाल्रादेशः शिच्च सर्वस्य स्यात्। अस्तेर्भूः। भविता। इद
मइशः। इतः। ङिच्चेत्ति नियमात्सिद्धे नेकाल्ग्रहणमपवादविप्रत्तिषेधार्थमित्युक्तं। यत्तु रत्निकोरेर्जसः शसः शित्ति शित्तउदाहरणं
दत्तं। तच्चिंत्यं। सर्वादेशत्वं विनात्र शित्वस्यैवालाभात्। सर्वादेशत्वा याश्चानुपूर्व्येणानेकाल्त्वेनैव णल्शादेशादिष्विव सिद्धत्वा
त्। तथाहि। णलुडाश्प्रभृतयो यदा सर्वादेशास्तदा प्रत्ययसंज्ञा ततः प्रत्ययादित्वप्रयुक्ता इत्संज्ञा ततो लोपस्तत एकाल्त्वेस
त्यपिन सर्वादेशत्वक्षत्तिः उपजीव्यविरोधापत्तेः। अत एव कर्त्तर्याद्येन सर्वादेशत्वेत्युक्तं। शकारेणानुबंधेन शप्रभृतीनामनेका
ल्त्वादेव सिद्धेश्शग्रहणं नानुबंधकृतमित्ति ज्ञापनार्थं तेन दिवउत्। अर्वणस्त्रसावनञः सर्वादेशत्वेत्ति बोध्यं। ननु कथं ज्ञापकता
घ्वसोरेद्धावभ्यासलोपश्चेत्ते तदर्थत्तया शग्रहणस्य चरित्तार्थत्वात्। तत्र हि लोपशः इत्ति छिद्यते। संज्ञायां च वृत्तशिलं तत्रानु
पयुक्तं सत्तु संज्ञि निफलत्तिङ्मुटच्छित्त्ववदित्ति चेत्सत्यं। अनेकांता अनुबंधा इत्तिपक्षे नानुबंधकृतमनेकाल्त्वमित्यस्य प्रयोजन
नाभावात्तदभिप्रायको लोपशित्ति च्छेदः इत्ति सिद्धांतः। एकांता अनुबंधा इत्तिपक्षे त्तु तत्र ऋत्या ज्ञापकमावश्यकं। घ्वसोरित्यत्र
त्र लोपशस्यैव च्छेदः। लोपो यीत्ति प्रवृत्ते पुनर्लोपग्रहणात्सर्वादेशः। वार्तिकमत्ते तु नानर्थके स्यैलोविधिरित्यनेनैव सिद्धेः। न वा

श्चि

म

नभ्यासविकारेष्विति निषेधस्यायं विषयः। लोपस्य विकारत्वाभावात्। रूपांतरापत्तिर्हि विकारः। तथा भ्रजाभित्यत्र अत्ति पिपर्त्योश्च
त्यादिः। अत एव पस्पशायां लोपो विकारात्पृथगुक्तः। लोपागमविकारज्ञो हि वेदं परिपालयिष्यतीति। तच्च पृषोदरादीनीति
सूत्रे कैयटेन। लोपोचापरे वर्णविकारज्ञा इति। वस्तुतस्तु उपदेशावस्थामेवाश्रित्य गतया इत्संज्ञा। अत एव उच्चारितप्रध्वंसि
तु नो वर्णाः स्मर्यमाणा एवसंतः कार्यं निर्वाहयंतीति सिद्धांतः। इदं चोत्तरसूत्रे कैयटे एव स्फुटं। तथा चादिवेऔत्। अर्वणस्तृ
त्यादेरेकालत्वादेकांतपक्षेपि न सर्वादेशता प्रसज्येत। एवं चानुबंधकृतमनेकाल्त्वमिति ज्ञापनं व्यर्थं। शिद्ग्रहणं चस्तुतरां
इदमइश्। इदं किमोरीश्की इति शिद्ग्रहणं तु शकारोच्चारणसामर्थ्यात्सर्वादेशतायां प्राप्नं लोपः। यत्तु इतेपि सर्वादेशे प्रयो
जनाभावात्सकारस्येत्संज्ञा न स्यादिति हरदत्तेनोक्तं तत्र लोपस्येव प्रयोजनत्वात्। न चैवमुच्चारणवैयर्थ्यं। सर्वादेशत्व
संपादनेन कृतार्थत्वादिति दिक्। तस्मादिह भाष्यकृतोरान्याय्यश्चिंत्यः। इहनानेकाल्शित्पठित्वा अंत्यस्यादेरिति चानुवर्त्य
अनुसंहारकृत्य निषेधे सर्वस्येति न्यायमकंतु॥ + सूत्र + ॥ इति श्रीकौस्तुभे प्रथमाध्यायस्य प्रथमे पादे सप्तममाह्निकं ॥

॥ ॥ इंदुनागर्षिकु १७८२ संख्याके शालिवाहनशाके याम्ये शुचौ वदि॥ द्वादश्यां जयकृष्णेन लिखितं समाप्तिं[illegible] ॥
दक्षिणायने भा पाठे कृष्णपक्षे

॥श्रीगणेशाय॥ सर्वादीनि सर्वनामानि ॥ एतानि सर्वनामसंज्ञानि स्युः तद्गुणसंविज्ञानोयं बहुव्रीहिः तस्यान्यपदार्थस्य गुणानां वर्तिपदार्थ
रूपाणां विशेषणानां कार्यान्वयितया संविज्ञानं यत्र स तद्गुणसंविज्ञानः । तत्र सर्व आदिर्येषां तानीति विग्रहः तच्छब्दप्रयोगेणान्यपदार्थ
प्राधान्यं लभ्यते एवं चित्रा गावो यस्य स इत्यादावपि अन्यथा हि यस्य गावश्चित्रा इति गोशब्दार्थप्राधान्यं स्यात् नचैवं विधेर्थे बहुव्रीहि
रिष्यते यत्तु वृत्तिवाक्ययोर्विशेष्यैक्यसंपत्तये चित्रा गावो यस्येत्यादिविग्रहवर्णनं मीमांसावार्तिके कृतं तन्न मुनिवचसामनु
कूलं अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति वार्तिककृता वक्ष्यमाणत्वात् भाष्यकृता च शेषो बहुव्रीहिरिति सूत्रे त्रिकतः शेषमाश्रित्य
सूत्राक्षरैरेवोक्तस्यार्थस्य साधितत्वात् द्वितीया श्रितातीतादिभिः तृतीया तत्कृतार्थेनेत्यादिक्रमेण द्विकाणां त्रिकाणां समासोक्तेः
तदपेक्षया शेषः प्रथमारूपस्त्रिकः तस्यैव बहुव्रीहिः स्यादिति वृत्ते देवेन गन्तव्यादेरिव चित्रा गावो यस्येत्यस्यापि दूरापास्तं बहुव्रीहित्वं । किंच
मत्वर्थे बहुव्रीहिरिति कात्यायनवचनात् कथं चित्रा गावो यस्येत्यत्र तत्प्रसक्तिः । ननु दंडी स्यादावपि दंडः स्यास्येति विग्रहाभ्युपगमा
त्स्यद्दीसा अप्रथमैव मत्वर्थ इति चेत् तर्हि सुतरां मुनिवचनविरोधः तदस्यास्त्यस्मिन्निति सूत्रे प्रथमांतात् स्यादुपाधिकात्सम्बन्धिनि मतुब्
विधानात् सप्तम्यर्थो नां प्रथमाद्वेति सूत्रेण प्रथमानिर्दिष्टस्यैव प्रकृतित्वावधारणाच्च । नन्वेतान्यपि सूत्रवार्तिकभाष्यवचांसि कृ
थं चित्त्वयं न्याय्यमेति चेत् समर्थः पदविधिरित्यादीनि व्रीहिर्मियजने तेत्यादिषु पदविधिभिन्नेष्वपि योजयित्वा सामर्थ्यं च भाष्या
दिसंमतां विपरीतमेव वर्णयन् भवादृशो निरंकुशः किं किं न कुर्यात् किं तु व्याकरणाधिकरणे सिद्धांतितं व्याकरणप्रामाण्यं कथं स्वेच्छया व्या
कुलयसीति परं पर्यनुयोगे समाधानं विभावय । तस्माच्चित्रा गावो यस्य स इत्येव विग्रहः सकलशिष्टसंप्रदायसिद्धो मुनित्रयवचसाम

प्रा

451

क्रणांतो दान्तपूर्वपदस्त्वर्थः ५

स्वरेण विलक्षणानां सरूपाणां मध्ये उत्तरस्य सूत्रेण यस्य स्वरविधिः संज्ञिष्यते ऽ
कर्मधारयः समासस्ये स्वतोदान्तः बहुव्रीहिस्तु बहुव्रीहौ प्रकृत्या पूर्वपदमि ऽ

इति २

सा॰ कौ॰ १

॥२॥

नुकूलश्चेतिदिक्॥ आदिशब्दस्यावयववाचित्वाद्बहुव्रीह्यवयवभेदः समुदायः समासार्थः॥ तस्य च समुदायस्यायुगपल्लक्ष्ये प्रयोगाभावा
दनार्थक्यात् तदंगेष्विति न्यायेन तदवयवेषु प्रवर्तमाना सर्वनामसंज्ञा। प्रविशेषात् सर्वशब्देपि प्रवर्तते युक्तं तद्गुणसंविज्ञानत्वं हलि
सर्वेषामित्यादिनिर्देशाश्चेह लिंगं। न च त्विष्टाद्यः षष्ठीति सचे लुग् अक्षरति योगं विभज्य ज्ञसेः संज्ञाविधानसामर्थ्यादेव इत्यारपर
त्यतद्गुणसंविज्ञानो नबहुव्रीहिः एतेन कृतं तेभ्यः कृष्णादिभ्यस्तु भयत्वात् पिशाचत्वशब्दसंग्रहार्थं यथा तत्पुरुषबहुव्रीह्योरेकदे
शरति चतुर्थे वक्ष्यते तथेहापि नपुंसकमनपुंसकेनेति वा स्वरे भिन्नानां पत्योत्तरः स्वरविधिः। संज्ञिष्यत इति वा तत्पुरुषबहुव्री
ह्योः सह विवक्षायां बहुव्रीहेः शेषरतियरास्त। तद्गुणसंविज्ञाननबहुव्रीहित्वेव सर्वशब्दस्यापि संग्रहे सिद्धे एकशेषाभावात्स्य
गौरवपरिहृतत्वात् महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं सर्वेषां नामानीति तत्सामर्थ्याच्च सर्वाभिधानसामर्थ्यविशिष्टाना-
मेव संज्ञित्वमनुमीयते। तथा च तथाभूतानां गणतो पाठस्यावश्यकत्वात् प्रकारान्तरेणुषां च पाठे प्रमाणाभावाद् दैवविशेषे व्यवस्थितानां
संज्ञानामुपसर्जनानां च सर्वादित्वमेव नास्ति। तेन तेषां गणकार्यं संज्ञाप्रयुक्तकार्यं चेत्युभयमपि न भवति। गणकार्यं यथा। स
दादीनामः तद्नामकः कश्चित्। अतिक्रान्तस्त्वम् अतितत्। तथा। अकतरादिभ्यः। अन्यमतिक्रान्तं अत्यन्यं। अतिकतरं। संज्ञाप्रयुक्तं यथा।
सर्वनाम्नः स्मै। अतिसर्वाय। तदेतदभिप्रेत्योक्तं वार्तिककृता। संज्ञोपसर्जनप्रतिषेधः। पाठात्पर्युदासः पठितानां संज्ञाकरणमिति।
यत्तु स्वरूपमात्राश्रयणं कार्यं। न तु गणपाठसंज्ञा
तस्मात्प्रसिद्धं न प्रवृत्तिनिमित्तेन प्रयुक्तस्तत्प्रत्ययनुपसर्जनीभूत एवेह संज्ञीति स्थितं। न चैवमुपाध्युपपदे रत्यादावपि तन्मादिप्रसंगः। लो
वा अपेक्ष्यते। यथा युष्मदस्मदोः सोरर इत्यादि तदुपसर्जनेपि भवत्येवेत्यवधेयं।
न

षष्ठीतत्पु॰
कर्मधारयः

शुद्धानां संज्ञोपसर्जनभिन्ना
ना

॥११०॥

कृप्रसिद्धार्थपरतायामेव तत्प्रवृत्तेः । अभिव्यक्तपदार्था ये इति न्यायात् । तदंतग्रहणमत्र बोद्धव्यं द्वंद्वे चेति ज्ञापकात् । तच्च तत्रैव वक्ष्यते । प्रयोजनं सर्वनामाव्यय
संज्ञायां इति वार्तिकवचनाच्च तेन परमसर्वतः । परमसर्वत्र परमसर्वके इत्यत्र समस्तात्तसिल् त्रल् अकच्च सिध्यति । न च तसिलादि विधौ प्रातिपदिकादि
त्यनुवृत्तेः सर्वनाम्नाश्चात द्विशेषणे तदंतविधिर्भविष्यतीति वाच्यं । समासप्रत्ययविधौ न तदंतविधिरिति निषेधात् । न चैवमतिसर्वाये स्यादावतिप्र
संगः । उपसर्जनपर्युदासस्योक्तत्वात् । अत एव परमसर्वस्मा इत्यसौ स्मायाद्यो भवंत्येव । स्यादेतत् । भ्रसः अतस्मिन्नैष इत्यसावपि अत्सतस्मिन्नादौ
मिनस्तु । अतिसर्व इत्यत्रैवोपसर्जनत्वात् । तथा च अब्राह्मण इत्यादौ ब्राह्मणभिन्न इत्यादिकमेव पूर्वपदार्थप्राधान्येन विवरणं कुर्वंति । सत्यं । नैया
करणमतेन नञ्समासस्य उत्तरपदार्थप्राधान्यमेव । नञ्सूत्रे भाष्यकारेण तथैव सिद्धांतितत्वात् । तथा हि । आरोपितत्वं नञर्थः । तथा च गामपामनुष्य
मायामृगव्याजनिशाकररूपरब्राह्मणादिशब्देभ्यस्त्व आरोपितो मिथ्याभूतो यं ब्राह्मण इत्येवं शाब्दबोधपर्यवसाने ब्राह्मणभिन्न इत्यादि कमा
र्थिकार्थविवरणं न तु शाब्दोयमर्थः । अत एव नञ् दोऽरितिसूत्रे । नञ्समास इति सार्थकं । अत एव औत्सर्गिकी तत्पुरुषस्योत्तरपदार्थप्राधानतापि नि
र्वहतीति दिक् । ननु यदीह तदंतविधिरिष्टस्तर्हि भाष्यविरोधः । तत्र हि संज्ञोपसर्जनप्रतिषेध इति वार्तिकस्य प्रत्याख्यानेनमुपपन्नस्य अर्थद्वारकं विभ
क्ति विशेषणमाश्रित्यातिप्रसंग उद्धृतः । सर्वनामार्थसमवेतसंख्याद्वारकत्वाद्यभिधायिनोऽतः स्मैस्यादि स्यादिना । उक्तरीत्या तदंतविधौ सति तु अति
सर्वायेत्यादौ समुदायस्य सर्वनामतयार्थद्वारकविभक्तियोगाश्रयणे पि स्मायादिप्रसंगस्तदवस्थ एव स्यादिति चेत् सत्यं । अत एवापरितोषात् भाष्य
अथवा महतीयं संज्ञा क्रियत इति पक्षांतरमुपन्यस्यते स्वैर्मिति गृह्णाण । ननु यदीह महान्वर्थसंज्ञा तर्हि पूर्वपदात्संज्ञायामग इति णत्वं स्यादिति चेत् सत्यं । अत एव
निपातनाण्णत्वाभावः सर्वत्वं तु रूपमसाध्येव निपातनेन णत्वशास्त्रस्य बाधितत्वात् । अत एव शाश्वतिक इत्याद्यप्यसाध्येव येषां च विरोधः शाश्वतिक इति
निपातनेन ठकुल सुगंतादि स्वरस्य बाधितत्वात् । नन्वेवमपरस्पराः क्रियासातत्य इति निपातनेन संततशब्दो बाध्येतेति चेन्न । तत्र सातत्यांशस्यैव नाकदेशानुमति
द्वारा लुप्येदवश्यमः स्वेरिति पूर्वाचार्यपठितस्य श्लोकस्यैव ज्ञापनात् । नन्वेवमपि पुराणप्रोक्तेषु ब्राह्मणकल्पेष्विति पुराणशब्देन पुरातनशब्दस्य बाधः प्राप्नोति ।

एव

त

ने

ण

॥श्र·कौ·६॥
॥२॥

निपातनानीति भाष्ये स्थितं यद्वा नेदं संज्ञासूत्रं किंतु गणशुद्धिमात्रफलकं। यानि सर्वनामानि तान्येव

सत्स्वं पृषोदरादिषु पुरातनशब्दस्य पाठो बोद्ध्यः आगमशास्त्रस्य अव्ययपटिलोपस्य चानित्यतामात्रं पुराणेति निर्देशेन ज्ञाप्यत इति तत्त्वं तदेव बाधकान्येवं सर्वादीनि न सिद्धराण्यपीति व्याख्यानात् यथातिङ्ग्मोन्द्रादीनि कुत्सनाभीक्ष्ण्ययोरिति सूत्रे कुत्सनाभीक्ष्ण्ययो रिति योगं विभज्य गोन्द्रादीन् नेत्यनुवर्त्य एतयोरर्थयोर्यानि वर्तन्ते तान्येव गोन्द्रादीनीति गणशुद्धिपरतया व्याख्यास्यते तेन च नचि दिवगोन्द्रादित द्विताम्रेति थगते: कुत्सने च सुप्यगोत्रादाविति सूत्रयोरपि विशिष्टार्थानामेव गोन्द्रादीनां ग्रहणं तथेहापि। ननूक्त रीत्या त्यदादीनामदस्याद्यतर्गणकार्यं सिध्यतु। सर्वनाम्नः स्मैड्स्यादिकं तु कृत्स्नसकलादिशब्देषु सति व्यानंस्यादिति चेन्न गणपाठसामर्थ्यादीनामेव ग्रहणात्। एतावानेव हि भेदो यत्सूत्रोक्ते पक्षे संज्ञा विधेया। गणशुद्धिस्तु आर्थिकी। अस्मिंस्तु पक्षे गणशुद्धिः शाब्दी। कृत्स्नादिव्यावृत्तिस्तु अर्थादिति। अथवा उभयमनेन क्रियते। पाठशुद्धिः संज्ञा च। तत्राद्यर्थविकल्पे कृत्स्नानामन्यतमाश्रयणात्। तत्र सहविवक्षां विना व्यावृत्तिस्तु अर्थादिति। अथवा उभयमनेन क्रियते। पाठशुद्धिः संज्ञा च। तत्रावृत्त्येकशेषाणामन्यतमाश्रयणात्। तत्र सहविवक्षां विनापि वाच निवर्तकशेषः आवृत्तिपक्षे हि प्रत्याख्यातेसरूपसूत्रं रकोगुणवृद्धी इत्यादिवच्छास्त्रप्रक्रियार्थसत्सहविवक्षां विनाप्येकशेषं विधत्ते। विशिष्टरूपो तदित्थं पंचापि पक्षाः स्थिताः संज्ञाभूतानां व्यावृत्तिस्तु गौणमुख्यन्यायेनापि सिध्यति। न चासौ पदकार्ये द्वे इति वाच्यं। विशिष्टरूपो पादानेन सर्वत्र तत्प्रवृत्तेरिति सपपादितमोत्सर्गेन वार्तिककरीत्या तु गणसंज्ञाधिकारे सर्वनामसंज्ञानंतरमेकद्रव्याभिनिवेशानी संज्ञेति संज्ञा संज्ञया सर्वनामसंज्ञा बाध्यते तस्यापि समाधानान्तरं बोध्यं। यद्वा। पूर्वपरावरेति गणसूत्रे असंज्ञायामिति योगं विभज्य पूर्वोत्तरयोः संज्ञया सर्वनामसंज्ञा बाध्यते तस्यापि समाधानान्तरं बोध्यं। तस्मादुपसर्जने न व्यावृत्तिरेवानर्थसंज्ञाश्रयणस्य मुख्यं प्र देशो व्याख्येयः। उक्ताः सर्वादिव्यवस्थमाणाः स्वार्थमसंज्ञायामिति। तस्मादुपसर्जने न व्यावृत्तिरेवानर्थसंज्ञाश्रयणस्य मुख्यं प्र योजनं। तद्यथा। अनुपसर्जने नेति लुप्तषष्ठीकं पदं। ननु अनुपसर्जनादिति योगं प्रकारान्तरेण व्याख्यायत इत्यलेनैव तद्गणकार्यं वारितं भाष्ये।

तत्र पठिता

यो

अ आदिति च्छेदः अच्च अत् च तयोः समाहारः। आत्। अकारान्तस्य अमत् इत्यादेशो यत्र क्रियेते तत्र अनुपसर्जनस्य ग्रहणमिति परिभाषार्थः
तेन स्वदाघते अदृतराटिम्य ह्रस्वद्दभावश्च गौणत्वान्न भवति। अकारान्तस्य तेन विशेषणं किं। पंचम्या अत्। युष्मानतिक्रान्तेभ्यो अतियुष्मात्
एकवचनस्य। युष्मानतिक्रान्तादिति युष्मात्। नस्य मकारान्तस्य न विधीयते इति। तथा चोपसर्जने भ्यावृत्ते रयुष्म्यथा सिद्धे किं। महासङ्
ख्येति चेत् अतिसङ्ख्येत्यादिवारणस्य तरेकसाध्यत्वात्। नहीदमनुपसर्जनादिति नेन साधयितुं शक्यते। एतदपरितोषादेव भाष्ये पक्षान्तराश्रय
णमिति दिक्। एवं चानुपसर्जनादिति सूत्रपरिभाषा तेनापि नोपपद्यत इत्यथोक्तम्याख्यातमेव भवतीत्यवधेयं। स्यादेतत्। कौम्भकारेय सिद्धये सू
त्रेपारम्भणीयं। तत्र हि कुम्भकारीशब्दादेव ढगुत्सारयितव्यः। अन्यथा कुम्भेत्युकारस्य वृद्धिर्न स्यात्। तथा च विशिष्टरूपस्त्रीप्रत्ययान्तात्प्येष्टव्यः। सा
चतदेव निर्वहति। यदि दिङ्गुणमिति सूत्रे प्रत्ययग्रहणपरिभाषया अणिन्त्यनेनाङ्गग्रहणेन च प्रातिपदिकविशेषणात् तदन्तान्तं प्रवृ
त्तिः स्यात् तत्र समासप्रत्ययविधौ प्रतिषेध इति ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नेति च प्रतिषेधात् दुर्लभमनुपसर्जनादिति
उपसर्जननिषेधसामर्थ्यात् प्रधानेन तदन्तविधौ ज्ञापिते कौम्भकारेयः सिध्यतीति स्पष्टमेव। न च ङ्याब्ग्रहणेन गतिकारकपूर्वस्यापीति प
रिभाषया कुम्भकारशब्दादेव स्त्रीप्रत्ययोऽस्तीति वाच्यं। अणिति तद्धितो विगृह्यते। औपगवीति यथा। ङ्याब्ग्रहणे इति परिभाषानु सूत्रमात्र
ग्रहणेऽप्रवर्तते न ङ्याब्ग्रहणेऽपि। एवमर्थमेवेदं सूत्रमिति भाष्यकृतैव चतुर्थे स्थापयिष्यते तत्कथमिह गौणमनुपसर्जनादित्ययं यो
गः प्रत्याख्यायत इति। अत्रोच्यते। चतुर्थे सूत्रकाराभिप्रायवर्णनमात्रं करिष्यते। निष्कर्षे तु क्रियमाणे सूत्रेऽनेन यथार्थमेवायातीत्याशा

श·कौ०६
॥२॥

उः

येनेह भगवता नं प्रत्याख्यायत इति। तथाहि। कारीषशब्दात् ङीबुत्सत्तावपि कैश्चिदकारेप। सिध्यत्येव। ष्यङः संप्रसारणमित्यत्र भाष्यकृ
ता पठिष्यमाणया वाचनिक्या स्त्रीप्रत्यये चानुपसर्जने नेति परिभाषया अनुपसर्जने स्त्रीप्रत्यये तदादिनियमनिषेधेन कुमकारी
शब्दात् ङ्युत्पत्तेः। अतएव हि परमकारीषगन्धीपुत्र इत्यत्र ष्यङः तस्योच्यमानं संप्रसारणं परमकारीषगन्ध्याशब्दस्यापि भवत्येव। नचैव
मतिकारीषगन्ध्यपुत्र इत्यादावपि प्रसंगः। अनुपसर्जने इत्युक्ते नोपसर्जने तदादिनियमसत्त्वात्। नचैवमधिपिप्पलीत्यादौ हल्ङ्या
दिलोपो न स्यादिति वाच्यं। हल्ङ्यादिसूत्रे दीर्घग्रहणसामर्थ्येन तत्रोपसर्जने नापि तदादिनियमो नास्तीति ज्ञापितत्वात्। वस्तुतस्तु
निष्कौशाम्ब्यादेः समुदायस्याङ्यन्तत्वेऽवयवस्याङ्यन्ततया ततः परस्य सोर्लोपे प्राप्ते नैतत् ज्ञापकं। अर्द्धपिप्पल्यादावप्येवमवयस्य
ङ्यन्ततयैव निर्वाहः। नच तत्र विहितविशेषणतावश्यंभावात्। याज्ञेत्यादावप्राप्तेः। नचतत्र हल्ग्रहणादिति तत्त्वेन निर्वाहः। कुमारी इत्यादावेल्लो
पप्राप्तेः। पः स इत्यादौ लोपापत्तेश्च। यद्वा। सुतिसीति प्रत्यये प्रकृतिराक्षिप्यते। हल्ङ्यादिसूत्रे कैयटं ग्रन्थनिर्वाहाय चित्रशोत तथैव वर्णनात्। ए
वं च ज्ञापकं सुस्थं। एकदेशस्याप्रवृत्तित्वात्। अतएव पंचमस्मात् सोर्गोस्त्रियोरुपसर्जनस्येति सूत्रे च कैयटेन ज्ञापकत्वपक्ष एवोक्तः। ननु यथापि
मालादेश्त्याहो समुदायादाबन्तत्वप्रयुक्तः सुः स्यात् तथैकदेशेऽकस्वर्थ्ये प्राप्तिः। एकवाक्यतया विधिरिति पक्षे विपचतिकल्पमित्यादिसिद्ध
येनदवचनमुत्सर्गस्यस्याबश्याश्रयणीयत्वादिति चेन्न। ङ्याब्ग्रहणस्यान्यार्थतया पथाकथंचित् प्रातिपदिकग्रहणेन ङ्याबन्तत्वात्।
सुब्लुक्तेश्च वक्ष्यमाणत्वात्। इह च समुदायस्य प्रातिपदिकत्वात्। अर्थवत्समुदायानां समासग्रहणं नियमार्थं नियमार्थमिति हि स्था

ग्रहणे लिंगविशिष्ट

ये

पि

प

456

स्यति। न चैवमपि कदाचित्कारीशब्दात् टक्स्यादेवेति वाच्यं। एकाज्द्विर्वचनन्यायेन समुदायादेवोत्पत्तेः। कुंभेनैकार्थभूतस्य निष्कृष्य भयस्येन प्रयो
गइतिवत्कुमराकष्टत्वाच्च। किंच। सूत्रमारभमाणस्याप्येषैव गतिः। औपगवी स्याद्वा विवेके बहुना कारशब्दादपि कदाचिन्ङीप्प्रसंगेन कुंभ
कारेये पाक्षिकदोषस्य तत्सत्वेपि तुल्यत्वात्। स्यादेतत्। अक्रियमाणेस्मिन्सूत्रे कुंभकारीत्यत्र ङीबेव स्यात्। कुंभेनैकार्थभूतस्याणन्तस्य स्त्रीत्वे
नायोगात्। यस्य च स्त्रीत्वेन योगो विशिष्टस्य न तदणंतं। तस्मात् महत्सूत्रविहिति निषेधेन ज्ञाप्यमानस्तदंतविधिरुत्तरत्राप्युपगंतव्यः। स च
यथा पूर्वे चोपसर्जने नापि भवति। न षट्स्वस्रादिभ्यः। प्रियपंचा द्रौपदी। न नोरच। अतिथी वरीति। तथा टिदादावपि स्यात्। ततश्च बहुकुरुच
रेस्यादावतिप्रसंगः। अतो निषेधसूत्रमिदं सार्थकं। ननु पूर्वे ज्ञोपात्तं तदंतं च स्त्रियामित्यनेन विशेष्यते। टिड्ढाणञित्सादौ तु उपात्तं टिदा
दिकमित्येव। तेन बहुकुरुचरे स्यादौ टिदादेरस्त्रीत्वान्न ङीप्। कुंभकारीस्यादौ त्वणन्तस्य स्त्रियां वृत्तेस्तदंतादपि ङीब्भविष्यतीति चेन्न।
एतद्विषयविभागस्य दुरूहत्वात् तद्ज्ञानार्थमेव सूत्रारंभस्योचितत्वादिति। नैतदेवं। आरब्धेप्यस्मिन्सूत्रे व्याख्यानस्यैव शरणीक
रणीयत्वात्। अमथा पंचाजीत्यत्र अजा नाम स्त्रीत्वेपि तदंतस्य स्त्रियां वृत्त्या टाप्प्रसंगात्। अतो विशेषणविशेष्यभावं प्रतिकाम्य चा
रादृशाद्यतष्टाविसत्र टिड्ढाणञित्सादौ चोपात्तं स्त्रीत्वेन विशेष्यते। वयोरन्ये सादौ तूपात्तं तदंतं चेति सकलेष्टसिद्धेः सूत्रं व्यर्थमे
वा। स्यादेतत्। तदंतविधिज्ञापनार्थमेवेदं सूत्रमारंभणीयं। न चाम महत्सूत्रैर्वैत्यने नैवेतत्सिद्धिरिति वाच्यं। तस्य ज्ञापकत्वायोगा
त्वा पंचाजीसादिसिध्यर्थं अजादिभिः स्त्रीत्वं विशेष्यत इति हि वक्ष्यते। तथा च महाभाष्ये यत्र समुदायस्य स्त्रियां वृत्तावपि अवयव
स्यात्तथात्वे न सत्यपि तदंतविधौ टाप् प्राप्नोतीति कथं तदंतविधिं ज्ञापयित्वा निषेधः पर्यवस्येत्। मैवं। इतरेतराजादिभिः स्त्रीत्व

॥शू॰कौ॰॥१६॥

॥७॥

मा

विशेषणेऽपि भूयस्त्वेना विशेषणात्। एवं च स्वरूपमेव ज्ञापकरूपपर्यवसानं। न चैवं पञ्चभूद्वीस्वेऽपि प्रसंगः। अतिरिक्तेनेन भूयस्य विशेषणात्।
पूर्वसूत्रनिर्देशोऽपि वा शास्त्रमधीत इतीति कात्यायनोक्तरीत्या सूत्रं सार्थकं। तथाहि। अप्रधानमुपसर्जनं। तथैव पूर्वाचार्यसूत्रेषु लोके च व्य-

स्यादेतत्

वहारात्। तत्तश्चापिशलिना प्रोक्तं। इञश्चेत्यण्। ततोऽध्येत्र्यां तदधीत इत्यण्। तस्य प्रोक्ताल्लुगिति लुक्। आपिशला ब्राह्मणी। अत्र प्रोक्तः स्वार्थे
णोऽप्रधानत्वात्तदन्तान्ङीप्। अत्यो अप्रधानमिति विशेषणात्। न चैवमप्यध्येत्र्यामुपसर्जनत्वाण्णोऽनुपसर्जनयात्तदन्तश्च यो ङीप् स्यादेवेति वाच्यं

कारः

तस्य लुप्तत्वात्। न च प्रत्ययलक्षणं शक्यं। वर्णाश्रये तन्निषेधात्। टिड्ढाणञिति सूत्रस्थ तस्यानुवर्तते। अणा च अकारो विशेष्यते। अण्यो अकार इ-
ति। ननु विपरीतो विशेषणविशेष्यभावः। वर्णस्याप्राधान्ये प्रत्ययलक्षणापत्तेः। अनृतो ङित्सूत्रेण हस्वत्। ननु स्त्रियामित्यनेनाणो विशेषणा-
णोऽत दोष इति चेन्न। काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी। तामधीते काशकृत्स्ना ब्राह्मणी। अत्र द्वितीये णिः प्रोक्ताल्लुगिति लुगप्रथमोऽप्यण्
स्त्रियामेवोत्पन्न इति तदन्ताद्धस्वान्त्यावर्तमानान्ङीप्रसंगात्। तस्मात्प्रधानाद्यथा स्यादप्रधानान्माभूदित्येतदर्थमारंभणीयं सूत्रमिति। अत्रो-

स्वेति

च्यते। अध्येत्र्यामभिधेयायामणीकारेण भवितव्यं। यश्चेहाध्येत्र्यामणुत्पन्नः स लुप्त एव यश्च श्रूयते तस्मादीकार उत्पन्नो लुप्तः पुनर्न भवति।
सत्वक्लृप्ता लक्षणस्य चरितार्थत्वात्। तस्मादनुपसर्जनादित्ययं योगः प्रत्याख्यायत इति भवेगर्दुक्ति निर्बाधैवेति दिक्। सर्वादयश्च पञ्चत्रिंशत्
सर्व। विश्व। उभ। उभय। डतर। डतम। अन्य। अन्यतर। इतर। त्वत्। त्व। नेम। सम। सिम। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां।
स्वमज्ञातिधनाख्यायां। अंतरं बहिर्योगोपसंव्यानयोः। त्यद्। तद्। यद्। एतद्। इदम्। अदस्। एक। द्वि। युष्मद्। अस्मद्। भवतु। किम्। इति तत्र शब्दे

सर्वे विश्व

हल्लनपर्यायो। सर्वशब्दस्य स्वांगशिटामित्याद्युदात्तत्वे प्राप्तेऽन्तोदात्तत्वं गणे निपात्यते। तेन सर्वेषां विकार इत्यत्रानुदात्तादेरञ् सिद्धः। सत्यनुदा-

तादिप्रवृत्तिका द्विधीयतइति ज्ञापकसूत्रे भाष्ये स्थितं। प्रयोगे सर्वस्य सुपीत्याद्युदात्तएव। उभशब्दो द्वित्वविशिष्टस्य वाचकः। अतएव नित्यं द्वि
वचनांतः। यद्येवं तर्हि किमर्थमसौ सर्वादिषु पठ्यते। नत्वत्र स्यायादयः संभवंति। काकचोस्तु नास्ति रूपे स्वरे वा विशेषः। अवग्रहस्तु
कप्रत्ययेपि पदकारैर्न क्रियते। चित्रकद्रूजाराजकाद्दन्यवेद्वत्यादौ तथैव निर्णतत्वात्। ननु उभाभ्यां हेतुभ्यामुभयोर्हेतोरित्यत्र सर्वनाम्न
स्तृतीया चेति पाक्षिकतृतीयासिध्यर्थं इह पाठ इति वाच्यं। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति वार्त्तिकेन गतार्थत्वात्। नच वृत्ति
कृता सर्वनाम्नस्तृतीया चेति सूत्रे पठितत्वादिदं वार्त्तिकमपि सर्वनामसंज्ञासापेक्षमेवेति वाच्यं। भाष्ये हेतौ इति सूत्रे तस्य पठितत्वात्। अत
एवान्नेन कारणेन वसति अन्नस्य कारणस्येत्युदाहृतं हरदत्तेन। उच्यते। उभशब्दस्तावद्द्विवचनमात्रविषयः। वृत्तौ तु द्विवचनलोपान्नासौ प्रयु
ज्यते। उभाभ्यां पक्षाभ्यां विनीतं निर्वीतिविग्रहे। उभयपक्षेत्यादिप्रयोगदर्शनात्। कथं तर्हि उभस्थाने उभयशब्दसिद्धिरिति चेत्। इत्थं। उभादु
दात्तो नित्यमित्यत्र उभादिति योगो विभज्यते। अवयवे वृत्तेः संख्यावाचिन उभशब्दात्स्वपविन्यर्थे अयच् स्यात्। उभयो मणिः। ततो नित्यं। उभशब्दा
द्वृत्तिविषये नित्यमयच् स्यात्। अनिर्दिष्टार्थास्वार्थे। तदेतदुक्तं वार्त्तिककृता। उभयोन्यत्रेति। एवं स्थिते उभयत उभयत्रेत्यादावकच्प्रत्ययेपु
भयएव प्राप्तः। अकचि तु उभकौ विप्रादिः सिध्यति। नचेहाप्युभय इति स्यादेवेति वाच्यं। अकजर्थं सर्वादिषु पाठेन अयचो बाधात्। अन्यथा पाठवैयर्थ्या
पत्तेरिति दिक्। स्वांगशिटामदंतानामित्याद्युदात्तार्थः पाठ इति तु न युक्तं। गणे एवांतोदात्तस्य निपातस्य मानत्वात्। अन्यथा उभे भद्रे जोषयेते। उभाउ
नूनं। उभाभ्यां देव सवितः। तयस्य तउभयो नृम्णमयो रित्यादौ आद्युदात्तप्रसंगात्। उभयशब्दस्तु अवयववृत्त्यारब्धो अयच् विनिवर्तते। उभयो मणिरि
तियथा। ह्यमलोहिताभ्यामवयवाभ्यामारब्धत्वसर्थः। तिरोहितावयवभेदस्यादिरेकवचनं। उभयमेव वदंति मनीषिण इत्यादौ तु समुदायिद्वयपरिसंधः

॥श्री·को०६
॥५॥

तु समुदायोऽर्थः। तिरोहितावयवभेदत्वं तुल्यमेव। यदा तु वर्गद्वयारब्धे महासमुदाये वर्तते तदा वर्ग्यभिन्नेन वर्गद्वयेन सह भेदविवक्षया उद्भूतावय
वभेदत्वाद्बहुवचनं तत एव। उभये देवमनुष्याः। तस्य भिन्ना अपि भिन्ना इति ये च ये च उभये नृपा इति यथा। यदा तु प्रागुक्तरीत्या उभयो मणी इति
व्युत्पाद्युताद्दशमेव प्रत्ति द्वयं स्यात् विवक्ष्यते तदा एकशेषेण द्विवचनं प्राप्नोति। अनभिधानात्तु न भवति। तथा च तद्धितश्चासर्वविभक्तिरिति सू
च त्रे हृत्तद्धितानां ग्रहणं पाठे इति भाष्यमवतारयन् कैयट आह। उभयशब्दस्य द्विवचनानुसारादसर्वविभक्तित्वमिति। हरदत्तस्तु तस्मिन्नेव सू व
न त्रे उभयशब्दाद्द्विवचने भंगी सूत्रपाठाश्रयणं तु पचतिरूपं पचतिकल्पमित्यादावतिप्रसंगं वारयितुमित्याह। इह अयजादेशस्य स्थानिव
द्भावेन तयप्प्रत्ययान्ततया प्रथमचरमेति सूत्रेण जसि विभाषा प्राप्नोति। व्यवस्थितविभाषया पूर्वप्रतिषेधेन वा नित्यमेव जसि
सर्वनामतेति केचित्। विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वात् नित्यसंज्ञया बहिरङ्गा वैकल्पिकी बाध्यत इति तु सिद्धान्तः। नवेति विभाषेति सूत्रे
त भाष्यकारस्त्वाह। अयच् प्रत्ययान्तरमेव न त्वसौ तयपः स्थानादेशः। उभादुदात्तो नित्यमिति सूत्रे तयपो नानुवृत्तेः। अयच एवानुवृत्तेः। न चैवं उभयी इत्य
त्र टिड्ढाणञिति सूत्रेण तयबन्तत्वप्रयुक्तो ङीप् न स्यादिति वाच्यं। तत्र मात्रच् इति मात्रशब्दात्प्रभृति अयच्पर्यन्तस्य चकारेण प्रत्याहारग्रहणात्
एवं च तयब्ग्रहणमपि तत्र न कार्यं। यद्वा सञिति प्रत्याहारः। तथा च दघ्नच्मात्रचोरपि न ग्रहणं कर्तव्यमिति महदेव लाघवं। वस्तुतस्तु
द्वय प्रमाणे मात्रच् द्वयसज्दघ्नचाविति पाठ्यमिति भाष्याशयः। तथा च ततोऽपि लाघवं। न चैवं कृतिस्त्रियपरत्वात्रातिप्रसंगः। अन्तरस्यानुवृत्तेः। न षट्
स्वस्रादिभ्य इति निषेधाद्वा। न चैवं तैलमात्रेत्यादावतिप्रसंगः। सह इत्यस्याप्यस्य प्रत्याहारे असंनिविष्टत्वादिति। अत्र कश्चित्। उभयेत्य

थे परो निर्देशः। तेन व्यर्थानां द्वयेषामपि मेदिनीभृतामिति माघप्रयोगः समर्थितो भवतीत्याहुः। तन्न। अर्थपरत्वात् पाञ्चवृत्तिकाराद्यभियुक्तवचना
नुपलम्भात्। महाकविप्रयोगबलादेवेदं कल्प्यत इति चेन्न महाकविभिरेव तद्विपरीतस्य बहुशः प्रयोगात्। तथा च माघः। गुरुद्वयाय गुरुणोरिति।
कालिदासोपि। अस्मिन्द्वये रूपविधानयत्न इति। श्रीहर्षश्च। अयेममोदासि तमेव जिह्मया द्वयेपि तस्मिन्ननतिप्रयोजन इति। तस्माद्द्वयं द्वैधं रहणं
ति गच्छतीति द्वयेषः। तेषां द्वयेषामिति रघोः क्लिष्टं तस्य रूपं बोध्यं। यत्तु कश्चिदाह। शाकटायनव्याकरणे द्वयशब्दस्यापि सर्वनामताभ्युपगमा
न्नद्वीत्यायं प्रयोग इति। तदपि न। मुनित्रयमतेन साध्वसाधुविभागः। तस्यैवेदानीन्तनशिष्टैरङ्गीकृतया परिगृहीतत्वात्। द्वयपदे हि नियत
कालास्मृतयः। यथा कृतेतु पाराशरस्मृतिरित्यादीति शालाद्यन्यतावशात्। तिसृष्वेव सर्वैकवाक्यतया सिद्धान्तितत्वात्। उतरउतमौ प्रत्ययौ। यद्यपि सं
ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति तथापीह प्रयोजनं सर्वनामाव्ययसंज्ञायामिति वार्त्तिकस्तदन्तविधिः। केवलयोः संज्ञायां प्रयोजन
नाभावाद्। अन्यो भिन्नः। अन्यतमान्यतमशब्दावव्युत्पन्नौ स्वभावाद्बहुविषये निर्द्धारणे वर्त्तेते इति पस्पशायां कैयटः। तत्रान्यतमशब्दस्य ग
णे पाठाभावान्न सर्वनामकार्य्यं। नाप्यड्डतरादिभ्य इत्याद्यतरगणकार्य्यं। तथा च प्रयुज्यते। न तावत्सामान्यादिष्वन्तमन्तम इति। शाकटायनस्तु
अन्यतरान्यतमयोः इतरइतमान्तौ व्युत्पादितवान्। तन्मते त्वन्यतरशब्दपाठस्य नियमार्थत्वादन्यतमशब्दो न गणकार्य्यं सर्वनामसंज्ञाकार्य्यं च
न लभत इति तद्व्याख्यातारः। इतरस्त्वन्यनीचयोरित्यमरः। त्वत्व इति द्वावप्यदन्तावन्यपर्य्यायौ तत्रैक उदात्तः। अपरोनुदात्तः। एतं त्वं [illegible]
भिस्युदात्तस्य प्रयोगः। उत त्वः पश्यन्नित्यादिरनुदात्तस्येति विवेकः। केचित्तु त्वदिति तान्तमेकं पठन्ति। तथा च जयदेवः प्रायुङ्क्त। त्वदधरमधुरमधूनि
पिबन्तमिति। त्वतः अस्याः अन्य अधर इति षष्ठीतत्पुरुषः। ननु तवाधरस्याधर इति पश्यति दिशि दिशि रहसि भवन्तमिति पूर्ववाक्येन सह अनन्वयाप
त्तेः। अनुदात्तश्चायं। त्वत्समसिमेत्यनुच्चानीति फिट्सूत्रात्। तथा च प्रयुज्यते। स्तरीरु त्वद्भवति सूत उ त्वदिति। त्वदिति सर्वनामसु पठितोनुदात्तो य

ह

ने

पि

नै

सर्वार्थवाचकत्वाभावादिसर्वपिकेचि
नु

मन्यपर्याय इति तद्व्याख्यायां वेदभाष्यकाराः ॥ इह प्राग्गुक्तरीत्या उदात्तानुदात्तयोरकारान्तयोरनुदात्तस्य त्वकारान्तस्य च प्रामाणिकत्वं निर्वि-
वादमेव । गणपाठे परं विप्रतिपत्तिः । तत्राप्यनुदात्तस्य अकारान्तस्य गणपाठे न संशयः । उतो त्वस्मै तन्वा विस्वादि प्रयोगात् । अवशिष्टयोर्म-
ध्ये कतरस्य गणे पाठ इति तु संशयः । उदात्तप्रयोगाणां तत्रोदासीन्यात् । तस्मात्तान्तस्य अकारादिकमुदात्तस्य तास्यादिकं क्वचिच्छा-
खायां प्रयुज्यते न वेति विभाव्य तत्त्वं निर्णेयं बहुश्रुतैरिति दिक् । वस्तुतस्तु आद्यस्य तान्तस्य छेद एव युक्तः । अन्यथा त्वच्छब्द इव त्वत्सर्वनाम्ना ।
एकश्रुत्योभयसंग्रहसंभवात् शब्दमेकमेव पठिष्यदिति ध्येयं । नेव सूनिवेशायः इत्यादयस्तु ड्वोप्रत्ययान्तस्य युष्मादः प्रयोगाः । न तु त्वशब्द-
स्य । परस्कारे: प्रगृह्यत्व प्रयुक्तस्य इति शब्दस्य प्रयोगा इति स्थितं वेदभाष्ये । नेमङ्ग्रस्य ऊर्जं । प्रयो गभ्य । प्र नेमस्मिन् ददृशे सोम इति । समः सर्वप-
र्याय: । न भं ता मन्यके समे । मानो वृकाय वृक्ये समस्मै । दुरुच्छ्रायो अघायतः समस्मात् । उतो समस्मिन्ना । तुल्यपर्यायस्य तु समशब्दस्य न स-
त्यादि
र्वनामता । यथासंख्यमनुदेशः समानाम् इति ज्ञापकात् । स्तेनेभ्यो नतरे सत्रे एते दोषाः समा भूयांसो वेति भाष्यकारप्रयोगाच्च । एतेन समे यज्ञे ते इति प्रयोगो व्याख्या-
तः । सिमं वृषणं ... सिम स्यान्मर्यादा वनद्धयोरिति निघण्टुः । आद्यन्ती वा ससर्ल नुते सिमस्मै । ... सिमस्मात् । यद्यपी-
द्
ह समसिमेत्यनुदात्तौ इति प्राप्तं तथापि सिमस्याथर्वणे तु उदात्तस्युदात्तता । अथर्ववेदप्रविष्टमन्त्रे ऋग्वेदादिगतेपीति अभियुक्ता व्या-
ख्याततत्त्वा दिगवधेयं । पूर्वपरावरोत्तरापराः पञ्चदिक्कालयोस्तद्वच्छिन्ने च । पूर्वस्यां दिशि । पूर्वस्मिन् काले । पूर्वस्यां वाप्यां पूर्वस्मिन्नु-
धर
रा विस्यादि । दक्षिणशब्दो दिशि तद्वच्छिन्ने च । अर्थनियमभ्यायं । व्यवस्थायामित्युक्तेर्गम्यते । स्वाभिधेयेनापेक्षमाणस्यावधेर्नियमो
हि व्यवस्था । पूर्वादिशब्दानामुक्तोर्थो हि नियमेनकं चिदवधिमपेक्षते । स्थाणा पापचो भावेरतिन्नि निप्राप्ते । तदवनिपातनाद्-
व्यवस्थायां किं । दक्षिणा गाथकाः । प्रवीणा इत्यर्थः । अधरे ताम्बूलरागः । उत्तरे प्रत्युत्तरे वा शाखाः । अर्थान्तरे इति तथा परे सांयुधिवे

ति कालिदासः। अपरे प्रस्थन्तिष्ठन्तरस्यादि च। अत्राहुः। देशवाचितया व्यवस्थाविषययोरेव परापरशब्दयोरुपचाराच्छत्रोर्वादिनि
च प्रयोगः। न चैवमुपसर्जनता। न हि लाक्षणिकमुपसर्जनं। किंतु स्वार्थविशिष्टार्थान्तरसंक्रमः। स तु न वृत्तिप्रविष्टस्यापि प्रधान
स्य। न वा लाक्षणिकस्यापि वृत्तिमप्रविष्टस्य। अत एव तस्माद्द्रिमानित्यादौ तात्र लक्षणापक्षेऽपि सर्वनामकार्यं। तद्योऽहं सोऽसौ
योऽसौ सोऽहमित्यत्र भागत्यागलक्षणायामपि सर्वनामकार्यप्रवृत्तिरिति भूवादिसूत्रे एतान्यपीति एतत्प्रतिपाद्यानि वस्तूनि सर्व
इति कैयटश्च। वस्तुतस्तु अत्र शानुसारिप्रकारबोधको यो नञ्वादिशब्देभ्यो भिन्नतादिरिवार्थकः। शब्दानुदेशान्तरनिष्ठतादिप्रकारेणैवे
ति तत्त्वं। असंज्ञायां किं। उत्तराः कुरवः। सुमेरुमवधिमपेक्ष्य कुरुषूत्तरशब्दो वर्त्ततेऽस्त्येव हि व्यवस्था प्रसिद्धत्वात्तु नावधेः प्रयोगः। मेघो
वर्षतीत्यत्र जलस्य यथा। एवं दिशः सपत्नीभवद्दक्षिणस्यादिशादावपि वस्तुतो व्यवस्थास्तीति सर्वनामकार्यं संभवत्येव। न च संज्ञात्वा
न्निषेधः। आधुनिकसंकेतो हि संज्ञा। न चास्तु दिक्षु सास्तीति पञ्चमेऽस्तातिप्रकरणे कैयटहरदत्तादयः। अत्र दिक्षु चिरंतनः कुरुषु साधुनि
कः संकेतस्तत्र व्याख्यातृवचनमेव प्रमाणं। स्वशब्दस्य चत्वारोऽर्थाः। आत्मा आत्मीयो ज्ञातिर्धनं चेति। स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये
स्वोऽस्त्रियां धने इत्यमरः। यद्यपि स्वामिन्नैश्वर्ये इति सूत्रे ऐश्वर्यस्य वाच्यपि स्वशब्दः स्वीकृतस्तथाप्यसौ मत्वर्थीयप्रत्ययमात्र विष
यो न तु केवलः प्रयोगार्हः। तत्र ज्ञातिधनयोर्निषेधादात्मात्मीययोरेव संज्ञा। आख्याग्रहणं किं। आत्मीयपक्षे पुरस्कृत्य ज्ञातिधनयोरपि प्र
वृत्तौ सर्वनामता यथा स्यात्। आत्मात्मीययोरित्येव तु वक्तुमिहोचितं। स्वस्मै इत्यादि। जसि विभाषा विधायके अष्टाध्यायीस्थे सूत्रेऽप्येवं। य
त्त्वत्र स्व आत्मीय इत्येव वक्तुमुचितं। आत्मवाचिनो नपुंसकतया जसि विभाषायामुपयोगाभावादिति केचित्। तच्चिन्त्यं। सूत्रसामर्थ्यादेवात्म

।।शृ.कौ.६
।।७ग

न्यपि पुंस्त्वं नाभात्। अत एवामरकोशे आत्मनीति पूर्वोन्चपि स्वमिति तूत्तरान्चयि। तथा च हेमचंद्रः। द्यौः स्वर्ग नभसोः स्वो ज्ञो ज्ञात्मनोः स्वं निजे.
धने इति मेदिनीकारोपि। स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये स्त्रियां धने इति। वस्तुतस्तु पूर्वपरेत्यादि त्रिसूत्र्यां अर्थनिर्देशः पाठविशेषणं।
तेन द्वितरेषां पाठादेव पर्युदासः। तथा च विभाषा जसीति प्रकरणे पूर्वादीनि नवैवेत्येव लाघवात्कर्तव्यं। त्रिसूत्री तु न पठनीयैवेति निष्कर्षः
अथवा गणपाठ एव पूर्वादि नवकपाठानंतरं विभाषा जसीति कर्तव्यं। पूर्वादीनि च अर्थविशिष्टान्यनुवर्तयानि। न च सर्वादीनामप्यनु
वृत्तिः शंक्या। नेमस्य जसि विभाषारंभात्। यद्वा। न सु रः सिः ङी नो ङि स्मात् स्मिन्नः पूर्वादिभ्यो वा। औः ङः आपः ङी। नपुंसकाच्चेति सप्तमे
न्यासः कर्तव्यः। परमार्थतस्तु सप्तमे यथान्यास एवास्तु। पूर्वादिभ्यो नवभ्यो वेत्येतत् तु नसः ङीत्यत्रानुवर्त्य वाक्यभेदेन संभंत्स्यते।
वाछन्दसीति एतदपि पूर्ववदस्यत्र यथा। तथा चेयं त्रिसूत्री भाष्ये प्रत्याख्यानपाद्येति स्थितं। असंज्ञायामिति तु न कार्यं। अन्वर्थसंज्ञया
अभिव्यक्तपदार्था ये इति न्यायेन वा संज्ञाया व्युदस्तत्वात्। अंतरशब्दस्तु नानार्थः। तथा चामरः। अंतरमवकाशावधिपरिधानांतर्द्धि
भेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्येंतरात्मनि चेति। तत्र बहिर्योगोपसंव्यानयोरेवार्थयोः संज्ञा। बहिरिस्यनावृतो देशो बाह्य
वोच्यते। तत्राद्ये अंतरे अंतरा गृहाः। नगरबाह्यास्वश्वपचादिगृहा इत्यर्थः। द्वितीये नगराभ्यंतरगृहा इत्यर्थः। उपसंव्यानशब्दोपि करणव्यु
त्पत्त्या उत्तरीयपरः कर्मव्युत्पत्त्या त्वंतरीयपरः। उभयथापि बहिर्योगेण गतार्थत्वात् उपसंव्यानग्रहणं न कर्तव्यमिति भाष्ये स्थितं। के
चित्तु शाटकानां त्रयेण शरीरसंयुक्तस्य तृतीयस्य। चतुष्टये तु। चतुर्थस्य तत्संयुक्तस्य च तृतीयस्य बहिर्योगाभावादुपसंव्यानग्रहणं कर्त
व्यं। शाटकत्रयग्रहणार्थमिति वदंतो वार्तिककारस्याप्ययमेवाशय आदिशब्दबलाद्वस्यते। भाष्यमते तु बहिर्योगग्रहणं स्वर्यते। तेन शीतो
ष्णाभ्यां कारिणी स्यादान्वितगोण ग्रहणास्वरं परस्या बाह्यसंबद्धस्यापि भविष्यतीत्याहुः। सत्यपि बहिर्योगे पुरी विषयत्वान्न सर्वनामता।। ०

नी – नवभ्यो

464

अ॰ पुरी निचवतच्चामिति वार्त्तिकात्। तद्धितार्णस्त्रत्रस्य द्वेषो नलुग्ज्ञि विभाषा विधायकस्य भत्रस्याधिकस्य स्तःशी विधाना द्वाबं ताभ्यां
प्रभावात्। अंतरायां पुरि। प्राकाराद्वहिः स्थापातं दंतवर्त्तिन्यां चेत्यर्थः। लिंगविशिष्टपरिभाषया एकादेशस्य पूर्वांतवद्ग्रहणेन ग्रहणाद्वा प्राप्ति
बोधा। त्यदादिष्णतो पूर्वोत्तरूपरामद्वौको। तत्राद्यश्छांदसः। एतस्यानुशिष्टिगणरत्नकारः। तन्न। तथा सति त्यश्छंदसि बहुलमिति सूत्रे
छंदोग्रहणं वैयर्थ्यापत्तेः। पदद्वैयस्य समर्पकः। एतदियमीप्रसंग्योपस्थितेः। अरस्य अवशिष्टे। एको न्यार्थे प्रधाने च प्रथमे केवले तथा। सा
धारणे समाने च संख्यायां च प्रयुज्यते। द्विशब्दो द्वित्वविशिष्टे। अलिंगः संबोधनेक विषयश्च पुष्पा इत्यर्थः। अस्मच्छब्दस्तु आरम्भिभर्थः। स
लिंगः संबोधन व्यभिचारी च भवतीत्यर्थः। भातेर्डवतुरिति व्युत्पादितो यं। पदार्थस्मात्स्मायादयो न संभवंति। सर्वनाम्नस्तृतीया चेति तु नि
मित्तकारणहेतुषु सर्वासां प्रायदर्शनमित्यनेनैव गतार्था तथापि। पिः अद्विमपदः पूर्वनिपातश्छकृछसोतथा। आत्वशेषश्च अविरहाय
कश्च भवतेः फलं। फिञ्। भावतायनिः। त्यदादित्वेन वृद्धसाङ्गुरीचां वृद्धादिति फिञ्। भवंतमं चातिभवङ्कृङ्। विष्वग्देवयोश्चेति चकारेण
सर्वनाम्नोनुवर्षणाद्दाद्यादेशः। भवन्मपः निस्यं वृद्धशरादिभ्य इति मयट्। भवन्मित्रः सर्वनामसंख्ययोरिति प्राङ्निपातः। भावत्कः
भवदीयः। भवतष्ठकृछसाविस्यत्र दिशात्रंत निवृत्तये वृद्धादित्यनुवर्तते। आतं। भवाहृक्। आसर्वनाम्न इत्यात्वं। देवदत्तश्च भवांश्च
भवंतौ। त्यदादीनि सर्वैरित्येकशेषः। भवतो भातो भवन्नेत्यत्र सर्वनामसंज्ञया गुणवचनसंज्ञा बाधनाश्च अविरहो पि फलं। अन्यथा
हि भावत्य मिति स्यात्। भवकान्। किंशब्दः प्रश्ने आक्षेपे चेति दिक्। वृत्। सर्वादिगणो वृत्तः समाप्त इत्यर्थः। यदिंद्राग्नी अवम
मध्य स्यां पृथिव्यां मध्यमस्यां परमस्यां मुतस्थ इत्यत्र तु अवम मध्यम परमशब्देषु छंदसि सकलविधिव्यत्ययात्स्याडागमः। न चैतदनुरोधेन स

ना॰ सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो पि फलं भवसाः पुत्रो भवत्पुत्रः॥

6

र्यादेरावृत्तिगणत्वमिति मंतव्यं। अत एव छंदस्यपि सर्वनामकार्य्यमेषां न नियतं। ये मध्यमाः पितरः। विष्णोः परे परमेश्वरादौ तदभावात्। व्यूहा
वृभोता वितरेतरस्मात्। अन्योन्येषां पुष्करैरामृशंतरसादितुद्धिः। प्रयोगो द्विर्वचनमिति पक्षे तदंतविधिना सिद्धं। स्थाने द्विर्वचनपक्षे तु सुप्तो
निवद्भावेनैस्वबधेयं। ननु वस्तुनः सादाविव प्रकृतिप्रत्ययविभागस्य संमोहात् स्थानिवद्भावेनापि पदमात्रे स्यान्न तु सर्वनामता। सुब्विधि
स्थानिनि तद्विरहादिति चेन्न। सन्नियोगशिष्टत्वेनांतरंगमपि द्वित्वं बाधित्वा सर्वेषां च बहुत्वमिति समासवद्भावप्रयुक्तस्य लुकः प्रथमं
प्रवृत्तेः। अंतरंगानपि विधीन्बहिरंगोपि लुग्बाधत इति वक्ष्यमाणत्वात्। ततः प्रत्ययलक्षणेन परत्वमाश्रित्य द्वित्वप्रवृत्तेः। एते
न तत्तन्नामसम्भूत भीतयः स्वादिव्याख्याते। नन्वस्तु तर्हि स्यादितरेतरस्मादित्यस्य सिद्धिः। अन्योन्येषामिति तु कथं। न त्वत्र समा
सवद्भावोस्तीति चेत्। तत्र प्रथमैकवचनांतत्वं पूर्वपदस्य प्रकृतीदं यस्तु परपद इति वचनबलेनैव प्रकृतिप्रत्ययविभागस्य सिद्धेरिति दि
क्। नन्वेतरान्नान परोपदाभिरिति तु वन्याः इतरेयेभ्य इति बहुव्रीहिणा समाधेयं। तपर इति ज्ञापकात्सर्वनाम्नः पूर्वनिपातो अनित्यः
पुत्रादेकालराजय इति तु प्राधान्यादिना आख्यातादित्यर्थे आख्यातलिंगनाद्घञर्थे कप्रत्यये लाक्षणिकस्य सर्वनामताविरहात्समाधे
यं। विभाषा दिक्समासे बहुव्रीहौ। अत्र सर्वनामता वा स्यात्। उत्तरपूर्वस्यै। उत्तरपूर्वायै। दिङ्नामान्यंतराल इति प्रतिपदोक्तो दिक्समासो गृ
ह्यते। तेनेह न। या पूर्वा सैवोत्तरा यस्य ग्रामस्य तस्मै पूर्वोत्तराय। एवं च बहुव्रीहिग्रहणं न कर्तव्यं। दक्षिणोत्तरपूर्वाणामिति द्वंद्वस्य ल
क्षणत्वात् प्रतिपदोक्तपरिभाषयैव वारणात्। ननूत्तरार्थं तत्। तथाहि। एकं बहुव्रीहिवत्। आबाधे चेति द्विर्भावे एकैकस्मै दक्षिणदक्षि
णस्यै इत्यादीष्यते। तत्रोत्तरस्य तेन निषेधो मा भूत्। बहुव्रीहिरेव यो बहुव्रीहिर्नेत्युक्ते तु द्विरुक्ते बहुव्रीहिस्तत्रैव यथा स्यात्। मैवं। समास

द्वि
मास
या

466

संज्ञाप्रवृत्ता सर्वनामसंज्ञा च निषिद्धा तत्र युज्यते भवद्भिरिति चेन्न बाधकाभावात् किंतु तस्य इत्यंवहुव्रीहिर्वा

इह हि समासप्रवृत्तेः प्राग्

ग्रहणं तानुवृत्त्या पुनरर्थत्वाभावात्। उत्तरसूत्रस्य प्रत्याख्यानाच्च। न बहुव्रीहौ। बहुव्रीहौ कर्तव्ये सति सर्वनामसंज्ञा न स्यात्। त्वकं पिता यस्य सः त्वत्क-
पितृकः। अहकं पिता यस्य मत्कपितृकः। द्व्यकौ पुत्रौ यस्य द्व्यकपुत्रः। प्रागकच्। अंतरंगत्वेन या अकच् प्रवर्तेत तस्य च समासे सत्यपि श्रूयेत अतिक्रान्तो भवकं अति-
भवकान्निवलः। नहि वृत्तेः प्रागपि उपसर्जनतास्ति। ननु यदि प्रागेव प्राप्नुवन्नकच् निवर्तितः तर्हि त्वकं पितेत्यादिकं विगृह्य तत्कपितृकस्यापि
कप्रत्ययप्रदर्शनोचितः स्यात्। इति चेत्। अलौकिक नहि प्रक्रिया वाक्ये उत्प्रेक्षामात्रगोचरे बहुव्रीहिसंज्ञाभून्यं वा क्यांतरमेव। यदाह कैयटः
प्रयोगसमवायि प्रक्रियावाक्यं तत्रायं निषेधो न तु लौकिके तस्य पृथगेव प्रयोगार्हत्वाभावादिति अलौकिकेऽन्तः सर्वत्र स्वविग्रहः। न तु सर्वदा इति प्र-
न्तःपुरुषः स्यादिविग्रह विशेषवगतिः। अलौकिके वाक्ये अप्रयोगार्हे स्यादेः प्रवृत्तेः। अंतरंगानपि विधीनिति सिद्धान्तात्। अत एव गामतः प्रियः स्यादेः सो-
ऽपि भवत्येव न तु हलन्यादिलोपः। तेन नुमूर्दीर्घादयो न प्रवर्तन्ते। भाष्ये तु त्वत्कपितृक इत्यादिवत् पक्षीपृष्टस्य इत्यादिस्त्रैव प्रत्याख्याते। यदाह अकच्स्वरौ तु कर्तव्यौ प्रत्य-
ङ्गेव न तु हलन्यादि लोपः। तेन नुम् दीर्घादयो न प्रवर्तन्ते। [illegible] इत्यादि विश्वप्रियः स्यादि स्वरं तेषु तु स्वांग [illegible] मदन्ता नामिस्यात्तेति वि-
गमक्तसंज्ञापाविति अंगप्रतीतिप्रसंग अनकारान्तेषु त्वत्कपितृको द्व्यकपुत्रः इत्यादिषु। तृतीयासमासे। अत्र सर्वनामता न स्यात्। मासपूर्वाय। लक्षणप्र-
पयविवेको बोध्य इत्यर्थः। यथोत्तरमुनीनां प्रामाण्यात्। भाष्योक्ते वय्यवस्थैव बोध्या। तृतीयासमासे। अत्र सर्वनामता न स्यात्। मासपूर्वाय। लक्षणप्र-
तिपदोक्तपरिभाषया पूर्वसदृशेति तृतीयासमासे गृह्यते न तु कर्तृकरणे कृतेत्यादिना तत्पर्यायाकृतलक्षणसमासादौ निषेधो ना सेमासस्यानुवर्तमाने पुनः
समासग्रहणं गौणार्थस्यापि संग्रहार्थं। तेन समासार्थवाक्येपि निषेधः। मासेन पूर्वाय। अयं च लौकिके वाक्ये निषेधो न तु न बहुव्रीहाविति वरल्लौकिके। अप्र-
कारान्तेका कचोरविशेषेण अनकारान्तानां प्रतिपदोक्तः तृतीयासमासविरहेण चालौकिके निषेधस्य वैयर्थ्यापत्तेः। द्वन्द्वे च। इहरुक्तं संज्ञा न स्यात्। पूर्वापराध-
त्वात्। संमुदायस्यायं निषेधो नत्ववयवानां। तथाहि। त्यदादीनां तावत् द्वन्द्व एव नास्ति। त्यदादीनि सर्वैर्नित्यमित्येकशेषेण बाधितत्वात्। न च द्वन्द्वे सतेरेकशेषः विभ-
ं। एकवद्भावस्वरसमासांत प्रसंगेन द्वन्द्वापवादत्वस्यैव स्यात्पयितुमशक्यत्वात्। अन्यथा तेषामित्यादावपि द्वन्द्वे चेति निषेधापत्तेश्च। त्यदादिभ्यः
भितव्या। एकवद्भाव स्वरसमासांत प्रसंगेन द्वन्द्वापवादत्वस्यैव स्थापयितुमशक्यत्वात्।

॥ स्त्रा को ॥

॥ २ ॥

षि

स्य

प्राचीनारम्हदंताः तत्र काकयोरविशेषः। सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावः सिध्यत एव। दक्षिणोत्तरपूर्वाणामिति। किंच। सर्वनामसंज्ञानिषेधेनाप्यसौ दु
वीरः। तत्र द्विमात्रग्रहणं किंचित्सर्वनामत्वेन दृष्टानां संप्रत्ययसर्वनामत्वे पि पुंवद्भावार्थं। अत एव दक्षिणपूर्वायै इत्यत्र संज्ञाभावे पि पुंवद्भावः। ननु अथवे
वे संज्ञा चेन्न निर्दिष्टत्वात् हि अंगाधिकारे तस्य च तदुत्तरपदस्य चेति वचनाद् दक्षिणोत्तरपूर्वाणामित्यादौ सुडागमादिप्रसंगः। न चानिषेधसामर्थ्यं। अना
गस्य चलादेर्व्यावृत्त्या चरितार्थत्वात् इति चेन्न। अंगकार्येषु सर्वनाम्नो विहितस्य आमः ३.:३. स्मिन्नो रित्यादिक्रमेण व्याख्यानात्। विहितविशेषण
तस्याश्रयणे प्रमाणं तु दक्षिणोत्तरपूर्वाणामिति भाष्यप्रयोग एव तस्मात्सम्प्रदायस्यैवायं प्रतिषेधो नावयवानामिति स्थितं। अत एव सर्वनामस
ज्ञायां तदंतविधिसद्भावे द्वंद्वे चेति ज्ञापकमित्युक्तं। विभाषा जसि। जसीति कार्यापेक्षया अधिकरणसप्तमी। जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वं
द्वे उक्ता संज्ञा वा स्यात्। वर्णाश्रमेतरे। वर्णाश्रमेतराः। शीभावप्रसंग एवायं विभाषेति व्याख्यातं। तेन अकच् न भवति। तस्मिन् कर्तव्ये द्वंद्वे चेति नित्यं नि
षेधात्। अतस्तत्र कप्रत्यय एव भवति। वर्णाश्रमेतरकाः केन व्यवधानान्नैव शीभावः अकचि कृते तु तन्मध्यपतितन्यायेन शीभावः स्यादेव। प्रथमचरमतयाल्पार्द्धक
तिपयनेमाश्च। एते जसः कार्यं प्रति सर्वनामसंज्ञा वा स्युः। प्रथमे प्रथमाः इत्यादि। शेषं रामवत्। नेमे नेमाः। शेषं सर्ववत्। इहापि प्राग्वच्छीभावं प्रत्येव संज्ञाविक
ल्पः। तेन प्रथमकाः इत्यादावकच् न। अन्यथा प्रथमके इति स्यात्। उभयशब्दस्तु नेयं विभाषा किं तु नित्या संज्ञेति गणव्याख्याप्रसंगे नोपपादितं। पूर्वापरावरदक्षि
णोत्तरापराधराणि व्यवस्थायामसंज्ञायां। स्वमज्ञातिधनाख्यायां २ अंतरं बहिर्योगोपसंव्यानयोः ३ एषां त्रिसूत्रीगणमध्ये पिपठ्यते। सा च व्याख्याता। तथा
यस्मिन्नेवोपाधौ नित्या संज्ञा प्राप्ता तत्रैव जसि विभाषया अनया विधीयते। पूर्वे पूर्वाः इत्यादि। स्वे स्वाः आत्मीया इत्यर्थः। आत्मान इति वा ज्ञाती इति तु प्रसादस्य प्रमादः।
आत्मनि स्वशब्दस्य नपुंसकत्वात् इति त्रिसूत्र्यां पदकृत्यं तत्सर्वगणव्याख्यानावसर एवोक्तं। विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानं। द्वितीयस्मै द्वितीयाये
त्यादि। एकादेशस्य पूर्वान्तग्रहणेन ग्रहणात् लिंगविशिष्टपरिभाषया वा द्वितीयस्यै। द्वितीयायै इत्याद्यपि सिद्धं। एवं च विभाषा द्वितीयातृतीयाभ्यामिति।

सूत्रे न कर्त्तव्यं भवति। अर्थवत्ता प्रतिपदोक्ता च्छे तीयः। ञेः संप्रसारणं चेत्ययमेव गृह्यते। तेनेह न। प्रकारवचने जातीयर्। पटुजातीयाय। जात्यंताच्छ बंधुनि।
ब्राह्मणजातीयाय। मुखपार्श्वशब्दाभ्यां तसंताभ्यां गहादिप्रश्चेति छः। मुखतीयाय। पार्श्वतीयाय। तथा द्वितीयाय भागायेत्यत्रापि न भवति। पूरणाद्भागे तीया
दन्निति अनिवृत्ते प्रत्यये इति चेत्सकारलोपे च सति तीयस्य लाक्षणिकत्वादिति दिक्। इति सर्वनामसंज्ञाप्रकरणं। स्वरादिनिपातमव्ययं। स्वरादयो निपाता
अव्ययसंज्ञाः स्युः। प्राग्रीश्वरान्निपाता इत्यारभ्य अधिरीश्वरे इत्येतत्पर्यंतं वक्ष्यंते ते निपाताः। नन्वेवं चादिष्वेव स्वरादयोऽपि पठ्यंतां। प्रकृतसूत्रं च त्यज्यतां। अ
व्ययप्रदेशेषु निपातशब्देनैव व्यवह्रियतामिति चेन्न। चादीनां हि असत्त्ववाचिनामेव निपातसंज्ञा। यथा। लोधं नयंति पशुमन्यमानाः इत्यत्र समन्यगर्थस्य पशु
शब्दस्य। ननु सत्त्ववाचिनां यथा पशुं त्वाम्नकेवायव्यानित्यादौ। स्वरादीनां तु सत्त्ववचनानामप्यव्ययसंज्ञेष्यते। स्वस्ति वाचयति। स्वः पश्येति स्वधा। अथ प्रा
ग्रीश्वरान्निपाताः स्वरादीनि। चादयोऽसत्त्वे इति कुतो न सूत्रितमिति चेन्न। एवं हि सति निपात एकाजनाङिति प्रगृह्यसंज्ञा स्वरादीनामप्येकाचां प्रसज्येत। स्तो
हि स्वरादिषु किमोत्। इहिलादाचित्येकाचो चोत द्धितो। केऽत्रभृतयस्तु एकाचः। यदि तु चादिरेकाजनाङिति क्रियेत तदा चादीनामसत्त्ववचनत्वं विशेषणं न लभ्ये
त। ततश्च अस्य अपत्यं इः मदनः तस्य संबोधनं ए अवेत्यत्र प्रगृह्यं स्यात्। ननु चादयोऽसत्त्वे इत्यत्र असत्त्व इति पाठ विशेषणं। तथा हि। चादय इति योगो विभज्यते। चाद
यो निपातसंज्ञाः स्युः। ततः असत्त्वे इह शास्त्रे चादयो असत्त्वे ज्ञेयाः ततश्च चादीनां सत्त्ववाचिनां पाठासपुदासः। तेन एवेत्यादेर्न दोषः। एवं च उभे संज्ञे न कर्त्तव्ये अव्य
यं निपातसंज्ञानि। किंतु प्राग्रीश्वरान्निपाता इति वा अव्ययानीति वा सूत्र्यतां। ततः स्वरादीनि। तद्धितश्चासर्वविभक्तिः। इत्यादि अव्ययीभावश्चेत्येतत् सूत्र्यतां। ततश्चादयो
सत्त्वे इत्यारभ्य प्रागधिरीश्वरे विभाषायामितीति यस्मिन्प्रदेशे निपातग्रहणं तत्र चादिग्रहणमस्तु। अव्ययप्रदेशे अव्ययग्रहणं निपातग्रहणं वेति। उच्यते। अव्ययसंज्ञा
विरहे अन्वर्थसंज्ञाबलल्लभ्यं वक्ष्यमाणप्रयोजनं न सिध्येत। निपातसंज्ञाविरहे तु इगंत नवाचार्यप्रणीतस्य निपाता आद्युदात्ता इति फिट्सूत्रस्य विभागो न लभ्येत।
अथ फिट्सूत्रेण चादिशब्दानामिव निपातशब्दस्याप्यन्यतरस्याम् एवार्थाध्यवसायः। तर्हि अव्ययसंज्ञामात्रेण निर्वाहः सुकर एवेत्यवधेयं। महासंज्ञाकरणमन्वर्थ

१

संज्ञाविज्ञानार्थेन व्येति विविधं विकारं न गच्छति सत्त्वधर्मान् लिंगसंख्याकारकादीन् न गृह्णाति इति यावत्। तेनोपसर्जनप्रतिषेधः सिद्धः। अस्तु चै
षो भस्तु उच्चैरस इति। अतिक्रान्तप्रधानत्वेन सत्त्वधर्मापरिग्रहान्नेहाव्ययसंज्ञा। ननु स्वरादिषु उच्चैः शब्दः पठ्यते। तत्र कथं तदन्तस्य
प्रसंग इति चेन्न। अन्वर्थसंज्ञयैव तदन्तविधेरपि ज्ञापनात्। अन्यथा उपसर्जने प्रसंगाभावेन तन्निवृत्त्यर्थायास्तस्याः वैयर्थ्यापत्तेः
तेन परमस्वः परमोच्चैरित्यादौ स्वरादिप्रधानेऽव्ययत्वं सिद्धम्। अव्ययसंज्ञायाः अन्वर्थत्वं आथर्वणे प्रणवविद्यायां श्रुतिरपि दर्शयति।।
सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति। एतेषु यन्न व्येति किंतु सदृशमेकप्रकारं यदव्यय
मिति। त्रिषु लिंगेषु सदृशं लिंगविशेषप्रतिपादने सामर्थ्याभावादिति भावः। विभ
क्तिप्रयोजना। पष्ठा। यस्मान्न व्येति तस्मादव्ययमिति। अव्ययीभावस्य यद्यपि लिंगकारकसंख्यायोगोऽस्ति तथापि वचनादव्ययत्वं। अथ स्वरादयः
क्तिषु कारकेषु वचनेषु लादिसंख्यासु। स्वर्गेऽव्ययस्य ... स्वर्लोकेषु। परलोके। स्वर्यातस्य तत्पुत्रस्येति। अंतरिति मध्ये। अंतर्बोध्यन्निरम
स्वरिति स्वर्गपरलोकयोः। स्वर्गेच्छायेव यास्वः अंतर्धेर्म लेषु। परलोके। ... तच्चिंत्यं। स्वःशब्दस्य स्वरितत्वात्। तथा च फिट्सू
त्रम्। प्रातरिति प्रत्यूषे। प्रातः संध्यामुपासीत। एतेत्रयोऽतोदात्ता इति काशिका। तच्चिंत्यं। स्वःशब्दस्य स्वरितत्वात्। तथा च फिट्सू
नुचरः। प्रातरिति प्रत्यूषे। प्रातः संध्यामुपासीत। ... प्रातरग्निं प्रातरिन्द्रं हवामहे इत्यादौ
न्त्रा। न्यङ् स्वरौ स्वरितविति। प्रयोगम्। अंतरिक्षमथो स्वः। यत्तु प्रातःशब्दः आद्युदात्त इति कश्चित्। तन्न। प्रातरग्निं प्रातरिन्द्रं हवामहे इत्यादा
वंतोदात्तस्यैव प्रसिद्धतरत्वात्। पुनरित्याद्युदात्तः। अप्रथमे विशेषे च। अप्रथमे पुनरुक्तं। विशेषे। किंपुनर्ब्राह्मणाः पुण्याः। सनुतरित्यं
तर्धाने। सनुतश्चोरो गच्छति। उच्चैरिति महति। नीचैरित्यल्पे। शनैरिति क्रियामांद्ये। ऋधगिति सत्ये। वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये।
न्तेशति वर्जने। युगपदित्येककाले। आरात् दूरसमीपयोः। पृथगिति भिन्ने। एते सनुतरप्रभृतयो नवांतोदात्ताः। इति काशिका। शनैश्चि

श्रोनागतेन्हि।

धंतो भद्रिवः। नृधामिसासमर्थः। रसत्वतुज्ञानेत्रैरंधक शब्दो आद्युदात्तो प्रयुज्येते। स्यसिति भतीते न्हिं दिवेति दिवसे। रात्राविति निशि।
सायमिति निशामुखे। चिरमिति बहुकाले। मनागिति स्वल्पे। ईषदित्यल्पे। जोषमिति सुखमौनयोः। तूष्णीमिति मौने। बहिरवसंइत्यंतो
बाह्ये। समयेति समीपे मध्ये च। ग्रामं समया। निकषेत्यंतिके। विलंघ्य लंकां निकषा हनिष्यति। स्वयमित्यात्मनेत्यर्थे। स्वयंकृतं। वृथेति व्यर्थे
नक्तमिति रात्रौ। नञ् इति निषेधे। हेताविति निमित्तार्थे। हे इति माकारूपे। अंद्धेति स्फुटावधारणयोः। तत्वातिशय्ययोरित्येके। सामी स्वद्धे जुगु
प्सितयोः। एतेषां प्रभृतयः स्वाम्यंतास्तद्धा विंशतिरंतोदात्ता इति कालिका। दिवाचितमः वृण्वंति। वृथा सृजंत्यर्थिभिः। नक्तं ददृशे कुह
चिद्दिवेयुरस्याद्यैस्तु आद्युदात्ताः प्रयुज्यंते। वत्। धत्तप्रत्ययांतमव्ययसंज्ञं स्यात्। ब्राह्मणवत्। तेन तुल्यमिति विहितो वतिरेव हग्रहते न तूप
सर्गाद्धात्वर्थ इति विहितः। स्वार्थत्वात्। यदुद्धृतो निवतो यासि बप्सत्। सनेति नित्ये। सनाजात इन्द्रः। सनात् सनत् इदमपि नित्ये। सनत्कुमा
रः। तिरस्तु स्यंतर्द्धौ तिर्यगर्थे च। तिरोहितः। तिरः काष्टं कुरु। यस्मिंस्तु लक्षणा। तिरस्कृतो रिः इति यथा। सनेत्यादयः तिरोन्ता आद्युदात्ता
इति कालिका। सनात्यहे तान नय पश्च सप्ति। तिरः पुरश्चिद् अश्विना इत्यादौ त्वेते दात्तमयुज्यंते। अंतरेणं तो दात्तो मध्येर्थे विना च। त्वां मां चांत
राकमंडलुः। त्वामंतरेण तामरसायताक्षि। अंतरेणेति वर्जने। अंतरेण हरिं न सुखं। ज्योगिति कालभूयस्त्वे प्रश्ने शीघ्रार्थे संप्रत्यर्थे च। कमिति
वारिमूर्द्धनिंदासुखेषु। वारिणि कं जपमाम्। मूर्द्धि कं जाः कचाः। निंद्यायां कं दर्पः। सुखे कं पुः। शमिति सुखे। शंकरः। सहसेत्याकस्मिका
विमर्शयोः। दिवः प्रसस्तं सहसा पपात। सहसा विदधीत न क्रियां। स्वधेति पितृदाने। अलमिति भूषणपर्याप्तिशक्तिवारणनिषेधेषु।
भूषणे। अलंकारः। पर्याप्तौ। अलमस्य धनं। बह्वित्यर्थः। शक्तौ। अलं मल्लो मल्लाय। शक्त इत्यर्थः। वारणे। अलमतिप्रसंगेन। निषेधे। आ
लप्यालमिरव भोर्यस्य दाराननपारता। नवत्त्वं ... इत्यर्थः। वषडिति हविर्दाने। विनेति वर्जने। नानेत्यनेकविनार्थयोः। नानामतं देहभृतां

।।शृ॰को॰।।

।।११।।

समाजं।नानाशक्तिंनिष्फलालोकयात्रा।स्वस्तीतिमंगले।अन्यदितिअन्यार्थेदेवदत्तआगतोन्यच्चयज्ञदत्तइति।अस्तीतिसत्तायां।अस्तीप
श्लोकइतिमतिरस्यास्तिकः।उपांश्विति अप्रकाशोच्चारणरहस्ययोः।क्षमेतिक्षांतौ।क्षमाकरोतुभवान्।विहायसेतिवियदर्थे।विहाय
सारम्यमि तान्नजामि।दोषेतिरात्रौ।मृषामिथ्येतिएतौवितथार्थौ।मुधेतिव्यर्थे।क्त्वातोसुन्कसुनः।कृन्मकारसंध्यक्षरांतः।अव्ययीभावश्च न
इदंगणसूत्रत्रयं अष्टाध्यायीस्थं त्रिसत्र्यासमानार्थे वैयर्थ्येतु उद्धरिष्यते।पुरेतिअविरतेचिरातीतेभविष्यदासन्नेच।पुराधीते।अवि
रतमपाठीदित्यर्थः।पुरिलङ्चेतिलट्।चिरातीते।पुरापिनवंपुराणं।पुरेदमूर्ध्वंभवतीतिवेधसा।समनंतरंभविष्यतीत्यर्थः।स्यात्प्रबं
धेचिरातीतेनिकटागामिकेपुरेत्यमरः।मिथोइतिरहःसहार्थयोः।मंत्रयंतेमिथो।मिथस्सि[illegible]तिपूर्ववत्।प्रायसितिबाहुल्ये।मुहुरि
त्तिपुनरर्थे।प्रवाहुकमितिसमकालेतुदीर्घेचा।केचित्तुप्रवाहिकेतिपठंति।आर्यहलमितिबलात्कारे।शाकटायनस्त्वाह।आर्यैतिप्रतिबंधे
हलमितिप्रतिषेधविवादयोरिति।अभीक्ष्णमितिपौनःपुन्ये।साकंसार्द्धमित्येतौसहार्थे।नमसइतिनतौ।हिरुगितिवर्जने।धिगिति
निंदाभर्त्सनयोः।तसिलादि [illegible] स्तद्धितएधाच्पर्यंतः।शस्तसी।कृत्वसुच्।सुच्।आस्थालौ।च्व्यर्थाश्चेति।तसिलादिरित्यादेरयमर्थः
[illegible]ः।पंचम्यास्तसिलिति आरभ्यएधाच्पर्यंतसूत्रेरुक्तोयस्तदंतास्वरादिषुबोद्धव्याः।तथाबह्वल्पा
र्थाच्छसःप्रतियोगेपंचम्यास्तसिः।संख्यायाःक्रियाभ्यावृत्तिगणनेकृत्वसुच्।द्वित्रिचतुर्भ्यःसुच्।इणआसिरित्युणादिसूत्रेआ
सिप्रत्ययोविहितः।अयादृत्युदाहरणं।प्रत्नपूर्वविश्वेमात्थाल्छंदसि।सपघकर्तरिश्विः।विभाषासातिका[illegible]र्त्स्न्ये।इत्येत्राच।एतदं
ताणाशाः।अमिति।अमुचंछदसिइतिविहितः।आमितिसंगीकारे।आम्कुर्मः।किमेत्तिङव्ययघादाम्वा।कास्प्रत्ययादाममंत्रेलिटिप्र
पिकेश्विता।प्रतामइतिग्लानौ।प्रशानितिसमानार्थे।प्रशान्देवदत्तोयज्ञदत्तेन।प्रतानितिविस्तारे।माइतिनिषेधे।माभवतुमाभ

विष्यति। माङिति निषेधार्थे कयोः। माकार्षीत्। अस्य पापं मा भूदिति। आकृतिगणश्चायं तेनान्येपि ग्राह्याः। तद्यथा। ओमिति त्रैष्वभ्युपगमे चा। काम
मिति स्वाच्छन्द्ये। प्रकाममित्यतिशये। भूय इति पुनरर्थे। सांप्रतमिति न्याय्ये। परं इति किंत्वर्थे। गुणवान्नसि परमहं काशामाक्षा इति प्रत्यक्षे
साचीति तिर्यगर्थे। सत्यमित्यङ्गीकारे। मङ्क्ष्विति शीघ्रे। आ इति। सर्वदिति वर्षे। अवश्यमिति निश्चये। सपदि शीघ्रे। बलवदिति भृश
यावत्तावदपि ... क्षितानां। प्रादुस् आविस् इति प्रकाशे। अनिशं नित्यं नित्यदा सदा अजस्रं संततं एते सातत्ये। उषेति रात्र्यौ। उषा तनो यासु। च
रोदसी द्यावापृथिव्यर्थे। ओमिति ब्रह्मवाची। भूर्भुवरिति पृथिव्यन्तरिक्षलोकयोः। भूर्लोकः भुवर्लोकः। झटिति द्रागिति तरसा शीघ्र्ये। स्वाकुः
हैघं द्रुतं शीघ्रं क्षिप्रमिति त्वरा। अतीवेत्यतिशये। सुष्ठु प्रशंसायां। कु इति कुत्सितेषदर्थयोः। कापथः। कवोष्णं। अञ्जसेति तत्त्वशीघ्रार्थयोः।
अङ्गेति ... मिथुरिति द्वावित्यर्थे। मिथुमत्रयेत। विष्वगिति समन्ततो भावे। भाजगिति शीघ्र्ये। भाजक्पचति। अन्वगित्यानुलोम्ये
चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः। आद्यग्रहणाच्चिरं चिरेण चिरादिति गृह्यते। अस्तमिति विनाशे। आनुषक् इत्यानुपूर्व्ये आनु
षक्स्म विप्रतीत्याह वधूता। अनुमाने नुषगिति ... आनुषदिति दांतके चित्। अग्रस्तिति शीघ्रसाप्रतिकयोः। अत्रे रवेति रे
फो वा। स्थाने इति युक्तार्थे। वरमिति हि ईषदुत्कर्षे। दुष्ठु निकृष्टार्थे। बलादिति हठार्थे। शुदिति पूजायां। शुनाशीरः। समन्ततो क्षान्तो। अर्वागि
ति प्राचीने। शुदिश्चकुपक्षे इति स्वरादिः। तद्धितश्चासर्वविभक्तिः। तद्धितान्तः शब्दोऽव्ययं स्यात्। यस्मात्सर्वा वचनत्रयात्मिका विभक्ति
र्नोत्पद्यते। किंत्वेकवचनमेव। ततः तत्र। तद्धितः इति किं। एकः द्वौ बहवः। असर्वविभक्तिरिति किं। औपगवः। ननु गोदो वरणादित्यादाव
ति व्याप्तिः। न च लुबोगाप्रख्यानाद्योगप्रमाणे च तदभावे दर्शनं स्यादिति पठतः सूत्रे वृत्तौ मतेनैतेन तद्धितान्ताः इति वाच्यं। एवम
पि पचतितरां पचतिरूपमित्यादौ अतिप्रसंगस्य दुर्वारत्वादिति चेदत्राह वार्तिककारः। सिद्धं तु पाठात्। तसिलादयः प्राक्पाशः

पः। सुप्सुप्रभृतयः प्राक् समासांतेभ्यः। मांतः कृत्तद्धितः तसिवती नानाञाविति न चैवं प्रतिरन्नाविति अधिकारे प्रत्ययत्वं विश्वेमाश्वालंछंदसीति वि
धानात् तदंतस्यासंग्रह इति वाच्यं प्रकारवचने थाल् इति प्रकरण एव प्रत्नादिभ्य इवे थाल् छंदसि प्रकारवचने इदमस्थमुरिति पठितं तु मुख्यत्वात् ।१
स्वरादिगणे आस्था ताविति पाठेन सिद्धत्वा[illegible] मांत इति। अम् आम् स्वार्थः। तसिप्रतियोगे पंचम्यास्तसिः। तेनैकदिकृत्तसिश्चेति ह्यावपि
गृह्येते। स्यादेतत्। सूत्रमते कथं सुप्संभवः। आवतां कर्मणि द्वितीया स्यात्। एकयोर्द्विवचनैकवचन इत्यादीनां स्वादिवाक्येनैकवाक्यतापक्षे
अव्ययेभ्यः स्वादीनां प्राप्तिरेव नास्ति। अव्ययादाप्सुप इति ज्ञापकेन तु सर्वा विभक्तयः। उच्यते। अव्ययेभ्यः सप्तानामपि विभक्तीनां त्री
ण्यपि वचनानि। तथा सप्तानामेकवचनान्येव। अथवा प्रथमाया एकवचनत्रयं। यद्वा प्रथमाया एकवचनमेवेति पक्षचतुष्टयं यद्यपि
ग्रंथेषु लभ्यते तथापि प्रथमैकवचनमात्रमेवेति चतुर्थपक्ष एव क्षोदक्षमः। तमेव गृहीत्वा सूत्रे स्वाप्सुप संभवः स्पष्टः इतरस्तु पक्षत्रय
वाद मभ्युच्चयमात्रेणोपन्यस्यते। न तु तात्त्विकं। तथाहि। यदि कर्मणि द्वितीयैव अभिहिते प्रथमैव एकत्वे एकवचनमेवेत्यादिरर्थे नियमः।
यदि वा द्वितीया कर्मण्येवेत्यादिः प्रवृत्तार्थापेक्षो विभक्तिनियमः। यदि वा एकवाक्यत्वे सामान्यापेक्षवचने विभक्तिनियमे वा अव्यया
दाप्सुप इति सामान्यापेक्षज्ञापकाद्विभक्तिसिद्धिः। तदा अविशेषात् सप्तानामपि विभक्तीनां त्रीण्यपि वचनानीति पक्षो लभ्यते। यदा
तु द्वित्वे द्विवचनमिति सूत्रेऽपि वा एकवचनमित्येव पृथक् सूत्र्यते तदन्यथानुपपत्त्या च कर्मण्येव द्वितीया न करणादौ द्वित्वबहुत्वयोरेव
द्विवचनबहुवचनेन त्वेकत्वे इत्यादिक्रमेण सजातीयापेक्षो विभक्तिनियमः। तत्र त्वाव्ययेभ्यः सकलविभक्तिप्राप्तौ एकवचनमित्यनेन
न नियमः क्रियते। यत्रैकवचनं चान्यच्च प्राप्नोति तत्रैकवचनमेवेति। यदि वा सामान्यापेक्ष नियमाश्रयणाद् अव्ययाद् प्राप्तौ एकव
चनमिति सूत्रं क्रियते। तस्य च स्वाद्याप्तिपदिकात् इत्यनेनैकवाक्यता। तथा च स्वाद्यादिभ्यः कर्मादिषु एकवचने सिद्धमेवेति। एतत् सूत्र

बलाद्व्ययेभ्य एव भवति। तिङंतात्तु न भवति। एकवचनमित्यस्याप्राप्तप्रापणार्थत्वे पिष्टापूत्रेणैकवाक्यत्वात् प्रदेशांतरे पाठसामर्थ्याच्चास्वातंत्र्ये
णापिष्टापूत्रे विधायकमिति द्विलेद्विवचनमित्यादेर्नियामकत्वं संगच्छते। तदाव्ययेभ्यः सर्वाण्येकवचनानीति द्वितीयः पक्षो लभ्यते। यदा तु द्वि
तीयाकर्मण्येवेत्यादिः सामान्यापेक्षः प्रत्ययनियमः अव्ययेभ्यः प्रथमैव। प्रथमा प्रातिपदिकार्थ एवेति नियमेन हि कर्माद्याधिक्यस्थले एवसा
निवार्यते। द्व्येकयोरिति तु यथान्यासमेव। तत्र च एकत्वे एवैकवचनं न संख्यांतरे सजातीयापेक्षप्रत्ययनियमपक्षः। तदानिसंख्येभ्यः प्रथ
मावचनत्रयमपि भवतीति तृतीयः पक्षो लभ्यते। त्रिषप्यमीषु पक्षेषु पचति कल्पं पचति रूपं इत्यादौ दोषः। तत्र हि प्रथमैकवचनमात्रमिष्य
ते। उक्तपक्षत्रयेप्याधिक्यं प्राप्नोति। तस्माद्द्वितीयपक्षरीत्या सकलैकवचनानि प्राप्य एकवचनमित्येकत्वस्य विवक्षितत्वात्प्रथमा तिङ
मेकारणाभावात्प्रथमैकवचनमेवेति सिद्धांतः। एवं सत्यपि सूत्रे स्वोक्ति संभवे पचति रूपमित्यादावतिव्याप्तिभयात्सर्वनामैव कर्ते
व्यं सूत्रं तु न कर्तव्यमिति स्थितम्। कृन्मेजंतः। कृद्यो मांत एजंतश्च तदंतमव्ययसंज्ञं स्यात्। स्वादुंकारं भुंक्ते। वक्षे राय। तुमर्थे सेसेन इति वचेः से
प्रत्यये रूपं। नन्वेवं कारयांचकारेत्यामंतस्य न प्राप्नोति। अत्रातिङ्‌भावितत्वात्। लिटः कृत्त्वेपि मांतत्वाभावात्। सत्यं। स्वरादिषु आमिति पा
ठात्सिद्धं। यदि तु तत्र तद्धितस्यैव ग्रहणं तर्हि हृत्संतादुस न्नानामपि सुपामामरिति [illegible] लुक् भविष्यति। तत्र हि लेरिति नानुवर्तते। न चैवं
तरबादेरपि लुगापत्तिः। अपरिसमाप्तार्थत्वात्तरबाद्युत्पत्तेरेवाभावात्। अपरिसमाप्तार्थत्वं च संख्याकर्त्रादिविषयकोक्षिताकांक्ष
त्वं। अत एवानुप्रयोगः प्रार्थ्यते। आमंतार्थगतप्रकर्षादिप्रतीतिस्तु अनुप्रयोगाद्युत्पन्नेन भविष्यति अत एव सूत्रितं कृञ्चानुप्रयुज्यते
इति। अनुशब्दो हि व्यवहितस्य विपरीतस्य च प्रयोगस्य निवृत्त्यर्थ इति वक्ष्यते। यद्वा पूर्वसूत्रोक्तनिष्कर्षरीत्या आमंतास्येरवो स्तोहृ
त्स्वादिलोपो न भविष्यति। अस्तु वा कृदंतयमेजंतमिति वाक्यार्थः। आमंतं च प्रत्ययलक्षणेन कृदंतं श्रूयते च मांतं। न चैवं प्रतामौ
प्रतामः लवमावक्षाणो होरित्यादावतिव्याप्तिरिति वाच्यं। स्वरादिषु प्रशान्प्रत्यनप्रत्ययलक्षणेन कृदंतत्वमुपलीय्याव्ययसंज्ञा न
भवतीति ज्ञापितत्वात्। न च मोनोधातोरित्यत्र नलेकृते नेत्मांतमिति कथं ज्ञापकतेति वाच्यं। नत्वस्यासिद्धत्वात्। नेन वृग्नानेत न न दल

दृ॥ि

ग

न राङ्हुस्य

॥ शब्दकौ० ॥
॥१९३॥

स्यार्थांतरवृत्तित्वेऽप्यनयती स्यादिप्रयोगासिध्यर्थं चुरादिस्वीकारेण निसंचनतत्राभावान्नस्येवायं स्वरादिषु पाठ इति वाच्यं ॥ अनभिधानात्
स्मात्क्विपो तुल्यत्वेः ॥ अत्र च लापकत्ववर्णनपरं भाष्यमेव प्रमाणं ॥ अव्ययमिति यहासंज्ञाबलादसत्त्वार्थस्य साम्यवाचिन एव प्रशाम् सूत्रंद्वस्ये
वात्रग्रहणं ॥ ननु प्रशांतिमद्वाचकस्य ॥ तेन प्रशामौ प्रशाम इत्युदाहरणं न विरुध्यते ॥ स्वस्रादीनां तु सत्त्ववाचिनामपि पाठसामर्थ्याद्व्यय
त्वमिति विशेषः ॥ अंतग्रहणान्नित्ययोगे बहुव्रीहिराश्रीयते ॥ तेन औपदेशिक एजन्तस्ते ॥ तेनेह न ॥ आध्यै ॥ चिकीर्षवे ॥ कुंभकारेभ्यः ॥ व
स्तुस्तु अंतग्रहणं व्यर्थं ॥ लक्षणप्रतिपदोक्तपरिभाषयैवातिप्रसंगभंगात् ॥ ननु वर्णग्रहणे इयं परिभाषा न प्रवर्तते ॥ अन्यथा ए चोयवायाव इत्या
दावतिप्रसंगात् इति चेन्न ॥ एवमपि बहिरंगपरिभाषया सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषयावेष्टसिद्धिः ॥ अयमत्रा
र्थः ॥ सन्निपातः संश्लेषस्तन्निमित्तो यो विधिस्स तद्विघातस्यानिमित्तं ॥ तं सन्निपातं यो विहंति स तद्विघातस्तस्येत्यर्थः ॥ एवं च सुप्सन्निपा
तलक्षणस्य चेङिः इतीति गुणस्य बहुवचने झल्येत्वस्य चाव्ययसंज्ञाप्रतिनेत्यवधेयं ॥ तथा परिभाषायाः प्रयोजनान्यपि संति ॥ दिङ्मा
त्रमुच्यते ॥ श्रीपकुलात्तस्मै श्रीपायेत्यत्रातो लोपो न भवति ॥ तथा अगव्यीत् अनाव्यीत् ॥ यस्य हलः इति लोपो न भवति ॥ तथा अतिजरैः कुले
अतिजरेण अतिजरैः ॥ अतिजरसात् इत्यत्र अम् इने ऐस आ नुट् इत्येतेषु अकारमुपजीव्य कृतेषु सत्सु जरसादेशो न भवति ॥ स्यादि
अनित्या चेयं परिभाषा ॥ कष्टाय क्रमणे न यासस्योरित्यादिज्ञापकात् ॥ तेनाग्निमानित्यत्र ह्रस्वनुड्भ्यां मतुबिति अंतोदात्तप्रसक्तौ तास्वर
रस्य मतुप उदात्तत्वे कृते ज्ञेमनित्या ॥ तेन प्रकृते स्नुरात्त्वं भवस्येवेति दिक् ॥ गोनौ ग्लौ रित्यादौ नेदं सूत्रं प्रवर्तते ॥ उणादीनामव्युत्पन्नत्वात् ॥ व्यु
त्पत्तिपक्षेऽपि स्निरव्ययमिति उणादिसूत्रेण डोडो प्रत्ययांतावाश्व्यंता एवेति नियमस्य कृतत्वात् ॥ क्त्वातोसुन्कसुनः ॥ एतदंतमव्ययं स्यात् ॥ ग
सूः सा पुरः सूर्यस्योदेतोः ॥ पुरा वत्सानामपाकर्तोः ॥ भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् ॥ पुरा क्रूरस्य विसृपो विर
न् ॥ पुरा जतुभ्य आतृदः ॥ सृपितृदोः कसुनिति कसुन् ॥ अव्ययीभावश्च ॥ अयमव्ययसंज्ञः स्यात् ॥ विषयपरिगणनं कर्तव्यं ॥ लु किंमुख

पृ.२

स्वरोपचारस्योर्निवृत्तौ चेति। उपाग्नि। प्रत्यग्नि। अव्ययादाप्सुप इति सुपो लुक्। उपाग्निमुखः। प्रत्यग्निमुखः। मुखं स्वाङ्गमिति उत्तरपदान्तोदात्तत्वे प्राप्ते नाव्य-
यदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्य इति प्रतिषेधः। तथा च बहुव्रीहौ पूर्वपदप्रकृतिस्वर एव भवति। पूर्वपदं च समासस्वरेणान्तोदात्तं। विसर्गस्यानिक-
स्य सकारस्य उपचार इति प्राचां संज्ञा। तन्निवृत्तौ यथा। उपपयःकारः। उपपयःकामः। इह अतः कृकमीति प्राप्तं सत्वं अनव्ययस्येति पर्युदस्यते। इह मुखस्व-
रनिवृत्तिरेव मुख्यं प्रयोजनं। लुक् तु नाव्ययीभावादत इति विशेषप्रतिषेधात् सिद्धः। उपचारनिवृत्तिरपि न प्रयोजनं। अतः कृकमीत्यत्रानुत्तरपदस्थस्येत्य-
नुवृत्तेः सिद्धेः। परिगणनं किं। उपाग्नि अधीयान। परं गवङ्घावेन षाष्टमाद्युदात्तत्वं यथा स्यात्। तत्र हि अव्ययानां प्रतिषेध उपसंख्यातः। उपे-
ध्यीयाने त्यादौ मा भूदिति। तथा। उपाग्निकमित्यादौ अव्ययसर्वनाम्नामित्यकच्। उपकुम्भमन्यः। खित्यनव्ययस्येति त्वनुवर्तमाने इह द्विषदन्ते-
तिसुम् प्रतिषेधो न। उपकुम्भीभूतः। अस्य च्वावित्यस्योपसंख्यानिकः प्रतिषेधो न भवति। वस्तुतस्तु इदं सूत्रं न कर्तव्यं। लुक् उपचारनिवृत्तेश्चान्यथो-
पपत्तेरुक्तत्वात्। मुखस्वरनिवृत्तिः परमवशिष्यते। तत्र केचिदाहुः। मुखस्वरो नेष्यते एव। यदि तावत् प्रयोजनं स्यात् तर्हि सूत्रकार एवायं ब्रूयात् नाव्ययादव्ययी-
भावाच्चेति। इति भाष्यस्वरसादिति। अन्ये तु अनव्ययमव्ययं भवतीति अव्ययसंज्ञाविज्ञानादेव मुखस्वरनिवृत्तिर्भविष्यतीति। स्यादेतत्। स्व-
रादित्वेनैव सिद्धत्वात् तद्धितश्चेत्यादि चतुःसूत्री व्यर्था। तत्र हि तसिलादिस्तद्धित एधाच्पर्यन्त इत्यादिना व्यर्थाश्चेत् सत्यं तेन आ सिमो णादिके वर्ज-
यित्वा तद्धितश्चासर्वविभक्तिरित्यस्यार्थः संगृह्यते। कृन्मकारसंध्यक्षरान्त इत्यनेन कृन्मेजन्त इत्यस्यार्थः संगृह्यते। क्त्वातोसुन्कसुनोऽव्ययीभाव-
श्चेति सूत्रद्वयं तु स्वरूपेणैव पठ्यते। अत्राहुः। पुनर्वचनमनित्यत्वज्ञापनार्थं। तेन प्रागुक्तं लुङ्मुखस्वरोपचारा इति परिगणनं लभ्यते। न त्वो-
काव्यये चाव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेध इति वक्ष्यमाणं च तु [illegible] ते इति। वस्तुतस्तु मास्तु चतुःसूत्री। अव्ययीभावश्चेति गणे-
पि मास्तु। उक्तरीत्या चरितार्थसंज्ञत्वे व सिद्धेः। तोसुन्कसुनोरप्रतिषेधस्तु लाघवात् समस्यतामिति [illegible] सुकः पंथाः। शि सर्वनामस्थानं।
नाम शि इत्येतत् सर्वनामस्थानसंज्ञं स्यात्। वारीणि। सर्वनामस्थाने चासंबुद्धौ इति दीर्घः। यदि तु प्रदेशेष्वेव शि आविस्या सुच्यते। नहि सुटिन स्या

त्।अथ यदि सुटोरित्युच्यते तर्हि नपुंसकसुटोपि ग्रहणं स्यात्। शिग्रहणं तु व्यर्थं स्यात्। तस्मात्संज्ञा तावत्प्रणेया। महासंज्ञाकरणं तु पूर्वाचा-
र्यानुरोधात्। सुट् नपुंसकस्य। सुडिति प्रत्याहारः। नपुंसकभिन्नस्य स्वादिपंचवचनानि उक्तसंज्ञानि स्युः। राजा। राजानौ। राजानः। इत्यादि। प्रा-
ग्वद्दीर्घः। अनपुंसकस्येति किं। सामनी। विभाषा ङिश्योरित्यल्लोपा[illegible]ति भावे दीर्घो न भवति। अनपुंसकस्येति पर्युदासः। तेनास्य सूत्रस्य स्त्री-
पुंसयोरेव प्रवृत्तिरिति नपुंसके न [illegible] विधिर्नापि प्रतिषेधः। तेन वनानि संतीत्यत्र पूर्वसूत्रेण प्राप्ता संज्ञा भवत्येव। प्रसज्यप्रतिषेधे तु सापि नि-
षिध्येत। पर्युदासे त्वनंतरस्य विधिर्वा भवति प्रतिषेधो वेति समाधानं तु शक्यते तथाप्यसमर्थसमासो वाक्यभेदश्चेति गौरवं स्यादेव। यद्वा सुट् स्त्रीपुंस-
योरिति वक्तव्ये अनपुंसकस्येति सूत्रयतः प्रसज्यप्रतिषेध एव संमतः। गौरवं च प्रामाणिकं। एतेन हि केचिन्नञ्समासा असामर्थ्येपि साधव इति
ज्ञाप्यते। तेन अश्राद्धभोजी ब्राह्मण इति सिद्धं भवति। नवेति विभाषा। इति सूत्रं। काकाक्षिन्यायेनोभाभ्यां संबध्यते। स च पदार्थविपर्यासहेतु-
र्नार्थ एवेह संज्ञी संज्ञा च। निषेधविकल्पयोर्विकल्पः संज्ञा स्यात्। न च तयोरपदार्थतयानन्वयप्रसंगः एतत्सूत्रारंभसामर्थ्यादेव विधि-
वाक्येषु विकल्पवाचीपदस्य लाक्षणिकत्वात्। उभयत्र विभाषार्थं चेदं। प्राप्तविभाषायामप्राप्तविभाषायां च नास्योपयोगः। तथाहि। विभा-
षोपपदेन प्रतीयमान इति प्राप्तविभाषा। तत्र स्वरितञितः इत्यादिना नित्यमात्मनेपदे प्राप्ते विभाषाश्रुत्या पक्षे तन्निवृत्तिमात्रं क्रियते। पक्षे
भवतीति त्वनुवाद[illegible]। तथा विभाषोर्णोरित्यप्राप्तविभाषा। प्रोर्णुवीत्यत्र परत्वात्सार्वधातुकमपिदिति ङित्वाभ्युपगमात्।
तत्र ऊर्णुवितेत्यादावभावांशस्य स्थितत्वात् भावांशमात्रपरता। विभाषा श्वेरिति तूभयत्र विभाषा। या तु यदि विधिमुखेन प्रवृत्तिः तर्हि पित्स्वे-
व विकल्पः स्यात्। किंतु यजादित्वान्नित्यमेव स्यात्। अथ प्रतिषेधमुखेन प्रवृत्तिस्तर्हि कित्स्वेव प्रवृत्तिः स्यान्नापित्सु। न च पित्सु विधि-
मुखेन कित्सु प्रतिषेधमुखेनेत्युभयथापि प्रवृत्तिरस्त्विति वाच्यं वैरूप्यलक्षणवाक्यभेदापत्तेः। संज्ञाकरणे तु सति श्रुतक्रमानुरोधेन ने-
ति निषेधः प्रथमं किंतु प्रवर्तते। ततः किदकिद्रूपे सर्वस्मिन्नपि लिटि पक्षे भवतीति एकरूप्येण विधिमुखेनैव विकल्पः प्रवर्तते। आवृत्तौ

478

प्रत्याख्या

पदार्थसमुदायस्य लक्षणं प्रवर्तत इति दर्शनेनेदं सूत्रमारभ्यते। यदा तु प्रतिलक्ष्यं विभाषा श्वेरित्येतद्विधीयते तदा क्वचिद्विधिमुखेन क्वचिन्निषेधमु
खेन प्रवृत्तेः संभवान्नेदं सूत्रमारम्भणीयं। तथा च वार्त्तिकं। अशिष्यो वा विदितत्वादिति। वस्तुतस्त्वा[illegible]निप[illegible]प्रदेशेषु न वा श्वेरित्यादि पठित्वा इदं सूत्रं त्यक्तु
प्रत्याख्यातुं शक्यं। युक्तं चैतत्। अन्यथाऽन्वर्थमारभ्यमाणा संज्ञा विभाषा णौ श्वेरित्यत्र प्रवर्तेत प्रतिषेधाश्च बलीयांसो भवन्तीति प्रोर्णुवीत्यत्रापि सार्व
धातुकमपिदित्यस्य निषेधस्ततो विकल्पश्च स्यात्। न चारभ्यमाणे सूत्रे न वा इत्यखण्डनिपातस्यार्थो निषेध एव संज्ञा किं न स्यादिति चेन्न। तथा
सति न बहुव्रीहावित्यनेनैव सिद्धो विभाषा दिक्समासे बहुव्रीहावित्यस्य वैयर्थ्यापत्तेः। इतीति किं। वृद्धिसंज्ञावत्स्वं रूपमिति वचनाच्छब्दस्य संज्ञा
मा भूत्। तथा हि सति विभाषा श्वेरित्यस्य न वा शब्दः श्वयतेर्वा शब्दादित्यर्थः स्यात्। इति शब्दे तु सति अर्थः संज्ञीति लभ्यते। तथा हि। लोके हि अर्थ
प्रधानः शब्दः गौरित्ययमाहेत्यादौ तु शब्दस्वरूपपरः संपद्यते। व्याकरणे तु स्वं रूपमिति परिभाषया स्वरूपपरत्वमौत्सर्गिकं। इति शब्दस
मभिव्याहारेण त्वर्थपरत्वमिति विशेषः। अर्थस्यैव संज्ञात्वमपि। न तु विभाषा शब्दस्येत्युक्तं। तेन ह्वः कोरन्यतरस्यामित्यादावपि वैरूप्याद्वारो
बोध्यः। एतत्प्रसंगेन त्रिविधा अपि विभाषाः प्रायेण भाष्ये विवेचिताः। तत्राप्राप्तविभाषामध्ये ग्रो यङीति [illegible] अचि विभाषेति पठितं अत्र व
दन्ति। अप्राप्तविभाषैवमिति सत्यं किंतु त्रिसंज्ञया इत्युपक्रम्य प्राप्तेऽप्राप्ते उभयत्र वैतस्यैवं रूपकोटित्रयप्रकारकसंशयविषयीभूताना
मेव व्युत्पाद्यमानत्वादत्रापि कोटित्रयस्योक्तिसंभवो वक्तव्यः। स च दुर्वचः। तथा हि। निजेगिल्यते इत्यत्र ग्रो यङीति नित्यं लत्वं विभाषाया
स्तु प्राप्तिरेव नास्ति। गिरति गिलतीत्यादौ तु विभाषा। ग्रो यङीति अस्य तु प्राप्तिरेव नास्तीति कुतः प्राप्तविभाषापक्षः। अथोच्यते। अचि
विभाषेत्यत्र यङीत्यनुवर्त्य यङ्निमित्तस्य रेफस्य अचि अनन्तरे वा लत्वमिति व्याख्यानादस्त्येवोक्तिसंभव इति। तन्न। निजेगिल्यते अचीति
स्थिते हि ग्रो यङीति प्राप्नोति। न चास्यामवस्थायां विभाषायाः प्राप्तिः अन्तरङ्गत्वाभावात्। अथ ब्रूयाः। विभाषारम्भसामर्थ्याद्यङ्लुकः
पूर्वं ग्रो यङीति न भवति। एवमप्युभयत्र विभाषात्वं दुर्लभमेव। गिरति गिलतीत्यादौ चरितार्थत्वेन यङ्लुकः प्रागेव ग्रो यङीत्यस्य
प्रवृत्ते [illegible] रुभयोरसमानकालीनत्वात्। न च लत्वस्यासिद्धत्वात्ततः प्रागेव लुगिति वाच्यं। अन्तर्भूतयङ्पक्ष[illegible]त्वेनान्तरङ्ग

॥श॰कौ॰
॥१५॥

त्वंप्रतिबहिर्भूतत्वा अन्यत्रसयापेक्षत्वेनबहिरंगस्यलुकोऽसिद्धत्वात्स्वोभावेनपूर्वत्रासिद्धमित्यस्याप्रवृत्तेरिति। अत्रोच्यते। प्राप्तविभाषात्वेऽस्य बलत्व
मनंतरशास्त्रेवोक्तिसंभवः। उभयत्रविभाषालिङ्। अन्तरंगानपीतिन्यायेनलत्वात्पूर्वंलुकूचलुङि·मित्तमवजेदुर्लभः। तस्यार्थापेक्षत्वेनबहिरंगतया
सिद्धत्वात्स्वोभावेपूर्वत्रासिद्धमित्यस्याप्रवृत्तेः। तथाचावः पूर्वमेवलत्वंस्यादितिवाच्यं। नतुविधिग्रहणेनबहिरंगपरिभाषायाअनित्य
त्वज्ञापनात्। धर्मिग्राहकमानेनलुकएवतदुपजीव्यानांसमासादीनामपिप्राबल्यसिद्धेश्च॥ ननुचरते वित्तन्निमित्ते [illegible] लुक्विसत्तिनिज्ञेगि
रअचूइतिस्थितेत्रोग्रोयङि·इतिप्राप्तातिय इ·परत्वाभावात्स्वयलक्षणंतुनलुमतेतिनिषिद्धं। तत्रहिअंगस्यसनेनांगाधिकारेणनि
र्दिश्यतेइतिवदन्य ता। नचस्थानिवद्भावः। लुकालुप्तेनस्थानिवदितिनिषेधात्। अत्रुक्लादेनाबाच्चं। तथाचकथमुभयत्रविभाषे [illegible] तिचे
नाम [illegible] धातुलोपइतिस्त्रप्रत्याख्यानपक्षेपृथग्लोपाश्रयणेनस्थानिवद्भावसंभवात्। नचपूर्वत्रासिद्धेनस्थानिवदितिनिषेधः
तस्यदोषःसंयोगादिलोपणत्वेष्विति सापवादत्वात्। यद्यपिअचिविभाषेत्यस्यपूर्वत्रासिद्धमितित्रोयङी [illegible] तिमत्यसिद्धत्वाद्धिमतिषे
ध्यासंभवः तनश्चसत्याभितियङीत्यस्यनिवृ [illegible] ता उभयत्रविभाषात्वं नसंभवतितथापिअधुनेतिव [illegible] लाघवार्थममुनेतिवक्तव्येन
सुनइत्युक्तेयोगविभागार्थतयानयोगेयोगोसिद्धः किंतुप्रकरणेप्रकरणमितिवाअसिद्धत्वनभविष्यतीत्याशयेनोभयत्रविभाषात्वेउ
क्तिसंभवोबोध्यः। सिद्धांतेतुविभाषायाअसिद्धत्वादेवनित्यत्वलत्वसमुदायलोपवादिनांतुमतेजपेक्ष्याअन्तरंगत्वान्नित्यत्वमित्यस्य
वस्थितविभाषेतिवासमर्थयितव्यं॥ इतिश्रीशब्दकौस्तुभेप्रथमाध्यायस्यप्रथमेपादे [illegible] प्रथममाह्निकं५॥०॥ ५ ॥०॥५

मिती १७८१ विधुनागार्षिकुमितेशके माघेतिमत्तिथौ [illegible] श्रीवृध्दतत्सुताभ्यांयो लिखितंपंचमाह्निकं॥

॥श्री॥ स्थानिवदादेशोऽनल्विधौ। आदेशः स्थानिवत् कार्यं लभते प्रवर्तयति च। तृतीयान्ताद्वतिना स्थानिना तुल्यं वर्तते इति वाक्यार्थलाभात्। य
द्रूपवैकल्यादुपदेशाप्रवृत्तौ सत्यामतिदेशो मृग्यते तत्र यद्रूपं स्थान्यलो साधारणं न भवेत्। आवधिषीष्ट। अत्र हन्ते विधीयमानमात्मनेपदमतिदे
शाद्वधेरपि भवति। आङो यमहन इत्यत्र अलुनाश्रीयते। एमा येत्यादेः सुपि चेति दीर्घे कर्तव्ये यद्यपि अनादावित्यलाश्रीयते तथापि न तत्र त
स्या द्विरूपप्रयुक्तः सुपि चेति प्रवृत्तिः। आदेशस्य यञादित्वात्। सुत्वे वैकल्यात्तु उपदेशस्याप्रवृत्तिः। सुप्त्वं चेह यद्यपि एदित्यस्मिन्नलि वर्तते तथापि
न तदलो साधारणं। भ्यामादौ समुदाये विश्रान्तेः। इदं च कार्यकालपक्षाश्रयेणोक्तं। यथोद्देशे सुप्संज्ञाया अपि शास्त्रीयत्वात् सैवातिदि
दा श्यते तत्र उपदेशेनैव दीर्घ इति न किंचित्कष्टं। एतेन अरुदित मिस्लो इडागमोपि व्याख्यातः। तत्रापि सार्वधातुकसंज्ञातिदेशात् इदेशसंभवादि अरुदितां
ति दिक्। अत्र धात्वङ्गकृत्तद्धिताव्ययसुप्तिङ्पदादेशाः प्रयोजनमिति वृत्तिकारः। उदाहरणदिक् चेयं। न तु परिगणनमिति भ्रमितव्यं। ह्लेः सिच इत्या
दीनामसंग्रहापत्तेः। क्रमेणोदाहरणानि। अस्तेर्भूः। आर्द्धधातुके विवक्षिते। अत एव गाङ्लिटि धातूपादाने। धातुत्वाद्धातुप्रत्ययाः। भव्यं। केनका
भ्यां पे:। अङ्गत्वाद्दीनादेशो दीर्घे सुभावाः। वृत्ता। प्रकृत्य। कृत्वा। कृत्स्नस्यापि तिरूतितुक्। अद्यतनात् तद्धितत्वात् तदन्तत्वप्रयुक्ता प्रातिपदिकसंज्ञा। कदथ्वः।
स्थाने तरमप् परिभाषयागतार्थत्वात्। अधोध इति तु उदाहरणं। आष्टमिकद्वित्वस्य स्थाने द्विर्वचनरूपत्वात् संभाव्यते। किंतु तत्रापि फलं दुर्वचं। तस्माद
धोधः कामदुदाहार्यं। अतः कुकमीति प्राप्तस्य सत्वस्य अव्ययत्वात्पर्युदासः। यत्तु वृत्तौ प्रस्तुत्य स्वव्ययादेशोदाहरणं। तच्चिन्त्यं। क्त्वा मात्रस्यान
व्ययत्वात् तदन्तविधेः सर्वैकवाक्यतया सिद्धांतित्वात्। न च जहत्स्वार्था यावृत्तौ क्त्वा आनर्थक्यात् सर्वं पदादेश इत्यभिप्रायेणेदमिति वाच्यं। ह
स्वस्यापि तिकृती तितुङ्गभावापत्तेरिति दिक्। सुपः रामाय। तिङः। अपचतां। तिङन्तत्वात् पदत्वं। वः। नः। पदत्वाद्रुत्वादिः। नन्वेवमधोध इत्यस्या
पि पदादेशत्वादेव गतार्थतेति चेत्सत्यं। गोबलीवर्दन्यायेनाव्ययग्रहणादिति दिक्। इहकाभ्यामित्यादावादेशः कार्यं लभते केनचिदित्यादौ तु
परस्य प्रवर्तयतीति विवेकः। न तु वत्करणमास्तु। स्थान्यादेशयोरेनावतापि असंयोगाल्लिट् कित् इत्यादावविवक्षितार्थलाभात्। यदाहुः। परत्र

स्थानिवद्भावेनाव्ययत्वादव्ययपूर्वपदप्रकृतिस्वर इत्याहुः। तच्चिन्त्यं॥

नवस्था नीआदेशं प्रतिपद्यते इत्येव वाक्यार्थः किं न स्यादिति वाच्यं तन्न आदेशं विधाय केनैव गतार्थत्वात्

परशब्दः प्रयुज्यमानो विनापि वृत्तिं वस्त्वर्थं गमयतीति तेन च आदेशः स्थानिरूपमापद्यते वचनद्वयप्रामाण्याच्च विकल्प इति वाच्यं वालिटीत्यारंभात्। नच
चक्षिङः ख्याञादेशः स्थानीति वचनप्रामाण्यात् सर्वत्र विकल्पापत्तौ लिट्येवेति नियमार्थं तत्स्यादिति वाच्यं एवमपि विभाषा लुङ्लृङोरित्याद्यप्रा
प्तविभाषासु वा ग्रहणवैकल्यापत्तेः। अस्तिभूभ्यां रूपद्वयसिद्धौ अस्तेर्भूरित्यस्य वैयर्थ्यापत्तेः। अन्याङ्गुः वत्करणाभावे स्थानी आदेशस्य संज्ञा
स्यात्। प्रायेण द्विस्त्रिन्यादे संज्ञासूत्राण्येवारभ्यन्ते ततश्चाङ्गेयमहन इत्यात्मनेपदं वधेरेव स्यान्न तु हन्तेः। न च स्वं रूपमिति हन्तेरपि ग्रहणं। अशब्द
संज्ञेति निषेधात्। न च स्थानिनः संज्ञात्वे सिद्धं धर्मिणमिति न्यायबाधः। अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञिनि विनियोग इति पक्षे
संज्ञायाः एवोद्देश्यकोटिनिवेशात्। न चैव माङ्लेवधियम इत्येव ब्रूयादिति वाच्यं वधहिंसायामिति भौवादिकस्यापि ग्रहणापत्तेः। न चैव माङ्लेव
धयम इत्येव पठ्यतां अकारस्याविवक्षितत्वात् न भौवादिके तिप्रसंग इति वाच्यं सकलहन्त्यादेशसंग्रहार्थं माङ्लेयमहन इत्यस्यैव वाच्यत्वात्।
तथा चावधिष्ट इति वदाजघ्न इत्यत्रात्मनेपदं सिद्धं। तथाहि हन्तेर्लिटि तत्सामान्यापेक्षत्वादन्तरंगत्वान्नित्यवादिषु द्वेतेषु परत्वनित्यत्वाभ्यां लोपात्के
र्ते इति बाधित्वा लिटिधातोरिति द्विः प्रयोगेऽभ्यासस्य चर्त्वेऽभ्यासात्परस्य घस्य एकदेशविकारसंभवेन समुदायस्य समुदायादेशत्वाद्वध्या
देशत्वं ततो वधिना तुल्ययोगक्षेमत्वेनेति दिक्। अस्तु वा स्थानिन आदेशः संज्ञा तथाप्यनिष्टं तुल्यमेव। तथाहि अस्यतिवक्तीत्यत्र ख्याति
पदेन चक्षिङः वग्रहेण तत्र कृत्रिमत्वात्। तथा च समचक्षिष्ट इत्यत्र अङ् न स्यात्। अख्यत इत्यत्र च न स्यात्। न चैवं चक्षिङ इत्येव ब्रूयात्। अनु
बन्धनिर्देशेनापि यङ्लुगुच्चारणसंभवादिति वाच्यं। एवमपि गाङ्कुटादिसूत्रे गाङ्ग्रहणे इङ्गाङोर्ग्रहणापत्तेः। इङ इत्येव सिद्धे गाङ्वचनसा
मर्थ्यात् स्पष्टगतिः स्यात्। गमेरिट्परस्मैपदेष्वित्यत्र इणिङिकामेव ग्रहणं स्यात्। तस्मात्कर्तव्यमेव वत्करणं। न चैवं वत्करणाभावाधी
नत्वाद्वानुरोधात्संज्ञाप्रकरणादन्यत्रैव स्थानिवद्भावप्रकरणं क्रियतामिति वाच्यं। तथा सति आदेशग्रहणं विना वाक्यार्थानिर्वाहेन
गौरवापत्तेः। सिद्धान्ते तु आदेशग्रहणमतिरिच्यमानमानुमानिकसंग्रहार्थं भवतीति तद्बलेनैकदेशविकृतस्योपसंख्यानमिति वार्तिकं

482

सत्याख्यास्यते। अपि च काममतिदिश्यतां वेति वक्ष्यमाणमपि वक्ष्यमाणाय तन्मिवेति दिक्। स्यादेतत्। यदि संज्ञाप्रकरणेऽनुकरणं विना अतिदेशाद्याभः
तर्हि कित् ङिदित्यादौ का गतिरिति चेदुच्यते। क्ङिदिति न संज्ञा न क्त्वा सेडिति ज्ञापकात्। न हि क्ङः किंसंज्ञा प्राप्ताम्या निषिध्येत। ननु मृड मृदेति प्राप्तासा
क्या निषिध्यताम्। वचनद्वयसा . र्थं। यच्च विकल्पोऽस्त्विति चेन्न। अम्हइम्रदेश्येनैव वाग्रहणसंभवात्। किं चैवं निष्ठाशीङ्क्त्वादिव्यर्थं स्यात्। न हि शीङादिभ्यो
निष्ठायाः केनचित्संज्ञा प्राप्ता। एवं ङिदित्यप्यतिदेशः कित्साहचर्यात्। किं च ङिदित्यस्य संज्ञात्वे ग्रहिज्येति सूत्रे सैव ग्रहणं स्यात् कृत्रिमत्वात्। तथा
च न व चूरी इति सूत्रं व्यर्थं स्यात्। वा बहूपतेरित्यादौ संप्रसारणाप्राप्तेः। किं च। क्ङिति चेत्यस्याग्रहणं स्यात्। संज्ञायाः स्वरूपानुच्चारणात्। तथा च गाङ्कु च
टादिसूत्रे कुटादिग्रहणं व्यर्थं स्यात्। बहुगणेत्यत्र संख्यावदतिदेशः। अन्यथा टिघुभादिवदेकाक्षरा एव संज्ञायाः कर्तव्यतापत्तेः। कि
क्नौ लिटि चेति न संज्ञाप्रकरणं। तेन लिङ् दिस्यति देशो निर्बाध इति दिक्। अथादेशग्रहणं किमर्थं स्थानिवदित्येतावतैव संबन्धिशब्दम
हिम्नात्तल्लाभात्। यथा पितृवदधीते इत्युक्ते पुत्र इति गम्यते इति चेत्सत्यं। द्विविध आदेशः। अस्तेर्भूरित्यादिः प्रत्यक्षः। तेस्तुरित्यादिस्त्वानुमा
निकः। अत्र हि उकारेणेकारान्तः स्थान्यनुमीयते उकारेण चोकारान्त आदेशः। तथा च तेस्तुरिति फलितोऽर्थः। तत्रासत्यादेशग्रहणे प्रत्यक्ष
स्यैव ग्रहणं स्यान्नानुमानिकस्य। आदेशग्रहणसामर्थ्यात्तूभयपरिग्रहः। तेन पचतु इत्यादेस्तिङन्तत्वात्पदसंज्ञा सिद्ध्यति। ननु एरुरित्यादि
यथाश्रुतमस्तु। एकदेशविकृतस्यानन्यत्वाच्च पदत्वं भविष्यतीति चेन्न। अर्थवत्त्वेव स्थान्यादेशभावविश्रान्तेर्वाच्यत्वात्तस्यैव प्रसङ्गसंभवात्।
तथा हि। षष्ठी स्थानेयोगेत्यत्र स्थानेन च प्रसंगः। सर्वार्थवतः अर्थप्रत्यायनार्थं शब्दप्रयोगात्। यद्यपि च्लेः सिजादावसंभवी दात्तथा
पि सति संभवे अर्थप्रयुक्त एव प्रसंगो न्याय्य इति आदेशग्रहणेन ज्ञाप्यते। उक्तं च। सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः। एकदेशविकारे सर्व
हि नित्यत्वं नोपपद्यते। पदमिहार्थवत्। पश्यतेनेनेति स्मृतत्वतः। यद्यपि सर्वविकारे तु तरां नित्यत्वानुपपत्तिस्तथापीह विकार एव नास्ती
ति तात्पर्यं। तथा च वार्त्तिके कार्यविपरिणामाद्वेति। कार्यमिह ज्ञानं योग्यताबलात्। तथा च ज्ञानं निष्ठ[illegible]उत्साद्यविनाशादिकं विष

483

११ भ्रू०कौ०११८

११ २ ११

ये आरोप्यन्ते इति भावः। नन्वेवं बुद्धिविपरिणाममात्रस्य स्थान्यादेशीभावत्वे अपवादेष्वुत्सर्गो वृत्तं प्राप्नोति। तथाहि। कप्रत्ययात्तादपि अणं तत्त्वप्रयुक्तो

ङीप्स्यात्। अत्राहवार्त्तिककारः। सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनादिति। षष्ठी स्थानेयोगेत्यतो नुवृत्तेरिति भावः। न चापवादः षष्ठीनिर्दिष्टस्य स्थाने वि

धीयते। नाभिनमेंचे त्यादौ तु षष्ठ्याः स्थाने प्रथमा बोध्या। विश्रवणरवणेत्यादीनीत्यशब्दान्तराणि प्रत्ययविधिविषयाणि बोध्यानि। विश्रवः शब्दात्तु न प्रत्ययोभ

वति अनभिधानात् इति भावः। तथाच विदूराञ्ण्य इति सूत्रे भाष्यं। वालवायो विदूरं च प्रकृत्यन्तरमेव वा। नवैतत्त्वेति चेद्ब्रूयाज्जित्वरीवदुपाचरेत् इति। अस्मिन्

पक्षे षष्ठीनिर्दिष्टस्य स्थाने आदेशा विधीयन्ते इति वृद्धिसूत्रस्थभाष्यस्याश्रुतमेव निर्बाधं। यत्तु स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वे एवं परतया कैयं

मं सू० टेनैयाख्यातात्तदत्रस्य पक्षान्तराभिप्रायेणेत्यवधेयं। अथवा इयन् श्नाश्नुरिति द्विकरणं तापकं अपवादे उत्सर्गवृत्तं नस्यादिति। नचपित्त्वनिवृत्त्यर्थं तदितिवाच्यं

इयनो नित्त्वादेवतत्सिद्धेः। नित्त्वस्याद्युदात्तार्थ। श्यनः पित्वे तु पित्त्वादेवानुदात्तत्वे लसार्वधातुकस्यत्तास्यनुदात्तत्वेच धातुस्वरेणैव सिद्धे किं नित्वेनान

चानेकाक्षु विशेषः। दिवादौ तदभावात्। वास्तु वर्तनइत्यस्तीतिचेन्न। वा शब्दस्य विकल्पार्थत्वात्। नच भ्वादिपाठेन सिद्धेस्तद्वैयर्थ्यं। भ्वादिपाठस्य

वृद्धः स्यसनो रित्याद्यन्तर्गणकार्ये उपक्षीणत्वात्। नन्वेवं ततो वावृत्यमानासारम् अग्रालोन्यवीक्षते इति भट्टिप्रयोगानुपपत्तिरितिचेन्न। तत्र वा शब्दस्य

इत्यर्थतया कामयमानेवा न तु तथाप्युपलनार्थमागतेत्यर्थात्। अत्र कैयटः। ताच्छील्यादिविषये वा न ग्लुः इयनो नित्त्वप्रवृत्तेराद्युदात्तार्थस्यादिति

सा० भा० तत्र हि लसार्वधातुकत्वादनुदात्तात्प्राप्त्याचित इत्यंततोदात्तत्वमेवप्राप्तमिष्टं च तत्रानिष्टार्थमेव नित्त्वं किन्नस्यादिति तस्यानुयः। न त्वेतद्युक्तं

अन्यत्र विकरणेभ्य इति पर्युदासात् प्रत्ययस्वरस्य दुर्बलत्वात्। नच नित्त्वसामर्थ्यात्तद्बाधः लसार्वधातुके चरितार्थत्वात्। तत्र स्थानि

वृद्धः वद्भ्येन पित्वेन। तार्थ नेतिचेन्न। इह नित्वेनातिदेशपर्युदासयोरन्यतरस्मिन्नवश्यं बाध्ये अतिदेशबाधस्यैव न्याय्यत्वात्। पूर्वीन्वि

धीन्बाधं तेनोत्तरान्निति न्यायाच्च। यत्तु कैश्चिच्चानशः तस्याद्युदात्तत्वमिष्टं मित्येवं परतया कैयटग्रन्थव्याख्याय विकरणेभ्योऽन्यत्रे

ति पर्युदासस्तु यत्र विकरणः स्वरभाक् तद्विषयः। इह तु विकरणान्तमेव स्वरभाक्। सोवर्थः सप्तम्यस्तदन्तसप्तम्य इति सिद्धान्तादिषुके

इत्यन्तोदात्तत्व

स्यादेतत्तः पित्वनिवृत्त्यर्थं ङित्वमस्तु। न च श्यनो ङित्वादेव पित्वनिवृत्तिसिद्धेः निवृत्त्याद्युदात्तार्थं यदि स्थानिवद्भावाल्लित्वं स्यात्। तदा विकरणे
स्य पित्वादनुदात्तत्वे लसार्वधातुकतास्यनुदात्तेदिति सूत्रेणानुदात्तत्वे परिशेषाद्धातुस्वरेणैवाद्युदात्तत्वं स्यात्। न हि दिवादिषु अनेकाचो धा
तवः सन्ति। यतो धातुस्वरेणान्तोदात्तत्वप्राप्तौ सत्यामाद्युदात्तार्थं नित्वं स्यात्। वावृतु वर्तने इति तु वा नूः छन्दस्तु श्यनो विकल्पार्थः। ननु धात्वं
तः पाति। भूवादिपाठमात्रात्तु नूः व्रलभ्यते। कृष्णः स्यसनो रित्याद्यन्तर्गणकार्यार्थतया पिपाठोपपत्तेः। ततो वावृत्यमाना सा रामनूः क्रा
न्यवीक्षते इति भट्टिप्रयोगे तु वा नूः छन्दस्त्वार्थः। कामयमाने वेसथः। वस्तुतस्तु छन्दनार्थमागते तिभावइति वाच्यं। तो छी ल्याद्येविषये

प्र चान ङितिकृते राद्युदात्तार्थता या नित्वस्य चरितार्थत्वात्। तत्र हि लसार्वधातुकत्वाभावादनुदात्ताप्राप्त्या चित्वमेव प्राप्तं नचैवं श्य
नो नित्वे सत्यपि पिपिस्वरप्रसंगः। नित्स्वरस्य सतिशिष्टत्वात्। अन्यत्र विकरणेभ्य इत्यस्य तु नायं विषयः। सोवर्यैः सत्सम्यस्तदंतस
त्यम्य इति विकरणान्तस्यास्य यस्वरेन तु विकरणान्तस्य। नन्वेवं पुसंशा सूत्रभ्रेपेदावेवायं। ननु देवस्तीति भाष्यविरोधः। दीयमा
न इति रूपं तोदात्तं स्यात्। श्यनि तु आद्युदात्तमिति फलविशेषस्येणदिवादिपाठस्याश्रयितुमहक्यत्वादिति चेन्न। अनभिधानादिह
चानरोचनेति तदानूयात्। यथोत्तरं मुनीनां प्रामाण्येनाद्युदात्तस्यैवेष्टत्वाद्धात्ततो वावृत्यमाना सेति भट्टिप्रयोगाद्धा नूश्छो धात्वं तु
भूतइति मते तु नित्वस्याद्युदात्तविध्यायकतया चरितार्थत्वं स्पष्टमेव। युक्तं चेदं। विकरणस्वरमात्रेपर्युदासस्यात्मना नेवश्चेति
सूत्रस्थभाष्ये स्थितत्वात्। खनन्तस्येव स्वानन्तस्यापि तोदात्ततायादुर्वारत्वात्। त्रत्यकेयटस्याभ्युच्चयमात्रत्वात्। तस्मा
त्पित्वनिवृत्त्या चरितार्थं ङित्वमिति पूर्वपक्षो दृढ एवेति॥ अत्र कैयटः। लक्ष्यानुरोधेन सामान्योपक्रमं स्वापकमाश्रियते न
तु नियमार्थतेति॥ ङः। १३ सर्गेवूतेन स्यादित्येतदग्रेकिंचेत्यतो यं पाठः। पाठद्वयं कौस्तुभे तु इत्यन्तेस्वष्टमाह्निके भाष्ये यो यं उत्तमः पा

फुलीचेहापाठः॥

॥श्री.को.८
॥३॥

मित्तिट

किंचातोनुपसर्गेकइत्तिकापवादस्यगापोष्टक: किक्करणंज्ञापकंनापवादेउत्सर्गेवृत्तंभवतीत्ति। अनल्विधावित्तिकिं। तेनतस्मात्तस्यत्तस्मिंश्चविधौ मा
माभूत्। नत्राला विधौ यथा। व्यूढोरस्केण। अच्चसोपदादावित्ति विसर्जनीयस्य स्थाने विहितस्य सकारस्य स्थानिवत्वाद्विसर्जनीयस्याट्स्यपदे
शेनाट्व्यवायेइत्तिणत्वप्राप्तो। अल: परस्य विधौ यथा। पंथा: स:। अत्र हल्ङ्याब्भ्यादिलोपोन। अलो विधौ यथा। दिवउत्। द्युकाम:। लोपोव्योर्वलीत्तिलो
पोन भवत्ति। ऊठविधानेतु अहर्विमलद्युइत्यादौवरितार्थो। अल्विधौ यथा। यजे: क्त: इष्ट: कइष्टइत्यत्र संप्रसारणस्य स्थानिवत्वात्केयिष्टत्यादाविव हस्वा
वेत्पुक्त्वनभवत्ति। सइष्टइत्यत्रेतत्तदो: सुलोपोनभवत्ति। अनेलइत्युक्तेपिसंबधसामान्यषष्ठ्याप्रागुक्तानेकविभक्त्यर्थसंग्रहोयद्यपिभवत्तितथापिवि
प्विशद्वोपादानमप्राधान्येनाप्पलआश्रयणेनिषेधार्थो। तेनप्रपठ्येत्यादि सिद्धं। अत्र हिवलादेरित्यप्राधान्येनाला श्रित:। नतुप्राधान्येन। स्यादेतत्
स्थान्यनुबंधकार्याण्यपित्तर्हि निषिध्येरन्। तथा च प्रदीव्येस ... स्थानिवद्भावेन किंचिन्नलभ्यत इत्तिचेन्न। अनुबंधा अनेकांता इत्तिपक्षे अनुबंधानां
स्थान्यलत्वाभावात्। एकांतपक्षेप्यंतरंगेणलोपेनादेशसंबधात्प्रागेवानुबंधानामपहारात्। नल्पपीत्तिलिंगाच्च। यत्तुसेटोपिच्चेतिज्ञापकमुच्य
तेतत्साक्षिकं। अपिद्वचनसामर्थ्यात्स्था...तरत्तमपरिभाषयाप्राप्तमनुदात्तत्वंनभवतीत्यस्यापिसुवचत्वात्। यद्यपिसामान्यातिदेशेविशेषा
नत्तिदेश इत्ति सिद्धांत:। उपस्थितसामान्यधर्मैस्तदाक्षिप्तव्यापकसामान्यधर्मैश्चविध्याकांक्षापूरणे सत्ति अनुपस्थितस्य विशेषस्य ग्रहणप्र
माणाभावात्। अतएव ब्राह्मणवदस्मिन्क्षत्रियेवर्तितव्यमित्युक्तेमाठरादिविशेषकार्यंनात्तिदिश्यते। अतएवाचाशंसायांभूतवच्चेत्यत्रभूतसा
मान्येविहितयोर्लुङ्लिटोरेवात्तिदेशोनतुभूतविशेषेविहितयोर्लुङ्लिटोरपीति सिद्धांत:। तथापीहनल्पपीत्तिलिंगाद्विशेषोप्यत्तिदिश्यते
कित्तिपरत्तोविहितमीत्वंनिषेद्धुंहिनल्पपीत्यारभ्यते किंत्वच्क्ताविशेषधर्म:। सिद्धेकेतदभावात्। तेनप्रत्तिदीव्येत्यादिसिद्धं। तस्मान्नल्पपीति
एवंतिसन्तेविशेषातिदेशेअनुबंधकार्यातिदेशेचेत्युपयज्ञापिसाथकमित्तिस्थितं। यत्तुप्राच:। अनल्विधावित्तिविशेषातिदेशेपेज्ञापकइत्ति
चिंत्यं। व्यूढोरस्केणेत्यादौविसर्गत्वस्यव्यापकीभूतयारत्वहरुत्वयोर्निषेधेनचरितार्थत्वात्। यद्यपिक्तातिदेशेरत्वप्रत्ययत्वाद्यत्तिदेश

कइष्ट पणत्वस्य

विशेषा मभ्युपेत्यैकदेशस्य इस्यादेशो हल्ङ्यादि इतिदेशो न प्राप्नोतीति मिश्रेणोक्तं । तत्र विसर्गत्वयणत्वयोरदृष्टत्वात् इत्येकं कथं विशेषौ धर्मावितिविपश्चित एवं विदाङ्कु-
र्वन्तु । यद्यपि तत्स्थानापन्नस्तद्धर्मं लभत इति न्यायसिद्धं । अत एव व्रीहिवत् स्थानापन्नेषु नीवारेषु वचनं विनैव व्रीहिधर्मा अवघातादयः क्रियन्-
ते । तथापि तेषां प्रवृत्तापूर्वसाधनत्वप्रयुक्ततया युक्ता नीवारेष्वनुष्ठानं । आङो यमहन इति हन्तेरात्मनेपदं तु न हिंसाद्यर्थाभिधानप्रयुक्तं येन वधो भ-
वेत् । किंतु स्वरूपमिति वचनात् स्वरूपविशेषप्रयुक्तं । अत एव तृणह्यादेर्न भवति तस्मात् युक्त एवातिदेशारंभः । स्यादेतत् । मा भूत् न्यायेन गतार्थता । ज्ञा-
पकात्तु भविष्यति । तथाहि । युष्मदस्मदोरनादेश इत्यग्रहणं ज्ञापयति । आदेशः स्थानिवत् स्यादिति । अदो जग्धिर्ल्यप्ति किति इति सूत्रे ति किति इत्येव सिद्धे ल्यब्-
ग्रहणं अनल्विधावितीमं ज्ञापयिष्यति । अप्राधान्येन वाल्आश्रयणे निषेध इत्यस्य ज्ञापकताथो च किं सूत्रेणेत्युच्यते । उत्तरार्थं तावत्स्थानिव-
दादेश इति कर्तव्यमेव । तस्यैव योगविभागमात्रेणोपपत्तौ सत्यामर्थापत्तिकैवचनेन कल्प्यं । एवं स्थिते अनल्विधाविति यमेशः स्पष्टप्रतिपत्त्य-
र्थं क्रियते । उत्तरसूत्रे द्वितीयविधिग्रहणस्यानुवृत्त्यर्थं वा । तत्प्रयोजनं तु तत्रैव वक्ष्यते । एतदेव सकलमभिप्रायोक्तं भगवता आरभ्यमाणेप्य-
स्मिन् सूत्रे इति स्यादेतत् [illegible] अस्तु सूत्रारंभः तथापि कार्यातिदेश एवेति कुतः प्रकारान्तराणामपि संभवात् । तथाहि । अतिदेशः षोढा । निमि-
त्तव्यपदेशतादात्म्यरूपशास्त्रकार्यरूपातिदेशभेदात् । तत्र निमित्तमतिदेष्टुं ब्राह्मणवत् । न हि ब्राह्मणस्याग्रभोजनादौ निमित्तभूतं ब्राह्मण्यं वचनशतेनापि
क्षत्रिये अतिदेष्टुं शक्यते । पूर्ववत्सनः इत्यत्रापि प्रवृत्तिगतं ङित्त्वादि न सन्नन्ते अतिदिश्यते । किंतु प्रकृतिगतमेव तत्सनोऽव्यवधाने सत्यपि आत्मनेपदं प्रवर्तयति । सेत्तावन्मात्रम-
तिदिश्यते एतावतैव निमित्तातिदेशोयमिति व्यवहारः । न चायं कार्यातिदेश एवास्त्विति वाच्यं । चिकीर्षते प्रचिकीर्षते इत्यादावप्रसंगात् निमित्तातिदेशे
पक्षे तु अनुपसर्गः प्रपूर्वश्च क्रमिरात्मनेपदं प्रवर्तितवानिति स्नुक्रमोरनात्मनेपदनिमित्त इति नियमादिट् न भविष्यति । निमित्तं हि तत्र फलोपहितमेव गृह्यते ॥

वेहसनाव्यवहितेप्य

ननु स्वरूपयोग्यतामात्रं इति वक्ष्यामः। सिद्धं त्वात्मनेपदेन समानपदस्थस्येट्प्रतिषेधादिति वार्तिकरीत्या तु इहापि कार्यातिदेशतास्तु वचान्याय्या चेति तत्रैव वक्ष्य
ते। व्यपदेशातिदेशस्तु आद्यन्तवदेकस्मिन्निति। एकस्मिन्नपि आदिरन्त इति च व्यपदेशोऽतिदिष्टे तत्तत्सूत्रैरेव कार्याणीति भावः। तथा च प्राचः। आद्यन्तवदेकस्मिन्
द्व्यपदेशो निमित्तं पूर्ववत्सन इति। एतच्च निर्मूलमिति तस्मिन्नेव सूत्रे हरदत्तः। तस्यायं भावः। कार्यातिदेश एव तत्र युक्तः। सर्वातिदेशानां कार्यार्थतया कार्यस्यैव प्राधान्यात्
अत एव कार्यातिदेशाभ्युपगमे यत्र बाधकावतारस्तत्रैव प्रकारान्तरानुसरणम्। न चाद्यन्तवत्सूत्रे तदस्ति। प्रत्युत व्यपदेशातिदेशपक्ष एव बाधकं। तथा हि कुरुते कुर्वद
त्यादावन्त्यव्यपदेश आदिव्यपदेशाश्रयस्तु। तथापि अन्त्यो आदिर्यस्येत्येवंरूपस्य बहुव्रीह्यर्थस्याभावाट्टिसंज्ञाया अभावाट्टेरेत्वं न स्यात्। कुर्वीते इत्यादौ दृष्टस्य टेरेत्वा
ख्यस्य कार्यस्यातिदेशे तु न कश्चिद्दोष इति। तादात्म्यातिदेशस्तु भिन्नयोरभेदातिदेशः। सुबामन्त्रिते पराङ्गवत्स्वरे इति यथा। तेन यत्ते दिवो दुहितर्मर्तभोजनमित्या
दौ आमन्त्रितस्य चेति आष्टमिकसूत्रेण पदात्परस्यामन्त्रितस्य क्रियमाणो निघातो दिवो दुहितरिति समुदाये प्रवर्तते। शास्त्रातिदेशस्तु कर्मवत् सूत्रे पाक्षिको
कार्यातिदेशो गोतो णित् इत्यादिः। रूपातिदेशस्तु तृज्वत्क्रोष्टुरित्यादिः। तदिह कार्यातिदेश एवेत्यत्र किं विनिगमकमिति चेदुच्यते। कार्यस्य प्राधान्यात्तदतिदे
श एवायं। अतिदेशान्तरे बाधकसत्त्वाच्च। तथा हि। निमित्तव्यपदेशो तावत्साक्षिकाविरुद्धं। शास्त्रातिदेशोऽप्येवं। तादात्म्यातिदेशस्तु द्वयोः सहावस्थितयोः
स्यात्सुबामन्त्रितयोरेव। इह तु स्थानी आदेशेनापहृत इति तदसंभवः। रूपातिदेशे तु आदेशविधानं व्यर्थं स्यात्। न च वचनप्रामाण्याद्विकल्पः। विभाषा लुङ्
लृङोरिति विकल्पारम्भात्। तस्मात्कार्यातिदेश एवायमिति स्थितम्। यत्तु न्यासकारेणोक्तं। व्यपदेशातिदेशः संज्ञापक्षपर्यवसन्नः। स च वत्करणसामर्थ्या
देव न भविष्यतीति। अत्रेदं वक्तव्यम्। असति हि संज्ञापक्षाद्वैषम्यं। तथा हि। आग्नेयमहन् इत्यादौ वधेरग्रहणं स्यान्न तु हन्तेः। तथा केन कस्मादित्यादौ अंगका
र्योदीनि न स्युरिति संज्ञापक्षे दोषद्वयं। न चेदं व्यपदेशोऽस्ति। स्वरूपमिति वचनाद्धि हन्तेर्हन्तिरेव संज्ञा तद्व्यपदेशस्य वध्यावप्यतिदेशो लुभ्यामात्मनेपदं लु

वक्ष्यते ८
कर्मणेति ८
नि

प्यते ननु हतेरिति। एवं च स्थानिनिष्ठानां धात्वंगादिव्यपदेशानां आदेशेऽतिदेशाद्धात्वंगादिकार्याण्यपि सुलभान्येव न स्थानप्राधान्यात्कार्यातिदेशोऽयं इत्येव नत्वं॥
अत्र वार्तिककाराः। तस्य दोष इति उपक्रम्य तथा आदेश उभयप्रतिषेधः ष्याप्ग्रहणे दीर्घः। आहिभुवो रीट्प्रतिषेध इत्यादीनि पेठुः। तत्रोभयशब्दे यथा नातिप्रसं
गस्तथा सर्वादिसूत्रे एवोपपादितं। ष्याप्ग्रहणेपि ङी ई आ आप् इति दीर्घप्रश्लेषात् इति खट्वेन अतिखट्व इत्यादौ नातिप्रसंगः। न चैवमतिखट्वायेत्यत्र दोषतादवस्थ्यं
उपसर्जनस्त्रीप्रत्ययेतदादिनियमसत्त्वात्। न चैवं प्रश्लेषवर्णनवैयर्थ्यं। अतिखट्व इत्यादावंगाधिकारविरहेणावयवाद्भावं समाश्रित्य हल्ङ्याब्भ्यो दीर्घात् सुलोपापत्तेः। न
च तत्र विहितविशेषणाश्रयणं युक्तं। यः स इत्यादावतिव्याप्तेर्यासे इत्यादावव्याप्तेश्च युक्तं। अत एव सूत्रे तत्र दीर्घग्रहणं कृतवान्। दीर्घप्रश्लेषस्तु भाष्यकारसंमत एव नोव
र्ण्यते इत्यन्यदेतत्। युक्तं चैतत्। वार्तिकमतेपि अतिखट्वायेत्यादौ अंगाधिकारबलेन कथंचिन्निर्वाहेपि निरसेन सेपूतेः इत्यादावतिप्रसंगस्य दुर्वारत्वात्। सुता
मिच्छन् सुतीः इत्यादौ सुलोपापत्तेश्चेति दिक्। अस्तु वा आकारान्तमपि प्रश्लिष्य तत्सामर्थ्यान्मध्ये ह्रस्वताप [illegible] न्नपरिहार इति दिक्। आहिभुवो रीति वार्ति
कं तु भाष्यकाराः प्रत्याचख्युः। आभेस्तत्र आहेः स्थानिवद्भावेन प्राप्तो भुवईट् न भवति। आहः स्थ इति ज्ञापकात्। तेन सल्लादेः परे थस्य [illegible] विधीयते। न च वृत्तेपीटि
भूतपूर्वगत्या सल्लादित्वाद्थकारस्येति वाच्यं। एवं हि सति आथमेव विदध्यात् लाघवात्। तिवादीनामपवादानामपि णलादीनामपि भूतपूर्वगत्या सल्लादित्वात्त
स्यादाहस्थ इति ज्ञापकादाहेरिट् न [illegible] विधौ स्थानिवद्भावो नेति स्थितं। अस्तेर्भूरिति विहितस्य भुवोपि स्थानिवद्भावप्रतिषेधो न वक्तव्यः। अस्तिसिचोऽपृक्ते
इति द्विसकारकनिर्देशेन सकारान्तादस्तेः परस्य ईड्विधानादिति। स्यादेतत्। अस् [illegible] स् इति सकारद्वयनिर्देशो धात्वन्तुत्वाभावाद्भिन्नवाक्यत्वानुपपन्नः। पदमध्य
प्रविष्टेन सकारेण सिचो विशेषणासंभवे सिज्राश्रयस्य ईटः प्रसंगश्च। न चास्तेः सांतत्वेन विशेषणसामर्थ्यात्सिच्प्रयुक्तोपीट् नेति वाच्यं। तथापि
स्वतंत्रस्य भवतेरतिप्रसंगस्य दुर्वारत्वात्। तथा चार्थभेदाभावेपि स्वतंत्रास्वतंत्राभ्यां भूभ्यां अभूवीत् अभूत् इति रूपद्वयापत्तिः। यत्तु एतद्दोषापन्यास

प्यति तासरकारे

सल्लादित्या

॥सू॰कौ॰८

॥५॥

पूर्वकंमाधवाचार्यैरुक्तं।सिचोल्पाच्कत्वाभावाद्द्वंद्वेविषयत्वेनाभ्यर्हितत्वाच्चपूर्वनिपातेकर्तव्येस्तिसिचइतिवचनात्तत्रादिनाविद्यमानस्सिचइत्यप्यर्थोलभ्यतेअतएवश्लि
प्रत्ययप्रयोगोपिसार्थकः।अन्यथासिजस्त्यामित्येवब्रूयात्।नचैवमसत्तावस्यतोचातिप्रसंगःविकरणव्यवधानेताभ्यांपरस्याप्रक्तसार्वधातुकस्यासंभवादिति॥त
श्लित्वं।एवमपिश्लिप्रत्ययसमाधानेपिद्विसकारकोनिर्देशइतिभाष्यस्यानिर्वाहात्।एतेननसिचूचअसूचसिचस समाहारद्वंद्वेलुप्तपंचमीकंपदं।अयस्मयादित्वेन
भत्वान्नजश्त्वकुत्वे।अस्तिचतत्सिच्चेतिकर्मधारयः।तेनलुप्तास्तिसिचोभूभावेनापहृतादस्तेश्चपरस्यनेतिकल्पनापिप्रत्युक्ता।उक्तरीत्यारूपासिद्धावपिभाष्यानिर्वा
हात्।तस्मादिहभगवतोभिप्रायांतरमेववक्तव्यं।अत्रोच्यते।अस्तिसिचस्सइतिच्छेदः।सांतादस्तेर्नतुकृतभूभावात्।सांतात्सिचःश्रूयमाणाइतियावत्।तथा
चसिचइत्यस्यानंतरंसकारःप्रश्लिष्यतेनतुश्लिपःप्राक्।येनमाधवोक्तःश्लिप्रत्ययानुपपत्तिरूपोदोषःस्यात्।अतएवसिचोपृक्तइतिद्विसकारकोनिर्देशइत्युक्तं
भाष्ये।अन्यथाह्यस्तीतिनिर्देशइत्येवब्रूयात्।नन्वेवमस्तिसिचोपृक्तइतिसंहितावाअसंहितावाकथंनिर्वहतीतिचेद्दिक्।संयोगांतस्यलोपइतिद्वितीयःसकारोलुप्यते
ननुलुप्तविभक्तिकंसइतिपदं।नचैतत्संयोगांतं।तथाचसंयोगांतंयत्पदंतदंतस्यविधीयमानोलोपःकथमिहस्यादितिचेन्न।संयोगांतस्यपदांतस्यलोपइति
व्याख्यानात्।संयोगेतिहिलुप्तषष्ठीकंपृथक्पदं।संयोगस्यपदस्येत्युभयंचैतत्तस्यविशेषणं।एवंचैतत्सूत्रतोप्यायातः।यदिहिबहुव्रीहिःस्यात्।पदंचान्यपदार्थइ
तिवार्तिककारस्तुतंव्याख्यानंसंमतंस्यात्।तर्हिअंतग्रहणंनकुर्यात्।संयोगेनपदविशेषणादेवतदंतलाभात्।अपिचसरूपसूत्रेपृथक्सर्वेभ्योविभक्तावेकशेष
इतिपक्षेवसस्सइतिप्रसज्येतेत्याशंक्यसंयोगांतलोपासिद्धमितिभाष्यग्रंथःप्रकृतव्याख्यानएवानुकूलः।यत्तुतत्रैवकैयटोवक्ष्यतिवस्तुतःसंयोगांतस्यलो
पात्।हल्ङ्याब्भ्यादिलोपात् इति।ननुमूलेस्वरस्यविरुद्धा।तत्रव्याख्यावक्षतइत्युपक्रमादपरितोषमस्तंच।अतएवहलेत्यसूत्रेअन्योन्याश्रयोद्धारार्थंअंत्यलकारस्य
त्संयोगेलोलित्वंस्वरार्थंक्रियमाणंज्ञापकमितिप्रक्रम्यननुलकारश्रवणार्थाएवसाद्यस्यअपृक्तहलितिदिक्।...णलःव्यावृत्तयेक्रियमाणंणलोपृक्तो

ज्ञापयतीति वक्ष्यति। तस्याप्ययमाशयः। भेत्ते स्तो दो इत्यादेशेऽहल्ग्रहणस्य व्यावृत्त्यैव संभवति। सुतिसीतिप्रत्यये तु प्रकृतेः संक्षेपेण हलन्तात्याः प्रकृतेः परेषां स्वादीनां लो
पः। न च उदात्तत्वं प्रतीता संता प्रकृतिरिति। एवं चेहापि रुत्वस्य प्रकृतिलाभात् कथं हल्ङ्याब्भ्यो दीर्घादिलोपः। अस्तिसिचोऽपृक्ते इति द्विसकारकनिर्देशः इति मतं तत्रथो
पितरक्तव्याख्यायामनुरूपएवान्वयस्तत्र रीत्या संयोगान्त लोपस्तथापि तस्यासिद्धत्वाद्रोरुत्वे दुर्लभमिति चेन्न। संयोगान्तलोपो रुत्वे इति वार्त्तिकेनासिद्धत्वनिषे
धात्। हरिवो मेदिनं त्वा इत्यादि वस्सिचोऽपृक्त इति प्रकृतनिर्देश एव च वार्त्तिकोक्तार्थज्ञापको बोध्यः। [illegible] अथवा अस्तु [illegible] इति कारोक्त एव संयोगान्तस्य लोप

तु स्या इति सूत्रार्थः। अंतग्रहणं प्रत्येकं संयोगान्तसंज्ञेति पक्षे संयोगान्तवतीयस्येति द्विवावगतये। अस्तु संयोगे संज्ञेति भाष्यकैयटयोस्तथैवाभिधानात्। प्रकृते मास्तु संयोगा
न्तलोपः। किं तु द्वयोः सकारयोः रुत्वे कृते तोरोरि लेनेन एक एव उकारो भविष्यति। विधेयविशेषणस्य एकत्वस्य पश्चेकवत् द्विवक्षितत्वात्। रोरिति जातिनिर्देशो नान्तःप पर

स्य दोरेस्य पूर्वत्वं च संभवात्। जातिपरत्वे प्रकृतनिर्देश एव प्रमाणमस्तु न च परत्वाद्रुगुणे चेति प्रथमस्यैव रोरुः स्यादिति वाच्यं रुत्वस्यासिद्धतया हशः परत्वाभावात्। न चा
श्रयासिद्धत्वमिति वाच्यं स्थान्येकत्वे तथात्वे निमित्तीभूतहशः तदसंभवात्। एष एव च द्विसकारकनिर्देशं वदतो भाष्यकारस्याशयः। ननु संयोगान्तलोपइति अ
त एव नुद विदेति सूत्रे श्रुपः कद्र्त्यादिबहुयोगविच्छिन्नस्य नकारस्य कथमनुवृत्तिरिति आशङ्क्य अन्यत्र स्यात्त्रयाख्येति संहितापाठेन नकारान्तरमश्लेषमुक्तं भाष्ये
हलो यमामिति लोप इति हि तस्याशयः। पूर्वोक्तरीत्या तु संयोगान्तलोपेनैव सिद्धेः संहितापाठपर्यंतं नोपन्यस्येत्। संहितायामपि हि हलो यमामिति लोपस्य बहि
रङ्गत्वत्रिपादीस्थत्वाभ्यामसिद्धत्वात्संयोगान्तलोपेनैव भाव्यं। संयोगान्तलोपे यणः प्रतिषेधः। न वा झलो लोपात्। बहिरङ्गलक्षणत्वादिति वार्त्तिकोक्तपक्षत्र
यमध्ये प्रथमचरिमयोस्तस्य दुर्वारत्वात्। तस्मात्समुदाये प्रत्येकं वा संयोगान्तसंज्ञेति पक्षद्वयानुरोधेन द्वसमाध्यानद्वयं व्यवस्थितमिति भाष्यार्थः। पूर्वोक्त
रीत्या सिच इति समाहारमाश्रित्य तदुपरि स इति पक्षे तु अस्तिग्रहणप्रत्याख्यानपरत्वेन पीदं भाष्यं योजयितुं शक्यमिति दिक्। एतेन संयोगान्तस्य लोप इ
तिसूत्रे अंतग्रहणं शक्यमकर्तुमिति पदमंजरीप्रयुक्ता। पक्षद्वयेपि प्रयोजनस्योक्तत्वात्। विद्यमानं यत्सिचस्स इति पक्षे यो(वा) ज्यायत्तु सिचः परत्वादिति प्रोक्त

॥सि॰कौ॰८

॥५॥

स्थानिवद्भावप्रतिषेधपरेणोक्तवार्त्तिकेनाप्राप्तेः। परत्वात्तु पुनः प्रवृत्तस्येटो निवृत्तावपि

वार्त्तिकफल आदिभुवो रीङ् प्रतिषेध इति निषेध इति केचिदुक्तं। तस्य दोषः लुपक्रमात्। स्थानिवद्भावप्रतिषेधपरेणोक्तवार्त्तिकेनाप्राप्तेः ... नाः। वध्यादेशे वृद्धितत्प्रतिषेधः द्विधि

सिच्प्रयुक्तस्यानिवीर्येत्वात्। अन्यथा दगादित्यादो उक्तदोषतादवस्थ्यात्। तस्मात्प्रागुक्त एषान्यतमः पन्थाः। ऊरणं इत्यले बहु ... लोपो वृद्धिरिति मत्वाद्वृद्धिर

श्चेति वार्त्तिकान्तरे। अस्यार्थः। हन्तेर्लुङि कृते वधादेश न्यन्नवधकगात्रविचक्षणाजिराद्यर्थमिति वार्त्तिकेन संज्ञा छन्दसो वधादेशः। स च हलन्त इति मत्वाद्वृद्धिर ... एकाचः इति निषेधः प्राप्तः। तस्मि

पाद्यते हन्त्रस्तो चिण्णलो रिति तत्कारस्थत योः कर्तव्ययोः स्थानिवद्भावप्रतिषेधः तथा आवधीष्टेत्यादौ स्थानिवद्भावेनागतयोः ... वधादेशस्तावददन्तः। अन्यथातो हलादेरिति

भपिकर्तव्ये स्थानिवद्भावेनागतानि तिवाच्या। तदेतद्धिद्धिश्चेति अनेनार्थादुक्तं। एतदपि भाष्ये प्रत्याख्यातं। तथाहि वधादेशस्तावददन्तः। अन्यथा ... णादिकसूत्रेण क्वुन्प्रत्ययः। तथा चेह वृद्धित्वयोः प्रसंग एव नास्ति

वृद्धिप्रसंगात्। एतच्चोत्तरसूत्रे भाष्ये एव स्पष्टं। वधकः इति नायं ण्वुल्। किंतु हनो वध च ... णादिकसूत्रेण क्वुन्प्रत्ययः। तथा चेह ... प्रत्ययस्वरो बाध्येत इति वा

आवधीष्टेत्यादौ विण्निषेधोपि न भवति। वधादेशे आद्युदात्तनिपातनसामर्थ्यात्। न चैवं सति निष्टेन तेन यदा वधीष्टेत्यादौ प्रत्ययस्वरेणेव सति शिष्टत्वात्। स्यादेतत्। हद्वि धिश्चेत्येष पूर्वपक्ष एव हि

च्या। आर्द्धधातुकीयानामादेशानां प्रत्ययविवक्षामात्रेण प्रवृत्याप्रत्ययस्वरस्यैव सति शिष्टत्वात्। ... अहितयोः स्थानिवद्भावविरहात्। सत्याने हस्थानिवद्भावं ननु

शिलः। तथाहि। उपदेशेनुदात्तादिष्विति निषिध्यते। न च वधिस्तथा। स्थानिवद्भावेन तथेति चेन्न। अच्विधौ स्थानिवद्भाववस्तु अंगसंज्ञार्थं मृग्यते। लुक्रमेव। एवमपि

ब्रूमः। किंतु हस्तुपदेशे एव वध रूपदेशः। चूस्तु पदेशादिवक्तर्त्ता कर्त्तुमित्यादौ करिष्यादीनां स्थानिवद्भाववस्तु अंगसंज्ञार्थं ... स्यसिच्सीयुट्तासिषु वार्त्ति

रिहारः। अथोसंगत एवायदि हि प्रागेव प्रत्ययोत्पत्तेर्वधादेशोभ्युपगतः तर्हि वध भावात्। सीयुटि चिण्वद्भावो विप्रतिषेधेनेति स्यसिच्सीयुट्तासिषु वार्त्ति ... द्वितीयमपि

कं विरुध्येत। अन्तरंग बहिरंगयोर्विप्रतिषेधायोगात्। तथा च कर्मणि सीयुटि वधिषीष्टेत्येकमेव रूपं स्यात्। इष्यते तु घानिषीष्टेति द्वितीयमपि

... णिसीयुटि ... लुङ्ल्यादीनां परस्मैपदत्वाभ्युपगमेन विप्रतिषेधः संभवत्येव। अत एवेहाद्युदात्त

अज्ञोच्यते। वार्त्तिकमते आर्द्धधातुकस्य स्वविषयसप्तमीत्वे पि लिङ्लुङ्लृङ्ल्यादिः पिविषयसप्तम्येव। तथा चाद्युदात्त

निपातनासंभवादिद्भिधिश्चेत्युपसंख्यानं। भाष्यकाराणां तु अयमाशयः। आर्द्धधातुक इति वल्लिङ्लृङ्ल्यादिरपि विषयसप्तम्येव। तथा चाद्युदात्त

निपातनासंभवादिद्धिधिश्चेत्युपसंख्यानं।

निपातनेनैवोपपत्तेः। इट्दीधिश्चेति न कर्तव्यमेव। पाणिनिशिष्टेति न सिध्येदिति परमवशिष्यते। तत्रेदमुत्तरं। प्रतिपदविधेर्बलीयस्त्वाच्चिण्वद्भाव इति। एतच्च स्यसि
च्सूत्रे कैयटेन स्पष्टमुक्तं। तस्माद्वार्तिकमतेन विप्रतिषेधाच्चिण्वद्भावः। भाष्यमते तु प्रतिपदोक्तत्वादिति विवेकः। एतेनैकाच इति सूत्रेण्पार्द्धधातुकीयाः
सामान्येन भवन्तीति भाष्यग्रन्थो व्याख्यातः। यत्तु कैयटेनोक्तं विप्रतिषेधे उपपत्तिश्चिन्त्येति। तत्तु प्रागुक्तोपपत्तिरेव स्मर्तव्येत्येवं परं। स्यादेतत्। प्र
तिपदविधित्वमिह किं विवक्षितं। अनवकाशत्वं वा साक्षादुपादानमात्रं वा। नाद्यः स्यसिच्सूत्रे हल्ग्रहणस्य प्रत्याख्यास्यमानत्वादोलध्वावकाशत्वात्
तत्र स्यस्य सीयुड्ग्रहणस्य तु कारिषीष्टेत्यादौ कृतार्थत्वात्। नान्त्यः। अन्तानां चतुर्णां स्यादिचतुष्कसंबन्धे स्वरितत्वाच्च यथासंख्याभावे हन्तेः सीयु
ट्रीति योगः। तस्यानर्थक्यमेवान्तरङ्गत्वाद्धिवधभावे कृते तस्य स्थानिवद्भावेन हन्तिग्रहणेन ग्रहणात्सीयुटि चिण्वदिटि कृते ण्यल्लोपाविधिङितिपू
र्वविप्रतिषेधेनाल्लोपसत्तिवधिषीष्टेत्येवरूपं स्यादिति वाच्यं। अन्तरेणवधिना पहारेण्याप्येसत्त्वसंभवादेवं हन्तेः सीयुटासमं संबन्धायोगात्। गे
संभवे व्यभिचारे च स्याद्विशेषणमर्थवदिति न्यायात्। अत एव भस्त्रादिसूत्रे आतः स्थाने इत्येतत्स्वरूपं दृष्टस्यैव विशेषणं न तु भस्त्रादीनामिति वक्ष्य
ते। तथा निसंक्रीडाजीविकयोरित्यत्र क्रीडायां तत्त्वोऽसंभवादकेनैवतद्वयमिति वक्ष्यते। नान्त्यः। वधादेशोऽपि हनो वधलिङीति साक्षादुपादान
स्याविशिष्टत्वादन्तरङ्गत्वस्याधिक्याच्चेति चेन्न। अन्योन्यत्तेः। चिण्वदिट्चेति चकारस्यानुक्तसमुच्चयार्थत्वेन व्याख्यानाद्धन्तेरपि परस्य सीयुट
श्चिण्वद्भावो विधीयते तत्तस्य चानर्थकत्वमेव प्रतिपदविधित्वं। अनुक्तसमुच्चयार्थत्वं चास्य भाष्यकार एव वक्ष्यति। चं भगवान्कृतवांस्तु देतेर्थमि
ति। अत एवाभाष्यत्रप्रसाख्यानपक्षे कृते पीटिणिलोपः सिध्यति। सूत्रारम्भपक्षे परं इट्चासिद्धस्तेनमे लुप्यते णिरिति वक्ष्यमाणबोध्याय
द्वालिङीति सामान्ये सीयुटीति विशेषः। हन्तेरित्युभयत्राविशिष्टः। तथा चापवादत्वमेव च चिण्वदिटइति नास्य संभवः। येन हन्तेः सीयुटा ना
न्वियात्। तथा च कैयटोक्तं प्रतिपदविधित्वमपि सम्यगेवायुक्तं चेतत्। यदि त्वसंभवस्तर्हि चेनाप्यसंभवि नो विधानायोगे नप्रागुक्तपक्षे स्य

मु.को.॥
॥७॥

दुर्बलत्वात्॥ अथ वक्ष्यमाणनिष्कर्षरीत्यांतरंगबलीयस्त्वस्यासिद्धं बहिरंगमित्यनेन प्रत्याख्यानात्तस्य दृतितुग्ग्रहणे नानित्यत्वात्तस्यानुरोधेन
त्यागाद्युक्तो विप्रतिषेधः। अथवा लिङीति सिलम्येवास्तु परत्वाच्च चिण्वदिट् आद्युदात्तनिपातनं तु मास्तु। न चैवं वधीष्टीष्टेत्यत्र वध्यादेश इण्निषेधापत्तिः कर्तेत्यादा
विवेति वाच्यं। वधेर्हि द्वावुपदेशौ अहंतोपदेशोऽदंतोपदेशश्चेति एकाच इति सूत्रे भाष्य एव स्पष्टं। तथा च वध्युपदेशेऽनेकाच्त्वादिण्निषेधो न भविष्यति न
एकेति विशेषणसामर्थ्यादनेकाच्कोपदेशो व्यावर्त्यते। न च वद इत्युक्ते अंतस्यैव स्यादिति चेन्मैवं पचादीनामनुदात्तत्वस्यैव वैयर्थ्यापत्तेः। अत एकस्विव दस
यामचस्त्वस्यस्यतद्धत इत्यर्थे लब्धे एकग्रहणसामर्थ्यादुक्तार्थो लभ्यते। न च यत्रैकाज्ग्रहणमिति परिभाषाप्रवृत्त्यैकग्रहणमिति युक्तं। यद्वा विशेष
मनादृत्य एकाच इत्यर्थमाश्रित्य परिभाषाप्रवृत्तेः सूपपादत्वात्। न चैवमिहेव विशेषणसार्थक्ये इत्तिपाशपेत्यादिपरिभाषाज्ञापकत्वं न स्यादिति वा
च्यं। रीङः सार्वधातुके गुणः दीङो युडचीत्यादिसानुबंधानामेव तज्ज्ञापकत्वसंभवात्। तदेवं सर्वथापि वधेः परस्य उदस्यैवेति स्थितं। अत एवानिट्
कारिकासु व्याघ्रभूतिना अजंतपर्युदासः कृतः। अदंतमुदंतम् तां च वद इत्याविद्यादिना। यत्तु कौमुद्यां भावकर्मलकारव्युत्पादनावसरे ध्यानिषी
ष्टेत्युदाहृत्य पक्षे वध्यादेश इत्युक्तं। तच्चोक्तरीत्या भाष्यमते वार्तिकमते चोभयथापि निर्बाध्यमेव। एवं स्थिते पक्षे वधादेश इति प्रतीकमुपादाय यदुक्तं तु भाष्य
विरुद्धं भाष्यादौ वधादेशानभ्युपगमादिति वदन् प्रासादकारः स्वस्यैव कलंकमाविष्करोतु। यदपि तेन स्वीयभ्रम बीजमूलं वार्तिकमुदाह
तं। हनिणिङादेशे प्रतिषेधश्चेति नेतल्लिङि प्राप्तस्य निषेधपरं किंतु स्यादिषु चिण्वदित्यनेनादेशे प्राप्तस्य। अत एवार्धधातुकाधिकारांगस्यैवादे
शेन तु हनिणिङादेशानामनंगत्वादिति। अधिकारबलेनैव भाष्ये तद्वार्तिकं प्रत्याख्यातं। यद्यप्येतत्सिद्धांतग्रंथेषु विवादमेव तथाप्यध्वस्य
वोप्यलग्नस्येति न्यायेन प्रसादग्रंथदृष्ट्या बाला मा भ्राम्येयुरिति तदर्थमस्माभिः स्फुटीकृतं। प्रकृतमनुसरामः। आकारांतानुकूत्पुक्प्रतिषेधः। लो
डादेशे यणाभावश्च भावपक्षे हिलोपे च प्रतिषेधः। नयादेशेऽस्यांतस्य प्रतिषेधः। आम्विधौ च स्वरे च वसादेशे। ण्यणिपं च वार्तिकानि प्र

५८७

494

स्याख्याताः॥ तथाहि। विलापयति भापयतीत्यत्रानुकूकुत्वे न भविष्यतः। लीङ्‌भीङ्‌ इति ईकारप्रश्लेषात् ह्रस्वप्रश्लेषाद्वा तथा श्लिष्टात् हृतात् भिन्तात् कुरुतात्
स्तादित्यत्र परत्वात् तातङि कृते ङ्गोहो हन्तेर्ज्ञः हुझल्भ्यो हेर्धिः उतश्च प्रत्ययादसंयोगपूर्वात् ध्वसोरेद्धावभ्यासलोपश्च। एतेविधयो यद्यपि प्राप्नुवन्ति। तात
ङः स्थानिवद्भावेन हि ग्रहणेन ग्रहणात् तथापि सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति न्यायान्न भवन्ति। एवं पुनीतादित्यत्र ह्रलः श्नः शानज्झौ न भव
ति। उभयोर्नित्ययोः परत्वात् तातङः प्रवृत्तेः। तथा तिसृणामित्यत्र परत्वान्नित्यत्वाच्च [illegible] न बाध्यते स्त्रस्त्रयः इत्यत्र यादेशोऽपि बाधित एव। एवं च तस्त्रस्त्रिष्टेत्यत्र प
रेण च तस्य भावेन चतुरनुडुहोरित्याम् न बाध्यते। तथा अन्नासे त्वा विदुषीसमस्मिन्नहनीत्यत्र विदेः शतुर्वसुरित्यत्र वसोः दृश्यस्य ग्रहणेन ग्रहणाच्छतुरनुमो नद्यजा
दी इति सूत्रेणान्तोदात्ताच्छत्रन्तात्परत्वमुपजीव्य प्राप्तं नद्या उदात्तत्वं यस्येवं विदुषोऽग्निहोत्रं जुहोतीत्यत्र षष्ठ्या उदात्तत्वं च न भवति अनुम इति निषेधात्। तथाहि। अवि
२ द्यमानत्रुम्यस्येति बहुव्रीहिः। उमिति सनाङ्गसभिक्ष उ इत्युकारात्प्रभृति आनुमो मकारात् प्रत्याहारः। तेनादिश्च [illegible] उरित्युकारात्प्रभृति वा। तत्र वसोः संप्रसारणं
चान्तर्भूतं। नन्वेवं द्वितीयपक्षे [illegible] लुनता अच्छा रवं जानतीगा [illegible] दित्यादावपि निषेधापत्तिः। तेनादि [illegible] उपक्रमे श्ना प्रत्ययस्यापि तन्त्रान्तर्भावादिति चेन्न। शत्रा
तरिपरेश्या प्रत्यता वपि शतुरनुम इत्यनेन पायात्। नुमागमग्रहणेऽपि हि शतुरेव तद्वाहित्वेन विशेषणं। ननु शत्रैतस्य मुञ्चता मुञ्चते स्यादावपि निषेधापत्तेः। इदं तु वार्तिकंसि
द्धान्तेऽपि सिद्धं। गोः पूर्वणित्वात्वस्वरेषु प्रतिषेध इति। चित्रग्वग्रं इत्यत्र हि सर्वत्र विभाषा गोरिति पूर्वरूपमासंगान्तः पादमिति पाठस्यैको गुणवृद्धी इति सूत्रे पाष्टभा
ष्ये च स्थितत्वेन तत्र द्वात्या सर्वत्रेति सूत्रस्यापि पूर्वरूपबाधकत्वोचित्यात्। कैयटस्तु [illegible] ह्रस्वश्चेति चकारेण प्रकृत्येत्यनुकृष्यत इति द्विना [illegible] तः पादमि
ति पाठमनुसृत्य वार्तिकस्थपूर्वपदत्वमासि पूर्वकं प्रकृतिभावोपलक्षणमिति सूचितवान्। न च सर्वत्र विभाषेत्यत्रैङः ह्रस्वानुवर्त्य अलिविधित्वान्निषेधः सुवचः। हे चित्र
गो अग्रमित्यत्रैवमप्यतिप्रसंगात्। नह्यत्र स्थान्यलाश्रयणं। स्वतएङं तत्वात्। चित्रगुरित्यत्र गोतो णिदिति णित्वप्राप्तं। चित्रगुं चित्रगूनित्यत्र तु ओ गोतो मृङ्गा
सो इति षाष्ठवार्तिकरीत्या आत्वं प्राप्तं। अत्रेणित्वात्वग्रहणं [illegible] व्यमकर्तुं गोत इति तपरकरणसामर्थ्यादेव णित्वाप्रवृत्तेः। ओतो मृङ्गासो इति पाठस्यैवस्थापयिष्यमाण

॥शु॰को॰
॥९॥

स्त स्य तस्माद्धा निमित्तभूतात्

त्वाच्च। अचिन वमित्यादावतिप्रसंगस्य दुःसासाहचर्येणापि वारणसंभवात्। स्वरे बहुगुमान्। इह स्वनुड्भ्यां मतु विस्युदात्तता यान गोश्वन्निति निषेधः प्राप्तः। तस्मा
द्वोः पूर्वस्वरयोरिति पठनीयमिति स्थितं। एवं च न गोश्वन्निति सूत्रे वृत्तौ यल मतौ बहुगुणा बहुगुभ्यामित्यादावंतोदात्तादुत्तरपदादन्यतरस्यामिति प्राप्तः प्रतिषिध्यत इति
तच्चिंत्यं भाष्यवार्तिकविरुद्धत्वात्। ॥ अचः परस्मिन्पूर्वविधौ। परनिमित्तो च आदेशः स्थानिवत्स्यात्। स्थानिभूतादचः पूर्वत्वेन दृष्टे विधौ कर्तव्ये। वव्रश्च। इह उरदत्व
संप्रसारण स्य स्थानिवद्भावेन न संप्रसारणमिति निषेधाद्वकारस्य संप्रसारणं न। न च पूर्वसूत्रेण गतार्थता। अद्विधित्वात्। न च परनिमित्तत्वमसिद्धमिति वाच्यं। अंगाक्षिप्तप्रत्यय
निमित्तत्वात्। न च प्रागभ्यासविकारेभ्योंगाधिकार इति वाच्यं। आसप्तमसमाप्तेरिति पक्षस्य सिद्धांतयिष्यमाणत्वात्। पूर्वस्माद्विधौ यथा। तन्वेति तन्वते। इह यणादे
स्व शः स्थानिवद्भावेन नेट्। तत्र हि तन इत्यंगं निमित्तं तच्च उकारात्पूर्वमिति। अच इति किं। विश्नः प्रश्नः। स्यात्स्यादभिगत्वात्। तथा हि। विश्नः प्रश्न इत्यत्र छकारस्य शकारः प
रनिमित्तकः तस्य स्थानिवद्भावाच्छे चेति तुक् प्राप्तः। अच इति वचनान्न भवति। स्यादेतत्। इहांतरंगत्वादागमे बहुकाभाव्यं। न च वार्णादांगं बलीय इति शकारः स्यादिति
वाच्यं। यत्र ह्येकमेव निमित्तं तत्र युगपदांगवार्णयोः प्राप्तिः। तत्र वार्णादांगं बलीयः यथा करोतेर्लिटि चकार इति स्थिते गोमित्यत्र सावकाशमचोञ्णितीति वृद्धिं बाधित्वा
तरंगत्वात्संयणं वृद्धिरेव बाध्यते। प्रश्न इत्यत्र तु शस्य नङ्-निमित्तं तुकस्तु छः। भिन्नकालत्वान्नानयोः प्राप्तिः। ननु यत्रैकस्मिन्विषये युगपत्प्राप्तिस्तत्रैवेयं परिभाषस्य त्रे
किं प्रमाणं इति चेत्। ध्वमिंमाह कमानमेवेति ग्रहणात्। तथा हि। अभ्यासस्यासवर्णे इति सूत्रेऽसवर्णग्रहणमस्याः परिभाषाया ज्ञापकं। एतच्च षष्ठे प्रथमाह्निके भाष्ये
स्थितं। तद्वापनुरूपत्तु रित्यादिवारणाय नोपयुज्यते। अंतरंगेण सवर्णदीर्घेण त योर्वा त्रेयङुवङोर्बाध्यात्। तौ हि अभ्याससंज्ञां अंगसंज्ञां चापेक्षमाणौ बहिरंगौ। न चै
वमप्यपवादत्वात्तावेव स्यातामिति वाच्यं। येन नाप्राप्तिन्यायेन तयोर्यणं प्रत्येवापवादत्वात्। नन्वियेष इत्यादौ प्रवृत्तस्यापि गुणस्य याच्यत्र प्रवृत्तायां वृद्धौ द्विर्वचने
चीति रूपासिद्धे नापहारे वृद्धिस्त्वे च वृत्ते सवर्णदीर्घस्यापि प्राप्त्या येन नाप्राप्तिन्यायेनेयङुवङ्भ्यां बाध्येतेति चेत्तर्हि तेष्वसवर्णग्रहणे निर्विषयतापत्तिः। अ
सवर्णग्रहणसामर्थ्यात्पुनर्गुणवृद्धौ सवर्णदीर्घं बाधित्वा स्यातामिति चेन्न। इयतीत्यादौ चरितार्थत्वात्। न चैवं सत्यसवर्णग्रहणं विनापि येन नाप्राप्तिन्या

496

नइयन्तीये [...]णो बाधने सिद्धे तन्न कुर्यादिति चेन्न हि सामर्थ्यादियेषत्यादौ गुणाप्रवृत्तिरिति फलितोऽर्थः तथा च पुनरस्य सवर्णग्रहणं व्यर्थमेव। अन्ते श्चेति सूत्रयित्वा य्वोरिति
न्वानुवर्त्य अन्ते रिकारस्य लाघवादियङ् विध्येयेऽभ्यासस्येत्युक्तिसामर्थ्येनापि इयेषत्यादेः सुसाधत्वात्। नन्वन्तीति श्निपा निर्देशोऽभियन्तीति यङ्लुकि यङ् न स्यादिति चेन्न हि
उरित्येवो व्यन्तां इणो यणिति साहचर्यात् धातुग्रहणं भविष्यति। अंगेन उर्विशेषणाद्वा। तेन अमारमति क्रीतेभ्यस्य भिरित्यादौ नातिप्रसंगः। नन्वेवमपीयेषत्स्वत्रेव इष
न्तुरित्यत्रेयङ् स्यादिति चेन्न। अन्तरंगेण दीर्घेण बाध्यत्वस्योक्तत्वात्। नन्वेवमियेषत्यादावपि तुल्यमिति वाच्यं। तत्र गुणसंभावनायां विनानुपपन्नत्वेन निमित्तेन दीर्घात्प्रवर्त्त
नात्। वक्ष्यते हि समर्थानां प्रथमाद्वेतिसूत्रे समर्थग्रहणमस्तु ऊहाः पाणिनीया इति परिभाषां ज्ञापयतीति। अत एव सौस्थितिर्वक्ष्यमाणिरित्यत्र भाविन्या आदिरध्यामर
गस्यापि सवर्णदीर्घस्य निमित्तविघातात्प्रवृत्तिर्माभूदिति सौस्थितिर्वीयीक्षमाणिरित्य निष्ठरूपं धारयितुं समर्थग्रहणं परिनिष्ठितत्वे चेत्तत्र समर्थशब्दस्यार्थः। इयु
तमपि निवर्तयन्तीत्यां ज्ञाप्यतां फलं तु तुल्यमेव गौरवे परमपि कृमिति। तत्र श्चेयेषत्यादौ गुणे कृते सवर्णदीर्घः प्राप्तो सोऽयणि प्राप्ते तस्येयङपवादः। इयेषतुरित्यादौ [■]
अन्तरंगत्वात्सवर्णदीर्घेण बाध्यत इति असवर्णग्रहणं अनर्थकं सज्ज्ञापकमेवोक्तपरिभाषायाः। ननु गुणेन कृतं निमित्तविघातः। अचः परस्मिन्निति स्थानिवत्त्वेन सवर्ण
दीर्घमासे स्तद्वस्थत्वादिति चेन्न। दीर्घस्य पूर्वापरविधित्वेन तस्मिन्कर्तव्ये स्थानिवत्त्वाभावात्। पूर्वस्यैव विप्रतिषेधः न तु पूर्वपरयोर्विध्योरिति विधिग्रहणव्यावर्त्यनिरूपणा
न सरे रुपपादयिष्यमाणत्वात्। सवर्णयोर्विधिः सोऽपि सवर्णविधिरिति तत्र कर्तव्ये न पदान्तेति निषेधाच्च। एतेनासवर्णग्रहणे कृते स्थानिवद्भावे नेयेषत्स्वत्रेयङ् न
स्यात्। न चासवर्णग्रहणसामर्थ्यादेतासवर्णमाश्रित्येयङ् प्रवर्ततां प्रतीतिप्रसवदिति वाच्यं। तथा सति परिभाषाज्ञापनासंभवात्। इयतीत्येव प्रयोजनायाहि
उश्चेति वक्तव्ये अभ्यासस्येति वचनसामर्थ्यादेवं ता वियङुवङौ णलीवानुसिद्धदीर्घमप्यविशेषाद्बाधेयातामिति तद्भावेऽप्यसवर्णग्रहणस्य चरितार्थत्वादिति प्रयुक्तं
सवर्णपरे न भवतीति प्रसज्यप्रतिषेधाश्रयणात् तत्र चोक्तरीत्या स्थानिवद्भावप्रतिषिद्धे इयेषत्यादौ यणश्च प्राप्त्या तदपवादत्वेन निर्णीतयोरियङुवङोरन्तरंगेण
दीर्घेणेयेषतुरित्यादौ बाधसंभवात्। सा चेत्साप्यमानासमानाश्रययुगपत्प्राप्तौ सोचेतयं विशेषविषयेवेति लक्ष्यानुरोधेनेति भाष्याभावः। अत एव स्योन इति सि
वेशेणादिकेन मत्यये वल्लोपापवादे उश्रु वक्तुं सिद्धुन इति स्थिते तेन रंगत्वाद्यणं न सांगोऽप्युपधागुणो व्याश्रयत्वात्। न चोक्तं माध्ये सापरत्वाद्गुणः शक्यः। लघुताभिम्ल

लि

॥ग्र॰ कौ॰ ८

॥९॥

क्षणामुपधामंगं चापेक्षमाणस्य गुणस्य बहुपेक्षत्वेन वहिरंगत्वात्। एतत्त्वयेन विध्यपि रिति सूत्रे कैयटे स्पष्टं। इति कारोप्येवं। प्रवृत्तमनुसरामः। उक्तरीत्या तु किं कृते गुणादेशः

तथा च विश्रम्भप्रश्नयोस्तु कृ श्रूयते वेति तन्निवर्तो यत्नांतरमास्थेयं। अन्यच्च इत्यस्य प्रसुदाहरणं चेति चेत्। मसत्ता अस्त्वेव यत्नांतरं। ष्ठ्वोरिति सूत्रे कनिर्देशस्य भाष्यादौ स्थितत्वा

त्। स्यादेतत्। अकृतव्यूहाः पाणिनीयाः कृतमपि निवर्तयंतीति परिभाषाभ्यां विश्रम्भप्रश्नयोः सिद्धौ किं सूत्रे ककि निर्देशेनानचोक्तपरिभाषयोरनित्यत्वज्ञापनमेतत्फलं तेन चास्वा

ष्यितेति सिद्धं। अन्यथा यस्य हल इति भाविनं लोपमालोच्य प्रागेवालेन क्रियेत कृते वाऽनिवर्तेत तत्त्वके सितकोत्तिभवेकानित्यादौ चाकन्नूनं स्येवेति वा। यां। अदोजग्धिरिति

सूत्रे ल्यपग्रहणस्य प्रत्ययोत्तरपदयोरिति सूत्रे उत्तरपदग्रहणस्य च क्रमेण ल्यप्कृते कोरंतरंगबाधकृताज्ञापनार्थतया सिद्धान्तग्रन्थेषु प्रसिद्धस्येवोक्तपरिभाषाद्वयानि

त्यस्व ज्ञापकत्वसंभवात्। अथ निर्युक्तिकः सिद्धान्तप्रवादेन अद्वेयः ल्यबुत्तरपदग्रहणयोरप्राप्तविध्यर्थत्वात्। अकृतव्यूहपरिभाषा वक्तुं द्प्राप्तेः स्पष्टत्वादिति चेन्न हि

मा भूत्। ल्यबुत्तरपदग्रहाव्यपि। अकृतव्यूहपरिभाषायामनित्यत्वे प्रवृत्तिप्रसक्तापत्ति च न च स एव ज्ञापकत्वसंभवात्। मास्तु तदपि कृणः सोश्चिल्लोप इत्यादिनिर्देशाना

मेव ज्ञापकत्वात्। तथा हि करइसउइति इकृताः पदांतरप्रयुक्ते यणादेशे कृते आकृणस्य निमित्तविघातादकृतव्यूहा इति परिभाषया गुणो न स्यात्। न चासिद्धं वहिरं

गं अंतरंगवलीय इति परिभाषाभ्यां निस्तारः। उक्ष इइ इमित्यादौ कृते पि दीर्घे निमित्ताविघातेन तत्र पश्चाचेदमित्यादौ च सावकाशयोर्द्वयोरपि परिभाषयो

र्थेन नाप्राप्तिन्यायेनाकृतव्यूहपरिभाषावाध्यत्वात्। अन्यथापेचुषो जग्मुषः स्वाद्यपि न सिध्येत्। एवं विश्रम्भः इत्यत्र गुणं निषेद्धुं क्रियमाणे नङोडित्त्वमेवाकृतव्यू

हपरिभाषां ज्ञापयतु समर्थानामिति न्यमास्तु। अत एव समर्थः पदविधिरिति सूत्रे कर्तव्यं च क्रियते समर्थानां प्रथमादिति भाष्यं संगच्छते। न ह्यात्मत्वापत्ति समर्थत्वस्य

वुत्तरपदग्रहाः। सत्तु वृत्तं चपन्चापि न कार्याणी ▪ स्व स्थितो। अत्रोच्यते। वाणोदांगमिति परिभाषा आअनित्यत्वे ज्ञापयितुं सतु च्क ग्रहः। तथा हि। समानाश्रय

इति प्राचां। तथा ननु सत्यप्राप्तौ तेन तु सोऽदक्षमं। व्याश्रयेष्वपि वधो हेतुत्वस्वीकारात्। तथा च कैयटे नासिद्धत्वसंनेशुन इत्यत्र वाणोदांगस्य वलीयस्त्वात् पूर्वं कादेशं वाधित्वा

स्लोप उक्तः। न च तत्रोभयोरकारांतरेसमानाश्रय समस्तेवेति वाच्यं। विश्रम्भः स्यान इत्यत्रापि कारे कारांशसाम्येन व्याश्रयत्वोपन्यासविरोधात्। किं चांगस्य आर्धी

नयोः सूत्रे डोरद् अचः परस्मिन्नुपेयिवाननाश्वानआउजादीनां अजादेर्द्वितीयस्य अदस औ सुलोपश्च। सार्वधातुकमपि तदुपसर्गाद्धस्वदुहेतः स्नुक्रमोरनालने

498

११।३। ओमेद्धातिह्न = स्थलके यटन पायेवमैव
आतो ऽनुपसर्गे इति स्थले पावनमैव

इत्यादिसूत्रेषु कैयटहरदत्तादिसकलग्रंथाः समानाश्रयत्वं क्वचिदाहस्य क्वचिन्नास्य प्रवृत्ता इति स्पष्टमेव सिद्धांतपरिशीलनशालिनां। षष्ठभाष्ये प्रथमाह्निकांते वार्णा
परिभाषायाः प्रयोजनं। अपि चाश्रयसाधारण्येनैवांतरंगस्माद्बहिरंग। परिभाषासूत्रे परिभाषा योगे च वार्णादांगमित्यस्या अपि अनित्यत्वमेवमुदाहरणं तत्र सत्तु कग्र
हणेन ज्ञाप्यते। न च परस्मिन्पूर्वविप्रतिषेधावितिस्थानिवद्भावेन तु कं चारयितुं सः। अन्यार्थं तयावत्कृत्यकर्तव्ये नाव इति अनेन गतार्थत्वात्। एवं चान्यार्थं क्रियमाणं सत्तु कृद्ग्रहणं
यथाश्रुतमेवास्या। एवं स्थिते तत्त्वे हि स्वस्य गुणनिषेधे चरितार्थत्वादङ्गवृत्तपरिभाषा
अङ्गवृत्तसूत्रात्यस्या अनित्यत्वं कामं ज्ञापयितुं प्रवृत्तसूत्रे विप्रतिषेधस्तु उदाहरणं तु ... ग्रहणमेवेति निष्कर्षः। आचार्यश्चैवं तात्पर्यं प्रत्ययग्रहणं तत्र ममादिबाध
यां ज्ञापकांतरमास्थेयं तत्र प्रत्यापत्तिरुपतरपदग्रहणं समर्थग्रहणं यत्ते अलुप्तव्यग्रहणमेवेति ... तेनेत्यपवादत्वाद्युक्ते इति सत्समेवस्यते। एवं च पामाद्यन्तगणसूत्रे
नार्थप्रयासं विप्रत्यर्थं वोत्तरपदग्रहणं स्थानस्थमपर्यंतानुवृत्ति ... हरदत्तोपेक्षात्वं नेतरंगस्यापवादवाध्यत्वाद्युक्ते इति सत्समेवस्यते ... स्पष्टीकरणार्थं वास्तु। एवं क्रियायाः पूर्वदिति
विषयमित्युत्तरलोपश्चात्र तत्संधेरित्याकृतसंधिग्रहणमप्यनावश्यकं वीक्षमाणादिभ्यः कृतसंधिभ्य एव तद्भिताइति स्पष्टीकरणार्थं वास्तु। एवं क्रियायाः पूर्वदिति
सूत्रेन ह्येषा परिभाषा सर्वत्राश्रीयते इति कैयटः समीचीन एव। अभाः स्वरूपस्य कैयटस्तु निमित्तापायपरिभाषाभाष्यासंमते सैवं रूपमापातनः। प्लुतः अपि इति
सूत्रेन ही दबवने ना ... इति एवं रूपोहरदत्तग्रंथोप्यापाततएव। समर्थसूत्रे परिभाषापरिष्कारस्य स्वयमेव कृतत्वात्। अथवा कृते परिभाषयोर्मध्ये सूत्रव्यूह
परिभाषेवला घवा दाद्रष्टव्या नतु कृतमपि इति गोरवादित्येवं परत्या कथंचित्कृतो नेयः। फलं तु निर्वीवादं ज्ञापकांतराणामपि सुलभत्वात्। तद्यथा। चाविति
परिभाषेवला ... प्रतीचरलादेकथं क्षेपस्य विषयत्वाभः। लौकिकन्यायोपीहस्तुवचः। लोके निमित्तमुभयविध मपिद
सूत्रं दीर्घविदथदिह ज्ञापकं। अंतरंगे हि यणि कृते प्रतीचरलादेकथं ... अन्यायेन ये ऽपेक्षावृद्धिः तन्नाशेद्वित्वनाशाभ्युपगमात्। तथा यदातिमते विक्षेपस्थितेनियाम
कं। कार्यस्य स्थितौ नियामकं तदनियामकं च। आद्यं यथान्यायन ... द्वितीयं दंडादि। तन्नाशे घटनाशादर्शनात्। एवं स्थिते इहापि द्विविधं कथं न भवेत्। तत्
कसमुपाधेः स्फटिकलोहित्यादिस्थितिनियामकत्वं च प्रसिद्धमेव। द्वितीयं दंडादि। तन्नाशे घटनाशादर्शनात्। ... लौकिक द्विविध व्यवहार उपष्टंभकत्वेनोदा
थाच यस्य च लक्षणांतरेण निमित्तं विहन्यते नासावनिसिद्धस्य क्वचिदाश्रयणं क्वचिन्नेत्येवं रूपे सिद्धांते लौकिकद्विविधव्यवहार उपष्टंभकत्वेनोदा
हृतः कैयटादिभिः। वालिसुग्रीवयोर्युध्यमानयो रामेण वालिनि हते पि सुग्रीवस्य वालित्तः प्रावल्यं व्यवहरंति भवा यत्सहायेः पांडवेर्नये धृतराष्ट्रे
हृतः कैयटादिभिः। ... सत्तुकनिर्दिष्टाहिरालोपेतस्यैवानुवृत्तिः स्यात्। तथा च हूः हुरो हुरः इत्यत्र लोपो न स्यात्।
पिपांडवानां प्राबल्यं व्यवहरंति चेति दिक्। यदिच्छोरिति सत्तु कनिर्दिष्टाहिरा ...

स्यादेतत्।

॥ शू॰ कौ॰ ॥
॥ ५०१ ॥

विशुकृत्वात्। न वानुवृत्तिसामर्थ्यान्न तु केविनेव गस्युत्तं। स्पर्धो हिंसायामिस त्रातइत्यनुवृत्तेपि अवर्णइत्येतिवाच्यो वकारमात्रान्वयस्येव सुवचत्वात्। यत्तु
सत्तुकृवित्तुको छ्वपीह निर्दिश्यते इति तन्न। समाहारे [illegible] एकवचनापत्तेः। इतरेतरयोगे बहुवचनापत्तेः। छकारयोः समाहारद्वन्द्वे च का
रेणेतरेतरयोगद्वन्द्वे शिष्यामह इति चेन्न। समाहारे स्त्र्यसंगात्। यथासंख्यासंभवापत्तेश्च। अत्रोच्यते। छकारवकारयोः समाहारद्वन्द्वे छ्वो ऊ
ठेतरस्य ऊठ् तरस्तु आदेशेपि ऊकार [ ] श्लेषः। तथा चान्तरतम्यात् यथासंख्यन्यायाच्चेष्टसिद्धिः। अथवा सत्तु सत्तु कृ स्येव निर्देशः। शलो
निषेधा — ऽन्तस्य तत्सामर्थ्यात् केवलान्वयः। न च तथा स्यन्तिर्लिङ्गाच्च। मूर्त इत्यत्र च लोपं विना न सम्प्राप्तिरेव न संभवति। एवं मूर्तो घनः इव मूर्तिः स्पर्शयोः इत्यादि
निर्देशात् [illegible] अपि संगच्छते इति दिक्। अवसिन्यंक्षेऽचइत्यस्य प्रसुदाहरणं तु शूत्वा स्वत्वेति। अत्र हि ठठः स्थानिवत्त्वात् यण स्यात्। ननु स्वा
श्रयमत्र भविष्यति। अतिदेशानां स्वाश्रयकार्यानिवर्तकत्वात् इति चेन्न। विधिप्रयोजनकथनावसरे हस्वे स्वाश्रय [illegible] निवृत्तेः सिद्धान्त
यिष्यमाणत्वात्। नन्वेवमपि योऽन्त्ययण् विध्या श्रीयते अचूना सावादेशः य श्वादेशः उडिति समुदायोऽरौ ण्विधौ निमित्तमिति चेन्न। अनुबन्धा
नामनेकान्तत्वात् एकान्तत्वेप्युच्चरितप्रध्वंसित्वात् उकारस्येवातिदेशः सत्। यति निर्देशाद्भावोप्यत्ति दिग्दृष्टतेइति वक्ष्यमाणत्वाच्च। एवमपि
लोपप्रसुदाहरणं [illegible] च हि अनु [illegible] नासिकलोपः परनिमित्तकस्तस्य स्थानिवद्भावात् अस्व स्यपि निवृत्ती तितुं प्राप्नोति। अथपरस्मि
न्निति किमर्थं। युवजानिः। अत्र [illegible] जायाया निङ्। स्थानिवद्भावाद्यलोपो न प्राप्नोति। स्वाश्रयनिवृत्तिरभावातिदेशश्च वक्ष्यते इत्युक्तमेव॥
किंच। व्याघ्रस्येव पादावस्य व्याघ्रपात्। पादस्य लोपो हस्त्यादिभ्यः। इत्यपरनिमित्तको लोपः। ततो गर्गादित्वाद्यञि वैयाघ्रपद्यः। लोपस्य स्था
निवद्भावात् पादः पदिति पद्भावो न स्यात्। वचनसामर्थ्याद्भविष्यतीति चेन्न। पादेनेयादावतिप्रसंगापत्तेः। किंच पादशान्तस्येति लोपवचनसा
मर्थ्यात् स्थानिवद्भावाप्रवृत्तौ सत्यां द्विपदिकेत्यादौ पद्भाववचनं चरितार्थमिति कृतस्य सामर्थ्यात् परस्मिन्निति रूते तु वैयाघ्रपद्य इत्यादौ पद्भावस्य

लोप

~ 501

चरितार्थत्तया पादेनेत्यादावेकादेशस्य स्थानिवद्भावात्पद्भावो नेति स्थितं ॥ नन्वेकादेशेनानाचः किं त्वचोः कथं स्थानिवत्त्वमिति चेन्नावर्णनिर्देशेना
ति निर्देशात् । अत एव श्वायसोमोत्तमो चानुरेऽआनडुहोइत्यादि सिध्यति ॥ श्वेयसोपत्यमित्यण् । देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् । दु
त्याकारादेशः । ततश्चतुर्भ्यो ष्यणं तेभ्य ओ प्रत्यये एकादेशस्यादिवत्त्वात्मासेनुमामो न भवतः । तथा उदवाहे उदके वहतीति कर्मण्यण् । संज्ञायामुदभा
वः । ततो ऽऐएकादेशस्यादिवत्त्वाद्धत्वे सति प्राप्तो वाहऊण् न भवति ॥ पूर्वविधाविति किं । नैधेयः । निपूर्वाद्धाञ उपसर्गे घोः किः आतो लोपः ढक्च
इतश्चानिञः इति ढक् । अकारलोपस्य स्थानिवत्त्वे सति व्यचूकत्वव्यपदेशेन ढक्चकत्वं विरुद्ध्येत । न हि त्रिषु द्विपुत्रव्यपदेशं लभते । नन्वे
वमपि विधिग्रहणं मास्तु । पूर्वस्येति षष्ठ्या कार्यैकत्वेऽप्येऽन्यार्थस्याशेषं सुशक्यत्वादिति चेन्न । पूर्वस्य विधिः पूर्वस्माद्विधिरिति समासद्वयलाभार्थ
विधिग्रहणात् । पञ्चमीसमासे उदाहरणं तु तत्रैवोक्तमेव । स्यादेतत् । यदि पञ्चमीसमासोऽपीष्टस्तर्हि विगणय्येत्यादि न सिध्यति । ल्यपि लघु
पूर्वादित्ययादेशे कर्तव्ये अल्लोपस्य स्थानिवद्भावात् । न चारम्भसामर्थ्यात् अनुगमय्येत्यादौ मित्सु चारितार्थ्यात् । अत्रोच्यते । पूर्वस्माद्विधौ स्था
निवत्त्वमनित्यं निष्ठायां सेटीति ज्ञापकात् । तथा हि । तत्र सेटीति पदं तावदनिड्व्यावृत्त्यर्थं । णिजन्तान्नन्दसंभवात् । ननु संज्ञपितः पशुरित्यत्र
स्य विभाषेति इट्प्रतिषेधः संभवत्येव । सनीवन्तेति विकल्पितत्वादिति चेन्न । यस्य विभाषेत्यत्रैकाच इत्यनुवृत्तेः । अन्यथा दरिद्रितइत्यत्र प्रतिषेधः स्या
त् । तस्मात्कालावधारणार्थं सेड्ग्रहणं । इडि कृते णिलोपो न तु ततः प्रागिति । अन्यथा कारितमित्यादौ णिलोपे कृते एकाच्त्वउपदेशोऽइतिप्रतिषेधः स्या
मा दिति सेटीति वदतो भावः । पूर्वस्माद्विधौ स्थानिवत्त्वे तु न स्यादेव निषेधः । णिचा व्यवधानात् । तस्मात्सेड्ग्रहणमनित्यतां ज्ञापयतीति स्थि
तं । तथा चाष्टमे हरदत्तः अनित्यः पूर्वस्माद्विधौ स्थानिवद्भावः । निष्ठायां सेटीति सूत्रे सेड्ग्रहणात् एतच्च [illegible] स्थानिवद्भावप्रकरण ए
वव्याख्यातमिति यद्यपि प्रकरणे स्वयं न व्याख्यातं तथापि न्यासकारादिभिर्व्याख्यातत्वादिति तद्ग्रन्थस्यार्थः । ऐरवक प्रमादाद्ग्रन्थभ्रंशोऽकल्प्यः ॥ वा

॥श॰कौ॰
॥११॥

एतेन ओः पुयण्ज्यपर इति सूत्रे यदत्र वक्तव्यं तद्द्विर्वचनेऽचीति सूत्रोक्तमित्यपि हरदत्तग्रन्थो व्याख्यातः। तथा वस्येकाच्सूत्रे कैयटः। पूर्वस्मादपि विधाविति ए
तदनित्यमिति। माधवाचार्यास्तु परिहृतमेव गतं हृस्वत्र असिद्धत्वामुक्ता व्यवस्थाश्रयत्वात् तां परिहृत्य पूर्वस्मादपीति स्थानिवत्त्वमात्राश्रयणे विभिदय्य
प्रसक्तं न्यस्य इत्यादि भाष्योदाहरणबलेन समादधुः। यद्वा स्यपि लघुपूर्वादित्यनेन साम र्थ्यादन्यपदार्थस्य वर्णस्यापेक्षायां वर्णग्रहणे जातिप
हणात् सवर्णधाने पिन दोषइति। केचित्तु पंचमीसमासइह मा स्तु। प्रयोजनाभावात्। तथाहि। विभिदितामाथितिकः अपीपचन्निति प्रयोजन
त्रयं भाष्ये उक्तं। तत्र विभिदिता तावदन्यथासिद्धं। एकाच इत्यत्र विहितविशेषणाश्रयणात्। माथितिके मथितं पण्यमस्येति विग्रहे तदस्य
पण्यमिति ठक्। तस्येकादेशे यस्येति चेत्यल्लोपे कृते इसुसुक्तान्तादिति कादेशो न भविष्यति। अनल्विधाविति निषेधेन स्थानिवद्भावासं
भवात्। ठस्येकइत्यत्र स्थान्यादेशयोरकारस्योच्चारणार्थतया वर्णमात्रस्य स्थानि त्वात्। अस्तु वा स्थान्यादेशयोरकारयोर्विवक्षा अ
थैवमनल्विधित्वात् कादेशप्रसंगः। संनिपातपरिभाषया समाधानात्। न चापीपचन्नित्युदाहरणं। इह हि चङकारस्यान्तेरकारस्य चातो गु
णइति पररूपे कृते न तस्य परं प्रत्यादिवद्भावाद्वि [illegible] ग्रहणेन ग्रहणोस्तीति सिज्झ्यस्तेति जुस्त्रा सो णिलोपस्येकादेशस्य वा स्थानिवद्भावा
न भवतीति वाच्यं। वेत्तेर्हि लङ्स्वि वानन्तरोस्ति सिः संभवतीति साहचर्यादभ्य स्तादपि लङ एव झेर्जुस्सु विधानात्। न च सिचा साहचर्यात् लुङोपि ग्र
हणमस्त्विति वाच्यं। विप्रतिषेधेपरमिति परस्मात् साहचर्यस्य बलीयस्त्वादिति। अत एव अभवतेर्यङ्लुगन्तात् लुङि अबोभुवन्निति माधवः। पंचमी
समासप्रयोजनतया अपीपचन्नित्युदाहरणं तो भगवतस्तु नेदं साहचर्यं नियामकतया संमतं। रूखोर्ध्व ग्रहणाद्विज्ञापकात् साहचर्येण सर्व
त्राश्रीयत इत्युक्तं दीधीवेव्यामिति सूत्रे। तस्मा यङ्लुकि भुवो लुकि नुसंयोगे चेति। आत इति नियमस्य सिचः परत्वमाश्रित्य यो जुस्कारस्त
न्मात्रपरतया माधवेनोक्तं तादभ्यस्ताश्रयस्य जुसो दुर्वारत्वात्। यदि तु लाघवादात इति नियमः सामान्यापेक्षस्तदा जुसभावे दभ्यस्तादि
त्यत्त्वात्। तत्रा चाबोभूवु र॰ बोभुवतइति पक्षभेदेन रूपद्वयं लभ्यते निस्तेन वुकोगुणवाधकत्वात्। माधवोदाहृतमबोभूवन्निति तु चिंत्यमेव॥

5-02

अंतादेकस्य दुर्लभत्वात्। अपि च निपात्यादिसिद्धये पंचमीसमासमाश्रयणीयः विगणय्य सत्रपूर्वोक्ताएवोद्धाराः स्मर्तव्या इति युक्तः पंथाः। ननु पंच
मीसमासो माऽस्त्विति वदतो मते तन्वंतीत्यत्रेड् न स्यादिति कुतो नोद्भावितमिति चेन्न। बहिरंगस्य यणो ऽसिद्धत्वात्। न च नाजानंतर्य इति निषेधः। अनंत
रकार्यविधौ यत्राजानंतर्यं इति कैयटेनाभ्युपगमात्। कथं तर्हि पंचमीसमासोदाहरणप्रायं दत्तमिति चेन्न। हरदत्तमतेन स्यैवेहि सह्यत्रांतरंगे बहिर
गे वा अचोरानंतर्यमिति व्याख्यात। नचैवं न पदं तस्सूत्रे दध्यत्रेतिवृत्तिमुपादाय स्त्रा निवद्धावप्रतिषेधसामर्थ्यात् बहिरंगपरिभाषा न प्रवर्तते
इति मिओति, विरुध्येत बहिरंगे यणि अचोराश्रयणेन नाजानंतर्यमिति निषेधादेव बहिरंगपरिभाषाया अप्रवृत्तेः। किं च संयोगांतलोपसूत्रेऽ
सिद्धं बहिरंगमंतरंगे इति परिभाषामाश्रित्य क्रियमाणं यणः प्रतिषेध इति वार्तिकप्रत्याख्यानमपि विरुध्येत। अपि च हलणिति सूत्रेऽरणपरइ
तिपरेण चत्सूत्रेऽर्थमित्यत्र रेफद्वयं श्रूयेत स्तुत्। तदपि विरुध्येत रो रि इति लोपसंभवात्। असिद्धपरिभाषां श्रित्य रीत्या निषेधात्। किंच न धातुलो या
प इति सूत्रे मेद्ध इति भाष्येण संयोगांतस्येत्यत्र यण इस्यप्रत्याख्यानभाष्येणापि विरोधः। किं चाएतेऽइत्यत्र पचावेदमित्यादावतिप्रसंगमाकू
स्व ए क्य बहिरंगपरिभाषयोः सूत्रं समाधानमपि भज्येतेति दिक्। तस्माद्धरदत्तकृताव्याख्या पूर्वपरस्वग्रंथेन भाष्येण च सह विरुद्धेति चेत्सत्यं। अतएव मा
याख्यानं धातुलोपसूत्रेऽ न्नुपादेयाम वोचाम॥ केण इति ज्ञापका आजानंतर्यमित्यस्यानित्यता मा अस्तु वा कथं विस्सम र्थ नीपं स्यादेतत् ग
कैयटमते अचोरिति द्विरविवक्षितं न वा। आद्ये मूलभूतज्ञापकविरोधः। नहि कोऽसिच क्रोस्येत्यादावनंतरेष स्वविधावचोराश्रयणं द्वितीये तु म
लभूतं ज्ञापकं संभवेत् ग्रहणं पूर्वेण स्यात्। तत्तुपौर्णेव स्थितं। अथ परेण ग्रहणे हलोपि केचिद्दत्त भवेतु नाम अज्ञानंतर्येतु न गतमिसा
द्युयः। तर्हि अस्तु कथंचित् ज्ञापकनिर्वाहः अयजइदंक्र रक्षोइइहेत्यत्र परत्वात्सवर्णदीर्घस्तु दुर्वार एव। न च असिद्धं बहिरंगमिति प्राप्नोति नाजा
नंतर्यमिति निषेधात्। नन्वंतरंगं बलवदिति परिभाषांतरेणेदं सिध्यति। तथा च [illegible] विप्रतिषेधसूत्रे तरंगं च सुपकेभ्य इत्यण
दि. सूत्रीनाम्ना कुणः सवर्णदीर्घादिति प्रयोजनं पठितमिति चेत् सत्यं पठितं। किंतु बहुत्तमप्रयोजनानि निष्ठितानि असिद्धपरिभाषयैव ग
तार्थत्वाअयं कर्तव्येसुपसंहृतं। एतेन प्रकृतसूत्रेपठ्याम्भ्यां इत्युदाहरणदूषणप्रस्तावे असिद्धपरिभाषा भाष्यकारेरूहहतां अंतर

॥प्र०कौ०
॥७१२॥

नाजानंतर्ये बहिष्ट्व

गंबलीयइत्येतदुपलक्षणतयाव्याचक्षाणोपि कैयटः प्रत्युक्तः। विप्रतिषेधसूत्रे भाष्यविरोधात्। तस्मादिह सिद्धांततत्त्वमन्यदेव वक्तव्यमिति।
उच्यते। अंतरंगपरिभाषाया निरपवादत्वादसिद्धपरिभाषायास्तु सापवादत्वादुभयोरेव दुर्बलता। विप्रतिषेधसूत्रस्थं भाष्यं तु अभ्युच्चय
परमेवेति भागवृत्तिकारः। कैयटस्तु विवरणादयोप्येवं। बृहद्विवरणकारास्तु नाजानंतर्य इति परिभाषा मास्तु तज्ज्ञापकतया यत्स्व
मतं तेनासिद्धपरिभाषाया अनित्यत्वमेव ज्ञाप्यत इत्याहुः। अस्मिंश्च पक्षे विप्रतिषेधसूत्रस्थं नाजानंतर्य इति भाष्यमपि अनित्यत्व
परतया मंस्कानेयं। अन्यथा हि तत्रैवांतरंगं बलीय इत्यस्य प्रसारव्याने विरुध्येत। अत एव वृत्तौ न लोपः सुप्स्वरे इति सूत्रे वृत्रहभ्यामित्य
त्र नलोपस्य सिद्धत्वाद्ध्रस्वस्येति तुक् स्यादिति सुप्क्रमस्य सन्निपातबहिरंगपरिभाषाभ्यां गतार्थता मा भूदिति परिभाषाद्वयस्यापि
ज्ञापयितुं तुग्ग्रहणमित्युक्तं। अत एव तत्र मिश्रैरुक्तं। बहिरंगपरिभाषाया अनित्यत्वात्। पासेस्यत्र बहिरंगमपि यद्वाच्यत्वं मतं रंगेणापि
नासिद्धं। तथा प्रतिदीव्न इत्यादि सिद्धयेप्यसिद्धपरिभाषाया अनित्यत्वं स्वीकृतं। अत एवाक्षद्यूरित्यत्रोलोपे कृते ऊठ् नासिद्ध इति दिक्॥
एतदपवादश्चाकृतव्यूह इत्यादिः। उत्सर्गापवादयोर्द्वयोरप्यनित्यत्वे स्थिते लक्ष्यानुरोधादेव व्यवस्थाहेतुरिति सर्वं सुस्थं
स्यादेतत्। पूर्वस्येति संबंधसामान्ये षष्ठी संबंधश्च द्विविधः। कार्यित्वेन निमित्तत्वेन वा। एवं च विधिग्रहणं विनैव समासद्वयं ल
ब्धं। विधिग्रहणे सत्यपि हि पूर्वस्मान्निमित्तत्वेनाश्रितादिति व्याख्येयमेव। अन्यथा गोरित्यत्र गकारात्परस्य विधौ रुत्वं स्थानि
वद्भावादेङ्ह्रस्वादिति संबुद्धिलोपः स्यात्। सत्यं। विधिग्रहणं योगविभागार्थं पूर्वस्य विधौ स्थानिवदेवेति नियमार्थस्त्वयं
वर्त्तते। यद्वा मास्तु योगविभागः। विधिग्रहणसामर्थ्याद्विधिमात्रे स्थानिवद्भावो भवति तिष्ठ्युगास्त्रीये युगास्त्रीये चैतेन पद
यतीत्यत्र वध्यभावो युगास्त्रीयोपि सिध्यति। नन्वेवं पूर्वसूत्रादेव विधिग्रहणमनुवर्तिष्यते। सत्यं। पुनर्विधिग्रहणाद्द्वितीयो
मपि

अनित्यत्वं
इति ८ पृ०

व्या

ऊठ् य

हे
नेने

504

६ ति हि२

नियमं क्रियते। पूर्वस्यैव विधौ स्थानिवन्न तु पूर्वपरयोर्विधौ। तेनैयतुरित्यसिद्धौ अन्यथैणो अनुसिद्धिर्वचनेनीति यणादेशस्य स्थानिरूपाति
देशाद्द्वित्वे कृते द्वित्वकाले यणोपहारस्तु नः प्रवृत्तिवेलायां याश्रयत्वेन वार्णादाङ्गं बलीय इत्यस्मिन्प्रवृत्ते वर्णमात्राश्रयत्वेनान्तरङ्गत्वात्सवर्ण
दीर्घः स्यात्। न चाकृतव्यूहा इत्यणि तिवाच्यं। निमित्तविनाशाभावात्। कृते यणि स्थानिवद्भावेन सवर्णदीर्घप्राप्तेः। तत्र सवर्णदीर्घे
कृते ऽनादिवच्चेत्यनेनाभ्यासग्रहणेन ग्रहणादभ्यासह्रस्वे दीर्घ इणः कित्तीति दीर्घत्वे कृते दीर्घविधानसामर्थ्यादिणो यणीति यणभावे
ईअतुरिति स्यात्। सिद्धान्ते तु पूर्वपरयोर्विधौ स्थानिवत्त्वाभावान्निमित्तविघातेनाकृतव्यूहपरिभाषयैणो यणि सिद्धं रूपं यद्वा। स्थानिव
दितिबलेनाभावोऽप्यतिदिश्यते। उत्तरसूत्रे द्विर्वचनादिग्रहणाल्लिङ्गात्। विधिग्रहणं तु पूर्वस्यैव न तु पूर्वपरयोरित्येतदर्थमिति दिक्। इह स्था
न्यादेशनिमित्तानां त्रयाणां सन्निधाना विशेषेऽपि स्थान्यपेक्षमेव ग्रहणं तेन त्वादेशापेक्षं निमित्तापेक्षं वा॥ वैयाकरण इत्यत्रायादेशापत्तेः॥
तदुक्तं॥ अचः पूर्वत्वविस्तानादेचोः सिद्धमिति। न चैवं समाधेयस्यत्र अन्यादेशप्रसंग॥ ण्मल्लोपाविति पूर्वप्रवृत्तिपेयेन णिलोपे कृते ततः
मल्यलक्षणेन वृद्धौ सत्यामेकदेशविकृतस्यानन्यत्वाद्यग्रहणेन ग्रहणात्। एवं पासादित्वत्र वधादेशप्रसंग इति चेन्न। आदिष्टादचो
रपि स्थानिदाशेऽनादिष्टादचः पूर्वत्वात्। ननु स्थानिनः पूर्वत्वेऽपि आदेशस्य किमायातं। न ह्यनादिष्टादचः पूर्वत्वं नाम शास्त्रीयं का
र्यं यस्थानिवदादेश इति पूर्वसूत्रेणातिदिश्येतेति चेन्न। अनादिष्टादचः पूर्वत्वमुपयोगी अचः परस्मिन्निति शास्त्रेण बतीयितव्ये
स्थानिवदादेश इत्यत्र प्रवृत्तिसंभवात्। तथा चाचः परस्मिन्नित्यतिदेश एव शास्त्रीयं कार्यं। तच्च पूर्वसूत्रेणातिदिश्यत इति फलितोऽर्थः
अत एव न पदान्तसूत्रे सवर्णग्रहणं कृतं। अन्यथा श्नसोरल्लोपे कृते पश्चाद्भव ननुस्वारे नानादिष्टादचः पूर्वत्वात्तस्य विधौ स्थानिवद्भा
वविरहात्सवर्णग्रहणं व्यर्थमेव स्यात्। नन्वेवं क्षत्रियकेऽरिति न सिध्यति। तथाहि। केऽयत्तेः क्विप् अल्लोपयलोपयोः कृतयोरल्लोप
स्य स्थानिवत्त्वेनोवङ्। कृते उकारस्यानादिष्टादचः पूर्वस्य स्थानेऽजातस्योवङः स्थानिवदादेश इति स्थानिवत्त्वेनानादिष्टादचः पूर्वत्वा

भै

से

तु। अचः परस्मिन्निति स्थानिवद्भावेनाकारेण व्यवधानादूठभावे स्थानिवत्त्वादेव लोपो व्योर्वलीति वलोपाभावे हलि चेति दीर्घे वृत्ते कं इच्
तिरितिस्यात्। यत्तु यः स्थानिद्वारा पूर्व उवङ् न तस्योठ् कस्य तर्हि वकारस्य यस्य च उठ् वकारस्य न स स्थानिपूर्व इति तन्नाते सुरितिवत् कें
ठ् इत्यस्य केठूठ् इत्यादेरूपात्। तस्य च केठ् उठ् इत्यादेरूपे कर्तव्ये स्थानिवद्भावाव श्यंभावात्। उक्तं हि। सर्वे सर्वपदादेशा इति। अन्यथा निरव
ष्यासादित्यादावपि स्थानिवद्भावानापत्त्यात्मत्वेथित्यापत्तेरिति। अत्रोच्यते। अनादिष्टादचः पूर्वत्वाया स्थानिद्वारकस्य मनित्यं। न
पदान्तादिति सूत्रे केठ्रिति भाष्योदाहरणात् ज्ञापकात्। आतो नुपसर्गे कः इति सूत्रे ककि थो सर्वत्र प्रसारिणिभ्यो ड इति वार्त्तिकस्य तत्र
प्रघट्टक भाष्यस्य च पर्यालोचन यात्यैवमेव लभ्यते। तथा च तत्र भाष्यं। यो नादिष्टादचः पूर्वस्तत्कार्ये स्थानिवद्भावो नेति स्थानिद्वारके तु गृ
ह्यमाणे संपूर्णः प्रघट्टक एवासंगतः स्यात्। इति तत्रैव स्फुटी करिष्यते। तत्र लिकैयट स्त्वापाततः॥ एतेन नितितउमाचक्षेति तापयतीहरदत्त ग्रंथो
पि समर्थितः। तत्र हि णौ टिलोपे कृते तस्य स्थानिवत्त्वादचो ञ्णितीति वृद्ध्यभावेपि अत उपधाया इति वृद्धावाकारे कृते तस्य स्थानिद्वारा उका
रापूर्वत्वेन पुग्विधायुकारस्य लोपस्य स्थानिवद्भावात् पुग्न प्राप्नोति॥ न च यस्य पुक् आकारस्य नासौ पूर्वः यश्च पूर्व आकारे न तस्य पुगिति

सर्वे

तिवाच्यं। एकदेशविकृतस्यानन्यत्वात् सर्वे सर्वपदादेशा इत्युक्तरीत्या चाकारान्तस्यापि पूर्वत्वानपायात्। तस्मात्स्थानिद्वारकं पूर्वत्वमानि
त्यं इत्येव हरदत्तस्याशयः। अत्र केचित् तितापयतीत्यसाध्वेव। तथा हि। तितउ णिच् इति स्थिते टिलोपश्च प्राप्नोति अत उपधाया
इति वृद्धिश्च उभयोर्नित्ययोः परत्वाद्वृद्धिः। ततष्टिलोपे कृते स्थान एवानादिष्टादचः पूर्वमादंतं न तु स्थानिद्वारा इति पुक् प्राप्नोति॥
तस्मात्पिपूते णिचो गुणे एचि वृद्धौ वायादेशे तितायतीति भवति। न च तितानि णिच् इति स्थिते अंतरंगत्वाद्गुणे न्याययादेशे तितायेति
तयतीति स्यादिति वाच्यं। अपि हि गुणे सति वृद्धिरेचीति बाधेनाद्गुणस्य निमित्तविघातस्यात्तस्य मानत याकृतव्यूहपरिभाष

पूर्वत्वे
पि

506

यापूर्वमन्तरंगस्याप्याद्गुणस्याप्रवृत्तेः।अकृतव्यूहपरिभाषात्वन्तरंगपरिभाषापवादइत्युक्तं।नचत्रापिगुणस्याचःपरस्मिन्निति स्थानि
वत्वाद्गुणस्यननिमित्त विघातइतिवाच्यं।पूर्वस्यैवविधेःस्थानिवद्भावोनतुपूर्वपरयोर्विध्याविरुक्तत्वात्।तस्मान्नितापयतीत्येव
साधुनतुनितयतीतितितापयतीतिवा।चङितुतितापणिचुचङ्इतिपूर्वस्थितेतनोतेर्डउःसन्वच्चेतिव्युत्पत्तिपक्षेअनभ्यासस्येतिद्वित्व
निषेध्येटिलोपस्यचङ्परे निर्ह्रासेस्थानिवत्त्वनिषेधादभ्यस्वाभावेणिलोपेस्यस्थानिवद्भावादसिद्धत्वाद्वा आतोलोपः भावेदी त
र्घेत्रिध्विंप्रतिस्थानिवत्त्वनिषेधात्सवर्णदीर्घेऽतितादितिभवतिनह्रस्वतितापयदिति।अत्रेदंवक्तव्यं।।परत्वाद्वृद्धिरित्यसंगतत्वान्नित्य
त्वेनटिलोपात्।नचवृद्धिर्नित्या।अचःपरस्मिन्नितिकार्यातिदेशेनचेद्वृद्धिप्राप्तावपिलक्षणान्तरेणप्राप्नुवन्ननित्यइतिन्यायेनानित्य
त्वात्।एवंच■हरदत्तोक्तिःसाध्वेव।किंतुअनित्यमपिस्थानिद्वारकंपूर्वत्वमिहनेष्यतेइत्यस्मिन्नर्थेप्रमाणंचिंत्यं।तदेवंस्थानिद्वा
रकंस्वतोवा।उभयथापिअचःपूर्वत्वमिहग्रहत्वतइतिस्थितेविधीयतइतिविधिरितिकर्मणिकिप्रत्ययः।पूर्वस्येतिशेषषष्ठीअनु
वादेपरिभाषाणामनुपस्थानात्।पुगाद्यागमेपिविधेयेस्थानिवद्भावः।अचइत्यत्रतुआदेशइतिसमभिव्याहाराद्योग्यताबला
त्स्थानसंबन्धलाभः।षष्ठीस्थानेयोगेत्यतःपूर्वसूत्रेअनुवर्तितस्यस्थानेग्रहणस्येहाप्यनुवृत्तेर्वेतिप्रसिद्धःपन्थाः।न्यासकारस्तु
निमित्तापेक्षमादेशपक्षंवापूर्वत्वमित्यपिपक्षोभाष्येउपन्यस्तत्वात्स्वीकारः।।वैयाकरणादौतुबहिरंगयोरेचोरसिद्धत्वान्नदो
षइत्याह।इदंचनाजानंतर्यपरिभाषायाएवअनित्यत्वेतिप्रागुक्तमुपष्टम्भसमर्थनीयं।अस्मिन्पक्षेविधिरितिभावेकिः।षष्ठीतुअ
नभिहितत्वात्कर्मणीत्यपिसर्वंसुस्थं।किंतुनिमित्तापेक्षयापूर्वत्वेस्यदाघत्वस्यस्थानिवत्त्वात्।द्वाभ्यामित्यादौदीर्घोनस्यात्।इद
ती तीँस्यस्थानिवत्त्वादिगन्तलक्षणो■गुणोनस्यात्देयमितितथागुणवृद्ध्योःस्थानित्वाल्लुवनेलावकइत्यवाचोनस्यात्ताः।द्वयोरे
कस्पदेयमृणेकिरतोलवनइत्यादिनिर्देशोपष्टम्भेनानित्यत्वाश्रयणंतुक्लिष्टमितिदिक्।।पूर्वत्वंचनाव्यवधानगर्भंकिंतुव्यवहि

507

चङ्परनिर्ह्रासे निषेधारम्भात् तेन पटयति स्यादेशस्थानिवद्भावः लि
तसाधारणं तस्मिन्निति निर्दिष्टत्वात् तिसूत्रे निर्दिष्टग्रहणाल्लिङ्गात्। अस्थानिवद्भावः। जस्त्वविधौ तत्र
व्यति। वध्यादेशो दत्तः। स्यादेतत् पटयती संज्ञात्वे तिविभक्तिमाश्रित्य पदत्वात् जस्त्वं प्राप्नोति। न
तिषेधात्। सत्यां कर्मसमर्पकात्प्रातिपदिकादेव सुबुत्पत्तिर्न तु सुबन्तादिति वक्ष्यमाणत्वात्। सुबन्तात् णिजिति पक्षे पिइष्टवद्भावे याभ्
संज्ञायां पदसंज्ञायां बाधात्। पटुमित्यस्यैव हि भसंज्ञाप्रवृत्तेः तिकथं तत्र पदसंज्ञाप्रवर्तेत। तत्र चाप्रवृत्ता कथं तत्रैमेकदेशविकृते सभ्ये
तेस्त्रविणमाचष्टे स्रजयतीत्यादौ हि प्रातिपदिकाण्णिजुत्पत्तिरिति पक्षेप्येषैव गतिरिति वक्ष्याम। अवधीदित्युदाहरणं तु भाष्यमते
आर्द्धधातुकीयाः सामान्येन भवन्तीति पूर्वसूत्रे एवोपपादितत्वेनार्द्धधातुकोपदेशे यदकारान्तं तत्स्य लोपइति लोपसंभवात्। वार्तिकम
तेतु लिङिङ्इति परसप्तमीत्युक्तं। तथा च अत इत्यत्र हलादौ विवक्षितो लोपो न प्राप्नोति। अत एव हलि तन्न एवायमादेशाइ तितन्मते। वृद्धिस्तु न
भवति। वध्यादेशो वृद्धितत्प्रतिषेधइति पूर्वसूत्रस्थ वार्तिकात्। एवं अखट्वको बहुखट्वक इत्यत्र केण आपोन्यतरस्यामिति ह्रस्वस्य
स्थानिवद्भावाध्रस्वासंत्यात्पूर्वमिति खकाराकारस्योदात्तो न भवति। किन्तु कपि पूर्वमित्युत्तरपदान्तोदात्तत्वमेव भवति। अचीति कोव
हुच्चितीकइत्यादौ तु च्वितः कपीति दीर्घस्य स्थानिवद्भावाच्चि शब्देकारस्योदात्तता भवति। न चोभयत्रापि स्वरविधौ न स्थानिवदिति नि
षेधः। अयः लोपाजादेशमात्रविषयः सइति वक्ष्यमाणत्वात्। एवं पट्व्या मृद्व्या इति बहुभिर्वृत्तिकारैरुदाहृतत्वान्मूर्धाभिषिक्तमेति
भाष्यव्यवहृतमप्युदाहरणं साध्वेव। अनूतच्युहल्यायेन प्रथमयणादेशायोगात्। न चैवं कर्त्र्या हर्त्र्या इत्यादौ उदात्तयणो हल्पूर्वादिति विभ
क्तेरुदात्तत्वं न स्यादिति वाच्यं। स्वरविधौ व्यञ्जनस्याविद्यमानवद्भावेन पूर्वयणमेवाश्रित्य तत्समाधानात्। न च पूर्वस्माद्विधौ स्था
निवद्भावात् व्यवधानमेवेति वाच्यं। रेफस्थानादिष्टादचः पूर्वत्वात् स्थानिद्वारकस्यापूर्वस्यत्वे नित्यत्वात्। निष्ठायां सेटीति सेट् ग्रहणा
त्पूर्वस्माद्विधौ स्थानिवत्त्वस्यानित्यत्वाच्च। तस्मान्मूर्धाभिषिक्तमुदाहरणमिति पक्षे नानीवदुष्यति। अत एव हिआ श्रीयमाणयामे

यप्रवृत्तौ स्थानिवत्त्वं इतिपक्षे अकुर्वीत्यत्र अलुन्यात्रां व्यसनन्यात्रां संख्यात्रामित्यत्र क्रमेण येचेत्युलोपइहल्यघोरित्तीत्वं येविभाषाइत्या
त्वं णयोहलीत्यात्वं प्राप्नोतीति भाष्यवार्त्तिकयोः स्पष्टं । यत्तु अंतरंगं बलवदिति वा असिद्धपरिभाषां वा आश्रित्य पट्व्या मृद्व्या इत्युदाहरणनि
र्णकरणपरं भाष्यं तत्स्वरूपकथनपरं वचसां नित्यत्वाभिप्रायेण कथंचिद्योज्यमितिदिक् ॥ नपदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदी
र्घजश्चर्विधिषु ॥ पदान्तादिषु विधीयमानेषु पूर्वसूत्रेण प्राप्तः स्थानिवद्भावो न स्यात् । पदान्ते । कानि संति । कोऽस्तः । इहयणादे
शयोः अस्योरल्लोपो न स्थानिवत्त्वान्वानादिष्टादचः पूर्वत्वविरहादेवन स्थानिवदितिवाच्यं । वाक्यादपोद्धृत्य पदानि संस्क्रियं
ते इतिपक्षे अनादिष्टादचः पूर्वत्वस्य सत्वात् । नहि पदांतरनिरपेक्षमेव पदमिह शास्त्रे संस्कार्यमिति नियमः । युष्मद्युपपदे मध्य
म इत्याद्यनुशासनस्यासंगतिप्रसंगात् । एतच्चांगसूत्रे कैयटेन ध्वनितं । केवलपदसंस्कारपक्षे तु अदन्नीचद्दत्यादावचइत्यल्लोपो
न स्थानिवदित्युदाहार्यं । विधिग्रहणं च सर्वेह न कर्मसाधनः । तथा सेकर्मधारयो वास्यात् शेषषष्ठ्या तेन सह तत्पुरुषो वा । नाद्यः । विधि
ग्रहणस्य क्रियाशब्दतया पूर्वनिपातप्रसंगात् । नांत्यः । पदांतस्य कस्मिंश्चित्कर्तव्ये न स्थानिवदिति पर्यवसानेन वृक्षवू इत्यादौ च
लोपापत्तेः । इष्टनिर्दिष्टेषु द्विर्वचनादिषु अनन्वयापत्तेश्च । तस्माद्भावसाधन एव । अंतरंगत्वाच्च । अतएव कर्मषष्ठी तेन समा
सः । शुकीतटीत्यादौ पदसंज्ञायां कर्तव्यायां यस्येति लोपः स्थानिवदेव । नहि स्थाविधिरिति सूत्रेण पदसंज्ञा तो विधीयते येन नि
षेधः स्यात् । किंतु संज्ञामात्रं । तत्रापि यथोद्देशं । जस्त्वादिकार्यकाले तेन पूर्वत्रासिद्धत्वं स्थानिवदिति निषेधापत्तेः । एक
देशविकृतस्यानन्यत्वात् । वितस्वानिस्वनरः प्राशो बहिरंगत्वान्नेति वक्ष्यते । भाष्ये तु पदसंज्ञायाः पदान्तत्वाश्रीकृत्य पदेन्त
इति भसंज्ञापि पदकार्यमिति चेद्वेधा समाहितं । नक्रोलेषडिकेवचनसामर्थ्यादिति बोध्यं । वाचिकषडिकेतु उपन्वमेव वक्ष्यते ॥

509

श्री०को०
११५७

द्विर्वचनेऽसुध्युपास्यः। स्थानिवद्भावनिषेधसामर्थ्यादेव बहिरंगपरिभाषापीह न प्रवर्त्तते नाजानंतर्य इति निषेधाद्वा। वरेऽइति। नि
पातनादेवालुक् दद्ध्यश्च। वरे यो जादेशः स न स्थानिवत्। यायावरः। यातेर्नित्यं कौटिल्ये इति यङ्। यश्च यङ इति वरच्। तन्निमित्तकोऽ
तो लोपः। स च आतो लोप इटि चेत्यालोपे कर्त्तव्ये न स्थानिवत्। न त्विह परनिमित्तकत्वमेव नास्ति। आर्द्धधातुक इति विषयसप्त
म्यभ्युपगमात्। अत एव हिंस्र चोयदिति सूत्रे जग्रहणं कृतं। अन्यथा हलंतात् ण्यतो विशेषविहितत्वाद्यापरिशेषादच्च भ्यय इ विष्यति त
इति किं तेन विषयसप्तम्यास्त्वंतु दित्स्यधित्स्य इत्यादौ व्यञ्जनभूतपूर्वादपि यत्सिद्धये जग्रहणमिति यत्तो नाव इत्याद्युदात्तं स्यति
पर सत्यां वरे ग्रहणे नैष समीपक्षोपि लाप्यते। तथा चाद्युदात्तत्वे हलादेरिति सूत्रे आदिग्रहणं कृतं। हलंतादिति माविज्ञायीति। अ
स्ति च हलंत विशेषणव्यावर्त्यं जुगुप्सते मीमांसते इति विषयसप्तमीत्वे त्विह पि अतो लोपे हलंतत्वाद्युत्वाभाव्यमेवेति हलंत विशे
षणवैयर्थ्यात्। सामर्थ्यादेवादिपरिग्रहे सिद्धे हल इत्येव ब्रूयात्। एवं च यातेर्यङंतात् क्विपि अतो लोपे यलोपविधिं प्रति स्थानिवद्भाव
निषेधाद्यलोपे च यायातीति यङः कारलोपस्य स्थानिवत्त्वादातो लोप इटि चेत्यालोपे कर्त्तव्ये पुनर्यलोपे यातिरिति भविष्यति। न च
पुनराकारस्य कारयोर्लोपे सति किं चान्न श्रूयेतेति वाच्यं। अल्लोपस्य स्थानिवत्त्वात् द्विर्णोल्लुङ्न्यायेनासिद्धत्व [illegible] द्वा। यलोपे उदाहर
णांतरमपि तद्यथा। कंडूयतेः क्विप् कंडूः। क्विन्निति काशिकायां प्रमादः। अप्रत्ययादित्यनेन बाधात्। न च स्त्रियाः इत्यादाविव हआ
यादित्वकल्पने बहुलग्रहणं वा शरणीकरणीयं। भाष्यकारेणैव कंडूये त्वेव भवितव्यमिति वदता एतस्यापराद्धत्वोक्तेः। तस्मादयं क्विपि
वा ततो लोपयलोपौ। अल्लोपस्य स्थानिवत्त्वादुवङ्। ततश्छ्वोः शूडिति ऊठ्। न च ऊठ्यपि स्थानिवत्त्वम्। आदिष्टादचः पूर्वत्वात्। अत एव

द्रुः पु नरवङ्न भवति। सर्वे सर्वपदादेशाः इत्यादिस्थानिद्वारकं पूर्वत्वं यद्यपीष्यते भाष्यमते लोलुवः पोपुव इत्यादौ यथा तथापि स्थानिद्वारकं पूर्वत्वं क्वाचित्कमेवेति पूर्वसूत्रे प्रोक्तं। तथा निष्ठे तेर्यङ्न्तात् क्विपि अल्लोपयलोपयोः स्तोष्वीति स्थि
ते अल्लोपस्य स्थानिवत्त्वादियङ् यलोपः ते स्थितिः तथापेपीयतेः क्विपि अल्लोपयलोपयोरनेकाच्त्वात्तियणियलोपे पेप्यिरितिभ
वति। नृतेनृतरणे यङ्न्तात् क्विपि अल्लोपयलोपाल्लोपेषु पूर्वत्रासिद्धे चेति स्थानिवत्त्वनिषेधाद् गुणाभावइति पत्वे कृते गुणे रिरितिभवति
रेचीयते श्वेति रिरिति दिक्। तदेवं वरेयलोपे तिनैकं निमित्तं किंतु द्वेधा इति स्थितं। केचित्तु वरेइत्यादौ कारं प्रश्लिष्य ईकारे परतोविधौ
नस्थानिवदिति व्याचख्युः। तेन आमलक्याः फलं आमलकं। नित्यं वृद्धशरादिभ्य इति मयट्। फले लुक्। ततो लुक्कृते ङीतलुकी तिङि
षोलुक्का स चयस्येति लोपेन स्थानिवत्। पूर्वोक्तव्याख्याने तु लुगंतेन स्थानिवदिति वचनं करिष्यते तत्र च नपुंसके भावे क्तः। लुङ् स्था
निवदिति फलितोर्थः। स्वरे चिकीर्षकः। सनोऽतो लोपो लिति तिककारेकारस्योदात्तत्वे कर्तव्येन स्थानिवत्। न चलितीत्यस्यारंभ
सामर्थ्यात्। कारक इत्यादौ सावकाशत्वात्। भाष्ये तु आकर्षिक इत्युदाहृतं। तदापातनः। ष्ठलो लित्व सामर्थ्यात् स्थानिवद्भावकृतव्य
वधानेस त्यपि लित्स्वरस्य सुवचत्वात्। शंतीत्यादौ कुत्ववत्। सवर्णानुस्वारयोः शिंषि पिंषि। श्नसोरल्लोपो न स्थानिवत्। अ
अनुस्वारस्यानादिष्टादचः पूर्वत्वं तु स्थानिद्वारेत्युक्तं। यद्यपि सवर्णग्रहणमात्रेणानुस्वारोप्याक्षेप्सुं शक्यते तथापि विशेषापे
पेक्षं ज्ञापकमित्यपि संभाव्येत तथा च न यत्र परसवर्णप्रसंगः शिंषतीत्यादौ तत्र स्थानिवद्भावनिषेधमनुस्वारग्रहणं। अन्वः
परस्मिन्निति सूत्रे ऊरुः श्यात्यभ्यासस्यासवर्णे इति निषेधस्य उवादेशाभावकारी तया शिंशीत्यादेरप्यसिद्ध्यापत्तेश्चेति दिक्। दीर्घे
प्रतिदीव्ना इहलिचेति दीर्घे ल्लोपो न स्थानिवत्। यत्तु काशिकायामुक्तं उपधायां चेति दीर्घे इति तत्सामान्दिके भत्तथा चोप

इत्यादेः सवर्णे

॥ सू॰ कौ॰ ॥
॥ ७६ ॥

ध्यायां चेत्स ज्ञेोक्तं। प्रतिदीव्नेत्यत्र हलि चेति दीर्घ इति। यद्वा। आचार क्विबंता क्विचेति क्विपि सति मा धेयं। नन्वेवमनुनासिकस्य क्विझलोरि
दीर्घः स्यात्। सत्यं। असूत्तवा रूपरिभाषया भा विनमल्लोप मालोच्यांतरंगोपि दीर्घो न करिष्यते। [illegible] जग्मुष इत्यादौ इडागमनकारादे
शा विधे [illegible] ति बोध्या न नु स्थानिवत्त्वाभावेप्यसिद्धं बहिरंगमित्यल्लोपस्यासिद्धत्वाद्दीर्घो न स्यादिति चेन्न। तुक् तु ग्रहणेन बहिरंगपरिभा
षाया अनित्यत्वस्य ज्ञापितत्वात्। यथोद्देशपक्षे षाष्ठी परिभाषा प्रतिदीर्घस्यासिद्धत्वयांतरंगत्वाभावेन परिभाषाया अप्रवृत्तेश्च। जक्षि
स ग्धि श्च मे। बध्धांते हरणान्त थाहि। अदनं ग्धिः। अदेः क्तिनि बहुलं छंदसीति घस्लादेशः। घसिभसोर्हलि चेत्युपधालोपः। झलो झलीति
सकारलोपः। घिसकारेसिचो लोप इति भाष्य कृतानाश्रयणात्। वार्तिकमतेप्छांदसो वर्णलोपः। झषस्तथोरिति धत्वं। न च तस्मिन्कर्तव्ये
पूर्वस्मादपीति स्थानिवद्भावः। पंचमी समासस्यानित्यतायाः पूर्वसूत्र एवोपपादितत्वात्। घस्य झलां जश् झशीति जस्य कर्तव्ये उपधा
लोपो न स्थानिवत्। समानाग्धिः सग्धिः। सह स्य सः संज्ञायामित्यनुवर्तमाने समानस्य छंदस्यमूर्धप्रभृत्युदर्केष्विति सूत्रेण समा
नस्य सभावः। बब्धामिति भसेर्लोटि तसस्तां। शपः श्लुः। अंतरंगत्वात्। द्वित्वं अभ्यासकार्यं। ततो घसिभसोर्हलीत्युपधालोपादि प्राग्व
त्। चखि जक्षतु जक्षुः। घसेर्लिट्। अतुस उसू च। गमहनेत्युपधालोपः खरि चेति चर्त्वं प्रति न स्थानिवत्। अनवार्तिके। स्वरदीर्घयलो
पेषु लोपाजादेश एव न स्थानिवत्। तेनान्यः स्थानिवदेव। पंचभिररत्निभिः क्रीताः पंचारत्न यः वेदेत्तु पंचारत्न्यः। जसादिषु छंदसि
वा वचनं प्राङ् णौ चङ्युपधाया इति गुणाभावे यणत्तस्य स्थानिवद्भावादिगंतकाले सप्तमीनापूर्वपदप्रकृतिस्वर इत्याहुः। यद्यप्यसिद्धं
बहिरंगमित्यनेनापीदं सिध्यति तथाप्यकृतव्यूहपरिभाषामाश्रित्यायोज्यं। अचित्तिको वट्कू खित्तिको इत्यत्र नेरमांसाखारं सूर्वमित्यस्य क्र
मेण प्रवृत्तस्य प्रवृत्ती फलमिति पूर्वसूत्र एवोक्तं। न चात्र बहिरंगपरिभाषायाः प्रसंगोस्ति। क्रियोः गिर्योः। व्युत्पत्तिपक्षे हलि चेति दीर्घः॥

512

प्राप्तः। यणः स्थानिवद्भावो न भवति। अच इत्यधिकारे भुजेः किच्च। हृ हृ ह्रु हृ कुटि भिदि छिदिभ्यश्चेति कुः। स च कित्। ननु हरदत्तेन न्यासकृता
दृग्भोरित्युपन्यस्तं। तत्र केचिदुणादिवृत्तावन्वेषणीयं। वा [illegible]य्वोः इह यलोपो न। अस्मिंश्च वार्तिके स्वरग्रहणमावश्यकं। गिर्योः क्रियोरि
त्युपधायां चेति सूत्रे वृत्तिकारोक्तरीत्या उणादीनामव्युत्पत्तिपक्षावलंबनेनापि सिद्धं। वाय्वोरिति तु बहिरंगपरिभाषयापि सिद्धं। किंतु उप
धात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानं। पूर्वत्रासिद्धे चान्तस्य दोषः संयोगादिलोपलत्वणत्वेषु अस्यार्थः। क्वौ विधिं प्रति न स्थानिवत्।
लत्वमाचक्षाणो लोः। अत्र णिचि यष्टिलोपो यश्च क्वौ णिलोपः तदुभयं दृष्टेः ऊठ् इति वकारस्य क्विनिमित्ते ऊठि कर्तव्ये न स्थानिवत्। एत्येधत्यूठ्
स्विति वृद्धिः। तथापि पठिषि प्रालणकुलानीति यदुदाहृतं तदपि क्वौ विधिं प्रतीति व्याख्याने एव संगच्छते। क्वौ लुप्तं न स्थानिवदिति
व्याख्याने लोः पिपठिषि इत्युभयमपि न सिध्यतु। णिचि टिलोपस्य स्थानिवद्भावे ऊठो संभवात्। पिपठिषतेरप्रत्यये अतो लोपे नपुंसकवह
वचने भ्रूणोस्तल्लक्षणे नुमि कृते य्वोः लोपस्य स्थानिवत्त्वप्रतिषेधेन नुमप्रसंगाच्च। एतच्च दीधीवेवीटामिति सूत्रे कैयटादिसूत्रे च मिश्रग्रंथे स्फु
टं। कैयटोऽपि दीधीवेवीटामित्यत्र क्वौ विधिं प्रतीत्यर्थो व्यवस्थितो न तु क्वौ [illegible] न स्थानिवदितीत्याह। अत्र व्यवस्थित इति वदता क्वौ लुप्तं न
स्थानिवदिति पक्षोऽपि क्वचिदाश्रीयत एव नियमः परं नास्तीति सूचितं। लुप्तमिति नपुंसके भावे क्तः। एवं च सख्युः गोमान् पदः त्वं अहं इ
ति सिद्धं। तथा हि। ख्यत्यात्परस्येति सूत्रे भाष्ये सखीयतेः सख्युः। लुनीयतेर्लून्युरिति। तत्र सखीयतेः क्विपि अल्लोपे यलोपे अल्लोप
स्य स्थानिवद्भावेन परत्वाल्लोपं बाधित्वा इको यणचीति यण् स्यात्। तत्राय लोपे सखोर्लून इति स्यात्। अत एव क्वौ लुप्तं न स्थानि
वदिति यणं परिजहार कैयटः। तथा उगिदचामिति सूत्रे अध्यातु पूर्वस्यापि नुमर्थमध्यातुग्रहणमित्युक्ता गोमत्यतेरप्रत्यये गोमान्
[illegible]समुदाहृतं भाष्ये। तत्राप्यल्लोपस्य स्थानिवत्त्वात् सर्वनामस्थानपरत्वेनास्तीति [illegible] नुम् न स्यात्। न चाध्यातुग्रहणसामर्थ्यात्स्था
निवद्भाव इ। अन्यथा ये ससापि नुम् स्यादिति वाच्यं। आचारक्विबंतात् क्विबेति क्विपि चरितार्थत्वात्। तस्मात् क्वौ लुप्तं नेत्येव चारस्तः॥

॥ शं०कौ०॥
॥१७॥

पि

ननु गोमसतेर्गोमंततेर्वा उभयथा गोमानिति न सिध्यति। अत्वसंतस्य चाधातोरिति विशेषणात्। सत्यं। तत्राधातुग्रहणं असंतस्यैव वि
शेषणं। न त्वतंतस्यापीति वक्ष्यमाणत्वान्न दोषः। तथा येन विधिस्तदंतस्येति केवलोपि पाच्छब्दोस्ति। पादयतेः पात्पद इति भाष्ये। अत्रा
पि स्थानिवद्भावा। व्यवधानेन पद्भावो न स्यात्। क्रोष्टुसंनेति सिध्यति। अत एव पादस्य पाद्भूस्त्यादिभ्य इति न सूत्रितं। प्रतिपदोक्तस्या
स्यैव पदादेशो माभूत्। किंतु क्विबंतस्यापि यथा स्यात्। इति। एवं च पादस्य लोप इति गुरुनिर्देशं कुर्वता सूत्रकृतेन क्रोष्टुसंनेति साध्यते।
तच्च कादाचित्कमिति तु प्रवृत्तसूत्रस्थस्येनेवं विज्ञायते क्रोष्टुसंनेति भाष्यस्यार्थः। विशुद्धमाहात्म्यात् स्वस्यादिति सूत्रभाष्याच्चेति व्य
च स्थितशाद्बम् प्रयुञ्जानेन कैयटेन ध्वनितं। तथा युष्मानाचष्टे युष्मयति। ततः क्विपि णिलोपे च वृत्ते स्तोहो सो इति कर्तव्ये णिलोपो न स्था
निवत्। तदुक्तं। स्थानिवत्त्वं चणारूपे क्रोष्टुसत्वान्न विद्यते। इति। स्थानिवत्त्वमिति लोपस्येति शेषः। णेः क्रोष्टुसत्वादित्यन्वयः। अस्तु न
र्हि क्रोष्टुसमित्यपि नित्यमेवा। तावता पिलदमाचाद्याणा लोरिरियस्य सिद्धेरिति चेन्न। पिपठिषीत्यस्यासिद्धेः। दिवयतेर्दयूरिति तु रहके
येटन यदुदाहृतं क्रोष्टुसंनेति सिध्यतीति तत्स्यायमाशयः। यद्यपीह क्वौ विधिं प्रतीत्य सूत्रसिद्धं तथापि तस्य स्थानिद्वारा अनादि
णादचः पूर्वत्वेन णिलोपस्य स्थानिवत्त्वादचो ञ्णितीति वृद्धिप्रसंगः। तस्मात् क्रोष्टुसंनेत्येवोदाहरणं। यत्तु लोपो व्योरिति सूत्रे कैयटेः व्य
जंतादप्रत्यये केरूः कंडुवा विवितिव्युत्पादयन् कैयट आह। स्थानिवद्भावाच्चण्। तस्य दुरून व ऊठि कर्तव्ये स्थानिवद्भावेन प्रतिबंधः स्या
दिति यकारस्यादिष्टादचः पूर्वत्वादिति। तत्तु स्थानिद्वारकं पूर्वत्वमनित्यमित्यभिप्राया। तद्वा स्याद्यूरित्यपि सुसाध्यमेवा। ननूभय
थापि द्यूरित्यत्र प्रत्ययलक्षणेन वृद्धिः स्यादेवेति चेन्न बहिरंगस्य ऊठो वृद्धिं प्रति असिद्धत्वात्। एवं च स्थानिवद्भावो वहलपिनका
चिस्तति। बहिरंगत्वेनैव समाधानात्। तस्माद्यूरिति पक्षद्वयेपि सिध्यतीत्येव तत्त्वं। नन्वेकदेशविकृतस्यानन्यत्वाद्दिव औ तु

त्वं

वान्यं

वैस

514

स्यादिति चेन्न [illegible] निरनुबन्धकपरिभाषया अध्यात्मग्रहणानुवृत्तेर्वा अक्षधूरित्यत्र [illegible] ओ
दिति दिव औत्सूत्रे भाष्ये एव स्पष्टत्वात् । यद्यप्युगिदचामिति सूत्रे धातुपूर्वादपीत्यर्थः तथापीह अद्धाधिकार इति भावः । एतेन हलि चेति दी
र्घः दीव्यतीति नाम धातुप्रकरणे कौमुदीप्रसादे प्रयुक्तो । दिवेरुं विरिति न्यासो हित्त सूत्रेण डिविरितिवदनूमाध्यायोपि दिव्यतीति ह्रस्वमेवो
पज्ञगाम । प्रवृत्तमनुसरामः । द्विवचनादो ओः सुपीति यण् । दद्ध्यौ दध्यः इत्यादिरवद्रूपवत् । कंडुः कंडुवौ कंडुव इति तुउवङ् वा संयोगपूर्वत्वया
यणो प्राप्ते रिति दिक् । अयमत्र संग्रहः । सखु गौमानुपदस्स्वचक्रो हुलस्य निदर्शनं । अनित्यत्वेपि पश्चिविक्रो विधौ लोहियोर्दयुः ॥ हुकाद्यु
सं न स्थानिवत् । आमलक्याः फलमामलकं । फले लुकः प्रत्याख्यानपक्षे तु पंचभिः पट्टीभिः क्रीतः पंचपटुरित्युदाहार्यं । तथापि च इन्द्राण्यो
ग्नाय्यश्च देवता अस्य पंचेन्द्रः पंचाग्निः । ङीषा संयुक्त आनुगेकारश्च श्रूयते । न च संनियोगशिष्टन्यायेन निवृत्तिः । परत्व द्धितलुकि मितत्वया
ङीषो निवृत्तेः पूर्वयोरानुगेकारयोर्निवृत्तौ कर्तव्यायाम चः परस्मिन्निति स्थानिवत्त्वात् । येतु पूर्वोक्तरीत्या चरईउ इति ईकारमश्लेषं कुर्वन्ति । तेषा
मिह लुग्ग्रहणं कर्तव्यं । उपधात्वे कर्तव्ये न स्थानिवत् । तेन परिखात्सद्धान्चातुरर्थिकेण्णि कृते वृद्धादकेकान्तखोपधादिति पारिखवृद्धाद्खोप
धलक्षणे छप्रत्यये पारखीयः सिध्यति । अन्यथा उपधासंज्ञायाः पूर्वविधित्वेत्तत्र कर्तव्यायामालोपो [illegible] स्थानिवत्स्यात् । न त्वेवं पटयती
त्यादौ वृद्धिः स्यात् इति चेन्न । अत्रोपधासंज्ञामुपजीव्य प्रत्ययो विधिसित्तस्तत्रैवायं निषेध इति भाष्ये स्थितत्वात् । अत्र चङ्परनिर्ह्रीस
ग्रहणमेव ज्ञापकं । कथं तर्हि भाष्ये सोशिबलाकेत्युदाहरणं दत्वा उपधाविधौ नेत्येव सिद्धमियुक्तमिति चेन्न । अनास्थावादमात्रेत दित्येव
हि । तेनैकदिगित्यणं तान्ङीपि अल्लोपद्वयस्यापि यलोपे कर्तव्ये स्थानिवद्भावे [illegible] निषिद्धे समानाश्रयस्याणो लोपस्यासिद्धत्वाया
यलोपः सिध्यतीति यलोपेन स्थानिवदित्यस्यैव सौरीत्युदाहरणं । उपधासंहित्तत्रलोपे कर्तव्ये उपयोगिनप्रत्ययविधाविति स्थितं ॥

॥ श० कौ० ॥
॥१८॥

न

चङ्परे ऐ यो कुस्वः सचङ्परस्मिन्नीसः। तत्र न स्थानिवत्। वादितवंतं प्रयोजितवान्। अवीवदद्वीणां परिवादकेन। प्रथमणिचो [illegible] लोपस्य स्था
निवत्त्वादनुपधा आकार इति णौ चङ्युपधाया ह्रस्वो न प्राप्नोति। णिसामान्यग्रहणादेव तत्सिद्धा इदं तूदाहरणं वारि आरख्यत् अशीवरत्। न चाग्लो
पीति निषेधः। द्वंद्वयः। परत्वाद्वृद्धौ सत्यां टिलोपः इत्यभ्युपगमेनाग्लोपित्वाभावात्। अत एव हलि कल्योरदंतत्वनिपातनं सार्थकं। कुत्वेन स्थानिवत्
अन्वीयते रो [illegible] णादिकः क्प्रत्ययः। अर्कः। पाचयतेः क्तिन्। पाक्तिः। चोः कुत्वे णिलोपो न स्थानिवत्। इह सूत्रे जश्चर्त्वेषु इत्येव सिद्धे विधौ ग्रहणं तदे
पसंग्रहार्थं। तद्धि उसादनार्थं च क्विब्लुगित्यादिवार्त्तिकं इति निष्कर्षः। तत्रापि क्विचङ्परे निर्ह्रासोपधाग्रहणमावश्यकं लुकई कारमश्लेषे
एगताथीत्वात्। कुत्वस्य पूर्वत्रासिद्धीयत्वाच्चेति अवधेयं। च लोरिति कुत्वे वा उदाहरणमन्वेषणीयं। पूर्वत्रासिद्धे च न स्थानिवत्। पाचय
तेः पापक्तिः। याजयतेः यायष्टिः। पाचयतेः पाक्तिः। याजयतेः याष्टिः। इहाल्लोपणिलोपौ कुत्वषत्वयोर्न स्थानिवत्। एवं लेहयतेर्लेढिः। दोहय
तेर्दोग्धिः। वेष्टयतेर्वेष्टिः। रासयतेर्दाष्टिः इत्यादि [illegible]। [illegible] सिद्धं चेदं। अचः परस्मिन्नित्यादिना प्रतिनिपादीस्व स्यासिद्ध [illegible] तया तस्मिन्कर्तरि ति
यस्तिदेशं प्राप्तः। न चैवं स्थानिवत्सूत्रस्याप्यप्रवृत्तौ रामइत्यादौ विसर्गो न स्यात् इति वाच्यं। प्रत्ययः परश्चेत्यादिनिर्देशेन भोभगो इति सू
त्रे रुग्रहणेन च ततश्चरितेपित्वादित्यवधेयं। एवं स्थिते द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः सूत्रेण पाम्याः। किंतु पदांतवरेयलोपस्व
रयलोपेष्विवेति भाष्यवार्त्तिकयोः स्थितं। स्यादेतत्। यदि दीर्घग्रहणं त्यज्यते तर्हि सास्यमिके दीर्घविधौ स्थानिवद्भावः प्रसज्येत। प्र
तथा च चिण्णमुलोः इति सूत्रे यङ्ाण्णिजंतादाणिचि तेन चिणि अशमि अशामि [illegible] शमामि इत्युदाहृते तन्न सिध्येत्। न च दीर्घग्रहणसा
मर्थ्यात् लब्धानिवद्भावबाधः। कमेर्णिङः सूत्रे हरदत्तायुक्तरीत्या चिण्णमुलोर्दीर्घ इत्यत्र केयटकारीत्या च अहिडीत्येतत्सिद्ध्या हेडीलस्य
निरस्या चरितार्थत्वात्। उच्यते। णिजोलै केवं [illegible] ही ताम [illegible] मी ति। अ [illegible] मी तियङ्लुगंता णिचि मविषती। तिन हियङ्‌ युङ्‌ लुको
स्वरे दीर्घे वा कश्चिद्दोषोऽस्ति। अनयंश्चेवसाधयितुं [illegible] एवं प्राहितमिस्या यपि सिद्धं। पूर्वस्मादपि विधौ स्थानिवद्भावेनोणि

न्याय्यव्यवस्थाने सति ग्रहो लिटीति दीर्घस्याप्रवृत्तेः। सूत्रमते विहितविशेषणाश्रयणाद् ग्रहितमित्यादौ न दीर्घः। अत एव यङन्तात् चिज्ञरीगृहीते
त्यत्र न दीर्घः स्थानिवद्भावात्। सूत्रमते विहितविशेषणा[illegible]श्चेति। यङ्लुगन्तात् तु जादाविटि दीर्घो भवत्येवेति माधवः। द्विःप्रयो
गो द्विर्वचनं षाष्ठमिति सिद्धान्ताद् ग्रहेर्विहितत्वानपायात् यङ्लुको नैमित्तिकत्वात् आङ्सत्वादेरुत्तत्वाच्च लुकाल्लुप्तत्वाच्च स्थानिवद्भावो
पि नास्तीति माधवस्याशयः। वस्तुतस्तु यङ्लुक्यपीटो दीर्घो निष्ट एव। भाष्यकैयटादिपर्यालोचनयात्तथैव निर्णयात्। तथा
च तत्र ग्रहेरङ्गादिति भाष्यमुपादाय कैयट आह। तत्र चोहिज्जरीगृहीत्यङ्गं न तु ग्रहिः। विशेषणसामर्थ्याद्धि यथाश्रुतरूपाश्रयणादु
ति। यद्यपि यङन्तं प्रक्रम्य तत्रेदमुक्तं। तथापि युक्तिसाम्याद् यङ्लुगन्तेपि न दीर्घ इति वक्ष्यते। अत एव एकाचो द्वे प्रथमस्येति सू
त्रे हरदत्तोपि यङन्ते दीर्घमाशङ्क्याह। एकाच उपदेश इत्यतो दीर्घविध्यावेकाज्ग्रहणमनुवर्तते इति। न चात्र पक्षे दीर्घस्योक्तिसंभवो
यङ्लुकि
प्यस्ति। नन्वेवं ग्रहो लिटि इतिसूत्रे यङ्लोपे चेत्कृमिति वार्तिकव्याख्यावसरे स्थानिवद्भावाद्विहितविशेषणाश्रयणाद्वा यङन्ते
दीर्घं परिहरन् कैयटोपि वि...ध्यते। यङ्लुगार्थं यथाश्रुतरूपाश्रयणस्य एकाज्ग्रहणस्य चावश्यकत्वात्तेनैव गतार्थत्वादिति
चेन्न। ग्रहो लिटि। तत्र कैयटाग्रहस्य उपायान्तरदूषकत्वादिति न्यायेन यङन्ते उपायान्तराभिधानपरत्वात्। अत एव तत्र कैयट आह
अन्यत्रास्य दोषस्य सम्यगुद्धृतत्वादिति। एवं हि वदन् तत्रत्यपरिहारस्याव्यापकतामेकाज्सूत्रोक्तस्यैवावश्यकत्वं यत्तं चाभि
प्रैति। न च यथाश्रुतरूपपक्षे गृहीतमित्याद्यसिद्धिः। अङ्गसंज्ञाप्रवृत्तिवेलायां यथाश्रुतस्यैव सत्वात्। ग्राहिता दोतु नैव। एकाच इति
समाधानं तु णिभिन्नविषयमेव। तस्माद्यङ्लुगन्तात् णिजन्तात् यङन्तात् ग्रहेरिटः द्विधा त्रिधा चतुर्धा न दीर्घो नेति व्यवस्थितं॥१॥

माधवग्रंथस्तु विहितविशेषणपक्षस्य सुस्थतां पक्षांतरस्याभ्युच्चयतां च परिकल्प्य कथंचिन्नेय इति प्रतिभातीति दिक्॥ नस्य
दोष इत्यादेरयमर्थः। नस्य पूर्वत्रासिद्धे नेत्यस्य स्थलत्रये दोषः। अतिप्रसक्तिः। तस्मात्तत्र स्थानिवद्भावस्य प्रतिप्रसवः कार्य इत्यर्थः।
तेन वृक्षस्य थीवास्य र्थ इत्यत्र स्कोः रिति लोपो न। निगार्यते। निगाल्यते। अचि विभाषेति लत्वं सिध्यति तथा माषवापिनीत्यत्र णत्वं न भवति
अल्लोपस्य स्थानिवत्वेन नकारस्य समासांतत्वाभावात्। न चासस्यापि स्थानिवद्भावे ङीबेव समासांतो न तु नकार इति वाच्यं ङीबुत्प
त्तेः प्रागेव समास इति द्वितीये वक्ष्यमाणत्वात्। एवं स्थिते तत्क्षयतेः क्विप् तक् रक्षयतेस्तुरगि त्वाद्वि बोध्यं। अत्र हि संयोगादि लो
पे कर्तव्ये णिलोपस्य स्थानिवद्भावान्न तत्स्वृतिः। संयोगांतलोपे तु स्थानिवद्भावनिषेधाद्भवत्येवासो। गोरट् इत्यादि तु पुद्धा क्विपि बो
ध्यं। यत्तु अचः परस्मिन्निति सूत्रे दध्यत्रेति भाष्यमुपादाय कैयटेनोक्तं पूर्वत्रासिद्धे चेत्यत्तदत्र नास्ति तस्य दोष इत्यत्र संयोगादि लो
पस्य संयोगांतलोपापवादत्वादिति तन्न वास्तवं। किं तु तत्र स पूर्वपक्षिणोऽभिप्रायवर्णनमात्रं। अत एव न पदांतसूत्रशेषे तेन
वोक्तं। स्कदयतेस्तु स्कन्। तक्षयतेस्तु तक्। यत्तु सिद्धकौमुद्यां श्चुत्वधुट्त्वं इति वार्तिकव्याख्यावसरे कैयटेनोक्तं मधुणि तीष्यतेर्मधु
ट् इति प्राप्नोतीति तत्तु सकारे पदे इत्सामर्थ्यादिति बोध्यं। सन् श्च्योततीत्यत्र श्चुत्वगिसस्यासिद्धत्वात् सकारस्य श्वशितार्थ इति चेन्न हि श्को
त्सुम् इति समाधेयं। कुसुमनाम्नो वाहनक्रू रिति माधवोदाहृतसम्यगेव। तत्र सामर्थ्यविरहेण संयोगादिलोपाप्रवृत्तेरिति दिक्॥
स्कोदेतत्। संयोगादिग्रहणमिह मास्तु न चैवं काक्यर्थमित्यादौ स्कोः रिति लोपापत्तिः। स्कोः संयोगाद्योरित्यतो झलि इत्यनुवर्तते। तं
च्चोपसर्जनस्यापि संयोगस्य विशेषणं। न तु प्रधानयोरपि स्कोः। अव्यभिचारात्। ततश्च झलि तो यः संयोगस्तदाद्योः स्कोर्लो
पः स्यादिति सूत्रार्थात्। बहिरंगतया यणोऽसिद्धत्वाद्वा। अत एव दध्यत्रेत्यादौ संयोगांतलोपो न प्रवर्तते। तथा चाष्टमे वार्तिकं॥१०॥

हि

यत्र झलो झलि

नवात्र लोलोपाद्बहिरंगलक्षणत्वादिति। नचैवमपि काष्ठतक्षक्षुरगिरसादिनसिध्येदेवेति वाच्यं। अनभिधानात्तत्र क्विप एव दुर्लभत्वात्। अ
नभिधाने च काष्ठशगेव नास्तीति आष्टमिकभाष्यबलेनन्यायसाम्यान्निर्णीयत इति॥ अत्रोच्यते। कुत्स्यतेः कूरित्यादिसिद्धये संयोगा
दीति वाच्यमेव। किंच तत्कूरकूरत्यात्यर्थवत्त्वमेव। अनभिधाने प्रमाणाभावात्। कैयटादिभिरुदाहृतत्वाच्च। नच काष्ठशगेव नास्तीति भा
ष्यं तत्र प्रमाणं। वैषम्यात्। तथाहि। काष्ठशगृत्यत्र सलयोरेव यः संयोगस्तदादेः ककारस्य लोपमाशंक्य तदुक्तं। तेन यत्र कलोपप्र
सक्तिस्तदभिप्रायकमनभिधानं। अत एव कौतेभ्यः क्विप्येवं परत्वात्त्व्या स्यात्। नच णिजंतेभ्यः क्विपि कलोपप्रसक्तिरस्ति। णि
लोपस्य स्थानिवद्भावात्। नच पूर्वत्रासिद्धमिति तन्निषेधः। संयोगादिलोपे प्रतिप्रसवस्य ज्ञापकत्वात्। तस्मात्संयोगादिग्रहणं कर्त
व्यमेवेति स्थितं। उदत्त्वं च धेयं। संयोगांतस्य लोप इत्यत्र नवा झलो लोपाद्बहिरंगलक्षणत्वादिति ध्यासिद्धांतव्यवस्थापना कूरिति
संयोगांतलोपोपि दुर्लभः। तेन कुत्स्य इत्येवम् वति प्रथमपक्षे। द्वितीयपक्षाभिप्रायेण तु माधवः। नन्वेवमपि लत्वग्रहणं व्यर्थं। निगाल्य
त इत्यत्र सत्यपि णिलोपे प्रत्ययलक्षणेनैव सिद्धेः। नच वर्णाश्रयत्वात्। ध्यातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्। इष्टं च दाडिनाय
नेति सूत्रे भ्रौणहत्येतत्वनिपातनेन ज्ञापयिष्यते। किंच अंतरंगत्वादपि लत्वं सुवचमिति। अत्रोच्यते। तृणह इत्यत्राचिनेत्यनुवर्तते॥
हलीति निवृत्तं। तथा चात्तृणेडि त्यादिसिद्धये प्रत्ययलक्षणसूत्रं नारंभणीयं। किंतु नियमार्थं तदारंभ इति भाष्ये स्थितं। एवं चेतर
व्यावृत्तिमात्रफलकं प्रत्ययलक्षणसूत्रं तत्तत्कार्याणि तु स्थानिवत्सूत्रेणैव निर्वाह्याणि। तत्र च प्रदीव्येत्यत्र ष्विरत्वे यः प्राधान्ये
नाप्यत्राश्रयेति निषेधः स्थितः। तथा चाचि प्रत्यये विधीयमाने लत्वं स्थानिवद्भावं विना दुर्लभमेव। यदप्यंतरंगत्वाल्लत्वमित्युक्तं। तद
पि नाकृतव्यूहपरिभाषया लत्वसिद्धेः। किंचोपसर्गस्यायत्ताविति सूत्रे पक्षद्वयं वक्ष्यते। अयतिपरत्वमुपसर्गस्य विशेषणं। रेफस्य
चेति। तत्राद्यपक्षे पल्ययत इति सिध्यति। पलायत इति न सिध्येत्। एकादेशे कृते व्यपवर्गाभावात्। उभयत आश्रयणे नादिवद्

वायोगात्स्थानात्तस्मात्तत्रस्थानिवद्भावेनैवव्यपवर्गो वक्तव्यः सच पूर्वत्रासिद्धेनेति निषिद्ध इति प्रतिप्रसवः सार्थक एव। द्वितीयेपक्षे तु पत्व्य
यत इत्ति न सिध्येत्। चकारेण व्यवधानात्। प्रायत इत्यत्रैव परत्वं स्यात्पूर्वत्रासिद्धे नेति स्थानिवत्त्वनिषेधेन तत्रैरेफस्याचतिपरत्वानपायात् प
वृते त्विह हल्ग्रहणे येननाव्यवधानन्यायेन पत्व्यपत इत्यत्रापि हल्त्वं सिध्यति। स्फुटंचेदमष्टमे भाष्ये एवं तस्मादिह हल्ग्रहणं कर्तव्यमेवेति स्थि
तं। णत्वग्रहणं तु व्यर्थं। तथाहि। माषवपनीति। नावद्बहिरंगपरिभाषयापि सिद्धं। नेचमहिणोति प्रमीणीत इत्यादिसिद्धये तदिति वाच्यं। अ
च्चः परस्मिन्निति सूत्रस्य प्रवृत्तिं विनापि एकदेशविकृतस्यानन्यत्वात्। हिनुमीनेत्यस्य प्रवृत्तिसंभवात्। नच ष्णान्ता षडिति सूत्रे वर्णितरीत्या प्रि
याष्ट इत्यादिसिद्धये णत्वग्रहणमिति वाच्यं। कार्यकालपक्षे बहिरंगपरिभाषयैव तस्यापि सिद्धेः। यथोद्देशपक्षस्तु न ग्रहीष्यते प्रत्याख्या
येन णत्वेन सह फलसामर्थ्यात्। तेन प्रियाष्टणः इति णत्वाभ्युपगमपरः पदमंजरीग्रंथोऽप्यपास्तः। बहिरंगपरिभाषाया अनित्यत्वेपीह तदप्र
वृत्तौ प्रमाणाभावात्। तस्मादिह णत्वग्रहणं व्यर्थमिति स्थितं। प्रत्युत णत्वे स्थानिवत्त्वाभ्युपगमे बाधकमप्यस्ति। तथाहि। अनितेरंत इति सूत्रे
अंत इति योगं विभज्य हे प्राणिनिति रूपसिद्धये पदांतस्येति प्रतिषेधं बाधयितुं अंत इति सूत्रेण पदांतस्यानितेर्णत्वं विधीयत इत्येका व्याख्या
अंतशब्दः समीपपर्यायः तमाश्रित्य निमित्तसमीपस्थानीयो नितेर्नकारः तस्य णत्वमिति त्वयोगविभागं विनापि व्याख्यानद्वयं भाष्ये स्थि
तं। तत्र प्रथमपक्षे प्राणितीत्यादावेकेन आकारेण व्यवधानेपि वचनसामर्थ्याण्णत्वं प्रवर्तते। द्वितीयपक्षे तु एकदेशस्यादिवद्भावाद्रे
फाद्व्यवहितस्यानितेः संभवात्प्रवर्तते। पर्यनितीत्यचतुर्वर्णद्वयेन एकेन च व्यवायात् पक्षद्वयेपि णत्वं न स्यात्। नच वचनसाम
र्थ्यात् स्थानिवद्भावकृतं व्यवधानमाश्रयिष्यते रत्रेप्र इति कुत्स इवेति वाच्यं। निरणिति दुरणितीत्यादौ चरितार्थत्वात्। नचैवं निर्दु
रोरनितेरित्येव ब्रूयात्। नत्वनितेरंत इति सामान्यलक्षणप्रणयेदिति वाच्यं। आवृत्तिमाश्रित्य हे प्राणिस्य [illegible] न्नणत्वस्य प्रतिप्र
सवार्थं निर्दुरोरित्यपेक्षया अंत इत्युक्तौ चाक्षरलाघवानुरोधात्त्सामान्यलक्षणप्रणयनसंभवात्। तस्मादष्टमिके भाष्यपर्या

ए

520

निपातप॰

लोचने नग्रहणत्वग्रहणंनकर्त्तव्यमिति निर्णीयते। अतएवव्यूढोरस्केनेत्यत्रणत्वंन। अन्यथा विसर्गस्यात्वेनतदादेशस्यस्थानिवद्भावा
प्णत्वंस्यात्। इहणत्वेग्रहणस्यप्रयोजनाभाववस्तुउक्त एवतत्त्वतस्यदोषः संयोगादिलोपलत्वयोरित्येववाच्यंवस्तुतस्तुनवाच्यं। पूर्वत्रासि
द्धेचेतिहि असिद्धत्वादेवन्यायसिद्धमित्युक्तेतत्त्वात्सिद्धत्वमनित्यमध्युनेतिवदमुनेतिवाच्येनमुनेइत्युक्तेनेतियोगविभागात्रुटौत्तिवाच्येनामी
तिलिंगाच्च। अनभ्यइत्यादेरंगस्येत्यनेनव्यावृत्तोसत्यामपिअक्षण्वत्तइत्यादौदीर्घव्यावर्त्तयितुंहिनामीत्युक्तं। रूप्यादिभ्यःश्नम्। श्नान्नलोपइति
सूत्रद्वयेभाष्यकैयटाभ्यांलोचनेनारंभसामर्थ्यात्परिभाषाया एवासिद्धतायाअप्यविशेषाद्बाधेप्राप्तेनामीत्युक्तमितिचेन्न। वृत्तिंतुग्र
हणादिनासंनिपातपरिभाषाअनित्यत्वज्ञापनात्सामर्थ्याद्बाधइतिपक्षेपिअक्षण्वत्तइत्यादावुभयबाधेगौरवाच्च। तस्मादनित्यत्वात्सा
पनार्थंपेक्षत्वा तेनसिद्धकार्यमपिसंगृहीतंभवति। एतेनरामःरामेभ्यइत्यादौरुत्वस्यासिद्धत्वाद्रोरुकारस्येत्संज्ञालोपोकथंस्यान्नाभिस्येत
दपिसमाहितं। प्रत्ययःपरश्चेत्यादिलिंगाच्च। यत्तुअनुनासिकनिर्देशात्सामर्थ्यादित्संज्ञालोपोप्रत्यसिद्धत्वंनेतिनत्तरूप्मलमित्यादौ
हस्त्रिचेत्युत्त्वस्यचव्यावृत्या अतोरोरित्य असानुनासिकनिर्देशाभ्युपगमेनचाविताथ्यात्। रामइत्यादावपिसानुनासिकश्रवणस्यापाद्य
मानतयाचारितार्थ्यस्यस्पष्टत्वादितिदिक्। तेनसंयोगादिलोपलत्वयोरसिद्धत्वविरहात्स्थानिवत्त्वंभविष्यतीतिसकलेष्टसिद्धिः॥ ६॥
द्विर्वचनेचि। रूपातिदेशोयं। द्वित्वनिमित्तेचियोजादेशः सस्थानिवत्स्वरूपंलभतेद्वित्वेकर्त्तव्ये। चक्रतुः चक्रुः। द्वित्वनिमित्तत्वेनाचिविशेष
णादिहन। दुद्यूषति। सुस्यूषति। नह्यूठ् द्वित्वनिमित्तं॥ नन्वेवंचक्रतुरित्यत्रयणोपिस्थानिवद्भावोनस्यात्। अत्रुसोद्वित्वनिमित्तेपि अका
रस्यातथात्वात्। सूत्रेतुअचकेइत्यादौसावकाशमिति॥ सत्यं॥ इहनिमित्तशब्देनसाक्षाद्वासमुदायघटकतयावाद्वित्वप्रयोजकमाश्रीयते॥ त्व
ननुसाक्षादेवेत्याग्रहः। लक्ष्यानुरोधात्। किंच। सूत्रेनिमित्तशब्दोनास्त्येव किंतुलक्षणायावाद्वित्वंयस्मिन्नितिद्विर्वचनमितिव्युत्पत्त्या
वाद्विर्वचनमस्मिन्निति अर्शआद्यजावा द्विर्वचननिमित्तेलक्ष्यते। तच्चप्रकारत्रयंसाक्षात्परंपरासाधारणेयनप्रयोजके
पिसुवचं। एतच्चोक्तंस्पष्टं कैयटे स्पष्टं। अतएवऊर्णोतेःसनिसनीवंतेतिइट्पक्षेविभाषोर्णोरितिङित्वविरहेऊर्णुनविषतीति

॥मू॰को॰
॥२९॥

सिद्धे सन्नंतस्य द्वित्वविधानेपि सनो द्वित्वप्रयोजकत्वेन तस्मिन् गुणावादेशयोर्द्वित्वे कर्त्तव्ये स्थानिवद्भावात्। तदुक्तं। तद्भावभावितामात्रेणेह नि
मित्तत्वमिति। वस्तुतस्तु द्विर्वचनाक्षिप्तः प्रत्ययोचीत्यनेन न विशिष्यते। परस्मिन्निति वर्त्तते। अमीषां मध्ये देवदत्तात्परमानयेत्युक्ते सजातीयेन मनु
ष्यांतरेणाव्यवहितः पर आनीयते। तथेहापि प्रत्ययांतरेणाव्यवहितः परो गृह्यते तेन द्वित्वनिमित्ते अजादौ प्रत्यये प्रत्ययांतरेणाव्यवहिते सति धा
त्वादेशः सस्थानिवत्स्यादिति सूत्रार्थः। एवं च कृनुरित्यादौ न काप्यनुपपत्तिः। वक्ष्यमाणज्ञापकबलेन णिचाव्यवहिते प्रवृत्तावपि दिदवयि
ष तीत्यादौ अनेकप्रत्ययव्यवधानादप्रवृत्तिः। अपीप्यदित्यत्र वर्णव्यवधानेन प्रत्ययांतराभावात्प्रवृत्तिः। अनुवादे परिभाषानुपस्थानेपि निर्दि
ष्टपरिभाषाकर्त्तव्यस्य निर्वाहश्चे मिबोध्यं। अत एवेह परस्मिन्निति अनुवर्त्तते इति न्यासकारः। तथा च द्विर्वचनेनेह प्रत्ययाक्षेपवदनुणि
ज्भिन्ने व्यवहिते ज्ञापकस्याप्रवृत्तिं वदन् कैयटोप्येतदभिप्रैति। ऊर्णुनुविषतीत्यादिसिद्धये तु तद्भावभावितामात्रेण निमित्तता स्वीक्रियते एव
सपथेयानन्वेवमरिरिषतीति न सिध्येत्। ऋधातोः सनि स्मिपूङ्रंज्वशां सनीति इटि कृते इस् शब्दनिमित्तस्य गुणस्य स्थानिवद्भावेऽजादे
द्वितीयस्येति इसो द्वित्वप्रसंगात्। इष्यते तु रिस् शब्दस्य द्वित्वं। अत्रोच्यते। न हि कार्यी निमित्ततयाश्रीयते इति दीधीवेवीटामित्यत्रोपपादितम्। अतो
नेह रिस् शब्दो निमित्तमतो न स्थानिवत्। नन्वेवं सन्नंतस्य कार्यित्वादूर्णुनविषतीत्यपि न स्यादिति वाच्यं। मत्वर्थीयेन इनिना कार्यमनुभवत
एव कार्यित्वलाभात्। तत्र द्वितीय एकाच् द्वित्वरूपं कार्यमनुभवतीति। ननु सनः अरिरिषतीत्यत्र तु रिस् शब्दस्यैव कार्यभाक्त्वमिति वैषम्या
त्वान्नैवमचीत्यस्य जेघ्रीयते देध्मीयते इति व्यावर्त्येन संगच्छते घ्रीयूध्मीयू इति द्वितीयानवध्यिकस्यैकाचः कार्यभाक्त्वाय इतोपि द्वित्वनिमित्त
त्वाभावादिति चेत्सत्यं। अधिजगे इत्यवाजू ग्रहणव्यावर्त्यमस्तु। तत्र हि गाङ्लिटीति द्विल्कारकनिर्देशमाश्रित्य लावस्थायामेव गाङादेशा
इति भाष्ये एव स्पष्टं। इदं च वार्त्तिकमतमनुसृत्योक्तं। तत्र द्वि टि लि डि इत्यादौ नापरस्सप्तमीत्वाभ्युपगमात्। भाष्यमते तु आर्द्धधातुकीयाः
सामान्येन भूवंतीत्यभ्युपगमात्। लिटीत्यादयोपि विषमसप्तम्य एवेत्युक्तं स्थानिवत्सूत्रे। तन्मते तु अचीत्यस्य जग्ले इत्यादि व्यावर्त्यं बोध्यं
तथाहि। [illegible] आदेच इति सूत्रे अन्ह्रितार्थ तपरस्ससमीपक्षेप इति कमेधार पाश्रयणाद्यस्मिन्विधिप्स

522

दादावल्ग्रहणेऽत्यस्य प्रवृत्या आदिकृतोन्यस्मिन्विधीयमाने मात्वं लावस्थायां क्रियते अतो न स्थानिवत्। न चांतरंगत्वात्तिबादिषु कृते
ष्वपि एकाच्त्वात् संप्रसारणं संप्रसारणं ह्लिटि वयो यङिति द्विलकारकनिर्देशमाश्रित्य तच
षु एज्झि च कृते आत्वं स्यात् तथा च स्थानिवत्त्वं दुर्वारमिति वाच्यम्। न संप्रसारणे संप्रसारणं
तत्रानुपयुक्तत्वादिहानुवर्त्य ह्लिटि तुलावस्था आमवेति आत्वविधौ व्याख्यानात्। कथं तर्हि जेघ्रीयते देध्मीयते इति भाष्यरूपादिषु अस्युदा
हृतमिति चेत् स्मातित्राख्यरात्स्यवेहि। तथा हि। अनुस्वारो व्यंजनं चाक्षरांगमित्युक्ता स्वरांतरे व्यंजनान्युत्तरस्येति तत्र सूत्रितम्। एवं च नेनिज
ति अनेनिजुरित्यादावेकाचः स्य धातोः संपूर्णस्य द्विर्वचनादश्यस्ताश्रयमदादौ वज्जुसादिश्सिद्ध्यतु। घ्यंक्रेतु मध्यवर्तिनो हलामुत्तरांगत्वात्
थमाजेतमेव द्विरुच्यते। यथा दरिद्रातोदद्रति। जागर्तेर्जाजागर्ति। न चैवं तावताक चिद्धये निष्टमापाद्यते। येन प्रातिपरख्य परिभाषा मुपे
क्ष्यनटभार्यो द्व्यजनानीति चाश्रित्य दद्रा गदत्यादि द्विरुच्येत। अत एव चतुरः छ्यता वा यक्षरलोपश्चेति संगच्छते इति दिक्। यदा तु
भाष्यवार्तिकरीत्या द्वितीयाजवधिक एकाचूरुच्यते। गाङ् लिटीति च विषयसप्तम्याश्रीयते। अने मिति कमात्वं ह्लिटीति तु प्रतिषेधः इति
वा आर्द्धीतीति [illegible] विषयसप्तमीति वा आश्रीयते तदा जेघ्रीयते अधिजगे जग्ले इति त्रिविधस्यापि व्यावर्त्यासंभवात् चीत्वस्य किंफ
लमिति विभावनीयं सूरिभिः॥ स्यादेतत्। भसेः क्वसोपसिभसोर्हलीत्युपधालोपे कृते स्थानिवद्रूपातिदेशेन द्वित्वं माभूदित्येतद
र्थमज्ग्रहणं भविष्यतीति चेत्सत्यं सस पि वा द्विते ब्यानिति श्रुतो विशेषाभावात्। ननु [illegible] दुर्लक्ष्योपि विशेषः सूक्ष्मदृशां प्र
तिदुर्वोरस्ति चेन्न। दातुम्प्रियाणि बीरवदातुरित्यादावि द्वित्वाभावसंभवात्। वक्ष्यति हि षष्ठे लिटि धातोरिति सूत्रे अभ्यासग्रहणा
नर्थक्यं च छंदसि वा वचनादिति। न चैवमपि पाक्षिकं द्वित्वं स्यादेवेति वाच्यम्। दृष्टानुविधानस्यैव छंदसि कर्तव्यत्वात्। अत एव हि तुर्ने
द्वित्वं सिद्धेनित्यं छंदसीति सूत्रं निष्फलमित्यभियुक्ताः। लोके तु भाष्यमते कसुर्दुर्लभः। उपधालोपश्च छांदस एवात्तदेवं जेघ्रीयते
देध्मीयते अधिजगे जग्ले इत्यादिसिद्धये क्रियमाणमज्ग्रहणमेव रूपातिदेशत्वे प्रमाणं कार्यातिदेशपक्षे हि घ्री ध्मा ग्ला इत्येषा
मेव भाव्यं द्वित्वे नेति किंतेन। तथा च वार्तिकं अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्येति। देध्मीयते जाग्राद्यतेऽत्यपि जेघ्रीयते

॥न्यो॰ क्रौ॰ ८
॥२२॥

इति अनेन न तुल्ययोगक्षेम[illegible]मुदाहरणं। इत्याभ्योऽग्निनीकरः। अथ यङः यि किं तिइति सूत्रेण यङादेशः अचीत्यस्य प्रत्याख्यानपक्षेऽलुक्ख्या
मुरेधादेवसूत्राद्धाधिकारस्माभिरेव इह रूपादेशो व्याख्येयः। पूर्वसूत्रादच इति षष्ठ्यन्तस्यानुवृत्तिरिह किमर्थं [illegible] शुश्रुवतुरित्यादिसिद्धये इति ग्र
हणान्तथाहि। विभाषाश्वेरितिसूत्रे यद्यपि शुशावे सादेश्चरितार्थोपि स्तु साचकाशुं तथापि श्वन इत्यादेश्चरितार्थस्य वचिस्यपीत्यस्य बाधक
मेवपरत्वात्। लिट्यभ्यासस्योभयेषामित्यस्य तु न बाधकं। श्वयस्य भ्यासविषयकस्य विध्येरनकफानुत्वात्। अत एव विभाषाश्वेरिति सूत्रे श्वे
र्लिट्यभ्यासलक्षणप्रतिषेध इति वार्तिकमारब्धं। लिट्यभ्यासस्येति सूत्रे अश्वयतीनामिति निपूरणीयमिति तस्याशयः। अन्यथा विहि
तप्रतिषिद्धतया विकल्पः स्यात्। शुश्वाय शुश्वियतुरित्यनिष्टमपि पक्षे प्रसज्येत। एवं स्थिते द्विवचनेचीत्यत्राच इत्यनन्तुरतो शुशावेत्यत्र
वध्यावादेशयोरिव संप्रसारणस्यापि स्थानिवद्भावः। तथा च शुशाव शिश्वियतुरित्याद्यनिष्टमापद्येत। न च संप्रसारणं तदाश्रयं च बलव
द्धितितिबाध्यवस्थायामेव संप्रसारणप्रवृत्तेरचीति नास्तीति [illegible]नां। एवमपि व्यतिशुशावे सादेशे [illegible] दोषध्रौव्यात्। न च विभाषाश्वेरिति
त्तावस्थायामेव प्रवर्तते इति वाच्यं। एवमपि इजा सेइजादेरित्यादौ दोषध्रौव्यात्। तावस्थायां किंत्वाविधानेन तत्र संप्रसारणप्रवृत्तेः ष
नच किंत्वमपि प्रवर्ततामिति वाच्यं। अंतरंगैस्तिबादिभिर्बाध्यत्वात्। किंच स्यापेक्ष इति अपूपुपदितीष्यते। तथा निवद्भावे सति न संप्र
सारणमिति निषेधादभ्यासे उवर्णो न श्रूयेतेति चेत्। तत्रावसेकश्रेषाणामन्यतमाश्रयणादिह कोतावच्चारणमपि क्रियते। तथा च व्या
ख्याना। द्वित्वकर्तव्ये इति। तेन च कर्तुरित्यादौ उत्तर[illegible]दले पुनर्यणाद्यर्थं यणादेशो भवत्येव। अन्यथा प्रवृत्तिभाव एव स्यात्। नित्यन्तुरित्य
त्रेतु प्रवृत्तेस्यापी यङो द्वित्वकालेपहारात्। पुनः प्राप्तोयमरनेकाच इति यणा बाध्यते। यद्वा पूर्वमपी यङः [illegible] न प्रवर्तते प्र
कल्प्य वापवादविषयं तत उत्सर्गोऽभिनिविशते इति न्यायात्। [illegible] यद्वा आभीयत्वेने यङो सिद्धत्वाद्यण् भविष्यति। तस्मादेनत्। स्था
निवद्ग्रहणं निवर्तनीयं वानुवर्त्यं द्वित्वनिमित्ते अचि पुनः आदेशेन स्यात्। द्वित्वकार्ये रस्यैव [illegible] व्याख्यायतां। एवं हि सति स्था
निवदिति सूत्राद्धाधिकारे कुत्रापि न भवतीति सर्वं। अस्मिन्नपि पक्षे नञः स्वरितत्वप्रतिज्ञाना व्या। स्थानिवच्छब्दस्य कृत्स्नमेव

स्यात्

हि

524

तदित्ति [illegible] लाघवं। अस्तु वा व्याख्याद्वयमपि। फले विशेषाभावादिति दिक्॥ नन्वेवमपि णौ स्थानिवद्वचनं कर्त्तव्यं दुनावयिषतीत्यादौ। चुस्नावयि-
षति। तुष्टावयिषति। इत्याद्यर्थं। अत्राहुः। ओः पुयण्ज्यपरे इति वचनं ज्ञापकं णौ स्थानिवद्भावस्येति। अयमर्थः। यौतेः पूङः श्रवसनीवते ति स्मि पूङ्
रंजव्रूणामिति सूत्राभ्यामिटि कृते यियविषति पिपविषते इत्यत्र द्विर्वचनेचीति स्थानिवद्भावाद्यकारवकारयोरवर्णपरत्वाभावाद्यभ्यासे उकारे
लभ्यते तत्स्यैवकादेशविधानेन ओः पुयण्सूत्रे पकारयकारग्रहणं चरितार्थं तथापि वर्गग्रहणं प्रत्याहारग्रहणं च ज्ञापकं। द्वित्वनिमित्तस्याचो
णिचा व्यवधानेपि स्थानिवद्भावः प्रवर्त्तते इति तेन विना अ वर्णपरेषु पुयण्ज्युपरेषु उवर्णान्तस्याभ्यासस्य दुर्लभत्वात्। येन नाव्यवधानान्न्यायेन णिचैवैके-
न द्वित्वनिमित्तस्याचो व्यवधानमाश्रीयते तेन भिन्नविनीयिषतीत्यादौ न स्थानिवत्। ल्युडूयियन्भ्यां व्यवधानात्। एवं णिजन्तात् ल्युडूयचुसनस्यपि
नी — निनावयिषतीत्यादि। न हि णौ कृते स्थानिवदिति वचनमस्ति किंतु ज्ञाप्यमानः स्थानिवद्भावो ज्ञापकादेकेन व्यवधाने इत्युक्तं। इह हलनेकेन व्यवधानं
स्पष्टमेव। अचः परस्मिन्नादेशविशेषणत्वान्निर्दिष्टपरिभाषा नोपतिष्ठते। तथा पोपमृष्टे षिक सप्तमी बलादेव तदर्थः पर्यवस्यति। इष द्विप्रहृ
ष्टलाभेच नोत्सन्नविप्रकृष्ट [illegible] स्यग्रहणं बोध्यं। [illegible] स्तुपरस्मिन्नित्यनुवर्त्तत इति सत्तप्रक्रमे एवोक्तं। एवं अबीभवत्। अमीमवत्। अशिर
वत्। अलीलवत्। इत्य दिषु विभावयिषतीत्यादिषु च ओः पुयण् इतीत्वं प्रवर्त्तते। ज्ञापनफलं तु यत्र ओः पुयण्ज्यीत्यस्याप्राप्तिस्तत्र बोध्यं। तद्यथा
चुस्नावयिषति। उड्डिवाचरति। उडवति। उडवतेर्णौ सन्। उडुडावयिषतीति। च्विडि ओ इडवत्। तुतावयिषति अतूतवत्। सोऽयोयं तु हस्तुरु
मीत्यत्र निर्दिष्टः। उर्णुनावयिषतीति॥ औणुनवत्। च्विस्कुशेर्णौ विप्यात्तस्य स्थानिवद्भावात् सुस्कारयिषति। अपुस्कुरत्। इत्यादि बोध्यं। तु व्यजाती
यापि [illegible] च ज्ञापकं। तेनावर्णपरे हल्येव स्थानिवत्त्वं। तेनान्विकीर्तदित्यादौ नातिप्रसंग इति [illegible] भाष्ये स्थितं। यत्तु काशिकायां सर्वेमासिद्ध
मिति सूत्रे वहे [illegible] निर्दिष्टं। तत्र चड्डि ओ जठरि सुदाहृत्य तिनं तत्स्य तु ओजिठ द्वित्वे कृते। तत्रैवभ्यासे पिणौ इतस्य टिलोपस्य स्थानि-
वदिति व्याख्यातं तदुभयं भाष्यविरोधादुपेक्ष्यं॥ अन्विकीर्तदित्यस्य सिद्धये अवर्णपरभ्यासाक्षरविषयकमेव ज्ञापकमिति भाष्ये एव स्पष्टं
प्रकृतसूत्रप्रत्याख्यानपरे [illegible] वार्त्तिके अभ्यासिरूपदोषो ज्ञापनपरेण ओदेदादेशस्य न्युडुतुरुगरी इत्यादि भाष्येणचायमर्थो लभ्यते

॥ शां० कौ०

॥२३॥

इत्यनुपदमेव स्फुटीकरिष्यते॥ अत एव रुरुष्किका शुष्कजंघा च क्षोमिमानो जिघत्तथेति वैयाघ्रपद्यवा[illegible]र्त्तिके जि शब्द एव पठ्यते जशब्दपा
ठस्तु काचित्कः प्रामादिक एवेति बोपदेवो दुर्गसिंहादिसंमतिप्रदर्शनपूर्वकं कामधेनौ व्यवस्थापितवान्। वैयाघ्रपद्यवार्त्तिकं तु पूर्वत्रा
सिद्धमिति सूत्रस्य प्रयोजनसंग्रहपरमिति तत्रैव व्याख्यास्यामः। एवं चाकपदे लक्षणे चेयस्य चङि सणि च द्वित्वेनाचिकद्वित्वे सूयं
नत्वा च कदिति। न चैवमदन्त पाठवैयर्थ्यं स्यादिति वाच्यं। तत्सामर्थ्याद्धलोपस्याप्रवृत्तौ सत्यां वृद्धिपुकोश्च सत्तोरकापयतीति रूपाभ्यु
पगमात्। न चैवं सत्यकयतीति रूपं न स्यादेवेति वाच्यं। सूचि सूत्रि इत्यादिवार्त्तिके सोसूच्यते सोसूत्र्यत इत्यादि भाष्योदाहरणेन पक्षे
ल्लोपाभ्युपगमात्। सूचि सूत्र्यादयो ह्यदन्ता। अत एवानेकाच्कत्वेन षोपदेशत्वाभावान्न षत्वं। षोपदेशलक्षणे हि एकाच्त्वं विवक्षितं इति
माधवीये स्पष्टं। एतच्च सेगादिपर्युदासात् स्वष्क स्विदादि[illegible]साहचर्यात्सोसूच्यते इत्यादि भाष्योदाहरणबलेन निर्णीयते इत्यव
क्ष्यते। एवं वाक्यशेषं समर्थयिष्यामहे प्रार्थनाध्यवसाये। संप्रश्नप्रार्थनेषु लिङ् लोडादि प्रयोगाश्चेष्यमानाः। तदन्तस्य फलमभिसंधा
य अदन्तत्वसार्थक्याय वाल्लोप इत्याह। उक्तं च कामधेनौ। अग्लोपित्वस्थानिवत्त्वं चादन्तत्वप्रयोजनं। यत्र त्वेतेन विद्येते तत्राल्लोपवि
कल्पन इति। कथयत्याभिप्रायेण पूर्वा द्वि। अकथयत्याभिप्रायेण तु उत्तरार्द्धमिति विवेकः। नन्वाचिकदित्यत्र दीर्घो लघोरिति दीर्घप्रसङ्ग
न ग्लोप इति निषेध्येनाकारस्य चरितार्थ इति चेन्न। चङ्परे णौ यदङ्गं तस्य योऽभ्यास इति सूत्रार्थव्यवस्थापनात्। इह त्वं[illegible]गावय
व स्याभ्यासो न तु अङ्गस्येति च णु धातौ माधवग्रंथे स्पष्टं॥ अत एवाटिटदित्यादौ न दीर्घः। यत्तु दीर्घविधौ हलादेरिति विशेषण
कौमुद्यां दत्तं तन्निर्मूलं। और्णनवदित्यादेः सिद्धावपि सन्वल्लघुनीत्यत्र चङ्परे इत्यङ्गस्य विशेषणं लघोर्वेति मतभेदेनेष्यमाणे अ
चिचकासदचचकासदित्यत्राति प्रसक्तेश्च। दीर्घविधौ चङ्परे इत्यस्य लघुविशेषणत्वमाश्रित्याथ सिद्ध कथनवादादितिस

माधेयं। सिद्धांते तु माधवोत्करीत्यादौ गुर्ण्णुनावयत्तेनिचत्वाकः सयत्तेर्दीर्घीभावस्पष्ट एवेति दिक्। एतच्च सूत्रं वार्त्तिककारः प्रत्याचख्यो॥
तथा हि। षष्टे द्वित्वप्रकरणांते विप्रतिषेधः पठ्यते। द्विवचनं यणयवायावाल्लोपोपधालोपणिलोपकिनोरुत्वेभ्य इति।
तथा च दध्यत्रेत्यादौ सावकाशो यण् चयनं चायक इत्यादौ लवनं लावक इत्यादौ चायवायावादयः। गोदः कंबलद इत्यादावाल्लोपः। श्रे
ष्म अग्र इत्यादावुपधालोपः। कारणा हारणेत्यादौ णिलोपः। निपूर्त्त इत्यादावुत्वमेत्येत। निनवबिभिदितुरित्यादौ सावकाशो न द्वित्वे
न पूर्वविप्रतिषेधाद्बाध्यंते। तेन चक्रतुः। चिच्चायतु लुलाव चिचयिथ लुलविथ पपतुः तस्थतुः जग्मतुः जक्षतुः आटिटत् ततु
रिजगुरिरित्यादि सिद्धं। न चैवं निन्यतुरिति न स्यात् इयङ् उवङ् हापरिगणितत्वादिति वेन्न। एरनेकाच इ तियणेह्यभाव्यंदु
ति। प्राग पीयङो ऽप्रवृत्तेः। प्रकल्प्यापवादेति न्यायात्तत्स्या द्विर्वचने चीति सूत्रं विनापि सर्वं सुस्थमिति। भाष्यकारस्तु सूत्र
समाधियते। तथा हि। विप्रतिषेधस्तावदयुक्तः। आल्लोपादीनां नित्यत्वाद्द्वित्वस्यानित्यत्वेनातुल्यबलत्वात्। किं च पूर्वविषेधे स
ति वचनस्यारम्भणीयत्वादि हेतुस्तुतरां तथेति लाघवं। अपि च। क्रियमाणमपि वचनं यदंतरंगाणामपि बाधकं। तर्हि निनव
नीयिषति दिदरिनीयिषतीत्यादावपि अभ्यासे उकारः श्रूयते अर्थांतरंगत्वादवादेशः। वचनं तु नांतरंगाणां बाधकं किं
तु नित्यानामेवेति ब्रूमः। एवमपि चुक्ष्णावयिषतीत्यादौ णिलोपादेः प्रवर्त्तनादभ्यासे इत्वं स्यात्। तथा च तद्बाधनाय उत्वं विधेयं।
तथा च लघोरभ्यासः कर्त्तव्यः। उरत् स्यात्। ओदोदादयुक्तस्य तु हुतुवरादेरिति। अभ्यासस्येति वर्त्तते। ओदोनोरादयुतो
यस्मिन् नेन तस्योऽभ्यासस्य हुतु हुवरादेस्तस्योकारस्य उत्स्यादित्यर्थः। यथा चुक्ष्णावयिषति उदुद्रावयिषति तुता
वयिषति। उर्णुनावयिषति। शुश्रावयिषति पुस्फारयिषतीति। अत्र चि स्फुरोर्णौ इत्यात्वं। यद्यपीह रवयः श्रेषत्वे तेऽरा

प्र॰ कौ॰
२५॥

तु

दित्वे नास्येव। तथाप्यभ्यासस्य स्थाने इति काले स्येवेत्यवधेयं। ओदोदादेन्नास्येति किं। वा यूय एत्रा यो विचाययिषति। रवदस्थे ये चिरवदिषति
दुद्रुसादेः किं। विभावयिषति। अनन्तरस्येति किं। अजुं अणुं अतुं अडुं वारवत् आर्जिजत् आर्णिणत् आर्तितत् अंभ्रिनुत् इत्यत्र परत्वाद्
ह्रोससा टिलोपे सणि च्चे स्पर्धित्वेमा भूत्। अभ्यासस्येति किं। चुडु लित्या दित्त्वे गस्य अतो वा विशेषणं स्यात्। उभयथापि दोषः। नूनी
तल्लुना तीति नूनी तलूसपः तमाख्यातुमिच्छति भूनूनीतल यिषति इत्यत्र तकारस्य न रस्यात् उत्त्वसंगात्। न चैवमप्यो जठ दोचक दिस्या दो
सजातीयापेक्षा हि सिद्धमे पिसापकं। अन्यथा अचिकीतीदित्यत्रापि अभ्यासे ऽकारश्रवणापत्तेः। तस्माद्वार्त्तिकयुक्तावेवचनद्वयमपि
कर्तव्यं स्यादिति स्थितं। तथा ओः पुयणज्जीति तत्तीयमपि कर्तव्यमेव। पिपविषते। यियविषति। जिजावयिषति। यत्र इत्वं पथास्यात्
त्राव्रयोत्तर्णत्वीनात्सनि जिजावयिषति इत्यत्र चुडुतुनूरादेरित्युत्वे प्राप्ते तद्बाधनाय इत्वंवत्। यमेवतथाप्युक्तं क्रम्ये त्यत्र निर्दिष्टा लो
त्रुद्धमिति वाच्यो गुडु पुडु ध्वनो आभ्यां णिजं ताभ्यां चङि सनि अजूगवत् अजूयवत् जुगावयिषति जुयावयिषतीसाध्यसिद्धि
प्रसंगात्। किंच दिदवनीयिषतीत्यत्र चुडुतुनूरादेरित्युत्वं स्यात्। तद्वारणाय वचनान्तरमारब्धेयं। अथ भासन्यतइति सूत्रा नु
कीवध्यानिमुत्वं नेति समाधेयं। एवमपि तनुनूराद्बादाचारक्विबंतादुतुमणो सस्ससति वा यदा सनूतत्रतितं नियिषति तितान
वयिषति इत्यत्राप्युत्वं स्यात्। तद्वारणाय ओदोदादेन्नास्येति वार्त्तिकमन्यथैव व्याख्येयं। तथा हि। अभ्यासस्योत्वविषये

दे ओौ दोदौ ड्रा स्यच थाय थ मवयवादि शो वा योत् तस्य उड्वती ति चुक्षाव यिषती त्य द्यव: पुस्फार यिषती त्यादेरा: तथा चाङ्ग हणमपि
सार्थकं । अन्यथा आ टि ट दित्यादि सिद्धये चङ्परे णौ यदङ्गं तदवयवे लघौ सन्वदिति देशा दाजिज दित्यादावति प्रसंग विरहादङ्ग इति व्यर्थं
स्यादिति दिक् ॥ तथा च सूत्रमत्तापेक्षया वार्त्तिकमतेन महदेव गौरव मिति । स्यादेतत् । मास्तु प्रकृत सूत्रं मा च वार्त्तिकं । ओः पुयण्जि त्येव साप
यिष्यति । अंतरंगं नित्यं च बाधित्वा द्वित्वं स्यादिति ततो द्वित्वे कृते यथाप्राप्तं यणादिकं रिष्यते । मैवं । निनवनीषति दिदवनीषती त्यादि असि
द्धेः । किं च सामान्यापेक्ष ज्ञापकं विशेषापेक्षं वा आद्ये ऽचिकीर्त्तदिति न सिध्येत् । अंत्ये च ऊर्णुनविषत्यादि न सिध्येत् । अत एव वामनोदाहृतमौ
जढदित्येतद्भाष्य विरुद्धमिति बोपदेवोपष्टंभेन प्रपंचितं प्राक् । वस्तुतस्तु वामनोदाहृतं सम्यगेव । यत: । बोपदेव महाग्राहग्रस्तो वामनं दिग्ग
जः । कीर्त्तेरेव प्रसंगेण माध्यं वेन विमोचित: । तथा हि । किं वामनोक्तो वार्त्तिकदूषणपर भाष्यविरोध: । किं वा सजातीयविषयज्ञापक कल्पनाव
प र्णीन भाष्यविरोध: । नाद्य: । नित्यानित्ययोर्विप्रतिषेधानुपपत्तिरिति दिदवनीयिषती त्याद्यसिद्धिरिति च दूषणयो भाष्येनुक्तत्वात् । तया भाष्यं दू
षणांतराणामप्युपलक्षणमिति स्थिते औजढदित्यभ्यासे उकारादेशोपि विधेय: स्यादिति वार्त्तिके दूषणांतरस्यापि दयत्वात् । न देवं वो
र्त्तिकं रचनीयं । आ दो दादेशास्य चुटुतु शरादेरभ्यासस्योत्त्वं नि । तत: अल्लोपवतो णिचोत् । अल्लोपवतोंगस्याभ्यासस्य णिचोत्स्यात् । औज
ढत् । आंचक [illegible] दिति । न द्वितीय: । यत्र द्विरुक्तो अभ्यासोत्तरखंडस्याद्योज्ज वर्णस्त [illegible] त्र स्थानिवदिति फलितोर्थ: । अस्ति च हन्तेरङ्गस्य द्वि भाष्यस
रुक्तौ प्रक्रियादशायामुत्तरत्रावर्ण: । ननु पुन: प्रवृत्तेन टिलोपेनापहारान्नासौ प्रयोगे समवेतीति चेत् । किं तत: । न हि प्रयोगसमवायि
त्वं विशेषणं भाष्ये दत्तं । एवं च तु नाव यिषतीत्यादौ द्वित्व प्रवृत्ति वेलायामवर्णाभावेपि पश्चाज्ज्ञविनं तमा [illegible] श्रिय था [illegible] स्थानिवद्भाव: त
था हतेरङ्गस्य पश्चात्तद्विरहेपि । अभ्यजीगपदित्यत्र तु स्थानिवद्भावे सति अजादित्वाणिच एव द्वित्वं स्यात्तथा चोद्वित्वप्रवृत्तिवे न
लायां नापि पश्चादवर्णपरत्वे स्यचिकीर्त्तदित्यादौ विवन स्थानिवद्भाव: । एवं च उवर्णस्थानिकस्येव स्थानिवद्भाव इति दुराग्रहो नि

529

म्रृलएव। अतएवल्लोपः पिबतेरिति सूत्रे अपीप्यदित्यत्र पिबतेर्णौ पुकि चङि उपधाल्लोपे च तस्य स्थानिवत्त्वात्साधु शब्द इति । कि भिति
वृत्तिग्रन्थोपि संगच्छते। एवं चाचकदित्येव साधु न त्वचिकदिति। अंकापयति अचीकपदित्यादि तु दूरापास्तं। अल्लोपस्य दुर्वारत्वा
त्। अकारोच्चारणं तु अभ्यासे ऽकारश्रुत्यादिनाचरितार्थं। यदप्यल्लोपि स्थानिवत्त्वं चेत्याद्युक्तं तदपि न। चिंत्तेरिदित्करणेन
चुरिविग्रहणं इत्येतत्सूत्रस्य भाष्येण च णिज्विकल्पस्य सुस्पष्टतया अल्लोपविकल्पस्य निर्मूलत्वात् । णिज्भावपक्षे हि अनेकाच्त्व
स्यान्यस्यासाध्यात्तोरंतोदात्तप्रसरसा वाकार। वृत्त्यर्थः। अंक्यादित्सादौ न लोप प्रतिबंधो विफलमिति दिक् । न चैवमप्योजढदित्य
भ्यासे उकारश्रूयेत। पूर्वत्रासिद्धीयमद्विर्वचने इत्युक्तेरिति वाच्यं। उभौ साभ्यासस्येति तदनित्यत्वज्ञापनात्। यत्तु पदद्विर्वचनं तदि
ति बोपदेवस्तन्न। सुप्तिङ्गिर्दिष्टर्पिदित्यत्र सूत्रेषु पिभृतो द्विरुच्यते इति वार्तिकेण तत्र भाष्येण च सह विरोधात्। अतएवाभ्यासे उकारं दृष्ट्वा गौर
व्यादयआहुः। एवं च वेयाश्रपयावार्तिके ओजढदिति पाठस्य प्रामादिकत्वकल्पनमेव प्रामाणिकं। न हि शब्दपाठस्तु क्वचिन्नानिर्वाह्यः।
यत्त्वदंते पुनुन्न स्यात्तो माभवानूनिनदिति अभ्यासे इकारश्रवणं तदपि लिपिप्रमादप्रयुक्तं। अन्यथा कृत संगृहीत्रस्यत्रस्योक्तेन समं
विरोधापत्तेः। तस्मादूननदित्येव धातुवृत्तिसंप्रदायिकः पाठः। एवं चेह भाष्यवार्तिकयोर्विरोधएवेति स्थिते सरस्वतीकं
ठाभरणादिग्रंथाश्च निर्बाध्याएवेत्यवधेयं। यत्तु स्तौतिण्योरिति सूत्रे सिषेचयिषतीत्यत्र सिचेर्हेतुमण्णौ गुणे सनि इट्गुणा
यादेशयोः कृतयोर्गुणस्य स्थानिवद्भावात्सिचशब्दस्य द्वित्वमिति न्यासकारेणोक्तं। तन्नृत्तरखंडे अकाराभावेन भाष्य
विरुद्धं। स्थानिवद्भावं विनाप्यभिमतरूपसिद्धेर्निष्फलं चेत्युपेक्ष्यं। एतेन ओजढदित्यादिसिद्धये सामान्यापेक्षत्वं ज्ञापक वद
न्नन्यचीकीर्तदित्यादिसिद्धये चानित्यतां शरणीकुर्वन्हरदेवोपप्रत्युक्तः। इति श्रीशब्दकौस्तुभे प्रथमाध्यायस्य प्रथमे पादे

द्वीप्य

श्री

॥ श्रीगणेशाय नमः ॥ श्री ॥ अदर्शनं लोपः । स्थानेद्दस्यानुवर्त्तते ॥ तदर्थश्च प्रसंग इति ॥ प्रसक्तस्यानुच्चारणं लोपसंज्ञं स्यात् ॥ संप्रदेशाः लोपो व्योर्वलि
स्यादयः ॥ अर्थस्यैषा संज्ञा न तु शब्दस्य महासंज्ञाकरणसामर्थ्यात् ॥ नन्वेवं प्रदेशेष्वेव लोपने लोप इति लौकिकार्थो ग्रहीष्यते ॥ पश्चौअपस्यंदेवदत्तेतिवत् ॥ त
त्किं संज्ञयेति चेन्न । अप्रसक्तस्य तस्यैवं रूपविशेषलाभाय सूत्रारंभात् ॥ अन्यथा दधिमधि इत्यादौ नुगागमप्रसंगात् ॥ अस्ति हि तत्र इकोऽदर्शनं । तत्र च लोप इति प्रत्यय
लक्षणापत्तेः । ननु चैवं वार्त्तिकमते भाष्यमते तु प्रत्ययलक्षणसूत्रं नियमार्थं । तत्कथं ध्यादौ तु कुप्रसंगः ॥ स्थानिवत्सूत्रं [illegible] प्रवर्त्तयति । षष्ठीग्रहणस्य त
त्रानुवर्त्त्यत्वात् । अत एव ग्रामणीरित्यादौ अणः कार्यं न भवति । तथा च भाष्यरीत्या संहितावसानयोर्लोकसिद्धत्वादिति वक्ष्यमाणन्यायेनेदमपि सूत्रमास्त्विति
चेन्न । घटं करोति ग्राममित्यादौ लस्य लोपइति पंचम्यापत्तेः । अग्निमीलइत्यादौ न्यादिर्लोप इति निघातप्रतिषेधापत्तेश्च । आद्ये तु सूत्रे तत्र शास्त्रतो लोक
तो वा लोपप्रत्यादीनां वा प्रसक्तत्वान्नोक्तदोषः ॥ ननु वार्त्तिकमते प्रसक्तस्यैव लोपे ग्रामणीरित्यत्र वृद्धिः स्यात् । कर्मण्यणः प्रसंगत्वादिति चेन्न । ना स्वरूपन्याये
न पक्षेऽण संभवेऽपि क्विप्पक्षे तेनाणः प्रसंगस्य बाधितत्वात् । वैकल्पिकयोरेकानुष्ठाने तस्मिन्नप्रयोगे इतरानुष्ठापकशास्त्रप्रामाण्यस्य शास्त्रसिद्धत्वात् । सं
प्रत्ययस्य लुक्श्लुलुपः । अनेकसंज्ञाकरणसामर्थ्यात् भाष्याद्यप्रियत्वात् अन्यत्राबिनसंश्लेह विज्ञायते । लुक् श्लु लुप् शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्सं
ज्ञं स्यात् । संज्ञाप्रदेशा लुक् तद्धितलुकि जुहोत्यादिभ्यः श्लुः जनपदे लुप् इति ॥ विधिप्रदेशेषु भाविसंज्ञानां नान्योन्याश्रयः । विशेषविहितानामप्ये
तां संज्ञा लोपसंज्ञां न बाधते । एकसंज्ञाधिकारादन्यत्र संज्ञानां बाध्यबाधकभावो नास्तीति कडारसूत्रे वक्ष्यमाणत्वात् । प्रत्ययस्येति शुक्लमकर्त्तौ
न चैवं लुक् तद्धितलुकीति विधीयमानमदर्शनं गोस्त्रियोरित्युक्ते गोशब्दस्यापि स्यादिति वाच्यं । गोरुपसर्जनस्येति योगविभागस्य । स्त्रियाः ॥ लुक् त
द्धितलुकीति सूत्रे स्त्रीग्रहणस्यानुवर्त्तनसंभवात् । अन्यथा प्रत्ययग्रहणे इहैव पिंगमेदोर्लुक् स्यात् । कंसीयपरशव्ययोर्यञ् ओ लुक् चेति लुगपि प्रसज्येत न भ
विष्यति । ङ्याप्प्रातिपदिकादित्यधिकारात्प्रातिपदिकावयवस्य लुग्विधानात् । एतेनापि हि प्रत्ययग्रहणेन कमेः सः कंसः परान्शृणातीति परशुरित्युकारसका

ते

स्ये

के

य

॥ मू॰ कौ॰ ॥ १

॥ १ ॥

त्योर्लुक्प्राप्तः सचमेव परिहार्यः। नचैवं यञञ्योरिव लुगस्तु विधानसामर्थ्याद्यञञोर्लुकां विकल्पः। वेत्यनुक्तिस्तु यञञ्भ्यां कृते औत्सर्गिकस्य श्रवणं माभूदि
त्येवमर्थमिति वाच्यं। यञञोर्लुकामेककालप्रवृत्तीनामदृष्टविधेयभावासंभवात् ... घकालतनेष्विति अनद्यतने लङिति च ज्ञापकाद्वाक्यभे
दमाश्रित्य घकालतनेषु विधीयते॥ तस्मात्प्रत्ययग्रहणं न कर्तव्यं॥ स्थानिविद्भावसर्वमेतदर्थमपि न। तथाहि। अत्रिभृगुकुत्सेत्यत्र तावद्यस्कादिभ्यो गोत्र
इत्यतो गोत्र इत्यनुवर्तते। तेन अत्र्यादिभ्यो गोत्रे यो विहितस्तस्य लुक् सिद्धः॥ जनपदे लुबित्यत्र लुब्ग्रहणात्प्रातिपदिकात्प्रत्यय इत्यनुवृत्तेः॥ जनपदे विहितस्य चा
तुरर्थिकस्य प्रत्ययस्य लुप्। लवणाल्लुगित्यत्र प्रकृतत्वाल्लुक एव। सर्वथापीह प्रत्ययद्वन्द्वस्य षष्ठी कल्पयिष्यते तस्मादित्युत्तरस्येति। स्यादेतत्। सर्वादेशा
र्थं प्रत्ययग्रहणं। तेन यञञोऽप्रव सुपो धातुप्रातिपदिकयोरित्यादिषु यत्रानेकाल्प्रत्ययस्तत्राऽलोऽन्त्यस्येति न भवति। तथा लवणाल्लुगित्यादावादेः परस्य
ति न भवतीति मैवं॥ ज्ञापकादेव सर्वादेशत्वसिद्धेः॥ यो लोपो हलि टिवेत्ति हि लोपे प्रवृत्ते लुग्वा दुहदिहेति लुग्ग्रहणं ज्ञापयति लुगादेशः सर्वादेश इति।
अलोऽन्त्यस्य तस्य दर्शनप्रसङ्गेन लोपे नापि सिद्धम्। न चैवं परीत्यापत्तिः॥ असंजातविरोधित्वेन लोपे अलोऽन्त्यपरिभाषाप्रवृत्तेः॥ सामान्येन लुग्विषये ज्ञापकेन
लुङ्मात्रविषयमिति सर्वं सिद्धम्। स्यादेतत्। आगस्त्यकौण्डिन्ययोरित्यत्र लुगागिन्नोरित्यतो लुग्ग्रहणमनुवर्तते न वा॥ आदिस्थाने नोक्तौ आदेशस्तु लुकः स
हः अयद्वितीये षष्ठ्या यथासंख्याभावे एकैकस्य त्रय आदेशाः पर्यायेण स्युः। तत्रश्चागस्तयोपि कुण्डिनास्यः कुण्डिनाश्चागस्तयः स्युः। लुक् क्रियमाणो ज्ञा
पकात्सर्वादेश इति उभयत्रापि विभक्तिमात्रं श्रूयेत। अथानिरुक्तं तत्तोऽगस्तयः कुण्डिना इत्यत्र न कश्चिद्दोषः॥ किंतु अगस्तीनां छात्रा आगस्तीया इत्यत्र प्रा
ग्दीव्यतीये अणोऽप्रत्यये विवक्षिते अगस्त्यादेशस्य ... भावादनिरुक्तावरुद्धत्वाच्छो न स्यात्। प्रत्ययग्रहणे सति लुक्लुग्ग्रहणानुवृत्त्या आ
गस्त्यकौण्डिन्ययोः प्रत्ययांशस्य लुग्भवति। अवशिष्टस्य भागयोर्यथासंख्यं अगस्तिकुण्डिनचौ। तेनागस्तयः कुण्डिना इति सिद्धम्। प्राग्दीव्यतीये अणोऽप्रत्य
ये ... विवक्षिते तु गोत्रे लुगन्यत्रेति लुक्प्रतिषिद्धः ततः सान्नियोगशिष्टत्वादगस्त्यादेशोऽपि निरस्तः। अगस्त्यशब्दाद्वृद्धाच्छे सूर्यतिष्य ... यलोपे चाम

छेद्ये

लु

त्तीयादिति सिध्यति॥ कौण्डिन्ये तु नास्ति विशेषः। निवृत्तेपि कुण्डिनजादेशे कौण्डिन्यशब्दादपि वृद्धादिभ्यो गोत्रे इञिति सति आपत्यस्येति यलोपे कौण्डिनाङ् इत्येव ल

भवितव्यं। तस्मादागस्त्यकौण्डिन्ययोरित्यत्रावश्यमनुवर्त्यं लुग्ग्रहणं। ततश्चेह प्रत्ययग्रहणमपि कर्तव्यमेवेति। मैवं। आगस्त्यकौण्डिन्ययोरित्यत्र

यस्कादिभ्यो गोत्र इति गोत्रग्रहणमनुवर्त्य गोत्रे यो विहितस्तस्य लुगित्यर्थ इति व्याख्यानेनापीष्टसिद्धेः। तस्मात्प्रत्ययग्रहणमिह मास्त्विति स्थि

तं। स्यादेतत्। एवं सति लोपसंज्ञया सह लुगादिसंज्ञानां तुल्यव्यक्तिकत्वं स्यात्। तद्भावितस्य संज्ञेति चेदविशेषाल्लोपेपि तथा स्या

त्। उच्यते। असंजातविरोधित्वाल्लोपसंज्ञा तावददर्शनमात्रस्य भवति लुगादिसंज्ञा परमनेकसंज्ञाप्रणयनसामर्थ्यात्तद्भा

वितग्रहः। तेन संज्ञासंकरो नेत्युक्तं। सति तु संकरे हन्तीति शपो लुकि श्लौ विति द्वित्वं स्यात्। जुहोतीत्यत्र श्लौ सति लोपे वृद्धिः लुकि हलीति

वृद्धिः स्यात्। न चात्र भाष्यस्तस्य नेत्यनुवृत्तेर्योयोतिनो नोतीत्यादाविव द्विर्न भविष्यतीति वाच्यं। संज्ञासंकरपक्षे तदनुवृत्त्यसं

भवात्। अन्यथा सूत्रस्य निर्विषयतापत्तेः॥ नेयोसिद्धौ तत्स्थादिरवकाशः संज्ञासंकरेणापि द्वित्वस्य दुर्वारत्वात्। लोपसंज्ञा तु लु

गादिसंज्ञानां व्यापिकेत्युक्तं। तेन पंचेत्यादौ प्रत्ययलक्षणं सिध्यतीति दिक्। भाष्यमते तु यद्यपि स्थानिवत्सूत्रेण पंचेत्यादिसिद्धिस्तथा

पि सुदृषद्ब्राह्मणादित्यत्र वक्ष्यमाणरीत्या उत्तरपदाद्युदात्तत्वस्योपधादीर्घस्य च वारणाय लोपे सति प्रत्ययलक्षणं ऽवेति नियमो व

॥ऋ०कौ०९
॥२॥

ष्ठ्यं प्रवर्तनीयः। तथा च तत्र लुकः प्रत्ययसंज्ञाप्यादर्त्तव्येत्यवधेयं। प्रत्ययलोपे प्रत्ययलक्षणं। प्रत्यये लुप्तेपि तदाश्रयं कार्यं स्यात्। अल्विध्यर्थ
मिति वार्त्तिकं। तथाहि। अतृणेडित्यत्र तिपो हल्ङ्यादिलोपे कृते तृणह इमिति सूत्रेणाविधीयमानो हल्ङ्यादिलोपेपि सार्वधातुकनिमित्त इमागमो
ऽस्माद्वचनाद्भवति। स्थानिवत्सूत्रेण तु न सिध्यति। अल्विधित्वात्। नन्वेवं प्रत्ययलक्षणमपि न स्यात्। वर्णाश्रयेनास्ति प्रत्ययलक्ष
णमिति निषेधादिति चेन्न। न ह्येवं स्पष्टं वचनमस्ति किंतु प्रवृत्तसूत्रे प्रत्ययलोपेन तल्लक्षणमित्येवास्तु। यद्वा तल्लक्षणमित्यपि मास्तु स्था
निवदित्यनुवृत्त्यैवेष्टसिद्धेः। एवं सति प्रत्ययलक्षणमित्यस्य कः फलं तत्संपद्यते। पुनः प्रत्ययग्रहणसामर्थ्याद्धि यत्कार्यं प्रतिप्रत्ययस्यासा
धारणं रूपं निमित्तत्वयाऽऽश्रीयते सत्त्वातिष्ठाद्द्रितदेव भवतीति लभ्यते। तेन गवे हितं गोहितमित्यत्रादेशो न भवति। तद्धि धावचूत्वमा
त्राश्रयणात्। तस्य च प्रत्ययाप्रत्ययसाधारण्यात्। अथात्र न लुमतेति निषेधस्तर्हि स्नःयशाइत्यत्र विसर्जनीयस्य सः स्यात्॥
सः वृडित्यादौ रविस्त्वेति च र्वे स्यादिति दिक्। इमागमे तु हल्ङ्यादौ सार्वधातुकं इति प्रत्यय एव प्राधान्येनाश्रीयते इति वैषम्यं। तस्मा
द्वर्णप्राधान्ये प्रत्ययलक्षणं नास्ति। प्रत्ययप्राधान्ये त्वस्तीति विवेकः। अनेनैव न्यायेन न धातुलोप इत्यत्र धातुलोप इति बहु
व्रीहिणैव सिद्धे आर्धधातुकग्रहणसामर्थ्यात्तत्वेन निमित्तता लभ्यते। तेन घिन्विकृण्व्योर्वि च लोपो व्योरिति वलोपस्य

वलितत्वात्तत्रार्धधातुकत्वयाविचो निमित्तत्वाभावाद्गुणो भवत्येव। तेन स्कधे स्कधेनौ स्कधेनः स्कः स्कणौ स्कणइत्यादि भवति। परंति

चा स्कधेस्कधेवारिव धात्स्कराणां स्कारणे ला घवतश्वरामः। विशेषणे हेयुइद्गुदिकर्तुवेदद्धी लिसद्दिके पटीयइति। न च तोतोर्तीत्यादि

व्याहत्या आर्धधातुकग्रहणसामर्थ्यं क्याल्कथं सामर्थ्यमिति वाच्यं। यङ्लुकश्छांदसत्वात् भाषाविषयत्वपक्षे आर्धधातुकग्रहण

मावश्यसामर्थ्यमुपपादनीयं। नन्वेवं तत्क्ङितिचेतस्सूत्रस्थभाष्येण सह विरुद्धं। पूर्वस्मिन् योगे यदार्धधातुकग्रहणं तदनवकाशमिति तत्रो

क्तत्वादिति चेन्न। अनास्था यतथोक्तत्वादित्याहुः। तदपरंभे नाग्रविजे वानभिमतइत्येव किं न स्यादिति चिंत्यं। किंपितु उद्गते न धिनूः धि

धन्वो धिन्वः ऋणूः ऋतो ऋणवइति भवति। स्कधी स्कधेनौ। स्कधिनः। स्कफीः स्कहणौ स्कहणइत्यादि तु न भवत्येवेत्याहुः। यङ्लुकौ

भाषाविषयत्वे आर्धधातुकग्रहणस्य तोतोर्तीत्यत्र चारितार्थ्यादक्तेचमानाभावात्तद्गुणनिषेधप्रवृत्त्या स्कधी स्कधिना विश्येवा

स्त्व। न चानुनासिकस्य क्विझलोः क्ङितीति दीर्घः शूं क्यः। इन्नादीनामुपधायाः शुविवेति वक्ष्यमाणत्वात्। दीर्घग्रहणमात्रेण पेवगतिः।

तदुक्तं दीर्घविधेरुपधानियमान्नेति सूत्रे णोलेस्तु दीर्घस्कीः स्कफीणौ स्ककणइत्यादि भवतीत्यपि चिंत्यं। नन्वेवं परिवीरित्यत्र तु

कुदीर्घपर्यायेण स्यात्। अनेनैवोभयविधानेपो रपिपर्याभावेन विप्रतिषेधे परमित्यस्याप्रवृत्तेः। सत्यं। शास्त्रीयातिदेशु [illegible]

॥मू०कौ०९

॥३॥

स्येय

स्यव्यपदेशस्य वाश्रयणाद्दोषः। यद्वा सति प्र कार्यं भवितुमर्हति तदेवातिदिश्यत इति परिवीये साद्यविवपरि वैरित्यत्रापि दीर्घोऽत्र भवति न तु गीति
कार्योतिदेशोप्यदोषः। भाष्यकारस्त्वाहुः। तृणह इत्यर्थं तावन्नेदं सूत्रं स्थानिवत्सूत्रेणैव गतार्थत्वात्। न चाल्विधिरयं हली सस्य निवर्तना
त्। मन्येवं तृणह्यानीत्यत्रापि अमुस्यादिति वाच्यं। नाभ्यस्तस्याचीत्यतोऽचिनेत्यनुवर्तनात्। नाप्या। शीरित्रशासदुहङ्गहलोरित्वार्थाम
द्। आशासः क्वावुपसंख्यानेनैव सिद्धेः तद्धित्वयापि वाच्यं। शासदुहङ्गहलोरित्यत्र शासिमात्रस्य ग्रहणमिति पक्षे नियमार्थश्चाशासः क्वा
वेव यथा स्यात्। आशास्ते इत्यादौ; नाभूदिति। यस्माच्छासेरङ् विहितः तस्य आङ्शाह्व चर्यादित्वविधौ ग्रहणमिति पक्षे तु यथा आशास्ते
दूत्यादौ न भवति तथा क्विप्यपि न स्थानिवदिति विध्यर्थं। तस्मात्प्रत्ययलक्षणमेवेति नियमार्थमिदं सूत्रं प्रत्ययाप्रत्ययसाधारणं
रूपमाश्रित्य यत्कार्यं विधीयते तन्निवृत्तिः फलं। तेन शोभना दृषदोऽस्य प्रासादस्य सुदृषत्। अत्र सोमं नयती अल्लोमोषसी इति सू
त्रेण सशब्दात् सुरमन्नं तस्य असंतस्य योत्तरपदस्य बहुव्रीहौ विधीमानमायकदात त्वं न भवति। अत्र हि लुकोपि असिस्थानिवद्भा
वेन असंतमुत्तरपदमस्त्येव। किंतु असङ् इति रूपं प्रत्ययाप्रत्ययसाधारणं। अनेनास्मिन् ग्रहणान्यर्थवत्ता चानर्थकेन च तदंतदि
त्थं प्रयोजयंतीति वक्ष्यमाणत्वात्। अतो नियमेनाध्याहार्त व्याहारतिः सिद्धा। तथा च नञ्सुभ्यामित्येतोदात्तं पदं भवति।

536

वे
ये

इदं त्ववधेयं। न केवलं स्वरार्थमेवेदं सूत्रं किंतु उक्तोदाहरणेऽवप्राप्नुवन्नत्वसंतत्वस्यैकरूपधारी यो पि उक्तनियमेनैव व्यावर्त्त्यः। वा
र्तिकमतेतु उक्तस्वरस्य दीर्घव्यावृत्तेश्च सिद्ध्यै उपायांतरमन्वेषणीयमिति। ननु यदि नियमार्थं सूत्रं तर्हि पंचेत्यत्र प्रत्यय
लक्षणेन पदत्वमिति वृत्तिः कथं योऽयाऽयं समासस्य प्रातिपदिकत्वं स्नुक्रमोरिती उभयप्राप्तौ कर्मणीति कर्मणि प्राप
र्द्दृश्याद्योपि तत्र तत्राभिकलग्रंथाः कथं योऽयादृत्तिअन्योच्यते। योऽस्माकं नियमविधिः समीमांसकरीत्या परिसं
ख्याविधिरिति तावत्स्वच्छंदविचरणादौ। तत्र दोषत्रयं स्वार्थहानिः परार्थपरिकल्पना प्राप्तबाधश्चेति। यश्च यद्यग
त्या सत्यते इति पक्षस्तदा नियमविधेर्निषेधपर्यवार्थः प्रत्ययलक्षणशब्देन तद्विधानं लक्ष्यते भवतीत्यनेन तु न
भवति। तथाच स्थानेंतरतमसूत्रे भाष्ये। नानेनांतरतमानिर्वर्त्यंते। अपितु अनंतरमानि वर्त्यंत इति। अतएव
वार्त्तिककारो वक्ष्यति। उभयप्राप्तौ कर्मणीति प्रतिषेधे काद्रिप्रयोगेऽप्रतिषेध इति। अस्मिन्पक्षे उभयप्रा
प्तावितिपरिशेषितान्ब ष्ठीत्यादिक्रमेण व्याख्येयं न तु विहितेति। यदि तु दोषत्रयगौरवपरिहारार्थं प्रत्ययलक्षण
सूत्रे यथाश्रुतं व्याख्याय अतऽवज्ञापकात्स्थानिवत्सूत्रस्य प्रत्ययलोपेतरविषयता कल्प्यते। सामान्यपु

537

शृ-कौ-९
११४॥

रस्कारप्रवृत्तस्य शास्त्रस्य विशेषितार्थेहि त्वयापि कल्प्यमेव। अन्यथा विकल्पापत्तेः। भाट्टमतेन तोपशेषं करोतीत्यत्र यथा पदे जुहोतीत्यादिविधिभिराहवनीयविधेरिव विशेषविधिना सामान्यविधेः संकोचसंभवात्। न चैवं सामान्यस्य विशेषेषु उपसंहारापत्तिः॥ सामान्यशास्त्रप्रणयनवैयर्थ्यापत्तेः। वेदे तु न कश्चित्प्रणेतायेनैवं पर्यनुयुज्येतेति चतुर्थाकरणस्याग्नेये उपसंहारो मीमांसायामभ्युपेतः। कल्पसूत्रकारैस्तु तत्रापि विकल्प एव॥ तथा च भगवता कात्यायनेन सूत्रितं। अविशेषाद्वुभौ चेति। एवं च सामान्यशास्त्रस्य विशेषलक्षणया उभयवाच्यतायैवोपपत्तौ दोषत्रयं न सोढव्यमिति पक्षस्तदाउदाहृतग्रंथाः सम्यगेव। नैयायिकमते तु तात्पर्यसंकोचस्य स्थले लक्षणा नास्त्येवेति निर्विवादं। विशेषधर्मप्रकारकबोधस्यौद्देश्यतायामेतदभ्युपगमात्। सामान्यप्रकारस्य विशेषविशेष्यकस्यापि लक्षणां विनैवोहादिति स्फुटीभि
दनि
राकलनीयं। नक्लुमतागस्य। लुमताशब्देन प्रत्ययस्य लोपे सति प्रत्ययलक्षणमेग कार्यं न स्यात्। वार्त्तिकमते पूर्वसूत्रप्राप्तस्यायं निषेधः। भाष्यमते तु स्थानिवत्सूत्रप्राप्तस्य। नियमविधीनां तात्पर्यसंकोचकत्वमात्रं न तु निषेधकत्वमिति प्रागुक्तरीत्या तु भाष्यमतेऽपि पूर्वसूत्रप्राप्तस्यायं निषेध इत्यवधेयं। एवमग्रेऽपि। गर्गाः। मृष्टः। जुहुतः।

ट्

तथा। जिगमिषेत्यत्र गमेरिट् परस्मैपदेष्विति दीर्घो न स्यात्। तथा विरंसेत्यत्र नरभ्यश्च तुर्भ्य इतीडन विधो न स्यात्॥

इहयन्त्रश्रापोल्लिमताल्लस्त्योरंगस्य गुणवृद्धी न भवतः। लुमतेति किं। कार्यते। इत्यत्र णिटीति णिलोपे कृते णिजपेक्षा वृद्धिर्भवत्येव। अमार्ट। मृजस्योदिलो (इ.)
पेनि लस्त्रात्कृतेपि वृद्धिः। अंगस्येति किं। पंचसप्त। अत्रांगस्येति स्वर्यते॥ तेनांगाधिकारो गृह्यते स्वरितेनाधिकार इति वचनादिति वार्तिकका (से)
राः। भाष्ये तु दूदद्दूषितं। तथाहि। उवंसत (उ) क्रमेस्त्वात्तोहेरिति हेर्लुकि कृतेपि क्रमः परस्मैपदेष्विति दीर्घो न स्यात्। तस्मान्न लुमतेत्यत्रांगा
चे धिकारः प्रतिनिर्दिश्यते॥ किं तु लुमताल्लुप्तेमत्वयेयदंगं तस्य आगमनांगं च सर्वं प्रतिषिध्यत इति। नैवमत्र दोषस्तादवस्थ्यमिति वाच्यं। उ
पृ क्रमेस्त्वत्र लुप्तं परस्मैपदं तदपेक्ष यायदंगं तेनं न तस्य दीर्घो विधीयते किं तु क्रमेः स तु शपं प्रसंगेन तु लुप्तं प्रतीति निषेधाप्रवृत्तो प्रत्ययलक्षणे
न दीर्घप्रवृत्तेः। एवं जिगमिषविरंसेत्यत्रापिद्रष्टो विधिप्रतिषेधो भवत एव। तो हि लुमताल्लुप्ते परस्मैपदे यदंगं सन्नंतं (त) स्य न क्रियेते किं तु
सकारादेः प्रत्ययस्य। स चागं नेति स्पष्टमेवास्यादेतत्। पक्षद्वयेपि ञ्निस्वारान्निसां। कित्तः। पथिमथोः सर्वनामस्थाने इति त्रिसूत्र्या वर्धमा
नोः स्वराः लुकि कृतेपि प्राप्नुवंति। तथाहि। गर्गाः विदाः। पञ्चो लुक्। उष्ट्रग्रीवाः। इवेपतिकृत्ताविति कनो देव पथादिभ्यश्चेति लुप्त तो ञ्निस्वा
दिरिस्वा कवत्तता प्राप्नोति। तथात्रयः इतः श्यानि जइतिङको अञ्जिभ्रगुकुलेव सिद्धगोलमंगिरोभ्यश्चेतिलुक्। ततः लुप्ते स्वेतिउ कित्त
दात्तो भवतीर्षतोदात्त तापाम्नोति सहिप्रत्ययग्रहणे तदंते ग्रहणात् वृद्धिर्ना स्वस्या विधीयते। न च सिद्धांते पिञ्निस्वरेणांतोदात्ततया भाव्यमे

॥ स०कौ० ९
११५४

पू

[illegible] त्रिप्रत्यये तस्य पित्वेनानुदात्तत्वादाद्युदात्तोऽत्रिशब्दः। तथा च प्रयुज्य
वेति वाच्यं। राशदिभ्यां त्रिप् अदेस्त्रिनिश्चेत्यूणादिसूत्रेणाहि अदेश्च कारानुबन्धे त्रिप्रत्यये तस्य पित्वेनानुदात्तत्वादाद्युदात्तोऽत्रिशब्दः। तथा च प्रयुज्य
ते। अत्रेरिव शृणुतं पूर्व्यस्तुतिं॥ यथा गोरत्रेः कर्माणि स्व एव तदिति। तथा टके [illegible] लुक्यथाद्युदात्तत्वं प्रयुज्यते। अत्रीणां स्तोमम द्रिव इति
अत्रीणां शृतं हवमिति च। त्रिनिप्रत्ययान्तस्य अंतोदात्तो नकारान्तश्चेत्यन्यदेतत्। सोऽपि प्रयुज्यते। दूरे पाये अंतिवाके चिदत्रिणइति। तथा पंथाः
प्रियो यस्य स पथिप्रियः सपो धातु इति सोर्लुकि पथिमथोः सर्वनामस्थाने दूत्याद्युदात्तता प्राप्नोति। न त्वेषा त्र सूत्री अंगाधिकारस्था
येन नलु मतेति निषेधः प्रवर्तेत। नाण्येतदुक्तं तोगकार्यो सकृदिडंत मिति पदसंज्ञावदुक्तस्वराणां प्रत्ययांत कार्यत्वात्। नन्वस्तु कि तदिति तथा
इत्तस्तुद्वयं ञ्नीति सर्वनामस्थान इति सप्तमी निर्दिष्टाद्युक्ता तोंऽगस्य कार्यं भवत्येवेति चेन्न। ञ्निदंतस्यादेरित्यादिक्रमेण प्रत्ययांतस्येव ति
तद्विधानात्। सोवर्यः सप्तम्यस्तदंतस प्तम्यइति सिद्धांतात्। इलश्च भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्यया स्वर्वं पितीपूर्वग्रहणेन
ज्ञाप्यत इति तत्रैव भाष्ये स्पष्टं। अत एवोपोत्तमंरितो त्कदात्तत्वं श्सं तस्य स्यात्। तथा च षड्क्शाश्चतुरः करुपर्यंतइत्यादौ चतुर इतिप दा
इमध्योदात्तमिष्यमाणं न सिध्येत् इति वाच्यं। तत्र शसग्रहण सामर्थ्यात्तदंतसप्तमी त्वबाधात्। इत्तरथा हि उडिदंपदाद्युप्रैद्युः चतुर्थ्यइ
सेवक्यात्। [illegible] तत्र त्य सर्वनामस्थानग्रहणानुवृत्तेः शसग्रहणं भविष्यति। षड्चतुर्भ्यो हलादिरिति हिलोपेः सिद्धांते
प्युदात्तविधानात्। न चैवं स्वरविधिषु षष्ठ्येव निर्दिष्टस्यता मिति वाच्यं। रितश्चउ इत्याद्य पेक्षयारिति चडीस्कन्वधर्मा

आहवनीयइत्यादौ रित्तस्योपोत्तमेनी शब्दस्येकारे प्रवर्तते चङ्यन्यतरस्यामिति च चडतस्या न चैवं चतुरः शसीत्यस्य न ते

540

नालाघवसंभवेन सप्तमीप्रयोगात् द्वितीयाऽत्रोच्यते। अंगाधिकारनिर्देशपक्षे तावद्बहुलदोषपरिहाराय वार्त्तिकमारभ्यते। लुमतिप्रतिषेधे एकपदस्वरस्योपसंख्यानं स
र्वामन्त्रितसिज्लुक्स्वरवर्जं प्रयोजनं निनि किलुक्स्वरः

पथिमथोः सर्वनामस्थाने लुकीति। अस्यार्थः लुमतिलुमत्संज्ञया प्रतिपादितेऽदर्शने यः प्रतिषेधस्तस्मिन्नेकपदाश्रयो यः स्व
रस्तस्योपसंख्यानं। प्रत्ययलक्षणेन प्राप्तोप्येकपदस्वरो न भवतीत्यर्थः। पदद्वयाश्रयस्तु स्यादेव। यथा दधि तिष्ठतीत्यत्र पद
स्य पदादित्यधिकृत्य विहितास्तिङ् तिङ इति निघातः। अत्र हि दधीत्यस्य पदसंज्ञार्थं प्रत्ययलक्षणमपेक्ष्यते। तथाद्रुतिष्ठे
त्यादौ तिङ्तत्त्वं लुग्भायामपि। नन्वेवं सर्वस्तोमोऽतिरात्र इत्यत्र सर्वस्य सुपीत्याद्युदात्तत्वं न स्यात्। तथा सर्पिरागच्छ समाग
च्छेत्यामन्त्रितस्य चेति षाष्ठमाद्युदात्तत्वं न स्यात्। तथा माहि दातां माहि धातामित्यत्र आदिः सिचोऽन्यतरस्यामित्याद्यु
दात्तत्वं न स्यादत आह। सर्वे स्वादि द्वंद्वस्वरत्रयं विहाय स्वरान्तरे प्रतिषेध इत्यर्थः। न च सर्वस्तोम इत्यत्र बहुव्रीहौ प्रकृत्या
पूर्वपदमिति पदद्वयस्वरोऽयमिति वाच्यं। सर्वस्य सुपीति यदाद्युदात्तत्वं तस्यैव त्वनेन प्रकृतिभावमात्रं कर्तव्यं। तथा च
तस्माल्लिरवस्योपपादयितव्येति भावात्। न च सर्पिःशब्दस्यामन्त्रितस्वरं विनाप्याद्युदात्तत्वे तौदो लक्ष्युं शक्या। अर्चिशुचिहु

॥ शब्दकौ० ९
॥५५॥

सृपिछादिछर्दिभ्य इसिरित्यौणादिके इसिप्रत्यये कृतेऽन्तोदात्तत्वात्। अव्युत्पत्तिपक्षेऽपि फिट्सूत्रेण तथात्वात्। न च नविषय

स्येत्याद्युदात्तः। अनिसन्तस्येति पर्युदासात्। केचित्तु सर्पिःशब्दस्य घृतादित्वं किमर्थं कल्पितमिति चिन्त्यम्। ननु सप्तशब्दः

सप्पश्भ्यां तुट् चेति कनिन्नन्तो व्युत्पादितः। तथा च नित्त्वादाद्युदात्तः। अव्युत्पत्तिपक्षेऽपि तथैव न्नः संख्याया इति वच

नादिति चेन्न। उभयथापि घृतादित्वेनान्तोदात्तत्वात्। तथा च प्रयुज्यते। सप्त युञ्जन्ति रथमेकचक्रमिति। इट् इसिज्

लुग्ग्रहणमास्तां गातिस्थेति सूत्रे सिज्ग्रहणसामर्थ्याल्लुकि स्वरः सिद्धः। अन्यथा हि लाघवार्थं च्लेरेव लुकं विदध्यात्॥

८ एवं स्वभूपादिस्वादिसिद्धयेऽस्तिसिचोऽपृक्ते इत्यत्र सकारान्तरप्रश्लेषं केचित्तु शोऽपि नाश्रयणीय इति। न चेच्छुर्हिल्कि आत इति सूत्रे

विध्यर्थमेव स्यान्न तु नियमार्थः। तथा च त

नलुङ्निवृत्तये ञ्लिलुकीतिवत् व्यस्यादिति विपरीतगौरवापत्तिरिति
वाच्यं। ङित्तद्भ्यलुट् स्थैव लटो व्युदस्तत्वात्। तस्मात् सर्वामंत्रितस्वरवर्जमित्येवावश्यकं। वार्त्तिकारंभस्य प्रयोजनमाह प्रयोजनमि
ति। तद्धेचं जिनिशब्दयोरिकारउकारणार्थः सूत्रितयोरितिवत्। ऽतिस्वरानिवर्त्तमानस्य प्रयोजनमित्यर्थः। प्रयोजनांतरमा
ह। पथिमथोरिति। तदेवं वचनबलेन त्रिसूत्र्या अतिव्याप्तिरुद्धृतेत्येतीह सूत्रे स्थितं। वस्तुतस्तु नैतदर्थं वचनं क्रियते। ज्ञापक
बलेनैव बिदाः गर्गादिस्यादेः सिद्धत्वात्। तथा च संज्ञायामुपमानमिति सूत्रे वार्त्तिकं। उपमानस्याद्युदात्तवचनं ज्ञापकमनुबंधल
क्षणे स्वरे प्रत्ययलक्षणप्रतिषेधस्येति। अस्मिंश्च पक्षे पथिमथोः सर्वनामस्थाने लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वच
नमेव कर्त्तव्यं। न ह्ययमनुबंधलक्षणः स्वरः। येनोक्तज्ञापकबलेन वार्येत। न च स्वरमात्रविषयकं ज्ञापकमस्त्विति वाच्यं। आमंत्रि
तस्वरसिद्धलुक्स्वरयोरसिद्धिप्रसंगात्। न चैवमपि सप्तमीनिर्दिष्टे स्वरे प्रत्ययलक्षणं न भवतीति ज्ञाप्यतामिति वाच्यं। सर्व य
स्तोमद्वयत्र आद्युदात्तासिद्धिप्रसंगात्। यद्वास्तु सप्तमीनिर्दिष्टविषयकमेव ज्ञापकं। सर्वस्य सुपीत्यत्र तु सुपीति सप्तमीमप
नीय सुपद्धति षष्ठी पाठ्या तथा च पथिस्वरार्थं वचनं नारंभणीयं ज्निविक्स्वरार्थं तु भवतु यथापि नारंभणीयमिति सर्वं सुस्थं। प

॥ग्रा॰ कौ॰ ९
॥७॥

क्षद्वयमपीदं संज्ञायामुपमानमिति सूत्रे भाष्यकारैः स्पष्टमुक्तं । तदयं निर्गलितोऽर्थः । त्रिसूत्र्यां शंकितस्यातिव्याप्तिदोषस्य वचनेनोद्धर
णमापाततः उक्तज्ञापकेनैवेष्टसिद्धिरिति निष्कर्षोऽग्रे स्फुटः इति । एतच्च समाधानमंगाधिकारे निर्दिश्यत इति पक्षद्वये वस्तुतो
अत गस्य यत्कार्यमिति निष्कृष्टपक्षेऽपि तुल्यौ एव संज्ञायामुपमानमिति सूत्रे भाष्यकारैः पक्षद्वयसाधारण्येनैवोक्तज्ञापन
वार्त्तिकं योजितं । प्रकृतसूत्रस्थभाष्यकैयटयोस्तु निष्कृष्टपक्षे उक्तदोषप्रसंग एव नास्तीति लभ्यते तदाशयमभिप्र
काशयन्ति । ज्ञापकं द्विविधं । सामान्यापेक्षं विशेषापेक्षं च । तत्र यदाभीष्ठीत्यत्र पूर्वग्रहणेन यत्र सप्तम्यर्थपक्षे तदंतग्रहण
पक्षे च फलभेदस्तत्र सौवर्यस्सप्तम्यः तदंतसप्तम्य इति ज्ञाप्यते । तथा भीष्ठीत्यत्रैव पूर्वग्रहणाभावे तदंतस्य कार्यित्वेऽप्ययांता
नां ङ्यादीनामुदात्तत्वं इस्य लोपेऽत्र परिभाषया प्रत्ययांत एवोदात्तः । सप्तम्यर्थाश्रयणे तु पितमपहाय ङ्यादीनामेवोदात्तत्वं इस्य
लोपे परिभाषया प्रत्ययांत एवोदात्तः स्यादिति स्पष्टफलभेदः । तदंतस्य हि कार्यित्वे प्रत्ययोरेवोदात्तत्वं । ञ्नित्यादिपूर्वं
स्यापि कार्यित्वे तथैवेति । तथा च तत्र सौवर्यद्वित्यस्याप्रत्ययान्तता कार्यित्वादुक्तदोषस्याप्रसंग एवेति । संज्ञायामुपमा
न इत्यत्र भाष्यकैयटादिग्रंथास्तु सामान्यापेक्षज्ञापकमाश्रित्य योजयितव्या इति । अत्र यद्यप्यत्र तु स्वरो न भवति । लुकि
कृते कार्यिणोऽभावात् । प्रत्ययग्रहणं हि यस्मात्स तस्य कार्यं तदादेरपि भवति । न तु यस्मात्स तस्यैव कार्यं तदादेरपि । न च प्रत्य

यग्रहणपरिभाषया तदन्तग्रहणं स्यादिति वाच्यं। येन विधिरिति सूत्रेणैव तल्लाभस्य वक्ष्यमाणत्वात्। विशेषणविशेष्यभावे
कामचारात्। नन्वेवमपि स्थानिवत्सूत्रेण स्यादित्यो दात्तेनेति चेन्न। लोपस्याभावरूपतया तदीयांतस्य तदुदात्तताया
श्चबाधात्। अत एव हि अभूदित्यादौ लुङ्स्य सिचो नेट्। न ह्यभावस्याभावोऽयवकः संभवति। भाष्यमतेऽनल्विधावि
ति निषेधाच्च। किंचिदादीनां तु नेड्वशीति द्विर्निषेधोऽप्यस्तीति दिक्। वस्त्वन्तोऽयं गमिति व्याख्यानाद्राजपुरुषादि
त्यादावपि निर्बाधं। पसंज्ञायाः निषेधे अल्लोपाभावात्। स्वंत्स्व पर्यन्त पदसंज्ञया न लोपाच्च। न चैवं न र्वाभिन्नो
ऐ स्र संगः तस्यापि लुकापहारादिति। तथा अहर्ददातीत्यत्र रेफोऽपि सिद्धः। असुपीति निषेधो हि वस्त्वन्तोऽङ्गस्य
कार्यमिति नेह प्रवर्तते। अंगाधिकारानिर्दिष्टेऽसुप्रवर्तत्ता सो। अत एवाहोरविधावित्ति वचनमारभ्यते। न चासुपी
ति वचनसामर्थ्यात्प्रत्ययलक्षणेनासुपीति निषेधो नेति वाच्यं। दीर्घाह्नि निदाघ इत्यादौ हल्ङ्यादिलोपे
पि रेफापत्तेः। एतेनासुपीति पर्युदासमाश्रित्याहर्ददातीत्यत्र धातोः सुब्भिन्नस्य सत्त्वाद्रेफ इत्यपि कल्प
हा नमपास्तं। दीर्घो निदाघ इत्यत्रातिप्रसंगात्। यद्यपि रुत्वरत्वयोरसिद्धत्वात्पूर्वं निलोपे कृते उकारस्यैव रु
त्वरत्वे प्राप्नुतस्तथापि रुत्वरत्वयोर्विषयेन लोपो नेष्यते। रुत्वरत्वोभयारंभसामर्थ्यात्। न च संबुद्धौ

॥ग्रं॰को॰ ९८
॥८ ॥

नलोपनिषेधाद्धेअहर्गच्छ हेदीर्घाहो निदाघेत्यत्र चरितार्थता। एवमपिरूपरात्रीतिरूत्वस्य वैयर्थ्यापत्तेः। नत्व कारस्यरोरे
वविशेषोऽस्तीतिदिक्। स्यादेतत्। परमवाचा परमगोदुहा परमलिहा परमदंडिना परमदिपरमकुमार्येत्यत्रांतर्वर्त्तिनी
विभक्तिमाश्रित्यउत्तरखंडस्य [illegible] पदसंज्ञा स्यात्। ततश्चोः कुःदादेर्घातोर्घः होढःनलोपः प्रातिपदिकांतस्येति
वउत्तद्धकोसवर्णेशाकल्यस्यह्रस्वश्चेत्येते विधयः प्रसज्येरन्। नचभसंज्ञया पदसंज्ञाबाधः। भिन्नावधिकत्वात्भ
संज्ञाहिसमस्तस्यप्राप्तापदसंज्ञातूत्तरखंडस्य। अत्रभाष्य। भसंज्ञासूत्रेसुप्तिङंतंपदमितिसूत्रात्सुबंतमित्यनुवर्त्तनी
यं। तदयं सूत्रार्थः। यजादावसर्वनामस्थानेपरेयस्मात्प्रत्ययविधिस्तथाभूतः पूर्वः समुदायोभसंज्ञोभवति। तदव
त यवभूतंसुबंतं यद्यस्तितर्हितदपिभसंज्ञंस्यात्न्यजादावनंतरइति। इहचसमुदायस्यभसंज्ञाप्रधानशिष्टा। अवयवस्यत्वन्
वाचयशिष्टा कर्तुः क्यङ्‌सलोपश्चेतिवत्। तेनराजन्इत्यादौ सुबंतावयवेपिभवति। सुबंतावयवसत्वेतुतस्यसमुदायस्य
चेत्युभयोरपिभवतीतिविवेकः। नन्वेवमपिपरमवाचोपरमवाचइत्यादौभत्वाभावात्पदकार्यंस्यादेवेतिचेन्न। तत्र
भत्वाभावेपिअसर्वनामस्थानेइति पदसंज्ञानिषेधात्। स्वादिष्वसर्वनामस्थानेइतिअत्रापिहिसुबंतमित्यनुवर्तते
प्रसज्यप्रतिषेधश्चायं। तत्सामर्थ्यादनंतरस्याविधिर्वेतिन्यायोनाश्रीयते। तदयमर्थः। सर्वनामस्थानेपरतःपूर्वःस
मुदायःपदंनस्यादिति। तत्रसमुदायस्यस्वादिष्विति प्राप्ता अवयवस्यतुसुबंतमितिप्राप्ता पदसंज्ञाअनेननिषिद्धेतिपरम षि
ति

पाचाविस्यादिसिद्धं। नन्वेवं समाकूराजे स्यादौ कुत्वादि न स्यात्। सावपि समुदायस्यावयवस्य च प्राप्तयोर्द्वयोरपि पदसंज्ञयो
र्निषेधादिति चेन्न। अ सर्वनामस्थाने इत्युत्तरसूत्राद्यचीत्यपकृष्य यजादौ सर्वनामस्थाने उभयविधपदसंज्ञानिषेधात्।
सौ तु द्विविधापि पदसंज्ञा भवत्येव। नन्वेवं श्रूयमाणे सौ पूर्वस्य पदसंज्ञा स्यादिति चेत्। दृष्टापत्तेः नन्वेवमेचोऽप्रगृह्यस्यादू
राद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुताविति सूत्रे भद्रंकरोषि गौरित्यत्रातिप्रसंगं वारयितुं पदान्तग्रहणं कर्त्तव्यमिति वार्त्तिककृता वक्ष्य
माणं विरुध्येत। क्रियमाणे पदान्तग्रहणे दोषतादवस्थ्यादिति चेन्न। अन्तग्रहणमात्रेण वाक्यस्य टेरित्यतो वाक्यग्रह
णमनुवर्त्य वाक्यान्तस्येति व्याख्यानसंभवात्। तदेवं समासचरमभागस्य पदसंज्ञा यजादौ क्वापि नास्तीति स्थितं। क्वचि
न्निषेधात्। क्वचित्तु भत्वेन बाधादिति विशेषः। नन्वेवं दूरान्नमकत्त्कमि स्यादावलुङः न स्यात्। तद्धोतापोतारावित्यत्रानङ् न
स्यात्। उत्तरपदे तद्विधानादिति चेन्न। उत्तरपदशब्दस्य समासोत्तरावयवे रूढतया पदसंज्ञाविरहेऽपि तत्प्रवृत्तेः। सर्वतिष्ठ
पचेयं रूढिः। तेन होतृपोतृनेष्टोद्गातारः इत्यत्र मध्यमानामुत्तरपदत्वाभावात्ततः पूर्वस्यानङ् न इति दिक्। नन्वेवं दधिसे
चौ दधिसेचवित्यत्र सात्पदाद्योरिति षत्वनिषेधो न स्यादिति चेन्न। पदात्पदादिः पदादिस्तस्य षत्वं नेति व्याख्यानात्।
नन्वेवं रामेषु हरिष्वित्यत्रापि निषेधः स्यादिति वाच्यं। स्वादिष्विति या पदसंज्ञा तामुपजीव्य पदात्पदेर्नेति निषेधाप्रवृत्तेः।
दा पतस्वसा सतिषेधेन ज्ञाप्यते। एतच्च पदादेर्नेत्येव व्याख्यानं न तु पदस्यादेरिति तथा सति गतिकारकोपपदानामि
ति सुबुत्पत्तेः प्रागेव समासे दधिसेगित्यादौ षत्वस्य दुर्वारापत्तेः। नन्वेवमपि बहुसेचौ बहुसेच इत्यत्र षत्वं स्यादेव।
बहुचो पदत्वेन षत्वप्रतिषेधाप्राप्तेरिति चेत्सत्यं। वचनमेवेह कर्तव्यं। बहुच्पूर्वस्य नेति। अत्रायं सूत्रन्यासः। सा

॥कृ॰को॰९
॥१९५

तेः सः षत्वं न स्यात्। ततः बहुच्पदाभ्यां। आभ्यामुत्तरस्य सस्य षत्वं न स्यात्। आदिग्रहणं न कर्त्तव्यं। तस्मादित्युत्तरस्ये
त्येव सिद्धं। तदिदं बहुग्रहणमादिग्रहणं न निर्मातव्यमिति। वार्त्तिके तु उत्तरपदत्वे चापदादिविधाविति वचनेनैव पर
मवाचेत्यादि साधितं। उत्तरस्य समासोत्तरभागस्य पदत्वे कर्त्तव्ये लुमता लुप्ते प्रत्ययग्रहणं न स्यात्। अतो न कु
त्वादिः पदादिविधौ तु प्रत्ययलक्षणं स्यादेव। तेन षत्वनिषेधाद्दधिसेचेत्यादि सिद्धिः। अस्मिंश्च पक्षे प्राक् सुबु
त्पत्तेः समासोऽनाभ्युपगन्तव्यः। धनक्रीतेत्यादि सिद्धये तस्या निसत्तायाः वक्ष्यमाणत्वात्। कैयटस्त्वाह। दधः
सेचाविति विग्रहे षष्ठीति समासः। न त्वयमुपपदसमासः। सोपपदात्तु विचू नास्ति उ नभिधानात्। अतो दधिसे
चावित्यादि न भवत्येवेति। अस्मिन्नपि पक्षे बहुच्पूर्वस्य चेति वचनं कर्त्तव्यमेव। एतेहि बहुचि विशिष्टस्यार्थ
वत्त्वेन प्रातिपदिकत्वे सुपो लुकि च कृते पुनर्विशिष्टात्सुबंतरमुत्पद्यते तदुत्स्वर्थवत्सूत्रे वक्ष्यते। तत्रान्तवर्तिनी
विभक्तिमाश्रित्य प्राप्तं पदत्वं तत्कृतं कार्यं कर्त्तव्ये माभूत्। षत्वनिषेधश्च यथा स्यादित्यतिभाष्य निष्कर्षः। पू
र्वसूत्रे व स्थित्वा उत्तरपदत्वे च पदादिविधौ बहुच्पूर्वस्य चेति पाठ्यं। पदादिविधावेव प्रत्ययलक्षणं भवति न तु पदांत
विधाविति नियमार्थं चेदं वचनद्वयमित्यिति व्याख्येयं। एवं च ... न कर्त्तव्यमिति लाघवं। अस्मिन्पक्षे सोपदत्वं नास्ति। प्रा
गुत्तकुसप्टेरभावात्। तदेतत्सर्वमभिप्रेत्य ह सूत्र्यादि सूत्रे भाष्यकारेरुक्तं। अथ सा वपि पदं भवति एवमप्युभ
यतः पाशुराज्यं रिति। ननु एवमगाधिकारग्रहणपक्षे वक्तेतोऽगस्येति पक्षे च अभूवान्नित्यत्र जुस्प्राप्नोतीति चे
न सत्यं। आतः इति नियमान्न भवति। ननु देवदत्तयाजयां चकारेत्यत्र लुकं बाधि त्वापरत्वात् तिदिषु आमः इति
वा

548

तेषां लुक्प्रत्ययलक्षणेन तिङंतत्वादामंत्रितस्य निघातः स्यात्ततः परस्य च न स्यादिति चेन्न। लुक् स्थायामेव येन नाप्राप्तिन्यायेन
तिबादीन्बाधित्वा लुक्प्रवृत्तेः। तदुक्तं। आमिलितिलो पात्तस्य चानिघातस्तस्मात्प्रनिघातइति। ननु देवदत्तो युष्मत्पुत्रइत्यादौ ष
ष्ठ्यंतस्य विधीयमाना युष्मदस्मदोरादेशाः प्राप्नुवंतीति चेत्सत्यं। स्यग्रहणान्न भवंति। न च विभक्तौ परतः पूर्वभागमात्रस्य
मात्। किंतु विभक्तिविशिष्टस्यैतोतदर्थस्य ग्रहणं स्यादिति वाच्यं। षष्ठीचतुर्थीद्वितीयानामिति निर्देशेनापिगतार्थत्वात्।
सर्वस्य परस्यैवानुवृत्तेश्च। तस्माद्विभक्तिलोपे कृते मा भूदित्येतदर्थमेव स्यग्रहणं। अवस्थानं हि श्रूयमाणस्यैव भवति। य
द्वा तिष्ठतिरत्रानो वर्तते। यथा समयेतिष्ठस्व श्रीवेति। समयं [illegible] मेहासीरित्यर्थः। तथा चापरित्यक्तविभक्तिकयो
व रिस्कत्वाच्छ्रूयमाणविभक्तिकत्वं स्यग्रहमेव लभ्यते। इदं तद्वैशिष्यते। वल्लतोंगस्येति सिद्धांते चिणो लुगिति तलोपे कृते ह निर्दे णि
देशाः न स्युः। अवधिभवतां ग्रामः। अध्यगामि भवतानुवाक इति। लुङि परतो ह्येते विधीयंते इति चेन्नैवं। लुङि यदार्धधातुकं त
त्र हि निमित्ते आदेशानां विधानात्। तस्माद्वल्लतोंगस्येति पक्षे निर्दोष इति स्थितं। अचोंत्यादिटि। अचैर्निर्धारणे षष्ठी जातौ इति
चैकवचनं। अचां मध्ये योंत्यस्तदादि शब्दरूपं टिसंज्ञं स्यात्। टिप्रदेशाः टित आत्मनेपदानां टेरित्यादयः पचते पचेते इ
त्यादि। अंते भवोंत्यः दिगादित्वाद्यत्। अंत्य आदिर्यस्येति बहुव्रीहिः। नित्यसापेक्षत्वात्समासः। अलोंत्यात्पूर्व उपधा। अ
न्त्यादलः पूर्वो वर्णउपधासंज्ञः स्यात्। उपधागुणः चेतति च्योतति। वर्द्धतइत्यादि। ननु पूर्वस्याविशेषितत्वात् शासिधा
तौ शा इति समुदायस्य संज्ञा स्यादिति चेत्। अस्तु। न चैवं शास इदङ्हलोरिती त्वं शा इति समुदायस्य स्यादिति वाच्यं। अ य

लोंऽत्यपरिभाषयाऽस्य सिद्धेः। स्यादेतत्। नानर्थकेऽलोंऽत्यविधिरनभ्यासविकारेष्विति निषेधः प्राप्नोति। इह च बिभर्तीत्यत्र भृञा
मित्। अंत्यस्य यथा स्यात् इत्येतदर्थम् अनभ्यासविकारेष्वित्युक्तं। विकारो नाम वर्णात्मक आदेशः। अतएव देद्दीत्यत्र लोपः सर्वा
देशो न भवतीति। अत्रोच्यते। न तावदेषा परिभाषा सूत्रकृतः संमता तस्य लोप इति सूत्रे जिटुडूनां सर्वलोपार्थे तस्यग्रहणात्।
नापि भाष्यकारस्य संमता। एतत्सूत्रयोगेनैनमन्यथोपपत्तेर्भाष्ये उक्तत्वात्। तथाहि। अव्यक्तानुकरणस्येति तावदंत्यादेशे न भवति।
नाम्रेडितस्यांत्यस्य तु वेति ज्ञापकात्। इतरथा हि आम्रेडितस्यैवेत्येव ब्रूयात्। घ्वसोरेद्धावित्यत्रापि लोपो यीति प्रवृत्ते पुनर्लोपग्र
हणसामर्थ्यात्सर्वादेशः। तथा चेत्थं सूत्रं न्यासः। घोरभ्यासस्य लोपो हौ। लोपशब्दांतरस्यानुवृत्त्या सर्वलोपः स्यात्। अश्रेत्। अ
स्ते घोश्च एत्वं तिह्नाविति। अथवा लोप इति छेदः। संज्ञायां कृतोऽनुबंधः संज्ञिनि फलति। यथाऽऽङ्मर्ट्टिभाष्ये तु द्विशकारकोनि
र्देश इत्युक्तं। तत्र लोपश इति भिन्नं पदं। शइत्यस्य च उपदेशोऽपृक्ते संज्ञा। तत्फलं तु प्रयोगे। सर्वत्रानुबंधानां कार्यादिवत्रनवप
वीकृसैव व्यावर्त्तकत्वादिति भावः॥ अस्मिन्नपि पक्षे झलियः संयोगस्तदादित्वात्सोर्लोपे प्रकृशकारकएव पाटः फवचः स्फ
रार्थं अनउपधालोपिनोऽन्यतरस्यामित्यादावकारस्यैवेहापि सकारस्य लोमास्त्विति तु भाष्याशयः। आभ्यामित्यादौ ह
लि लोप इति सूत्रेण अकारस्येरमइदोविधीयमानो लोपापितर्द्धिनिस्यस्यादिति चेन्न। अनाप्यक इति सूत्राद्दनित्यनुवर्त्तत इहली
तिसप्तम्या षष्ठीं प्रकल्प्य अनएव लोपविधानात्। तथा च तत्रालोंऽत्यपरिभाषया नकारलोपे अतो गुण इति पररूपे च कृते आभ्या
मेषांइत्यादि सिद्धं। अत्र लोपोऽभ्यासस्येति सूत्रेपि अत्राभ्यासस्याश्रयेन तु तदेकदेशो इति व्याख्यानात् अस्त्रग्रहणसामर्थ्यात्सर्वलोपः। यद्य
पि सनीत्यपेक्षितं दरीदधविस्यादिवारणाय सादावितिच जिघ्रपथि षतीत्येतद्वारणाय प्रकृतयोपि पिपक्षतीत्यादिवारणाय

ना पो म

जो व्याख्यायामिति बहुवचनं पूर्वे इत्यपि जसंतं भसोरेव सा ज्ञानाल्लभ्यते। यद्वा अल इति निर्द्धारणे षष्ठी जातौ चैकवचनं अलां मध्ये त्यास्य इत्यर्थः। तथा चेह
जस इति जस ङ-सिङ-सूत्रेति पक्षत्रयमपि स्थितं॥

विषयो थ पि स्तितः म चोक र्म कस्य गुणो वेति। मुमस्तिगामि त्यादिवारणाय तथापीदं सर्वमनुरत्यैव सरूपमिति सर्वलोपार्थमेवा[illegible]त्रग्रहणं
बोध्यं। नन्वेवमपि विभाषा भवद्गवदघवता मोश्वावस्येति वार्त्तिकेन विधीयमान ओकारोंत्यस्य स्यादिति चेन्नावस्येति सिद्धे अवस्ये
ति गुरूकरण सामर्थ्यात्सर्वादेश सिद्धेः। तस्मान्नानर्थक इति परिभाषा निष्फला सूत्रभाष्या संमता चेति स्थितं। अवेंचशासेः शास्त्रावृ
स्योपधात्वे पि शिष्ट इत्यादि सिध्यति। संयोगोपधग्रहणं कृअर्थमित्यादि व्यवहाराश्चास्मिन्नू पक्षे संगच्छंत इति दिक्। यद्वा अवध्यव
धिमद्भावः सजातीयानामेवेत्युत्सर्गः। लोके त्वमीषां ब्राह्मणानां मध्ये मासात्पूर्वमानयेत्युक्ते एक एवांत्यादव्यवहित पूर्व आनीयते न
तु समुदायः। एवं चेहाप्यल अव्यवहितपूर्वोऽलेव संज्ञी न तु समुदायः। न वा व्यवहितोऽल्। संयोगोपध व्यवहारस्तु भाक्तः। अवयवध
र्मस्य समुदाये उपचारात्। एवं स्थिते अल इति जसंतमपि सकृवचोंतास्मिन्निति निर्दिष्टे पूर्वस्य। सप्तमी निर्दिष्टेषु पूर्वस्यैव कार्यं स्या
त्। तत्र स्यन्निर्दिष्टे अव्यवहितो ग्राह्य इति सूत्रार्थः। निः शब्दो नैरंतर्ये। दिशिरुच्चारणक्रियः। निरंतरं दिष्टो निर्दिष्टः। नियमार्थमि
दं सूत्रं। तथाहि। इको यणचीत्यत्राचीति यस्य भावेन भावलक्षणमिति सप्तमी। उच्चार्यमाणत्वाच्चांतरंगस्यास्यार्थस्य
लाभः। तेनाचि सति यण् भवतीत्यर्थः। यद्वा गंगायां घोष इति वदौपश्लेषिकेऽधिकरणे सप्तमी। तत्र सत्वं परस्येव पूर्वस्यापि सं
भवति। एवमुपश्लेषोपि। तत्र युगपदेकस्य कार्यित्वनिमित्तत्वयोरसंभवात् दध्युदकं मधिद मित्यादौ इकारोकारयोः पर्याये
ण यण्प्राप्तः। पूर्वस्यैवेति नियम्यते। तथा अग्निचिदत्रेति व्यवहितस्यापि प्राप्तः अनंतरस्यैवेति नियम्यते। ननु गवित्ययमा
हेत्यादौ स्वरूपपदार्थकतामिति शब्दः करोतीति तथेह्यापि। एवं च तस्मिन्नणीत्यत्रैवेयं परिभाषा प्रवर्त्तेत। अस्ति हि तत्र व्यवधे

रे

पि

११ यं। हे यौष्माकीन अस्मभ्यं देहि हे आस्माकीन युष्मभ्यं ददामीत्यादौऽस्य जस्ङसभ्यां परस्याप्यादेशप्रसंगसत्वात्‌। सत्यां इतिकरणः
पदार्थविपर्यासकृत्‌। लोकेऽर्थपरताया औत्सर्गिकत्वात्‌। तत्र शब्दपरतां करोति। शास्त्रे तु विपरीतं। किंच। यदि तस्मिन्नणीत्यत्रे
वेयं प्रवर्त्तेत तर्हि तत्रैव पूर्वग्रहणं कुर्यात्‌। तस्मान्नेदं तस्मिन्नित्यनुकरणं। किंतु अचि हलीत्यादि सकलविशेषसंग्रहार्थस्तत
त्रस्य सर्वनाम्नोऽयं निर्देशः। तस्यापत्यं तत्रभव इत्यादिवत्‌। तस्मादित्युत्तरस्य।। पंचमीनिर्दिष्टेषूत्तरस्यैव कार्यं स्यात्तत्र्वा
व्यवहितोऽव्यवहिते। तिङ्‌ तिङः। अग्निमीळे। इह न भवति। ईळे अग्निं। इह कारकविभक्तेरभावाद्दिग्योगलक्षणा पंचमी। तत्रदि
कुशब्देऽध्याह्रियमाणउत्तरशब्दवत्‌ पूर्वशब्दोऽप्यविशेषादध्याह्रियेत व्यवहितोपि च गृह्येत। तथा उत्संगस्यानेत्यत्रापि उ
दस्यास्तंभोरित्यस्य प्रसंगः। तदेवं पूर्वसूत्रमेतत्सूत्रं चेति द्वयमपि नियमार्थमिति स्थितं। तथा च वार्त्तिकं। तस्मिन्स्तस्मा
दिति पूर्वोत्तरयोर्योगाविशेषान्नियमार्थवचनाद्ध्युदकं पचत्योरनमितौ ह्यापि तस्मादिति स्वतंत्रस्य सर्वनाम्नो निर्देशः
ढ प्राग्वत्‌ न खल्वनुकरणं। तर्हि सति यद्यपि तस्मान्नुड्द्विहल इत्यत्रात ओदरिति दीर्घात्सूर्वस्यांगस्य संभवात्प्रयोजनाभावान्नै
था त्यरिभाषोपस्थितिस्तथापि तस्माच्छसो नः पुंसि तस्मान्नुडचीति योगद्वये स्यात्‌। उभ्यरतआ उभ्यरतआनुपलभते। गो
त रनश्च इत्यादेर्व्याचष्टस्य तत्र संभवादिति दिक्‌। स्यादेतत्‌। एतत्सूत्रं नियमार्थमस्तु। पूर्वसूत्रमपि औपश्लेषिकस
प्तमीपक्षे तु नियामकत्वमयुक्तं। भाष्यकैयटविरोधात्‌। तथाहि ह्मान्नलोप इत्यत्र भाष्ये नैषा परसप्तमी कात्तर्हि सत्सपु

धा

मीक्ङितिसतीति। तथा तत्रैव कैयटः। कथं पुनः संभवत्यां परसप्तम्यां सत्सप्तम्याश्रयितुं शक्या। यथेष्टं वाक्याध्याहारे दो
षः। क्ङिति सतीत्येव वृद्धिर्विधीयमाने पौर्वापर्यानाश्रयणान्नास्ति तन्निमित्तस्याः परिभाषाया उपस्थानं। यद्वौपश्लेषिकेयम
धिकरणे सप्तमी तदा किं पूर्वस्य कार्यमथ परस्येत्यनियमे नियमाय परिभाषोपस्थानमिति। अत्रोच्यते। षाष्ठग्रंथस्य प्र
कृतमात्रपरत्वाद्विरोधः। तथाहि श्नान्नलोप इति सूत्रे शकारवतो ग्रहणं मास्तु नादित्येव सिद्धमिति प्रश्ने नंदे दावतिप्रसंग
दूषणतरितं। अनिदितामित्यस्यानुकर्षणे तु हि नस्तीनं स्यात्। ततः क्ङितीत्यनुवर्त्त्यमानेऽप्येव क्ङितमाश्रित्य सहि नस्तीत्यत्र हे
ङस्त इति शंक्यते यदि व्यास्यामवस्थायां तस्मिन्निति परिभाषोपतिष्ठेत तदा नंदस्मानादौ चानशो ङित्त्वाल्लोपः प्रवर्त्तेत।
श्नमः श्नित्करणं चानर्थकं स्यात्। तद्धि श्नित्त्वात्सार्वधातुकत्वाद् ङित्तमिममेवाश्रित्य सहि नस्तीत्यत्र नलोपे क्रियमाणे
सार्थकं न त्वन्यथा। नन्वार्धधातुकसंज्ञानिरस्यार्थं शित्त्वं सार्थकं। तस्यां हि सत्यां अनक्ति भनक्तीत्यतो लोपः स्यात्। रुण
द्धि भिनत्तीत्यत्र गुणः स्यात्। तृणेढि तीडागमः स्यात्। नेड्वशीति तु न प्रवर्त्तते अकृत्त्वादिति चेन्न। श्नमः पूर्वभागस्या
नंगतयोक्तविधीनामप्राप्तेः। कथमनंगतेति चेन्नाद्रुस्थां। प्रत्ययविधौ यः पंचमीनिर्दिष्टस्तं धातोः प्रातिपदिकाद्दितेरा
दित्तस्मिन्प्रत्यये परेऽङ्गमिति हि सूत्रार्थः। इह तु यः पंचमीनिर्दिष्टो रुधादिभ्य इति नास्मात्प्रत्ययः परः यस्मात्प्रत्य
यः पूर्वभागात् नासौ तस्मिन् विधीयमाने पंचमीनिर्दिष्टः। अतएव भनक्तीत्यादावतो दीर्घो यञीति न प्रवर्त्तते।।

॥श्री·फो०९
॥१२५

नन्वेवं नांतात्स्योर्ग्रहणं स्यात्।
नचश्नसोरल्लोपइत्यत्र विशेषणार्थं श्नित्करणं स्यादिति वाच्यं। नसोरल्लोपइत्युक्ते पि दोषाभावात्। नन्वेवं नांतात्स्योर्ग्रहणं स्यात्।
तथा च कनेर्यद्धि किंच कांतइत्य पि स्यादिति चेन्न। सिद्धांते पि श्नप्रत्ययसांतयोर्ग्रहणापत्तौ वस्तेइत्यादावतिप्रसंगसामान्यात्।
साहचर्यात्सस्यैव धात्वोर्ग्रहणमिति तुल्यं। ननु नसोरल्लोपइत्युच्यमाने यत्र न प्रत्ययस्य क्ङित्यानंतर्यं तत्रैव भविष्यति। यत्तद्वा
चरतः यत्नतः यमनतइति। मैवं। अनुवर्त्तमानेन सार्वधातुकग्रहणेन न प्रत्ययो विशेष्यते। तथा च विध्यसंस्पर्शान्निर्दिष्ट
परिभाषानुपस्थितौ निमित्तसप्तमी। सार्वधातुकनिमित्तस्य नप्रत्ययस्यास्तेश्चाल्लोपः क्ङित्यनंतरइति। ननु चानंतर्ये सार्वधा
तुकग्रहणं प्रत्याख्यातमिति चेन्न। सत्ति शिक्षि प्रत्याख्यानात्। तदेवं श्नमः शित्वसामर्थ्यात् क्ङितीति सप्तम्यामपि परिभाषा
नापत्तिरित्तइति स्थितं। पूर्वपक्षस्वारस्यं यात थोक मिति वा वर्णनीयं। इह सूत्रद्वये षष्ठीप्रकॢप्तिपक्षोपि भाष्ये स्थितः।
तथा हि। षष्ठीस्थानेयोगेति सूत्रात् षष्ठी ह्यनुवर्तते। सप्तम्यर्थनिर्दिष्टे पूर्वस्याव्यवहितस्य षष्ठी स्यात्। पंचम्यर्थनिर्दिष्टे उत्त
रस्याव्यवहितस्य षष्ठी स्यादिति। तत्रैकोयणचीत्यादौ सूत्रे एव षष्ठीश्रवणात्तां षष्ठीमनूद्य पूर्वस्यानंतरस्यैव नानंतू
तरस्य न वा पूर्वस्याव्यवहितस्यैवेति तावन्मात्रमुच्यते। आनेमुगित्यादौ [illegible] षष्ठ्याउत्त
रस्य न वा पूर्वस्याव्यवहितस्यैवेति तावन्मात्रमुच्यते। यस्य स्थाने षष्ठी तस्यैव कार्यनियम इति सो प्य
वणात्सां पिप्रक ल्प्यतइति शेषः। सा चानियतयोगत्वात्स्थानषष्ठी। यस्य स्थाने षष्ठी तस्यैव कार्यनियमइति सोप्य
र्थात्सिध्यति। यत्र तूभयनिर्देशस्तत्रोभयं तावन्न प्रकल्पकं। कार्यित्वनिमित्तत्वयोरेकत्रयुगपदसंभवात् ज्ञापकार्थ
तथा चैकः पूर्वपरयोरिति स्त्रैयैयट्ः। सूत्रद्वयप्रमाणत्वात्तद्वैतां प्रकल्पिके। षष्ठीविभक्तिनात्र ज्ञापनार्थत्व

माश्रितमपि। नच पर्यायप्रसंगोऽभयकल्पने। अतुल्यबलत्वात्। तथाहि। आने मुक् इत्यत्र सप्तमी निरवकाशा सा पूर्वत्र चरितार्था या अतो दि
येय इति पंचम्याः षष्ठीं कल्पयति। एवमीदास इति पंचमी आन इति सप्तम्याः। तथा तास्यनुदात्तेत् सूत्रे अभ्यस्तसिजर्थं सार्वधातुक
इति सप्तमी निर्दिष्टां वक्ष्यति। सप्तम्यन्तस्यान्यत्र चरितार्थत्वात् तस्या एव षष्ठी कल्प्यते। तथा बहोर्लोपः इत्यत्र बहोरिति पंचमी अचरिता
र्था इष्ठस्य यिट् चेति सप्तम्याः षष्ठीं कल्पयति। अत एव भूम च बहोरिति पृथक् षष्ठी निर्दिष्टा। तथा गोतो णिदिति पंचमी स
र्वनामस्थाने इति सप्तम्याः षष्ठीं कल्पयति। गोशब्दस्य णित्त्वे प्रयोजनाभावात्। न च तिष्ठति गौरित्यादौ पूर्वस्य वृद्धिः
फलमिति वाच्यं। गोशब्दे प्रतितिष्ठते लब्धं गत्वात्। एवं प्रायेण पंचम्याः कृतार्थत्वेऽभिभाव्येऽस्पष्टा। आमि सर्वनाम्नः सुट् इ स
त्रापि पंचम्यनवकाशा आमीति सप्तमी तु त्रपुषे चरितार्था सावकाशा। यदि तु ह्रस्व आदित्यनुवृत्त्या पंचम्याः सामानाधिकर
ण्यं संपाद्य सर्वनाम्न इति पंचम्यपि कृतार्थेति ब्रूयात्तर्हि यथोद्देशपक्षाश्रयणेन परत्वात् तस्मादित्युत्तरस्येति भविष्य
ति। तदुक्तं। उभयनिर्देशे विप्रतिषेधात् पंचमीनिर्देशः इति। यत्तु न तत्र नेह सामानाधिकरण्यं। वर्णाश्रमेतराणामित्यस्य
सिद्धये सर्वनाम्नो विहितस्येति व्याख्यानात्। येषां तेषामित्यादावर्थमकारान्तस्येति व्याख्यानात्स्वा। दीर्घाच्छे तुग्भ
वती अत्र तु षष्ठ्याः स्थाने पंचमी। तेन दीर्घस्यैव तुक् भवति न तु छकारस्य। स्फायो इति निर्देशश्चैह लिंगं। अथाहि न
खरि चेति चर्त्वेन स्फायो इति चकारद्वयं निर्दिष्टं तथा प्रत्ययविधौ तु पंचम्यो न प्रकल्पिकाः। षष्ठ्या अयोनुर्दे विभक्तिः सीता।

नार्थवद्ग्रहणे नानर्थकस्येत्युपपन्नं भवति। ननूक्तत्तापकादर्थो ग्राह्यः। रूपं स्वमिति वचनाद्रूपं चेति सामर्थ्यादर्थवतो रूपस्य ग्रहणं। न
अप्रसिद्धस्य चानुवादासंभवात्। तत्रानियमप्रसंगेन नियमकारिण्याः परिभाषाया अप्रवृत्तेश्चेति दिक्। स्वं रूपं शब्दस्याशब्द
स्याशब्दसंज्ञा। शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रे या संज्ञा तां विना। अग्नेर्ढक्। आग्नेयं। आग्नेयमहन्नः। आयच्छतेम आहतोइह
अग्नि आग्नेयमहन्नेषामेतत्सूत्रोपात्तानां संधायिनस्त एव संज्ञिनः। अशब्दसंज्ञेति किं। उपसर्गे घोः किः। दाधा घ्वदाप्। यथास्या
लुक्धातोः शब्दार्थान्माभूत्। शब्दः शब्दशास्त्रं तत्र संज्ञेति सप्तमीसमासः। ननु शब्दस्य संज्ञेति कर्मकरणमित्यादिष्वर्थ
संज्ञास्य स्वरूपग्रहणापत्तेः॥ स्यादेतत्। रूपग्रहणं विनापि स्वशब्देन तदेव ग्राहिष्यते। प्रतीतावुपदेशानपेक्षत्वात् साधा
रणत्वादंतरंगत्वान्नियतोपस्थितिकत्वाच्च। अर्थो हि प्रतीतो संबंधग्रहणमपेक्षते साधारणश्च पर्यायैरपि प्रत्यायनात्।
बहिरंगश्च पदज्ञानजन्यबोधविषयत्वात्। अनियतोपस्थितिकश्च अनुकरणदशायामप्रतीतेः। तत्किं रूपग्रहणेनेति चेत्। अत्रा
हुः। इह शास्त्रे अर्थोपि विवक्षितो रूपवदिति ज्ञापनार्थं रूपग्रहणं। ते [illegible] नकाशकुशेइस्यत्र शेदिति प्रेगत्ध संज्ञा न भव
ति। एतत्सूत्रं भाष्ये प्रत्याख्यातं। तथा हि। आरभ्यमाणेपि सूत्रे पशुरपत्यं देवतां मां च उदस्पो भरतादित्यादयस्तावल्लौकवदर्था
एव गृह्यंते। अग्नेर्ढगित्यादौ तु शब्द एव ग्रहीष्यते। अर्थस्य प्रत्ययेन पौर्वापर्यासंभवात्। ङ्याप्प्रातिपदिकादित्यधिकाराच्च।
उपसर्गे घोः किरित्यादौ तु घुधातुर्न ग्रहीष्यते दाधाघ्वेत्यारंभात्। उक्तं हि। व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचिदिति। अ
र्थवद्ग्रहणपरिभाषापि व्रश्चादिसूत्रे राजिपठितात् पुनर्भ्राजिपाठात् सिद्धा न्यायसिद्धा च। अग्नेर्ढगित्यादौ हि शब्दविशि
ष्टस्यार्थेः स्योत्सर्गतः उपस्थितो विशिष्य कार्यबाधाद्धि शब्दप्रणीभूते शब्दे प्रवर्त्तमाने कार्ये उपस्थितार्थोपहितत्वेन त्वनर्थ

गोपालकयोगान्मीमांसकः । अर्थस्य विशेषणविशेष्यभावव्यवस्था समासे प्रत्ययप्राप्ते सर्वोऽपि नास्त्यागमाद्योगात् । गोपालकव्यन्यायोपि तन्मूलकः । गो
केपि । अर्थस्य विशेषणविशेष्यभावव्यवस्था समासे तत्पिप्रतौ सर्वोऽपि नास्त्यागमायोगात् । गोपालकस्य न्यायोपि तन्मूलकः । गौ
णस्य प्रथमतोनुपस्थितेः । इतिनाभिव्यक्तपदार्थायेदृशपि न्याख्यातं । तस्मान्न्यायत एव सकलनिर्वाहे सूत्रे नारंभणीयमिति ।
नवनूतनचतुःसूत्र्यामनुवृत्त्यर्थं स्वरूपमिति स्ववश्यं वाच्यमेवेति चेन्न । अनुवृत्तेरनावश्यकत्वात् । तथाहि । अणुदित्सूत्रे ताव
न्नत्रापि स्वसावर्ण्यादिवत्सिद्धं । कथमन्यथा अवर्त्तामित्यत्र झरो झरीति लोपः । अत्र व्यक्तिभेदात् सावर्ण्यमिति चेत् । इहापि
बोध्यबोधकव्यक्त्योर्भेदात् । न तावत् परस्तत्कालस्येत्यर्थेऽपि । आदिरंत्येनेत्यत्रापि प्रत्याहारग्रहणार्थस्यासिद्धं । आरत्तोलिगो
लुनाच्छिन्दीत्याहि । येन विधिरित्यत्र तु वार्त्तिककारस्तस्य चेति वक्ष्यत्येव । वस्तुतस्तु तदपि न वाच्यं । व्यपदेशिवद्भावेनैव
सिद्धेः । अप्रातिपदिकेनेति तु तन्त्रेण वक्ष्यमाणव्याख्यानमतः । अत एव येन विधिस्तदन्तस्येत्यादि प्रयोजनमित्याद्यैतत्सूत्रस्थं वार्त्तिकं स
गच्छतद्व्यक्तिरित्येकु । सित्तद्विशेषाणां वृक्षाद्यर्थं । अत्र सिदित्युपलक्षणं । किंचिल्लिंगमासज्येष्टलिंगाविशेषाणां संज्ञेति व
तव्यं । तद्वल्लिंगे वृक्षाः प्लवा सं ज्ञीयमित्यर्थः । एवमग्रेपि । तेन विभाषा वृक्षमृगेति सूत्रे विशेषाणामेव ग्रहणात् प्लक्षन्यग्रो
धं प्लक्षन्यग्रोधाइति सिद्ध्यति । पित्पर्यायवचनस्य च स्वाद्यर्थं च कारात्तद्विशेषाणां स्वरूपस्य च ग्रहणं । सोपुष्प्यः पिष्पुलच्छ
अश्वपोषां स्वपोषं । जित्पर्यायवचनस्येव राजाद्यर्थं । सभा राजा मनुष्यपूर्वा । इनसभं । ईश्वरसभं । नेह राजसभा ।
सि श्वट्टसभा । पर्यायेणियो वक्ति सहिपर्यायवचनः न च स्वस्य स्वेन सहविकल्पः नापि विशेषेण । सामान्यविशेषयो
र्भिन्नकारकबोधजनकतयातुल्यार्थत्वाभावात् । तुल्यार्थस्य विकल्पेरन्निति न्यायात् । ईनशब्दो राजशब्द
स्य पर्याय इत्यादि व्यवहारस्तु भीमो भीमसेन इतिवत् । सितस्य तद्विशेषणां च मत्स्याद्यर्थं । पाठीनमत्स्यमृगान्

॥सू०कौ०॥१॥

॥५४॥

पर्यायवचनानां न । अनिमिषान् हंति । मीनस्येष्यते इति भाष्यं मैनिकः । मृगपक्षिणोस्तु पि[illegible] निर्देशः कर्तव्यः तेन स्वरूपस्य पर्याया
णां विशेषाणां च ग्रहणमिति व्याख्यातं । इह च स्वादेरणादेश्च न्यायेनैवाभिमतं सिध्यतीति तन्नैव वक्ष्यते । इत्त स्तु सर्वथा ति के
मित्यवधेयं ॥ अणुदित्सवर्णस्य चाप्रत्ययः ॥ अत्राण् परेण णकारेणेत्युक्तं । अणुदिच्च सवर्णस्य संज्ञा स्यात् विधीयमानं विना
वकारात्स्वरूपस्य । अस्य ... । शुक्ला स्यात् । माला स्यात् । एरनेकाचो संयोगपूर्वस्य वियतुः निन्यतुः ऋदोरप् । यवः लवः ल
वः पवः । उरण्रपरः । कर्ता । किरति । न चैवं ऋदोरप् ह्रस्वांतेभ्यः ... आदिभ्योपि स्यादिति वाच्यं दीर्घोच्चारणे यथार्थापत्तेः । न
न चैवमपि अष्टन आ विभक्तौ इत्यत्र सवर्णग्रहो दुर्वारः । न हि तत्रास्ति सामर्थ्यं । ह्रस्वोच्चारणेऽप्यर्धमात्रस्य मात्रिक एवस्या
दिति । दीर्घग्रहणस्योभयार्थतापत्तेरिति चेन्न । अप्रत्यय इत्यनेन निषेधात् । दीर्घानामनण्त्वेन सवर्णग्राहकत्वं नास्तीति प्रा
गेवोक्तत्वाच्च । ननु दीर्घाश्चेदनणः तर्हि कारको हारको इत्यादेरपरत्वं न लभ्यते इति चेन्न । ओतो सि । न हि दीर्घाः व्याप्यण् ग्रह
णेन नोपस्थाप्यन्त इति ब्रूमः । किं तु ग्रहणकशास्त्रेषु बलीयेषु वर्णोपदेशादिषु इतरत्र तु वाक्यापरिसमाप्तिन्यायेन वर्णाः इत्से
याण्ग्रहणेन दीर्घग्रहणमिति तत्त्वं । उदितः कुहोश्चुः । चकारः जगाद । अप्रत्यय इति निषेधस्तु उदित्सु न प्रवर्तते ॥ उदित्कर
णसामर्थ्यात् । अत एवाहुः । भाव्यमानोण् सवर्णान्न गृह्णातीति । नुक् तुडादयस्तु नोदितः । प्रतिज्ञानुनासिक्याः पाणि
नीयाः इत्यभ्युपेमात् । अप्रत्यय इति किं । विधीयमानानां प्रत्ययादेशानां [illegible] सवर्णग्राहकत्वं माभूत् । अत इञ् । इदम इश् । इद आ
द्व्यातु ... स्ये ... वोतुक्ता अमू संबुद्धौ । इह हि सर्वत्र उपदेश इति वचनात् । सत्रांतर्गते ... एवं इत्यादिषु ... प्र
वर्तते । लोपस्तु त्रानुपूर्व्या सिद्धो यितोपि पद स्वरूपपर्यालोचनायां प्रवृत्तः । ततः स्वरूपमिति संज्ञाव सांज्ञायमाना

558

पदार्थोपस्थितिरनुबंधविनिर्मुक्तस्यैवभवति। तथाचोपस्थापकस्याणःखाःसवर्णग्रहणंप्राप्तंनिषिध्यतइत्युक्तंचेत्॥
अतएवचतुर्दशसूत्र्यामकारस्यारणार्थस्याकारस्यैवसंज्ञकानामपिणकारादीनांलृमध्योकारस्यचपरपर्यालोचनायांमे
वलोपश्चबलवत्तरइतिन्यायेनापहारादितरांतर्भाविनैवसंज्ञाप्रवर्त्ततइतिसिद्धांतः। इदंचालोत्यासूत्रेउपधेतिसूत्रेतस्मि
त्रे न्नितिदनिर्दिष्टेइत्येचकेयटग्रंथेस्पष्टं। इइजकः इकोचीत्यादौसानुबंधाद्विभक्तिस्तुप्राथमिकबोधेविशिष्टस्यविषयत
व यातस्यैवार्थत्वंमादायअन्योहिपश्चादुपतिष्टतेनतुप्रयुज्यतइतिकथंततोविभक्तिंक्रियतां। इत्संज्ञाकार्यंतुआनर्थक्या
त्तदंगेष्वितिन्यायेनप्रत्याप्यप्रवर्त्तते। विभक्त्यर्थान्वयोप्येवं। इदंहिइकडादावुपस्थापकेरतस्यलिंगस्यतद्बोध्येफलप्रवर्त्त
कत्वमितिदिक्। स्यादेतत्। उक्तरीत्याउदोष्ठ्यपूर्वस्येतिसूत्रेउपधाद्धेप्रवृत्ताइत्संज्ञालस्यैतित्वरंप्रवर्त्तयेदितिचेत्। सत्यं॥
अतएवतत्सम्माधानायपूर्वाचार्यैः परान्कालमितिगृहाण। कथंतर्हिएओङ्‌सूत्रेतद्दूषणायप्रवृत्तमितिचेत्। तत्कालावधा
रणेनरत्तार्थस्यतकारस्यानुबंधात्तरेवेष्यादितिगृहाण। अतएववैयाकरणाइत्येंऐचेभिस्वरोनभवति। पचस्वेति त्रे
शापोप्येवं। नयाभ्यामितिसूत्रेङ्स्यःपरस्यदेइत्यत्रऐजेचोश्चकारस्यप्रत्याहारेउपक्षयात्। यद्वा। इजिशादिष्वपिमास्तु
सूत्रंगितेष्विसंज्ञा। किंतुफलप्रत्यासत्त्यापदार्थस्यैवसाऽस्तु। मैतेउपदिश्याइतिचेत्। ननेफलभाजइतितुल्यं। सामर्थ्या
त्परपरासंबंधेफलमितिचेसंज्ञापितत्रैवास्तु। सामर्थ्यादितितुल्यं। उपदेशेयत्त्वंहिप्रायोगिकेस्वसंमवान्तरस्थापक
निष्ठमानुपूर्वीसाजात्यादाश्रीयते। नचैतत्संप्रेस्वस्तिप्रत्याप्यतकाराभावादितिदिक्। प्रकृतमनुसरामः॥ भाष्यमानो
नो

559

नन्वेवमपि अकः सवर्णे दीर्घ इत्यत्र अकारो ग्राह्यशास्त्राणां ग्राहकोऽस्तु । अण्त्वात् । अस्तु च सवर्णे ईकारादीनामपि ग्राहकः । आदिरन्त्येनेत्युक्तेः ॥

प्युकारादेशः सवर्णानुग्रहणाति । ऋत उदिति तपरकरणाल्लिङ्गात् । तेनाकनामुष्यामित्यत्र ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घः सिध्य
ति । न चैवं सनाशंसे सप्रत्ययोपि सवर्णानुग्राहकोऽस्त्विति वाच्यं । आदेशविषयके ज्ञापकमित्येकत्वात् । यद्वा अदसोसेर्दादु इति सूत्रे
ऽवउ स्थ उ स्थेति समाहारद्वन्द्वोऽस्तु । अत एव सौलुकानिर्देशः कृतः । अत एव उदुपधायाद् इति सूत्रे गोहः इति विकृतनिर्देशं प्रयो
हा ग्यात्तु भाष्यकारेरुकारान्तरप्रश्लेष उक्तः । ईकारादयस्तु कथं ग्राह्याः । नहि तद्वाचकः शब्दस्तस्मिन् सूत्रे उपात्तोस्ति । ननु
स्यात्तु ... ननु नेपि स्वार्थोपस्था स
र अकृशब्दे न ऋकारः इकारयोः प्युपस्थिता इति चेन्न हि वाक्यार्थे ते न यन्तु । पदार्थसंसर्गस्य वाक्यार्थत्वात् । ननु नेपि स्वार्थोपस्थि तत्र तद्वाचकत्वं न तु तदर्थवेत्तीति । तदुक्तं वार्तिककृता ।
पकानुच्चारितत्वादिस्तत् । अत एव वक्ष्यते वैयाकरणशब्दविशेषवेत्ती स्वपाधीन तु तदर्थवेत्तीति । तदुक्तं वार्तिककृता
लभ्यप्रत्याहारग्रहणे सवर्णग्रहणमनुपदेशात् । ह्रस्वसंप्रसार्यादिति चेत् । उच्चार्यमाणसंप्रत्यायकत्वाच्छब्दस्यावचन
मिति । शब्दस्यमतीयमानस्य अवचने अर्थप्रतिपादकत्वमित्यर्थः ॥ अत्रोच्यते । प्रत्याहारग्रहणे सर्वत्रस्वत्राच्यवाच्येऽस्तु
क्षणा निरूढा । दीर्घाज्जसि चेति ज्ञापकात् । प्रथमयोः पूर्वसवर्ण इति सूत्रे हि अक इत्यनुवर्तते । तथा कृशब्दना च्योदीर्घोसि
योऽस्य निषेधस्य विषयः स्यात् । नन्वाकारोस्तीति चेन्न । नादिचीत्यनेनैव तत्र निषेधसिद्धेः । प्वादीनामित्यादिनिर्दे
शात् अपीह लिङ्गं । नन्वेवमिकोयणचीति सूत्रे ईदतो ग्रहणं न स्यात् । गुणपद्धतिद्वयविरोधात् । तथा च सुध्युपास्योदध्या
नयेत्यादि न सिध्येदिति चेन्न । सतितात्पर्ये ऋगपद्धतिद्वयस्वीकारे बाधकाभावात् । इकोयणचीत्यत्र इति निर्देशान्नो
तात्पर्यग्राहकत्वात् । यदि तु प्राचां मते श्रद्धा वण्याकरणपद्धतिद्वयं नाभ्युपेषितं हि इह ईदलो रपिरुगमशब्दयोर्लक्षणा वास्तु ।
द

स्ववाच्यदूस्ववाच्यत्वाविशेषात्। स्ववाच्यतापि परमस्तीत्यन्यदेतत्। नन्वेवमपि शशीरमित्यादेशूकारस्यस्थानसाम्याद्य
कारादेशः प्राप्नोति। इकारवाच्योदीर्घः। नसवर्णग्रश्शकारइतिनस्यापिइग्रहणेनग्रहणात्। तथाशीतलमित्यादावपियण्प्र
संगः। दीर्घः परं नभवति। अकुशब्दवाच्यवाच्यतायाः दीर्घे विश्रान्त्यात स्वं वदु ग्रहेमानाभावादिति। अत्रोच्यते। भवेदयं
शकारस्ययकारादेशप्रसंगो दोषः यदि स्ववाच्यसवर्णेलक्षणं वदेम। वयं तु स्ववाच्यवाच्येसत्येव ब्रूमः। नचईकारस्यशकारस्य
वाचकः। दीर्घाणामप्यत्वेनसवर्णग्राहकत्वेनाऽसत्त्वाद्वेदितत्वात्। भाष्यमतेतुअच्छत्लौ सावर्ण्यमेवनास्तीत्युक्तं॥
मदयमिह निर्गलितोऽर्थः। [illegible]कारोऽष्टादशानां संज्ञा एवमिस्सो ऋलृ इत्येतौ तु पर्यायशब्दौ त्रिंशतः संज्ञे। ऋलृवर्ण
योः सावर्ण्यस्योपसंख्यानत्वात्। ऋलृकुसूत्रे ऋ ल्यक इति प्रश्लेषितभाष्यदर्शनेन ज्ञापितत्वाद्वा। नचैतुल्यव्यक्तिक संज्ञा
दूषये वव्यर्थी। तदर्थमिहसवर्णान्तरोपन्यनतो एच स्तुद्वादशानां संज्ञाः। यवलाः द्वयोः। रहौ तु स्वस्यैवेति। यद्यपि हकारआ
कारस्य संज्ञेति प्राप्तं तथापि तत्परिहाराय नाज्झलाविति [illegible] सूत्रैव यत्नेऽकृते नु विस्मर्तव्यः। वार्त्तिककारास्तु हाकारग्रहणं
प्रत्याचख्युः। तन्मते अस्य ग्योदुस्यादौ जाति निर्दिष्टत्वात् सिद्धं। अनुनासिकविशेषस्य च ग्रहणं खल्वस्य ग्रहेकत्ववदविवक्षा। विधि
प्रदेशोपश्लेकत्ववद्विवक्षेति सर्वं सुस्थं सिद्धिः। यद्यप्यस्मिन् [illegible] पक्षे ऋकारे लृकार ग्रहणं दुःसाधं तथापि ऋलृक सूत्रोक्त
रीत्या समाधेयमिति दिक्। तपरस्तत्कालस्य। तः परो यस्मात् स तपरः। तात्परश्च तपरः। द्विविधोप्ययं स्वसमो न कालस्य
ग्राहकः स्यात्। तेन अ त इ त उ त इति षण्णां संज्ञा। ऋदिति द्वादशानां। अतएवोपसर्गादृति धातावित्यत्र सावर्ण्यं लृवर्ण
ग्रहणं तपरत्वाद्दीर्घेनेति सिद्धान्तः। पंचमी समासोदाहरणं तु खट्वैरादेजिति। इह हि संज्ञायां सतेनावरसंसंज्ञिनोः फलतिङ् ऋकारस्य

ए न अ र्थ

ग

॥ग्र॰कौ॰

॥१७६॥

त्वमिवेत्युक्तं। परंपरासंबंधेन लाक्षणिकस्यैव स्मारकत्वेति पक्षे तु न कश्चिद्दोषः। अदेङ्गुणः इत्यत्रापि त्वेवं सिद्धं॥
तत्र तकारस्योभयार्थतया सामर्थ्यविरहात्। यदि तु ऊकालसूत्रे वक्ष्यमाणरीत्याऽणुदित्सूत्रे ऽ शब्दसंज्ञायामित्यनुव
वा र्त्तते। यदि कार्यकालपक्षमाश्रित्य भाव्यमानत्वादेव सवर्णाग्रहणं वार्यते तदा वृद्धिसूत्रे तपरकरणं स्पष्टार्थं इह तु पंच
मीसमासो नाश्रयणीयः। अत एव वक्ष्यन्ते अत आदिति भाष्ये संगच्छते। गुणाभेदका इति पक्षे तु वृद्धिसूत्रे तप
रकरणमुभयार्थं। गुणान्तरप्रत्यकस्य ग्राह्यत्वात्॥ भेदकत्वे ज्ञापकं तु अणुदित्सूत्रस्थमण्ग्रहणं इतिहलिति सूत्रेण
वोपपादितं। तथा एतत्सूत्रस्थं तकालस्येति पदमपि ज्ञापकं। अन्यथा हि स्वस्य रूपस्येत्यनुवृत्त्यैव सिद्धेः किं तेन
न च सावर्ण्याल्लुग्रहणार्थं तत्। एवं हि तत्रैव लग्रहणं कुर्यात्। अ इति अ चेति विहितं रेफद्वयमध्यवो स्मारयेत्। अत आ
त्येव सिद्धे अतो दीर्घो यञीति सूत्रे दीर्घग्रहणमपि हि लिंगमिति दिक्॥ अत एवैतत्सूत्रं भाष्याद्वृद्धिधात्वाख्याले विधेयं
नियमार्थं चेति। तथाहि। अणिति नानुवर्त्तते। तेन आकारादावेणि तत्कालानां सवर्णानां गुणाभेदेप्यनेन ग्रहणं।
अतो भिस ऐसित्यादेत्तु भयप्रसंगे परत्वादस्यैव प्रवृत्तिः। ननु संज्ञानां बाध्यबाधकभावो नेष्यत इति चेन्न। सत्यं।
अविरोधे फलभेदे च भवत्येव समावेशः। इह तु विरोध एवास्ति। अष्टादशाग्रा त्या षड्ग्रा त्या इति हि क्लिष्टा संख्यो
तव्यवहारस्य परस्परपरिहारेणैव दृष्टत्वात्। अत एव छादेर्घे इति सूत्रे द्विप्रभृत्युपसर्गस्येति वक्तव्यमिति वार्त्तिकं सं
गच्छते। त्र्युपाद्युः। वस्तुतस्तु नेह संज्ञासूत्रद्वये संख्योपात्ता येन विरोधः स्यात्। किं तु अतोभिस इत्यादेस्तत्परकरण
सामर्थ्याद्वाध्यबाधकभावोनुमीयते इति तत्त्वं। वस्तुतस्तु तकारविशिष्टेयं संज्ञा। न त्वण्मात्रं सत्कालस्येति तच्छब्द

स्य विशेष्यमात्रं परामृशति न तु विशिष्टं। तदुच्चारणकालसदृशे लक्षणानुप्राचां मते प्यक्षरस्यैव। सर्वनामपदे पि एतस्यैवं
वा ख्यतीयं। तत्त्वमसीत्यादौ लक्षणायाः पूर्वोक्तरीत्या तत्त्वयोः स्थितत्वात्। तथा च दीर्घादेः न्तर्गताणवदिह पदैकदेशलेना
नर्थक्या द्व्यहकता प्रसंग एव नास्तिभेवि त्वयु सन्तिर प्यैवं संगच्छते। वृद्धिसूत्रे ऽवाकारः प्रयोगस्यैराकारैरर्थवानिति।
हरदत्तग्रन्थस्य प्राचीरीत्यानेत व्युत्पत्तिनिष्कर्षः। सोयं विध्यर्थतापक्षः। यदा तु अणित्यनुवर्त्तते तदा नियमार्थमिदं। त
परो ऽण्तत्कालस्यैवेति गुणानामभेदकत्वादनण्त्वं न कश्चिद्दोषः। अस्मिंश्च पक्षे तत्कालग्रहणं शक्यमकर्तुं। अण्ग्र
